सरस्वतीभवन-अध्ययनमाला

[२२]

महाभाष्यनिगूढाकूतयः

लेखकः सम्पादकश्च

डॉ० देवस्वरूपमिश्रः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

SARASVATĪ BHAVANA STUDIES

[*Vol. XXII*]

MAHĀBHĀṢYANIGŪḌHĀKŪTAYAḤ

by

Dr. DEVASWARŪPA MIŚRA
Head of the Vedānta Department
Sampurnanand Sanskrit Vishvavidyalaya

Chief Editor of The Granthamālā

Dr. BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute,

Sampurnanand Sanskrit Vishvavidyalaya,

VARANASI.
1978

Published by—
Director, Research Institute
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi.

Available At—
Publication Section
Sampurnananda Sanskrit Vishvavidyalaya,
Varanasi-221002.

First Edition-1000 Copies
Price Rs. 26-80 P.

Printed by—
Gauri Shankar Press,
Madhyameshvara,
Varanasi—1.

सरस्वतीभवन-अध्ययनमाला

[२२]

महाभाष्यनिगूढाकूतयः

लेखकः सम्पादकश्च

डॉ० देवस्वरूपमिश्रः

वेदान्तविभागाध्यक्षः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

ग्रन्थमालाया मुख्यसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणस्याम्

२०३५ तमे वैक्रमाब्दे   १९०० तमे शकाब्दे   १९७८ तमे ख्रैस्ताब्दे

प्रकाशकः—
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी–२

प्राप्तिस्थानम्—
प्रकाशनविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी–२२१००२.

प्रथमं संस्करणम् : १००० प्रतिरूपाणि
मूल्यम् : २६-८० रूप्यकाणि

मुद्रकः—
गौरीशङ्करप्रेस,
मध्यमेश्वर, वाराणसी–१

प्रास्ताविकम्

ऐन्द्रादिव्याकरणापेक्षया जिज्ञासूनामल्पीयसा कालेन शब्दविद्याधिगमः स्यादिति धिया लौकिकवैदिकोभयशब्दसाधुत्वान्वाख्यानं सर्वाङ्गपूर्णं सूत्रात्मकं व्याकरणं तनिष्ठमतनिष्ट महामुनिः पाणिनिः। कत्यायनगोत्रेण रुचिररुचिना वररुचिना यद्यपि तत्र यथास्थानं पुष्कलानि वार्त्तिकानि विन्यस्तानि, तथापि चूर्णिगद्यपुष्पाञ्जलिना भगवता पतञ्जलिना पूर्ववर्तिनो निश्शेषान् व्याकरणप्रक्रियादर्शनग्रन्थान् निर्मथ्य विभावितं नवनीतनीकाशं महाभाष्यं कामप्यपूर्वामभिख्यामाख्याति शाश्वतीम्। चूर्णिर्नाम चतसृषु गद्यशैलीष्वन्यतमा। साहित्यदर्पणे (६,२९५) तदीयं लक्षणमित्थमभिहितम्—

वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्॥
आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्॥ इति।

समासयुतस्य गद्यस्य चूर्णयित्वा=विश्लेषणपूर्वकं यत्र प्रयोगो भवेत्, तत् समासविरहितं गद्यं चूर्णका(चूर्णा)ख्यमभिधीयते। छन्दोमञ्जर्यां तु वैदर्भरीतिस्थस्य तस्य हृद्यतरत्वं प्रत्यपादि—

अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥ इति।

महाभाष्यस्य प्रतिपादनशैली सुमञ्जुला। विषयनिरूपणपद्धतिरनया चूर्णि(=चूर्णक)-गद्यशैल्याऽवलम्बिता सरलतरा सम्भाषणात्मिका च विद्योतते। इदमेव तस्याश्चूर्णकत्वं नाम। तत्र दुरूहविषयाणामुपक्रमः 'इदमिह सम्प्रधार्यम्' इत्येतादृशैर्वचनैः सार्धमध्येतृजागरणाय विधीयते। मध्ये मध्ये 'किं वक्तव्यमेतत्, कथमनुच्यमानं गंस्यते' इति, आहोस्वित् 'अस्ति प्रयोजनमेतत्?' 'कथं तर्हि' इत्येतादृशैः सम्भाषणात्मकैर्वचोभिरध्येतॄणां चेतो लक्ष्यं प्रति समाकृष्यते। पूर्वपक्षस्थापनानन्तरं 'विषम उपन्यासः' इत्यादिभिर्भाषितैरुत्तरपक्षः प्रतिपाद्यते। पर्यन्ते खलु 'यथा न दोषस्तथास्तु' इत्यभिधाय 'यथेच्छसि तथा कुरु' इति श्रीमद्भगवद्गीतोक्तिदृशा निर्णयः खल्वध्येतॄणामायत्तः क्रियते। 'गोनर्दीयस्त्वाह' इत्युक्त्वा क्वचिद् ग्राह्यतरः पक्षः पोष्यते, क्वचिच्च 'उभयथा गोणिकापुत्रः' इत्याभाष्य पक्षद्वयं समर्थ्यते। बहुत्र सूत्राक्षेपकवार्त्तिकानि व्याख्याय युक्तिभिः 'यथान्यायमेवास्तु' इत्युदीर्य सूत्रकारपक्षस्य साधीयस्त्व-

मास्थाप्यते । यत्र लोकप्रयोगाणामाधारेण समाधानमनर्हं विज्ञातम्, तत्र 'देवा ज्ञातुमर्हन्ति' 'देव एव जानाति' इत्येतादृशैर्विनोदात्मकैर्वचनैर्निर्वाहः कृतः । इत्थं व्याकरणसदृशो जटिलो विरसश्च विषयो हृद्यतरेण चूर्णकाव्यगद्येन सरसीकृतो भगवता पतञ्जलिना । विश्लिष्य प्रयोगाच्चूर्णकस्यास्य गद्यस्य पदत्वेनापि व्याहारः । महाभाष्यकारस्य शैलीममूमभिलक्ष्य समाख्यातं भर्तृहरिणा वाक्यपदीये (२,४७८)—

अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात् ।
तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः ॥ इति ।

अतिगभीरं हि भाष्यमुपरचितं भगवता पतञ्जलिनेति न तस्याभिधेयं व्यवच्छेत्तुं केनचिच्छक्यते । उत्तानं स्पष्टं सौष्ठवं परिपाटी यस्मादेतद् भाष्यं परिपाटीलक्षणादत्र सौष्ठवादुत्तानं स्पष्टप्रायं यत एव प्रतिभाति, अतो नेदमक्षेव्यं सज्जनमानसमिव निसर्गसुकुमारमतिगम्भीरं चैतदत एव महाभाष्यमित्युच्यत इत्यर्थः । एतेन संग्रहानुसारेण भगवता पतञ्जलिना संग्रह-संक्षेपभूतमेव प्रायशो भाष्यमुपनिबद्धमित्युक्तं वेदितव्यमिति पुण्यराजः समाम्नाति ।

अस्याः शैल्याः कारणादेव पदकारतया स्मृतो भगवान् भाष्यकारः । पदशेषकारतयाऽपि स्मर्यते पतञ्जलिर्भाष्यव्याख्याप्रपञ्चे । वस्तुतो महामुनिना पतञ्जलिना महाभाष्ये सूत्रवार्त्तिकयो-रपूर्तिः (शेषः) परिपूर्तिमानीतेत्यस्माद्धेतोः स पदशेषकारतया संबोधितः । अतोऽप्येतदीयस्य व्याकरणमहाभाष्यस्य महाभाष्यत्वमुपपद्यते । पदशेषकारत्वात् तदीयमभिधानं शेषः, नागनाथः, अहिपतिः, फणिभृत्, फणिपतिः, वासुकिः, भोगीन्द्रो वेति प्रसिद्धमिति न बुधजनमनो-रमणीयम् । आश्लेषानक्षत्रे सर्पवृद्धिर्भवतीति तत् सार्पनक्षत्रतया प्रथते । अस्मिन्नेव नक्षत्रे दाशरथिर्लक्ष्मणो जनिं लेभे—'सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ' (वा० रा० १, १८,१५) इति स शेषावतारतया प्रसिद्धः । एवमेव सार्पनक्षत्रजातत्वादेव भगवतः पतञ्जलेः शेषावतारत्वमभ्युपेतव्यम् ।

विवादग्रस्तेषु स्थलेषु पूर्वोत्तरपक्षोपस्थापनक्रमे प्राचीनवैयाकरणानां मतानि समुपन्यस्तानि भोगीन्द्रेण महाप्राज्ञेन तत्रभवता भगवता पतञ्जलिना । पूर्वतो विद्यमानानि पाणिनेरष्टाध्याय्या बहूनि भाष्याणि महाभाष्यकारेणाऽऽत्मसात्कृतानीति तदीये महाभाष्ये स्थाने स्थाने 'उक्तो भावभेदो भाष्ये' 'अपर आह' इति संकीर्तिताभिरुक्तिभिर्विभाव्यते ।

भविष्यपुराणे (प्रतिसर्गपर्वणि ३५,१–२) पतञ्जलेर्भाष्यविशारदत्वं सूल्बणं प्रतिपादितम्—

चित्रकूटे गिरौ रम्ये नानाधातुविचित्रिते ।
तत्रावसन्महाप्राज्ञ उपाध्यायः पतञ्जलिः ॥

वेदवेदाङ्गतत्त्वज्ञो गीताशास्त्रपरायणः ।
विष्णुभक्तः सत्यसन्धो भाष्यशास्त्रविशारदः ॥ इति ।

एवं तावद् विज्ञायते यत् साम्प्रतमनधिगम्यमानानां पतञ्जलितः पूर्ववर्तिनामशेषाणां व्याकरणभाष्यवचनानामुपयोगो विहितो यथास्थानं महाभाष्यकारेण । कात्यायनात् पूर्ववर्तिनां वार्तिककाराणां वार्त्तिकानि यत्र तत्र समुद्धृतानि, पूर्ववर्त्तिनां वैयाकरणानां नियमाः, बहूनि वचनानि च यथास्थानं तत्र संनिवेशितानि सन्ति । सत्यपि प्रसादगुणगुम्फिते गद्ये समुपन्यस्तवचनानामाकरग्रन्थानामनुपलभ्यमानत्वात् तदुक्तीनां सङ्गतिविनिर्धारणाय महाम्बुधिसन्तरणवद् यतन्ते वैयाकरणतल्लजा यथामति । अत एव कैयटेन पारावारवदतिगभीरत्वं महाभाष्यस्य स्पष्टमुदितं महाभाष्यप्रदीपादौ—

भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्तथा ।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ॥ इति ।

सर्ववेदपारिषदत्वमस्य पाणिनीयस्य व्याकरणस्य महाभाष्यकारेण द्विराख्यातम् । तत्तु महाभाष्यमन्तरा न सिध्यति । अतोऽपि तदीया गभीरता विज्ञायते । सर्वेषु भाष्येषु महिष्ठत्वादपि पातञ्जलभाष्यस्य महाभाष्यत्वाभिधानमुपपद्यते । भविष्यपुराणे (प्रति० ३५, १२) 'जने जने तथा कृत्वा महाभाष्यमुदैरयत्' इत्यत्रापि तथैव दृश्यते । महाकूपारावगाहनेन यथाशक्ति विविधानि रत्नानि यथा विचीयन्ते, तथैव पातञ्जलस्य महाभाष्यस्य पर्यालोडनेन नानातत्त्वानि समासाद्यन्ते विधायकैर्विद्वद्वरेण्यैः । शब्दब्रह्मोपासकेन भर्तृहरिणा वाक्यपदीयं ग्रन्थरत्नं महाभाष्याम्बुधिपर्यालोडनपूर्वकमेवाऽऽविष्कृतम् । तेन खलु वाक्यपदीयस्य द्वितीयकाण्डे (२,४७७) निश्शेषन्यायबीजानां निबन्धनं महाभाष्यमुदीरितम्—'सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने' इति । किन्तु निगूढत्वादखिलानि तानि न्यायबीजानि न पार्यन्ते यथायथं विश्लेषयितुं महामतिभिरपि । यद्यपि कानिचिद् वार्त्तिकानि महाभाष्यकारेण स्वतो रचितानीति तानि महाभाष्यवार्त्तिकतया बुध्यन्ते बुधैः, तथापि तत्रापि विप्रतिपद्यन्ते दोषज्ञाः कानि कात्यायनकृतानि कानि च पातञ्जलानीति । एतादृशस्य गभीरस्य महाभाष्यस्य द्विस्त्रिर्वा विप्लावितत्वादपि समजनि क्वचित् किमपि दुर्बोधत्वं निगूढत्वं वा । स्थितिं तादृशीं संलक्ष्य नैषधकृता नैषधे (२,९५) समुपश्लोकितम्—'फणिभाषितभाष्यफक्किका विषमा कुण्डलनामवापिता' इति ।

अनूनकान् विषमानुपन्यासानिमान् समाकलय्य शास्त्रार्थनदीष्णेन व्याकरणाचार्येण श्रीमता पण्डितदेवस्वरूपमिश्रेण महाभाष्यनिगूढाकूतानि स्फोरयितुकामेन विद्यावारिध्युपाध्यर्थकाय

गवेषणाय 'महाभाष्यनिगूढाकूतयः' इति स्वरूपानुरूपो वृतो विषयो विश्वविद्यालयसमर्थितः। यद्यपि महाभाष्यगतानि निगूढाकूतानि विवरीतुं चिरात् प्रवृत्ताः सन्ति विद्वांसः, तथापि महाब्धिसंकाशात् तस्माद् यौगपद्येन नासादयितुं शक्यन्ते निखिलानि तत्त्वानि समैः। मुहुर्मुहुः प्रवृत्तैर्लब्धवर्णैः प्रत्यग्रप्रत्यग्राणि भिन्नभिन्नानि च लभ्यन्ते विश्लेषणानि प्रतिवारम्। चिरात् प्रचलितान् कांश्चन विवादग्रस्तविषयान् अस्मिन् गवेषणाप्रबन्धे प्रातिस्विकैर्विचारैर्विश्लिष्य नूनं साफल्यमलम्भि गवेषकेण। 'अथ शब्दानुशासनम्' इतीदं सूत्रप्रतीकाशं वचनं पाणिनीयं पातञ्जलं वेति चिराय प्रवृत्तो विवादो गवेषकप्रवरेण निर्णीतो महताध्यवसायेन। एवं खलु विषयस्य दर्शनेन परीक्षकाणां च प्रतिवेदनेन बहिष्ठां प्रशंसामर्हति गवेषणाप्रबन्धोऽयम्।

विश्वविद्यालयानुदानायोगस्य वित्तीयेन साहायकेन ग्रन्थस्यास्य प्रकाशनं सम्पद्यत इति विश्वविद्यालयपक्षतस्तत्रत्येभ्योऽधिकारिभ्यो वितीर्यन्ते साधुवादाः। सरस्वतीभवनाध्ययन-मालाया द्वाविंशपुष्परूपतया प्रकाशित एष प्रबन्धो जिज्ञासूनामुपकाराय विद्वज्जनानां च प्रीणनाय ध्रुवं प्रभविष्यतीति बाढं प्रत्येति।

वाराणस्याम्
गीताजयन्त्याम्, २०३५ वै०
(१०-१२-७८ ख्रीस्ताब्दे रवौ)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य

भूमिका

अथ भगवतो विश्वनाथस्य सान्नपूर्णस्य सन्निधौ तत्कृपाकटाक्षनिक्षेपमात्रैक-साधारणासाधारणकारणेन विगलितविक्षेपोऽहं लब्धालब्धव्यनिवासः सविश्वास-स्तन्मात्रशरणस्तस्मिन्निरस्तसमस्तभारो भारमस्य निबन्धसौष्ठवस्य तस्मिन् भगवति सर्वशक्तिमति निधाय नितरां मोदमानोऽस्मि । तत्र—

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥
येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥

इति गीतोक्तेरनेकजन्मार्जितपुण्यपुञ्जाल्लब्धं भवति मनुष्यजन्मेति निश्चीयते । चतुरशीतिलक्षयोनिपरिभ्रमणसम्प्राप्तखेदखिन्नप्राणिनिवहो मनुष्यशरीरं लभते । तत्रापि पुण्यातिरेकाद् भारते जनिः । तदुक्तं विष्णुपुराणे—

यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥ इति ।

अस्मिंश्च मनुष्यजन्मनि द्विविधे उन्नत्यवनती भवत ऐहलौकिक्यौ पारलौकिक्यौ च । द्विविधेऽपि ते पुण्यापुण्यनिबन्धने इति सर्वसिद्धान्तः । के ते पुण्यापुण्ये इति जिज्ञासायां वेद एव तज्ज्ञापकत्वेनाश्रयणीयो भवति । तदुक्तं श्रीमता शब्दब्रह्म-तत्त्वविदा भर्तृहरिणा—

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ॥
इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणां शास्त्रमेव प्रयोजनम् ॥

तत्र शास्त्रपदेन वेदस्य तन्मूलकस्मृतीनाञ्च ग्रहणं विवक्षितम् । तथा चाह भगवान् मनुरपि—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति ।

आत्मनस्तुष्टिश्च वेदानुमते वैकल्पिके प्रमाणम्, न तु स्वातन्त्र्येण, अन्येषां वैयर्थ्यापत्तेः, उच्छृङ्खलत्वापत्तेश्च। तदुक्तम्—

मतयो यत्र गच्छन्ति तत्र गच्छन्ति वानराः।
श्रुतयो यत्र गच्छन्ति तत्र गच्छन्ति ते नराः ॥ इति।

तत्र वेदतन्मूलकस्मृतिविहितकर्मजन्यस्य सुकृतित्वं तन्निषिद्धकर्मजन्यस्य च पापत्वं शास्त्रसम्मतम्। तथाहि—

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा।
पुंसा येनोपदिश्येत तच्छास्त्रमिति गीयते॥

तथा चेदं सिद्धं यदन्यप्रमाणाप्राप्तयोः सुखदुःखकारणभूतयोः पुण्यापुण्ययोः शास्त्रमेव प्रमाणमिति। अत एव तु प्रोक्तम्—

प्रत्यक्षेणानुमानेन यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥ इति।

किं बहुना, निखिलोऽपि व्यवहारजातो वेदादेव नियतः। तथाहि—

सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥ इति।

ब्रह्मसूत्रे भगवान् व्यासोऽपि—'शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्' इति। स च वेदः शब्दरूपो मन्त्रब्राह्मणात्मकः। तस्य च वेदस्य शब्दरूपस्यार्थनिर्णयाय पूर्वमीमांसोत्तरमीमांसे प्रवृत्ते। ताभ्यामपि धर्मब्रह्मपराभ्यां पूर्वोत्तरमीमांसाभ्यां वेदार्थनिर्णयो न सम्यक्तया निष्पन्न इति हेतोर्वेदस्य षडङ्गानि स्वीकृतानि। तैः शब्दरूपैः षडङ्गैर्वेदस्य पदवाक्यात्मकस्य शब्दरूपस्य निखिलज्ञानराशेरर्थनिर्णयो भवति किलाञ्जस्येन। अत एव श्रुतिः—'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'।

वेदे हि रक्षिते सर्वं रक्षितं भवति। यदा हि लङ्कायां रावणेन सह भगवतो मर्यादापुरुषोत्तमस्य रामचन्द्रस्य युद्धारम्भो जातः, तदा भगवता रामचन्द्रेण श्रीमतो ज्ञानिनामग्रगण्यस्य भगवतो हनुमतो विषये पृष्टं यत् स क्व वर्तते, कुशली चास्तीति ? तदा सर्वेषामिदं मनसि जातं यदन्येषां विषये भगवता न पृच्छ्यते यत् कः कुत्र कोणे स्थले वा विद्यमानो युद्धं कुरुते, कुशली न वेति कथं केवलं हनुमद्विषये एव रामचन्द्रस्य भगवतोऽभिन्नदृष्टेर्दृष्टिभेद इति, तदा भगवता प्रोक्तम्—

तस्मिञ्जीवति दुर्धर्षे हतमप्यहतं बलम् ।
हनूमति गतप्राणे जीवन्तोऽपि हता वयम् ॥ इति ।

तथा च यथा केवले भगवति हनुमति रक्षिते विद्यमाने सति सर्वरक्षेति तत्र स्थितिस्तेन न्यायेन वेदे हि रक्षिते सर्वं रक्षितं भवति । अत एव भगवता महाभाष्यकृता पतञ्जलिना व्याकरणमहाभाष्ये व्याकरणाध्ययनस्य प्रयोजननिरुक्तौ प्राथम्येन वेदरक्षैव प्रयोजनमुक्तम् । तथाहि—'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति ।

तत्र रक्षापदेन कस्यचिदनिर्देशादन्यरक्षैव केवलं मा प्रसञ्जीतेति धिया स्वयमेव वेदरक्षापरकतात्पर्यवत्त्वेन रक्षापदार्थस्य व्याख्यानमपि विहितम्—'रक्षार्थं वेदानामध्येयं व्याकरणम्' इति ।

स च वेद एकोऽपि सन्नुपाधिभेदाच्चतुर्विधः, ऋग्यजुःसामाथर्वभेदात् । यद्यपि त्रय एव वेदाः, अत एव वेदत्रयीति प्रोच्यते । तथापि याज्ञिककर्मभेदेन मन्त्राणां भेदमाश्रित्य चतुष्ट्वमिति बोध्यम् । तथा च ब्राह्मणम्—'ऋग्वेदमेत्र होतारं वृणीष्व, यजुर्वेदमध्वर्युम्, सामवेदमुद्गातारम्, अथर्वाङ्गिरं ब्राह्मणम्' इति । एवञ्च होतृकर्मोपयोगिमन्त्रसमूह ऋक् । अध्वर्युकर्मोपयोगिमन्त्रसमूहो यजुरिति । उद्गातृकर्मोपयोगिमन्त्रसमूहः सामेति । ब्रह्मकर्मोपयोगिमन्त्रसमूहोऽथर्वेति च व्यवहारः । अथर्वाख्येन ब्रह्मणा दृष्टत्वात् तन्नाम्नाऽयं वेदो व्यपदिश्यत इति स्थितिः ।

स चोपाधिवशाच्चतुर्विधभेदवान् वेदः षडङ्गः । अङ्गानि च तानि षट्—शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दोज्योतिषानि । तथा चोक्तम्—

शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां च यः ।
ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु ॥ इति ।

तेषामङ्गत्वञ्च वेदार्थप्रमित्यात्मकज्ञानजननोपयोगित्वेन । अत एव तेष्वङ्गत्वमङ्गित्वञ्च वेदे प्रकल्प्य व्यवहारः । उक्तञ्चाभियुक्तैः—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनञ्चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ।

तत्र षण्णामपि वेदाङ्गानां समासेन लक्षणानि प्रोच्यन्ते, येन स्वरूपमुपयोगश्च स्पष्टीभविष्यतः । अन्यथा सामान्यतो ज्ञानेन नोपयोगसिद्धिः ।

१. शिक्षा-यद्यपि 'योगाद् रूढिर्बलीयसी' इति न्यायेन शिक्षापदार्थो ज्ञानानुकूल-व्यापाररूपः। अत एव व्याख्यातं रामरुद्रभट्टाचार्यैर्न्यायसिद्धान्तमुक्तावलीग्रन्थ-व्याख्याने 'स्वकर्तव्यत्वप्रकारकज्ञानं शिक्षापदार्थः' इति। तथाप्यत्र सोऽर्थो नाभिप्रेतः, तथा सति षण्णामपि तथात्वेन विभागानुपपत्तेः। विभागो हि नाम स्वसमभिव्याहृत-पदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकधर्मिप्रतिपादनमेव। परिष्कृतशिक्षा-त्वाङ्गीकारे तु सर्वेषामेव वेदाङ्गानां शिक्षात्वात् तत्र कृतः षट्त्वेन विभागो न स्यादुप-पन्नः। तस्मादत्रान्य एव शिक्षापदार्थो मन्तव्यः। स च क इति जिज्ञासायामुच्यते—शिक्षा नाम तत्तद्वर्णानां स्थानप्रयत्नोच्चारणादिक्रमप्रदर्शको ग्रन्थविशेषः। वर्णानां शास्त्रानुसारेण वर्णानुच्चारणे यदनिष्टं भवति तद् दर्शितं शास्त्रे—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ इति।

सविध्युच्चारणे तु—'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति' इति फलमुक्तम्।

२. कल्पः—केषां मन्त्राणां कुत्र प्रयोग इति प्रयोगक्रमकल्पक आपस्तम्बादि-मुनिप्रणीतो ग्रन्थविशेषः। तेऽपि बहवः, यथायथमुपयोगाय अपेक्ष्यन्ते। बहुत्वेऽपि सर्वेषामेव प्रामाण्यम्।

३. व्याकरणम्—पुण्यजनकतावच्छेदकशब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्य-लक्षणात्मको वा ग्रन्थविशेषः। तदुक्तं महाभाष्ये—लक्ष्यलक्षणे व्याकरणम्। लक्ष्यञ्च लक्षणञ्चैतत्समुदितं व्याकरणं भवति। किं पुनर्लक्ष्यं लक्षणञ्च? शब्दो लक्ष्यः, सूत्रं लक्षणमिति। अथवा पुनरस्तु 'सूत्रम्' इति च। तच्च शब्दसाधुत्वप्रयोजकं व्याकरणशास्त्रमपि बहुविधम्। तथा चोक्तम्—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतञ्चापिशलं शाकलं पाणिनीयकम्॥ इति।

यद्यपि वेदानामनादित्वादङ्गानाञ्च सादित्वात् साधनादीनामङ्गाङ्गिभावो विरुद्धः, तथापि वेदवदेवाङ्गानामप्यनादित्वाङ्गीकारान्नाङ्गाङ्गिभावव्याकोपः, न वा सादित्वादङ्गानां ततः पूर्वं वेदस्य पञ्चाङ्गत्वापत्तिर्वा। जगतोऽनादित्वमेव मत्वा मीमांसकैर्निःशङ्कमुद्घोषो विहितः—'न कदाचिदनीदृशं जगत्' इति।

४. निरुक्तम्—शब्दानामर्थनिर्वचनात्मको यास्कमुनिप्रणीतो ग्रन्थविशेषः। तच्च व्याकरणस्यैव परिशिष्टप्रायम्। बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रायशस्तत्र संग्रहात्।

५. छन्दः—लौकिकान् वैदिकांश्च वाक्यविशेषान् पदविरामादिव्यवस्थापनेन नियमविशेषव्यवस्थापरकः पिङ्गलादिमहर्षिप्रणीतो ग्रन्थविशेषः ।

६. ज्यौतिषम्—सूर्यचन्द्रादिज्योतिर्द्वारा तत्तद्वेदशास्त्रादिकर्मानुष्ठानकाल-निर्णयेष्टानिष्टफलप्रदर्शको ग्रन्थविशेषः ।

इत्थं वर्णितानामेषां वेदाङ्गानां सर्वेषामेव वेदार्थनिश्चायकत्वेन प्रामाण्यं समानमेव। तथापि व्याकरणशास्त्रं प्रधानं वेदाङ्गम्। यतो हि वेदास्तदङ्गानि च सर्वाणि शब्दस्वरूपाण्येव। तथा च पदपदार्थावगमस्य व्याकरणाधीनत्वाद् व्याकरणं प्रधानमङ्गम्, निराबाधं सर्वत्र तस्य गतेः। यथा हि 'खरवसानयोर्विसर्जनीयः' इति सूत्रमन्यप्रयोगेषु विसर्गं कुर्वत् स्वघटकपदेष्वपि विसर्गं प्रतिपादयति। तथा चोक्तं महाभाष्ये—'प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति' इति।

विवृतञ्च प्रदीपे श्रीमता कौयटेन—'पदपदार्थावगमस्य व्याकरणनिमित्तत्वात् तन्मूलकत्वाद् वाक्यवाक्यार्थावसायस्येति भावः' इति।

उपपादितञ्च नागेशभट्टेनोद्द्योते—'ननु गुणानां परस्परसम्बन्धाभावात् 'षडङ्गेषु प्रधानम्' इत्यनुपपन्नम्, अत आह—पदेति। एवञ्च वेदार्थज्ञाने व्याकरणं प्रधानं कारणमिति भावः' इति।

तस्य च वेदाङ्गप्रधानस्य व्याकरणशास्त्रस्य पूर्वप्रदर्शितरीत्या ऐन्द्रचान्द्रादि-भेदभिन्नस्य बहुविधस्य सत्त्वेऽपि साम्प्रतं पाणिनीयव्याकरणमेव शब्दसाधुत्वसाधने लोके परमोपकारकत्वेन प्राप्तसाफल्यमाद्रियते। तदुक्तम्—

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥ इति।

तदेव पाणिनीयव्याकरणशास्त्रं पाणिन्युपज्ञमस्माकं समक्षमष्टाध्यायीरूपेण चकास्ति। यस्य च शब्दसाधुत्वसाधने परमप्रामाण्यं भारतीयैरेव विद्वद्भिर्नहि, किन्तु वैदेशिकैरपि हृदयेन सादरमभिनन्द्यते। भगवता पाणिनिना ज्ञानप्रदाद् भगवतो महेश्वरादुपासितात् तत्कृपातो लब्धानि—'अ इ उ ण्' इत्यारभ्य 'हल्' इत्यन्तानि सूत्राणि माहेश्वराणीति पदेन व्यवह्रियमाणानि भवन्ति। तत्र च तैः सूत्रैः भगवता पाणिनिना प्रणीतैः साधवः शब्दाः साधिता एव। क्वचनासिद्धिदर्शनेन जातोत्साहो वार्त्तिककारः कात्यायनो वार्त्तिकानि प्रणीय तान् शब्दान् साधयामास। यथा—'सुध्युपास्य' इत्यादिप्रयोगेषु यकारादेः संयोगान्तत्वात् 'संयोगान्तस्य लोपः' इति सूत्रेण लोपप्रसक्तः 'यणः प्रतिषेधो वाच्यः' इति वार्त्तिकेन लोपवारणेन शब्दसाधुत्वं प्रसाधितम्। एवमेवान्यत्रापि बहुत्र।

तदनन्तरञ्च क्रमते खलु भगवान् पतञ्जलिर्महाभाष्यप्रणेता। तेन हि भगवता पतञ्जलिना सूत्राणामुपरि वार्त्तिकानाञ्चोपरि भाष्यं विधाय यदुपकृतं तस्याधमर्ण्यं सर्वं खलु शाब्दिकजगद् बिभर्ति। प्रक्रियाप्रदर्शने दार्शनिकपद्धत्या च सूत्राणां व्याख्यानं प्राञ्जलभाषया अन्यूनाक्षरपदवाक्यगर्भया पद्धत्या कृत्वा शब्दविषये कृतो महान् उपकारः। तथा च त्रयाणामेव मुनीनां पाणिनिकात्यायनपतञ्जलीनां शब्द-साधुत्वोपपत्तये महान् प्रयत्नः सफलश्च। तत्र पूर्वपूर्वमुनिकृतेऽपि यत्ने सम्भाव्यमानाया विपरीतायाः प्रतीतेः शब्दानामल्पत्वात् स्पष्टतया तत्राप्रतीतेश्च उत्तरोत्तरमुनीनां शास्त्रप्रणयने प्रयत्नः। अत एव च तत्र तत्रोत्तरमुनितात्पर्ये एव पूर्वमुनीनामपि तात्पर्यं प्रकल्प्य 'यथोत्तरं मुनीनां प्रामाण्यम्' इति समुद्घोषयन्ति वैयाकरणाः।

शब्दसाधुत्वबोधनप्रयोजनके व्याकरणशास्त्रे शब्दस्य लक्षणं सूत्रे वार्त्तिके वा न कृतमिति हेतोर्भगवता महाभाष्यकृता प्रथमतः 'अथ शब्दा-नुशासनम्' इति वाक्येन शब्दानुशासनं प्रतिज्ञाय ततश्च शब्दस्य लक्षणमुक्तम्। महाभाष्यं स्वरूपतः प्रसन्नमजटिलशब्दगर्भितमपि अर्थदृष्ट्या परमगम्भीरम्। अत एवोक्तमभियुक्तैः—'गम्भीरमर्थदृष्ट्या तु प्रसन्नं शब्दसौष्ठवात्' इति।

महाभाष्ये प्रथमतः पस्पशाह्निकं विद्यते। पस्पश्यन्ते निग्रहं प्राप्यन्ते पदार्थ-विचारेण वादिनो यत्र सा पस्पशा। आसीत् किल व्याकरणशास्त्रस्योपरि महानाक्षेपो यदत्र शब्दस्य लक्षणं नास्ति। शब्दा नित्या वा अनित्या वा? व्याकरणञ्च किम्? केन हि लक्षणेन व्याकरणं व्यवहरणीयम्? तेषां समेषां प्रश्नानामुत्तराय पस्पशाह्निकं भगवता महाभाष्यकृता रचितम्। एकस्मिन् दिने यावन्तमंशं छात्रानुपदिदेश आचार्यः पतञ्जलिस्तावानंशो हि आह्निकपदेन व्यवह्रियते। अह्ना निर्वृतमाह्निक-मिति व्युत्पत्तेः। तत्र 'तेन निर्वृत्तम्' इति पाणिनिसूत्रेण ठकि प्रत्यये सति निष्पद्यते आह्निकशब्दः। अष्टाध्याय्यात्मकस्य व्याकरणशास्त्रस्य सर्वस्योपरि भाष्यं भाषितवान् भगवान् पतञ्जलिः। तेन प्रोक्तं भाष्यं महाभाष्यपदेन, व्याकरणमहाभाष्यपदेन, पातञ्जलमहाभाष्यपदेन च व्यवह्रियते। अत एव नागेशभट्टेन स्वरचिते शब्देन्दुशेखरे 'पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः' इत्युक्तम्।

महाभाष्यवाक्यविवरणावसरे प्रदीपे कैयटोऽपि—

भाष्याब्धिः क्वातिगम्भीरः क्वाहं मन्दमतिस्ततः।
छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम्॥

इति प्राह।

तत्र महाभाष्यैकदेशस्य भाष्येत्यस्य कैयटेन कृतो निर्देशो नहि तस्य महत्त्वं परिगोपयितुमर्हः। अत एव तु नागेशभट्टेनोद्द्योते भाष्यगतं महत्त्वमित्थं वर्णितम्। तथाहि—'महाभाष्येति। व्याख्यातृत्वेऽप्यस्येष्ट्यादिकथनेनान्वाख्यातृत्वादितरभाष्य-वैलक्षण्येन महत्त्वम्' इति।

साक्षादपि महाभाष्यपदमुदाजहार कैयटः—

महाभाष्यार्णवाऽवारपारीणं विवृतिप्लवम्।
यथागमं विधास्येऽहं कैयटो जैयटात्मजः॥ इति।

तत्र—

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥

इति वैयाकरणसिद्धान्तकौमुदीस्थप्रथमश्लोकेनास्य पाणिनीयव्याकरणशास्त्रस्य त्रिमुनिकत्वं प्रसिद्धयति। तथा च पायिनीयव्याकरणे सूत्रवार्त्तिकमहाभाष्यकारास्त्रय एव ऋषयः प्रमाणमित्ययं सार्वजनीनः सिद्धान्तः। किन्तु ऋषयस्ते त्रयः पाणिनि-कात्यायनपतञ्जलयः कदा स्वजन्मना भारतभूमिमिमामलमकुर्वन्निति विषये किञ्चिद् वक्तव्यमापतति। यतो हि कालदेशविशिष्टानां तेषामनुस्मरणेन प्रामाण्यमस्य शास्त्र-स्याध्येतॄणाञ्च परमप्रमोदो भवत इत्यनुभवगोचरो विषयः। अतो यथाज्ञातं पूर्व-पूर्वाचार्यसम्प्राप्तप्रकारश्च वर्तते, तथाऽत्र विलिखामि।

पाणिनिदेशकालौ—तत्र गुणाढ्यरचितबृहत्कथामाधारीकृत्य विरचिते कथासरित्सागरे पाणिनेः पाटलिपुत्रेऽध्ययनम्, मन्दबुद्धितयाध्ययने साफल्यमनासाद्य भगवतो महेश्वरस्य प्रीत्यर्थं तपश्चरितुं गमनम्। महेश्वरादभिनवव्याकरणशास्त्रा-वाप्तिः, ततः कात्यायनेन सह शास्त्रार्थः, यतो हि गुरोः पार्श्वे सहैवाध्ययनं कुर्वतो-स्तयोर्द्वयोर्महान् किल विरोध आसीत्। पाणिनेर्मन्दबुद्धित्वात् तं सदैव कात्यायन-स्तिरश्चकार। तदनन्तरं महेश्वरहुङ्कारेण ऐन्द्रव्याकरणस्य विनाशात् पाणिनीयस्यैव प्रतिष्ठा, ऐन्द्रव्याकरणनाशेन मूर्खीभूतस्य कात्यायनस्यापि तपसा महेश्वरप्रसादनम्, तत्प्रसादात् पाणिनीयव्याकरणपूर्तिशक्तिलाभः, तेन गतायाः प्रतिष्ठाया अवाप्तिरित्यादि वर्णितम्। अतस्तया कथासरित्सागरवर्णितया पद्धत्या पाणिनिकात्यायनयोः समकालिकत्वं सिद्धयति।

तत्र त्रिकाण्डशेषे कोशे पाणिनिनामसु 'शालातुरीयः' इति पठनात्, गणरत्न-महोदधौ च जैनलेखकेन वर्द्धमानेन शालातुरो ग्रामः, सोऽभिजनोऽस्यास्तीति

शालातुरीयस्तत्रभवान् पाणिनिरिति तद्विवरणात् शालातुरो ग्रामोऽस्य भगवतः पाणिनेर्जन्मस्थानमित्युररीक्रियते। काशिकाव्याख्यायां न्यासग्रन्थेऽपि च (५।१।१) सूत्रव्याख्यायाम् 'अतः शालातुरीयेण प्राक्ठञ्ञ इति नोक्तम्' इत्युक्तम्। तेनापि शालातुरीयत्वं तत्रभवतो भगवतः पाणिनेः समायाति। गुप्तशिलालेखेषु वलभ्यां प्राप्ते एकस्मिन् शिलालेखे (३१० संवत्सरे लिखिते) पाणिनीयशास्त्रकृते 'शालातुरीयतन्त्रम्' इति प्राप्यते इत्यपि श्रीवासुदेवशरणमहोदयेनोक्तम्।

'ह्यूआन्चुआङ्' नामकश्चीनदेशीयः परिभ्रमणशीलो यीशुख्रीस्तस्य सप्तम्यां शताब्द्यामिहायातः स्वयं शालातुरग्रामं गतः। तेन स्पष्टमेव तत्रत्यजनानां किंवदन्तीमाकर्ण्य शालातुरग्रामः पाणिनेर्जन्मस्थानमिति लिखितम्।

तथा चानेन प्रमाणनिकरेण निश्चितमिदं यद् भगवतः पाणिनेर्जन्मस्थानं शालातुरग्राम इत्येवैतिहासिका मन्यन्ते। अस्य च ग्रामस्य स्थाननिर्देशोऽपि चीनदेशीयेनोक्तेन परिभ्रमणशीलेन कृतः, यदयं शालातुरग्रामो गान्धारदेशे उद्भाण्ड इति प्रसिद्धात् स्थानात् प्रायेण क्रोशद्वयान्तरे लहुरग्रामसमीपेऽस्ति। लहुर एव लाहौरपदेन साम्प्रतं व्यवह्रियमाणं नगरम्, गान्धारदेशः इदानीं कन्धार इत्युच्यते इति बहूनां विश्वासः।

कालविषये तु पाणिनेरैतिहासिकेषु महती विप्रतिपत्तिः। यद्यपि कस्यचिदाचार्यस्य ग्रन्थप्रणेतुश्च देशकालादिविचारो न तथापेक्षितः। अत एव महाकवेः कालिदासस्य को देशः, कः काल इति तेन कविनानिर्देशान्निर्णेतुमशक्यः। कामं तन्निर्मितकाव्यादिदर्शनेन तदन्येन वा केनचिल्लिङ्गेनानुमीयताम्, किन्तु स्पष्टतया नोक्तम्। नहि तेन काचन क्षतिः। अत एव श्रुतौ कृताध्ययनं शिष्यं प्रति आचार्यस्योपदेशः श्रूयते— 'यान्यस्माकं सुचरितानि तानि त्वया सेव्यानि नेतराणि' इति सङ्गच्छते। पाणिनेः कालो यीशुसंवत्सरात् प्राक् चतुर्थ्यां पञ्चम्यां वा शताब्द्यां सम्भाव्यते इत्याधुनिका ऐतिहासिका मन्यन्ते। तेषां या युक्तयस्ता विस्तरभयान्नेह प्रदर्श्यन्ते। विस्तरेण ता द्रष्टव्या श्रीगिरधरशर्मचतुर्वेदमहोदयैर्लिखिते महाभाष्यभूमिकाप्रस्तावे।

अथ कात्यायनदेशकालौ—तत्र कात्यायनस्य देशकालविषये न किमपि स्फुटं विज्ञायते। ऐतिहासिकैरपि तद्विषये किमपि स्पष्टतया निश्चेतुं न पारितम्। तथापि कथासरित्सागरदर्शनेन पाणिनिसमकालिकत्वं यन्निदर्शितं तत्तु मन्तव्यम्। अन्यश्च यो विशेष एतस्य देशकालविषये स सर्वोऽपि तत्र तत्रेतिहासग्रन्थेषु श्रीगिरिधरशर्मरचितायां महाभाष्यभूमिकायाञ्च विस्तरशो द्रष्टव्यम्।

पतञ्जलेर्देशकालौ—तत्रभवतो भगवतो महाभाष्यकारस्य पतञ्जलेर्देशकालविषये विद्यते दृढं मानम्। देशोऽस्य गोनर्दः। स्वयमेव भाष्यकृता स्वमतमभिनिवेशेन तत्र तत्रोपन्यस्यता 'गोनर्दीयस्त्वाह' इत्युक्तम्। यद्यपि केचन सज्जनाः परमतमेवेदम्, अन्य एव कश्चिद् गोनर्दीय इत्यपि ब्रुवन्ति, परं प्रामाणिकव्याख्याकृतो गोनर्दीयपदेन स्वमतमेवोपन्यस्तमित्येवाभ्युपगच्छन्ति। वयमपि च तत्र तत्र भाष्यकारीयशैलीं दृष्ट्वा नूनं गोनर्ददेश एव साम्प्रतं 'गोंडा' इति शब्देन व्यवह्रियते इति वक्तुं प्रभवामः।

पुष्यमित्रस्य यद्यपि प्रधानभूता राजधानी पाटलिपुत्रमासीत्; अथापि अयोध्यायामपि तेनोपराज्यस्थानं स्थापितमित्यपि विवृण्वन्ति ऐतिहासिकाः। ततश्च गोंडादेशवासिनो महर्षेः पतञ्जलेः सम्भवत्येवायोध्यायां वसता पुष्यमित्रेण सम्बन्धः। पुष्यमित्रेण चाश्वमेधराज्यसूयाद्यनुष्ठानं कृतमिति प्राप्तेभ्योऽभिलेखेभ्यो हरिवंशादिभ्यश्च प्रतीयते। एवंविधेषु महत्सु यज्ञेषु तदानीं सम्पन्नेषु पतञ्जलिसन्निभो महाविद्वान् बभूवेति क एतन्नानुमन्येत। अन्ये तु गोनर्दस्थानमुज्जयिनीप्रान्ते मध्यदेशेऽभ्युपगच्छन्ति, यस्य प्राकृतं नाम गौनद्धमित्यासीत्। व्यापारिणाञ्च तत् केन्द्रस्थानं बभूव। पुष्यमित्रादीनां शुङ्गवंशीयानां च मूलस्थानं विदिशानगरी, या इदानीं ग्वालियरराज्ये 'भिलिसा' इत्याख्यायते। तदेवमभिजनस्थानसामीप्यात् पुरातन एव पतञ्जलिपुष्यमित्रयोः सम्बन्ध इति तेषामभिप्रायः। काशिकादिषु व्याकरणग्रन्थेषु तु प्राग्देशेष्वेव गोनर्दस्य गणना कृतेति गोंडाप्रान्तमेव गोनर्दपदेन पण्डिताः सम्भावयन्ति।

तत्रानेकैः प्रमाणैः प्रसिद्धैश्च पुष्यमित्रस्य यः कालः स एव महाभाष्यकारस्यापि काल इत्यत्र न विवादः। यद्यपि नाहमितिहासविद्, न वा तत्र मम किमपि ज्ञानम्; किन्तु नामूला जनश्रुतिरिति न्यायमनुसृत्य प्रसिद्धिवशात् तथा वक्तुं पारयामि, यत् पुष्यमित्रसमकाल एव महर्षिः पतञ्जलिरिति। पुष्यमित्रसमयश्चाधुनिकानामैतिहासिकानां दृष्ट्या यीशुख्रीष्टाब्दतः पूर्वा द्वितीया शताब्दी। पौराणिकदृष्ट्या तु यीशुख्रीष्टतः पूर्वं सहस्राब्दीतोऽपि पुरातनः पुष्यमित्र इति सोऽयं मतभेदः सर्वत्रैव जागर्ति। न च लघुनिबन्धे सर्वं सामञ्जस्येन निवेदयितुं शक्नोमि। तत्र महाभाष्ये 'पुष्यमित्रं याजयामहे'* इति दत्तोदाहरणात् पतञ्जलिः पुष्यमित्रस्य पुरोहित इत्यपि केचन ब्रुवते। राजसभा, चन्द्रगुप्तसभा इत्याद्युदाहरणदर्शनाच्चास्य चन्द्रगुप्ततोऽनन्तरत्वमपि प्रसिध्यत्येव। तत्र महाभाष्यकाररचितेषु ग्रन्थेषु योगग्रन्थः—योगसूत्रम्,

वेदान्तग्रन्थः—परमार्थसारः, वैद्यकग्रन्थः–चरकः। व्याकरणग्रन्थः—महाभाष्यम्। अत एव तु महाभाष्यकारविषये श्लोकोऽयं रचितः—

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥ इति।

तेन च भगवता महर्षिणा पतञ्जलिना रचितं खलु महाभाष्यं व्याकरणशास्त्रस्य प्रामाणिको ग्रन्थः। यस्य च शब्दतः परमसरलस्यार्थतो गम्भीरस्य महाभाष्यस्याभिप्रायो न साधारणजनवेद्यः। अतः शाब्दिकशिरोमणिना भर्तृहरिणा तत्र काचन व्याख्या विहिता। तद्व्याख्यानोपलब्धबलेन कैयटेन महाभाष्याभिप्राय-प्रकाशको व्याख्यानविशेषः प्रदीपाख्यः कृतः। उद्द्योतकारेण नागेशभट्टेन महाभाष्यस्य तद्व्याख्यानभूतस्य प्रदीपस्य च व्याख्यानं कृतम्। क्वचित् क्वचित् कैयटकृता व्याख्या खण्डितापि नागेशभट्टेन। अनयोर्द्वयोर्महाभाष्यव्याख्यानतद्-व्याख्यानयोः परमप्रामाण्यं मनुते वैयाकरणसमाजः। ततश्चोद्द्योताभिप्रायप्रकाशिका अनेका व्याख्याश्छायाप्रभृतयः प्रवृत्ताः। तासु सर्वासु व्याख्यासु परमप्रामाणिकपुरुष-प्रणीतासु सतीष्वपि तत्र महाभाष्ये किमपि लिखितुं मादृशस्य वराकस्य व्याकरणशास्त्रसन्निभे गम्भीरे शास्त्रेऽकृतश्रमस्य लेखनी कथमुद्यतेति तु नूनं सङ्कोचावहम्। तथापि—'वियत्पतन्त्यात्मसमं पतत्रिणः' इत्युक्तेः 'दोषो ह्यविद्यमानोऽपि तद्दृष्टीनां प्रकाशते' इति न्यायात् परमप्रसन्ने निर्दुष्टेऽपि महाभाष्य-वाक्ये केषाञ्चिद् व्याख्यानं कैयटादिविरुद्धमद्यावधि व्याकरणलोकप्रसिद्धम्? रीतिविरुद्धञ्च दर्शं दर्शं नितरामहं खिन्नः किञ्चिन्निवेदयितुं प्रवृत्तः।

तत्र प्रथमस्तु—'अथ शब्दानुशासनम्' इति वाक्यं भगवतो महाभाष्यकारस्येति कैयटप्रभृतिभिराचार्यैः स्पष्टीकृतम्। तथैवाद्यावधि सर्वैराचार्यै-र्वैयाकरणैर्मतं तथैव पाठितं पाठ्यते च। अस्माकं गुरुचरणैरपि तथैवाहं पाठितः। किन्तु तत्र दयानन्दस्वामिना 'अष्टाध्यायीभाष्ये' वचनस्यास्य भगवतः पाणिनेः सूत्रत्वमुपपादितम्। तदनुयायिनोऽपि तथैव व्याख्यातवन्तः। स ग्रन्थो मया वाराणसेयसंस्कृतविश्वविद्यालयस्थे महति सरस्वतीभवने पुस्तकालये पुरा दृष्टः। तत्राप्यथ शब्दानुशासनमिति भाष्यस्थवाक्यस्य पाणिनीयसूत्रत्वं साधितम्। तेषां युक्तिरियं, वर्तते यदार्षसूत्रेषु तथैव दृश्यते। यथा—

'अथ योगानुशासनम्'
'अथातो ब्रह्मजिज्ञासा'
'अथातो धर्मजिज्ञासा'

इत्यादि। अतो व्याकरणशास्त्रेऽपि 'अथ शब्दानुशासनम्' इति वाक्यं पाणिनीयसूत्रमेव, न तु महाभाष्यवाक्यमिति।

इदं व्याख्यानं दृष्ट्वा नितरां खिन्नोऽप्यहं किमपि समाधानं तेषां युक्तिनिवारणक्षमं स्वमनस्तोषकरमनुपलभमानो दूयमानमानसश्चिरं चिन्तितवान्। यदपि समाधानं कुर्वन्ति वैयाकरणा यत् पाणिनेः प्रथमं सूत्रं तु 'वृद्धिरादैच्' इति। यतो हि महाभाष्यकारैस्तत्र वृद्धिशब्दस्यादिप्रयोगो मङ्गलार्थ इति सिद्धान्तितम्। तदपि तैः खण्डितं यन्नहि महाभाष्यकारो ब्रवीति यद् 'वृद्धिरादैच्' इति सूत्रं पाणिनेरादिसूत्रमिति। तथा च मध्यमङ्गलं तदिति महाभाष्याशय इति। तदनन्तरमहमपरं समाधानं व्याकरणलोकप्रसिद्धमनवाप्य किमप्युल्लिखितुमसमर्थः।

किन्तु पूज्यानां श्रीमतां गुरूणां पण्डितमुरलीधरमिश्रमहोदयानां निर्दशने अनुसन्धानकार्यं सम्पादयता मया विषयोऽयं गृहीत आसीद्—'महाभाष्यनिगूढाकूतयः' इति। तत्र प्रथमत एव महाभाष्यनिगूढाशयवर्णनं तु दूरं तिष्ठति तद्वाक्यं महाभाष्यीयं न वेति निश्चेतुमप्रभुरहं जातः। किन्तु निरन्तरं चिन्तनपरायणेन मया भगवतो ज्ञानराशेर्विश्वनाथस्य प्रभोर्ज्ञानप्रदस्य कृपया समाधानमकस्माल्लब्धं हृदि। तदस्मिन्निबन्धेऽहं लिखितवान्। यदा मनसि समाधानं जातं तदाऽहं स्नानात् प्राग् हस्तौ प्रक्षालयन्नासं मनसि चिन्ता तु समाधानायासीत्। तदैव वस्तु चिन्तयन् मनसि स्थितोऽहं तत्र। तदानीमेव काश्यां स्थितेन मया लब्धं समाधानं मोदकरम्। गत्वाहं लिखितवान्। विलिख्य च पूज्यचरणानां निर्देशकमहोदयानां पार्श्वे संस्कृतविश्वविद्यालये गत्वा निवेदितवान्। ते परमप्रसन्ना मयि जाताः। लब्ध्वा गुरुप्रसादमहं नितरामामोदसम्पन्नः। तच्च समाधानमिदं वर्तते यद् यदि 'अथ शब्दानुशासनम्' इति वाक्यं पाणिनिसूत्रत्वेन स्वीक्रियते, तर्हि तन्मतेन द्वितीयं सूत्रं स्यात् 'वृद्धिरादैच्' इति। किन्तु तत्र शब्दानुशासनस्य प्रतिज्ञातस्य विषयो यः शब्दस्तस्य लक्षणं न लिखितमिति सूत्रकारीयपद्धतिहानिः। यैर्यैर्महर्षिभिः अथशब्द-घटितैः सूत्राणि प्रणीतानि यानि दृष्टान्तीकृत्य 'अथ शब्दानुशासनम्' इति वाक्यस्य पाणिनिसूत्रत्वं भवद्भिः साध्यते। तत्र सर्वत्र प्रतिज्ञातस्य तत्त्वस्य लक्षणं द्वितीये सूत्रे कृतं विद्यते। यथा—'अथ योगानुशासनम्' इति योगसूत्रं प्रथमम्। ततो द्वितीये सूत्रे योगस्य लक्षणं कृतम्—'योगश्चित्तवृत्तिनिरोधः' इत्यनेन। तथैवान्यत्रापि।

यदि हि वाक्यमिदं पाणिनेः स्यात्, तर्हि द्वितीयसूत्रे 'वृद्धिरादैच्' इत्यत्र प्रतिज्ञातस्य शब्दस्य लक्षणानुल्लेखात् सूत्रकारीयपद्धतिहानप्रसङ्गः। तस्मादिदं वाक्यं महाभाष्यकारस्यैवेति मन्तव्यम्। तथा सति तस्मिन् महाभाष्यकारे कर्त्तव्यमिदं सम्पाद्यत्वेन समापतति यत् सशब्दलक्षणं ब्रूयादिति। तथा च कृतमेव भगवता शब्दलक्षणं द्वाभ्यां वाक्याभ्यां द्विविधम्।

एवमेव महाभाष्यवाक्यानामापाततो विरुद्धत्वेनास्पष्टत्वेन च प्रतिभासमानानां व्याख्यानमपि विहितम्। तत्र तत्र विरोधा ये प्रतिभातास्तेषां निराकरणाय कृतो यत्नो मया। तत्राष्टाध्यायीरूपेण भगवता सूत्राणि प्रणीतानि। महाभाष्यकृतापि तथैव विभज्य व्याख्यातानि तानि। तत्र महाभाष्यवाक्यव्याख्यानं कर्तुं प्रवृत्तेन मया प्रस्तुते निबन्धेऽत्राष्टौ कृता अध्यायाः। तत्र यस्मिन्नध्याये यानि वाक्यानि सिद्धान्तो वा महाभाष्ये उपलब्धा अत्र निबन्धेऽपि तस्मिन्नेवाध्याये मया लिखिता इति बोध्यम्।

तत्र 'न वेति विभाषा' इति सूत्रे—'इतिकरणोऽर्थनिर्देशार्थः' इति महाभाष्यवचनं व्यवस्थापकं प्रसक्तानुपपत्तिनिवारकं प्रवृत्तम्। तद्वाक्यं दृष्ट्वा यानि यानि सूत्राणीतिपदघटितानि तत्र सर्वत्र मम मनसि कुतूहलं जातं यद् किं भविष्यति। यथा—

'द्विस्त्रिश्चतुरिति कृत्वोऽर्थे'

'विदां कुर्वन्त्वित्यन्यतरस्याम्'

'तस्मिन्निति निर्दिष्टे पूर्वस्य'

'तस्मादित्युत्तरस्य'

एवमेवान्यान्यपि बहूनि सन्ति सूत्राणि यानि मया निबन्धे निबद्धानीतिपदघटितानि। तत्र प्रकरणविरुद्धोऽर्थो न भवेत्, न च भवेदतिव्याप्त्यादिदोषा इति हृदि निधाय तत्र तत्र श्रुतानामितिपदानां विषये किं निर्णेयमिति चिन्तयन्नहं यथाप्रतिभानं प्रमाणञ्चान्विष्य लिखितवान्। एवमेव किमपि किमपि विप्रतिपन्नं विषयजातमवेक्ष्य निबन्धेऽत्र सम्पादनीये ममाभिनिवेशो जातः।

अत एव ईदृशानां वाक्यानां व्याख्यानं कर्तुं नियुक्तोऽहं स्वयमपि तत्र च कर्मणि समुत्सुको यथाशक्ति प्रयत्नं कृतवान्। तत्र या त्रुटयस्ताः क्षन्तव्याः करणापाटवादिदूषणानां साधारणानां मदीयस्यापरस्य चासाधारणस्यानेकशास्त्रव्युत्पत्तेरपेक्षिताया अभावेन तत्सम्भवात्।

यत्र महाभाष्ये कैयटप्रभृतिविदुषामपि मतम्, तत्र ममापि प्रयासो नूनं मायायां सर्वसम्भव इत्यस्य प्रामाण्यं साधयति। अतोऽन्ततोगत्वा—

गुरूणां माहात्म्यान्निजविविधशास्त्रपरिचयात्
श्रुतो यन्मे सम्यग् मननपरिन्निष्पन्नमभवत् ।
परब्रह्मानन्दस्फुरणमखिलानर्थशमनं
तदेतस्मिन् ग्रन्थे निखिलमतियत्नेन निहितम् ॥

इति मधुसूदनस्वामिश्लोकोक्तन्यायेन गुरूणां कृपया तदुपजीव्यस्वीयचिन्तनेन च प्रतिभातानां तत्त्वानामत्र निबन्धे 'महाभाष्यनिगूढाकूतयः' इति नाम्नि निरूपणं निबन्धनञ्च मया कृतम् । अत्र ये गुणास्तेऽगण्यगुणगणवतां गुरूणामेव, दोषाश्च मदीयमतेरिति विभावयन्तो विद्वांसो मयि दत्तस्नेहाः शुभैराशीर्वादैर्मां कृतार्थयिष्यन्तीति दृढं प्रत्येमि ।

किमधिकेन वक्तव्येन, अहं तु भगवतो महाभाष्यकारस्य वचसि सम्मिश्रितां स्वीयां वाचं दृष्ट्वा पवित्रे सुरसरित्प्रवाहे पतितं रथ्योदकमिव पवित्रां पश्यन् नितरां कृतार्थोऽस्मि । अतः साम्प्रतमनेकविद्याविशारदानां दर्शनकान्तारसञ्चारकेशरिणां श्रीवाचस्पतिमिश्राणां वचनमिदं भामतीस्थम् 'आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् । रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयतु' इति वाक्यमुदाहृत्य, श्रीमता तर्ककर्कशविचारचातुरीचमत्कृतमानसानां तार्किककुलभूषणानाम्—

विदुषां निवहैरिहैकमत्या यददुष्टं निरटङ्कि यच्च दुष्टम् ।
मयि जयति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव ॥

इति साभिनिवेशं वस्तुभूतमुद्घोषयतां श्रीरघुनाथशिरोमणिमहोदयानामिमामुक्तिञ्च—

मान्यान् प्रणम्य विहिताञ्जलिरेषभूयो
भूयो निवेद्य विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न दुनोति चेतः ॥

समुपस्थापयामि ।

कृतज्ञताप्रकाशनम्

तत्र 'प्रजातन्तून् मा व्यवच्छेत्सीः' इति श्रुतिवचनात् प्रजापदवाच्यसन्तानव्यवच्छेदो नूनं श्रुतिविरुद्धः । किन्तु 'यदैव विरहेत् तदैव प्रव्रजेद् गृहाद्वा वनाद्वा' इति श्रुतेरध्ययनावस्थात एव विरक्तस्य कथं न श्रुतिविरोधजन्यप्रत्यवायभाक्त्वमिति प्रश्ने यद्यपि समाधानमिदं भवितुमर्हति यत् तत्सजातीयश्रुतिवाक्यप्रमाणाद् विरक्ताति-

रिक्तस्य तत्र ग्रहणमिति। अथ च—'निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः' इति श्रुतिप्रामाण्याद् बालत एव विरक्तस्य संसारेऽनासक्तस्य न तत्र प्रवेश इति च समाधानम्। तथापि न तेषामपि प्रजातन्तुव्यवच्छेद इति ब्रवीमि। यतो हि प्रजा द्विविधा—विद्यया, जन्मद्वारा वा। अत एव सिद्धान्तकौमुद्यामव्ययीभाव-समासप्रकरणे 'संख्या वंश्येन' (२।१।१९) सूत्रव्याख्याने 'वंशो द्विधा—विद्यया जन्मना च' इति लिखितम्। तत्र प्राशस्त्याद् विद्यावंशस्य प्रथमत उपादानम्। प्राशस्त्यञ्च तस्य, अत एव यतो हि गुरुगतां विद्यां स परिश्रमेण लभते। गुरुश्चातीव परिश्रमेण निखिलान् पदार्थान् शनैः शनैः स्वशिष्ये स्थापयति। अत एव तु 'धातुक्षयाद् वाक्क्षयो गरीयान्' इत्युक्तिरपि सङ्गच्छते। अत एव गुरुऋणान्मुक्तिः सद्यो न भवति। अत एव श्रुतौ 'आचार्यदेवो भव' इत्युपदेशः। आचार्याद्धि लब्धा विद्या प्रतिष्ठिता भवति। आचार्यवान् पुरुषो वेद इत्यादिकञ्च वचनमुपपद्यते।

तथा च येषां गुरूणामकारणकरुणावतां मयि सुताविशेषस्नेहवतां कृपा-कटाक्षेण शास्त्रेषु प्रवेशितो व्युत्पादितश्चाहं तान् प्रति काञ्चित् सेवां तत्सन्निभां कर्तुम-प्रभुरप्यहं वचोविन्यासमालां श्रद्धासूत्रावनद्धां समर्प्यात्मानं कृतार्थीकर्तुं वाञ्छामि।

तत्र प्रथमतो देवरियाजनपदस्थसलेमपुरान्तर्गतकिशोरगञ्जस्थस्य सरवार-संस्कृतमहाविद्यालयस्य प्रधानाचार्याणां साम्प्रतं त्यक्तकलेवराणामपि यशःशरीरेण विद्यमानानां स्वजीवने सान्नविद्याप्रदानेन परिवर्द्धितकतिपयशतसंख्याकसच्छिष्य-कदम्बानां श्रीपण्डितप्रकाण्डानां देवशरणमिश्रमहोदयानां चरणकमलेषु शिरोनति-र्तति समर्पयामि। यैरहं व्याकरणमध्यमापरीक्षापर्यन्तं पाठितः। तस्मिन्नेव काले अवकाशदिनेष्वपि सतत्त्वबोधिनी सिद्धान्तकौमुदी पठिता। साहित्यग्रन्थाश्च रघुवंश-किरात-मेघदूत-नैषधमहाकाव्यानि सव्याख्यानानि पाठितानि। साहित्यदर्पणे काव्य-प्रकाशे चाहं व्युत्पादितः। प्रबोधचन्द्रोदयसदृशनाटकग्रन्थाध्यापनेन च मम वेदान्त-संस्कारास्तैरुद्बोधिताः। कौमुदीमधीयानोऽप्यहमहर्निशमविश्रामं तैरध्याप्यमानस्तत्र तत्र स्थले परिभाषेन्दुशेखरे शब्देन्दौ महाभाष्ये च प्रवेशितः। ततश्च विद्यानगर्यां सविश्वनाथायां सान्नपूर्णायाञ्चाहमानीयाध्ययनार्थं दत्तस्थानः। सदैव पत्रद्वारेण काशीस्थितोऽप्यहमनुवेलं तैः सदुपदेशैरहं मार्गे स्थापितः। तान् साम्प्रतं मुक्तान् गुरुवरान् कैरप्युपायैः सत्कर्तुमशक्नुवन्नहं सश्रद्धं स्मरणेन हृदयस्थले स्थानं प्रदायैव कथञ्चिदात्मानं कृतार्थयामि।

काशीमागत्य चाहं व्याकरणशास्त्रप्रसिद्धमुनित्रयपाणिनिकात्यायनपतञ्जलिसदृशान् पूज्यान् गुरून् श्रीपण्डितरघुनाथशर्मशास्त्रिणः, श्रीमुरलीधरमिश्रमहोदयान् श्रीरामप्रसादत्रिपाठिनश्च प्राप्तवान्। काश्यामागमनात् प्रागेव निश्चित्याहमागतो यदेभ्य आचार्येभ्योऽध्येतव्यम्। तत्र राजकीयसंस्कृतमहाविद्यालयेऽहं व्याकरणविभागे प्रविष्टः। विद्यालये तु आचार्यद्वयेनाहं पाठितः, गृहेऽपि त्रिपाठिचरणैः पूज्यैर्गुरुचरणैः श्रीरघुनाथशर्मभिश्च। तत्र शास्त्रिप्रथमखण्डेऽधीयानोऽहं समस्तशास्त्रपारङ्गतैर्विदितवेदितव्यैरहर्निशं काश्यां विद्वत्तल्लजैरनुसेव्यमानैर्गुरुवरैस्त्वया प्रदीपोद्द्योतच्छायाव्याख्यासहितं महाभाष्यमध्येतव्यमित्युपदिष्टः। तमुपदेशं वेदोपदेशमिव सर्वथैवानुपेक्ष्यं शिरसा निभाल्याहं तेभ्य एव पतञ्जलिसन्निभेभ्यो मयि सुताविशेषस्नेहसुधासिक्तमानसेभ्यो लोकोत्तरादूष्यवैदूष्यविभूषितेभ्यो दुर्गाराधनतत्प्रसादावाप्तसमस्तसारस्वतवैभवेभ्यो गुरुचरणेभ्यो श्रीरघुनाथशर्मभ्यो महाभाष्यं नवाह्निकपर्यन्तं सव्याख्यानं पठितम्।

तदनन्तरं व्याकरणाचार्यपरीक्षां दत्तवतापि मया प्राक्तनसंस्कारवशाद् वेदान्तशास्त्रे बद्धश्रद्धेन वेदान्तशास्त्रे वेदान्तपरिभाषामारभ्य तत्त्वप्रदीपिका-खण्डनखण्डखाद्याद्वैतसिद्धिलघुचन्द्रिकाभाष्यभामतीविलसितब्रह्मसूत्रसिद्धान्तलेशविवरणप्रमेयसंग्रहादिग्रन्था अधीताः, तत्र शास्त्रार्थपाटवञ्च प्रसाधितं पूज्यानां गुरुचरणानां कृपावशात्। किं बहुना, दिवा वाराणसेयसंस्कृतविश्वविद्यालयेऽध्यापनव्यावृत्तैर्गृहे च सायंकालत एवैकादशवादनपर्यन्तं पण्डितान् निखिलशास्त्रकुशलान् जटिलग्रन्थग्रन्थिसमुद्भेदेन व्युत्पादयद्भिः समयं मां पाठयितुमलभमानैः कृपालुभिः परिश्रान्तैरपि गुरुचरणैः कदाचिद्रात्रौ निशान्ते कदाचिद् ब्राह्ममूहूर्ते चाहं पाठितः। वेदान्तग्रन्थाः प्रपाठ्य पुनः पुनश्च परिशोधितास्तेषां कृपातः। पाठनसमये एवाहमनेकैः शुभाशीर्वादशब्दैः सस्नेहः सौभाग्यतां नीतः। तैः पाठनसमये एव सदा प्रोक्तं कोऽपि स्वव्यवहारैर्न तिरस्कार्यः।

तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः।
आत्मनो भूतिमन्विच्छन् द्रोग्धुर्वै परतो भयम्॥ इति।

श्लोकः प्रायशः श्रावितः। त्वं मम स्थाने एव वेदान्तविभागाध्यक्षपदेऽभिषिक्तो भविष्यसि, विद्यया जीवनोपयोगिप्रतिष्ठितपदप्राप्तिप्रयुक्तार्जितलक्ष्म्या च समन्वितो भविष्यसीति बहुशोऽहममोघैः शब्दैरधमर्णीकृतः। यस्य च फलं समक्षमेव यदहं करालेऽपि कलिकाले काश्यामस्यामानन्दकाननेऽमन्दानन्दं शास्त्रचिन्तनेऽनुभवामि।

तान् पूज्यान् स्वात्मतुष्टान् गुरुचरणान् साम्प्रतमहं कैरुपायैरात्मानं कृतार्थयितुं सत्करोमि। पठनसमये एव सेवाऽसेवा न प्रदर्शिता, तर्हि साम्प्रतमपरं कमुपायमाश्रयामि। तेषां कृपालुगुरूणां चरणेषु स्वात्मानं समर्प्यैव सन्तोषमाप्नोमि। नवाह्निकमहाभाष्यस्य सकैयटोद्द्योतच्छायस्याध्ययने समीचीनतया कृते सम्पूर्णे महाभाष्ये सम्प्रविष्टो भवतीति गुरुचरणानामासीद्वचः। तत्प्रत्यक्षमेव जातम्। अग्रिमभाष्ये यत्र यत्र मम क्लेशो मार्गश्चावरुद्धस्तत्र तत्र साहाय्यं दत्तवन्तो गुरुवराः। तान् शिरसा सश्रद्धं नतिततिं समर्प्य विरमामि।

साम्प्रतं वैयाकरणजगति लब्धप्रतिष्ठानां व्याकरणशास्त्रे बालत एव प्राप्तनिष्ठानामासिद्धान्तकौमुदीमहाभाष्यान्तप्रत्यक्षीकृतसर्वग्रन्थानामहर्निशमध्यापयतां शिष्यान् वैयाकरणकेशरिणां वाराणसेयसंस्कृतविश्वविद्यालये प्राचीनव्याकरणदर्शनागमविभागाध्यक्षपदमलङ्कुर्वतां श्रीरामप्रसादत्रिपाठिचरणानां समक्षमहं श्रद्धापुष्पं समर्पयितुमभिलषामि। एते हि गुरवो मार्गे गृहे रात्रौ दिवा वा कदापि मां व्याकरणेऽन्ये च शास्त्रे पाठयितुं प्रवृत्ताः। 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रस्यातीव जटिलस्य परिष्कारे पुनः पुनः प्रवेशितोऽप्यहं नूतननूतनान्यत्रानुल्लिखितपरिष्काराविष्कारैरतीव व्युत्पादितः। एवमेव किं किं विलिखामि शेखरादिग्रन्थे भूषणे मञ्जूषायाञ्च साभिलाषमहं प्रवेशितः। निबन्धनिष्पादनसमये सम्पूर्णे महाभाष्ये द्रष्टव्ये 'यत्र मज्जति मन्दरः' इति न्यायेन महतां विदुषां यत्र महाभाष्याब्धौ प्रवेशो दुर्गमस्तत्राहं तेषामेव करुणावतां गुरुचरणानां त्रिपाठिमहोदयानां पाठनेन मार्गप्रदर्शनेन कुटिलपङ्क्तिव्याख्यानेन महाभाष्यवाक्यतात्पर्यार्थावबोधनेन च धन्यतां नीतः। नाहं तेभ्यो गुरुभ्यः कथमपि कदाप्यात्मानमृणमुक्तं कर्तुं शक्नोमि। तेषां चरणेषु श्रद्धासुमनसन्नद्धमालोपमं वचोऽमृतमेव निवेद्य सत्रपो भवामि।

येषां निर्देशनमवाप्य शोधप्रबन्धोऽहं लिखितुं किञ्चित् समर्थोऽभवम्, येषां पूर्वं राजकीयसंस्कृतकालेजे पुनश्च वाराणसेयसंस्कृतविश्वविद्यालये व्याकरणविभागाध्यक्षपदमलङ्कुर्वतामध्यापितविविधच्छात्राणां कदापि परापकारे न प्रवृत्तानां परोपकारपरोन्नतिप्रदोपायप्रदर्शकानामनेकशास्त्रनिष्णातानामिदानीं लब्धावकाशानां श्रीपण्डितमुरलीधरमिश्रमहोदयानां गुरूणां कं कमुपकारं वर्णयामि। विश्वविद्यालये प्रवेशादद्ययावत् तथैव मयि स्नेहस्तेषाम्। अध्ययनकाले एवाधिकारिणां तदानीन्तनानां समक्षं सदैव विभागानुसारेण कश्छात्रो भविष्णुरिति कथाप्रसङ्गे मम नाम स्नेहेनोच्चारितवन्तो हि ते गुरवः। यदि स्यादयमित्थमेव विद्यारतस्तर्हि नूनं सति काले भाविनि

विद्वान् भवितायमिति मां निर्दिष्टवन्तः। स सर्वोऽपि भारो मयि। तस्य स्नेहस्याभ्युदयसंकल्पस्यानल्पस्य तेषां केनाप्युपायेन प्रत्यर्पणाय नाहं प्रभुः। तेषां ज्ञानप्रदानां गुरूणां चरणेषु श्रद्धा मेऽनपायिनी स्यात्, कदापि मम व्यवहारेण वचसाऽन्येन वा केनचित्तेषां समक्षमौद्धत्यं न भवेदिति विश्वनाथं प्रार्थये। अन्यः को नु नामोपायो विद्यते येनानृण्यं स्यान्मम ?

अतस्तेषां सर्वेषां गुरूणां स्मरणं कृत्वा तैरुपदिष्टैरुपायैः कृतैश्चार्थैरहमत्र निबन्धेऽपारयमिति तच्चरणेषु श्रद्धयाऽवनतकन्धरेण प्रणामान् समर्पयामि। अन्ततोगत्वा—

यादृशैः सन्निविशते यादृशांश्चोपसेवते।
यादृग् भवितुमीहेत च तादृग् भवति पूरुषः॥

इति वचनप्रामाण्यानुसारेणाचार्यानहं प्रार्थयामि यन्मयि स्वसामर्थ्यांशं प्रदाय कृतार्थयन्त्विति।

श्रीमतां शीलसौजन्यवैदूष्यप्रभृतिगुणगणान्वितानामनुकरणीयाचरणानां वन्दनीयचरणानाम्—

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषां न ते वन्द्याः॥

इति वचोऽमृतार्थमूर्तस्वरूपाणां स्थिरमतीनां भूतपूर्वकुलपतीनां श्रीपण्डितकरुणापतीनां त्रिपाठिनां चरणेषु सप्रणतितति कृतज्ञतां समर्पयामि, येषामकारणकरुणया ग्रन्थोऽयं प्रकाशनाय स्वीकृतः।

पूज्यानशेषविद्यानिधीन् लोकोत्तरादूष्यवैदूष्यविभूषितान् कल्पनाकामिनीसंसेवितान् शास्त्रार्थकलाचणान् अध्यापनप्रशासनप्रसिद्धान् तर्ककर्कशविचारसञ्चारसहभूतसाहित्यकलाकोविदान् सहृदयान् गुरून् सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य वर्तमानकुलपतीन् श्रीबदरीनाथशुक्लमहोदयान् शिरसा नमन् कृतज्ञतां प्रकाशयामि, येषां प्रशासनकाले ग्रन्थोऽयं प्रकाशनसरणिमवाप्य पूर्णतां गतः।

ततः श्रीमतो भूतपूर्वकुलसचिवान् वर्तमान् कुलसचिवांश्च ग्रन्थाध्यक्षान् श्रीलक्ष्मीनारायणतिवारिमहोदयान् श्रीविश्वम्भरनाथत्रिपाठिनश्च धन्यवादेन योजयामि, यैः सम्भूय साभिनिवेशं मम निबन्धो नितरां वेगेन प्रकाशनाय स्वीकारितः।

अनुसन्धानसंस्थाननिदेशकाः श्रीमन्तो डॉ० भागीरथप्रसादत्रिपाठिमहोदया धन्या धन्यवादार्हाः, येषां विभागे ग्रन्थस्यास्य प्रकाशनव्यवस्थाऽवस्थिता। तत्रैव प्रकाशनाधि-

कारिपदमलङ्कुर्वतस्तत्रभवतः श्रीमतो मम स्नेहभाजनहरिश्चन्दमणित्रिपाठिनोऽहमनेकैराशीर्वादसुधासिक्तैर्वाक्यैर्योजयामि, यैः सदैव ग्रन्थस्यास्य प्रकाशनाय महान् श्रमो विहितः। अहमपि काले काले तत्रापेक्षितसाहाय्यप्रदानार्थं प्रेरितः।

तत्रैव कार्यपरायणान् स्वसुहृदो विदुषः प्रकाशनकर्मणि निपुणान् श्रीपरमेश्वरपाण्डेयान् धन्यवादैरभिनन्दयामि, येषां प्रयासेन प्राग्रूप(प्रूफ)संशोधनपाठपरिवर्तनानेकाशुद्धिनिराकरणादिमहत्कार्यसंसाधनेन ग्रन्थोऽयं तद्दोषरहितत्वेन स्थापयितुमवसरः प्रदत्तः।

अन्ते च स्वान्तेवासिभ्यां विद्याविनयान्विताभ्यां श्रीपारसनाथ-नरेन्द्रनाथाभ्यां शुभाशीराशिमर्पयामि, याभ्यां द्वाभ्यामस्य ग्रन्थस्य प्रकाशने सदैव मत्कृतिनिष्पाद्यकर्मणि साहाय्यं प्रदत्तम्।

कार्तिकशुक्लपूर्णिमा
२०३५ वै०, भौमवासरे
(१४-११-१९७८ ख्रीस्ताब्दे)

निवेदकः
डॉ० देवस्वरूपमिश्रः
आचार्योऽध्यक्षश्च,
वेदान्तविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

विषयानुक्रमणिका

विषयः	पृष्ठम्
प्रास्ताविकम्	१-४
भूमिका	क—द
प्रथमोऽध्यायः	**१-१४३**
१. मङ्गलाचरणम्	१
२. विषयपरिचयः	१-८
३. अथ शब्दानुशासनम्	९-१५
४. द्रव्यं नाम तद्, गुणो नाम सः	१५-१९
५. येनोच्चारितेन सास्नालाङ्गूलककुदखुर-विषाणिनां सम्प्रत्ययो भवति स शब्दः	१९-३७
६. अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते	३७-४९
७. रक्षोहागमलघ्वसन्देहाः प्रयोजनम्	४९-६२
८. लक्ष्यलक्षणे व्याकरणम्	६२-६६
९. तस्मात् संज्ञासंज्ञिनावेव	६६-७८
१०. न वाऽर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र	७८-९४
११. 'अनुपसर्जनात्' इत्येष योगः प्रत्याख्यायते	९४-१०४
१२. इतिकरणोऽर्थनिर्देशार्थः	१०४-११७
१३. आदेशमात्रं स्थानिवद् यथा स्यात्	११७-१३२
१४. तिसृणां संज्ञानां करणसामर्थ्यात्	१३२-१४१
स्वरितञित इति शक्यमकर्तुम्	१४१-१४३
द्वितीयोऽध्यायः	**१४४-१५९**
१५. सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभि-सम्बन्धः स्वरः	१४४-१५५
१६. एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्	१५५-१५९

विषयः	पृष्ठम्
तृतीयोऽध्यायः	**१६०--१६५**
१७. अपवादश्च नामानुबन्धभिन्नो वा भवति, रूपान्यत्वेन वा	१६०-१६३
१७. कर्मणि निवर्त्यमानविक्रियमाणे	१६३-१६५
चतुर्थोऽध्यायः	**१६६-१६८**
१८. असत्तु मृगतृष्णावत्	१६६-१६७
१९. गुणवचनलक्षणम्	१६७-१६८
पञ्चमोऽध्यायः	**१६९--१७१**
२०. भावपदार्थनिर्णयः	१६९-१७१
षष्ठोऽध्यायः	**१७२--१७४**
२१. भाषितपुंस्कपदार्थविमर्शः	१७१-१७४
सप्तमोऽध्यायः	**१७५--१७७**
२२. अलिङ्गे युष्मदस्मदी	१७५-१७७
अष्टमोऽध्यायः	**१७८-१८४**
२३. वीप्सापदार्थनिर्णयः	१७८-१८४
२४. सहायकग्रन्थसूची	१८५-१८८

महाभाष्यनिगूढाकूतयः

प्रथमोऽध्यायः

विषयपरिचयः

मङ्गलाचरणम्

सहान्नपूर्णं विश्वेशं ध्यात्वा च नितरामहम् ।
तन्मूलकव्याकरणे किञ्चिद् वक्तुमुपक्रमे ॥ १ ।

यस्याः प्रसादमासाद्य साध्यमाप्नोति साधकः ।
तां श्रीवाग्देवतां नत्वा कार्यं साधयितुमीहे ॥ २ ।

अभिवन्द्य गुरूनादौ शिष्यधीपद्मिनीरवीन् ।
शर्मणः श्रीरघुनाथान् भाष्याब्धौ प्रविशाम्यहम् ॥ ३ ।

येषां निर्देशमासाद्य भाष्याब्धेः पारमाप्नवान् ।
मिश्रोपाधीन् गुरून् पूज्यान् श्रीमुरलीधरान् नतः ॥ ४ ।

येषां प्रसादात् किल शब्दशास्त्रे गतिर्मयाऽवाप्यचिरेण काचित् ।
रामप्रसादाख्यगुरून् नमामि व्रजामि पारमपशब्दजालात् ॥ ५ ।

तत्र कस्यापि शास्त्रस्य ग्रन्थस्य निबन्धस्य किं बहुना पत्रस्य च कश्चन निरूपणीयो विषयो भवति । अत एव काचन मर्यादा निर्धारिता विद्यते—

विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम् ।
अनुबन्धं विना ग्रन्थे मङ्गलं नैव शस्यते ॥ इति ।

यथा लोके केचन नियमा निर्धारिता वर्तन्ते येषां परिपालनेन समाजस्य व्यक्तेः सर्वेषां वस्तूनाञ्च संरक्षणं परिवर्धनं भवति। अतो रघुवंशे[१]—

"न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः"

इति प्रोक्तम्। तदुल्लङ्घनस्य फलन्तु पुरा प्रसिद्धमेव, साम्प्रतमपि दृश्यते एव। तथैव ग्रन्थनिबन्धपत्रादिपरिलेखनावसरेऽनुबन्धचतुष्टयस्य परिपालनमन्तरा श्रोता तत्र सोत्साहो न प्रवर्तते। अत एव सूक्तिरियं सदा समाद्रियते—

ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥[२] इति।

विषयशब्देन निरूपणीयस्य ग्रहणं भवति। तदपि वस्तु केनचिन्निरूपितं तर्हि तस्यापूर्वत्वाभावान्न प्रामाण्यम्, न वा लोकोपकारकत्वम्। अत एव न्यायशास्त्रेऽपि सिद्धसाधनं दोषः। प्रमात्वमपि तां दृष्टिमाकलय्यैव अनधिगताबाधितविषयक-ज्ञानत्वमिति वा—"तद्वति तत्कारकानुभवः प्रमा" इति वा निरुक्तम्। मीमांसाशास्त्रेऽपि विधिनियमपरिसङ्ख्याप्रविभागनिरूपणावसरे सर्वश्रेष्ठस्य प्रवर्तकत्वलक्षणस्य विधे-रपूर्वत्वमाकलितम्। तथाहि—

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते॥[३] इति।

अत्यन्ताप्राप्तत्वं नाम—सजातीयप्रमाणान्तरानधिगतत्वम्। तेनेश्वराधिगम-विषयत्वेऽपि विधेर्नापूर्वत्वक्षतिः। वेदान्तशास्त्रेऽपि येषां षण्णामुपायानां तात्पर्य-धारणार्थमुपेतानां परिगणनं तत्राप्यपूर्वता चकास्त्येव। तथाहि—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥[४] इति।

साहित्येऽपि—

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः"

---

१. रघुवंशः प्रथमसर्गः, श्लोकः १६।

२. वेदान्तसारः।

३. मीमांसान्यायप्रकाशः।

४. अद्वैतसिद्धिः।

इति प्रोक्तम् । रमणीयार्थनिरूपणपरकशब्दत्वमेव काव्यत्वम्, तथानुभवात् तच्छास्त्रनिरूपणाच्च । तथा चोक्तं पण्डितराजेन जगन्नाथेन—"रमणीयार्थप्रतिपादकः शब्दः काव्यम्"[१] इति ।

अनेन निश्चप्रचमिदं भवति यदपूर्वे ह्यर्थे प्रामाणिकत्वं लोकानुरञ्जकत्वं प्रवृत्तिप्रयोजकत्वञ्च भवति नान्यत्र । अत एव शास्त्रेषु इदं निर्धारितं वर्तते यत् "सिद्धे वस्तुनि नेच्छा किन्तु असिद्धे"[२] इति । अतोऽत्रेदमाकूतं भवति यत्कस्यापि शास्त्रस्य ग्रन्थादेश्च निरूपणीयो विषयो यावन्न कमप्यपूर्वमर्थमभिधत्ते प्रकाशयति तावन्न तस्य साफल्यम् । तस्मिन् सत्येव तस्य साफल्म्, यथा "प्रियेषु सौभाग्यफला हि चारुता"[३] इति । विषयत्वञ्च शास्त्रेषु—

"तदतिरिक्ताप्रतिपाद्यत्वे सति तत्प्रतिपाद्यत्वम्"

इति परिष्कृतम् । इदञ्च लक्षणं तत्र तत्र सर्वत्र ग्रन्थनिरूपणीये विषये स्वलक्ष्ये[४] समन्वेति । लक्षणस्येदमेव वैशिष्ट्यं यत्सर्वं लक्ष्यं गृह्णातीति । अत एव लक्षणस्य लक्षणमिदं सम्पन्नं भवति—असाधारणधर्मो लक्षणम्, असाधारण्यञ्च लक्ष्यतावच्छेदकसमनियतत्वम्, समनियतत्वञ्च तद्व्याप्यत्वे सति तद्व्यापकत्वम् । इदञ्चात एव परिष्क्रियते येन लक्ष्यमात्रस्य ग्रहणं भवेत् । अतो विषयस्यापि कृतमिदं तदतिरिक्ताप्रतिपाद्यत्वे सति तत्प्रतिपाद्यत्वमसाधारण्यं भजते एव । तथात्वाभावे लक्षणत्वानापत्तेः । परिभाषेन्दुशेखरे नागेशभट्टैः प्रतिज्ञा कृता—

"प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते"[५] इति । तत्र व्याख्येयपरिभाषा याः प्रतिज्ञातास्तासामेव व्याख्यानं परिभाषेन्दुशेखरे नागेशभट्टैः कृतम् । किन्तु व्याकरणशास्त्रे परिभाषापदेन परिभाषासूत्राणामन्येषाञ्च लक्षणानां व्यवस्थापकवाक्यानां ग्रहणं भवति । अत एव तु—

---

१. रसगङ्गाधरः ।

२. अद्वैतसिद्धिः ।

३. कुमारसम्भवः ।

४. शिखामणिः । वेदान्तपरिभाषा व्याख्या, विषयपरिच्छेदः ।

५. परिभाषेन्दुशेखर ।

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥

इत्याभाणकस्यापि प्रामाण्यं परिरक्षितं भवति। अतो यथाप्रतिज्ञा कृता तथा तु न जातम्, अतो न्यूनत्वमापतितमालक्ष्य तन्निवारणाय नागेशोक्तिं परिष्कृतवन्तो व्याख्यातारः—

"व्याख्येयपरिभाषात्वञ्च—सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्व-प्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम्"[1] इति। अतः सिद्ध्यतीदमेव यत् प्रतिज्ञातस्य वस्तुनः प्रकाशायैव यतितव्यं लेखकैः। अत एव मल्लिनाथो महाविद्वान् प्राह—

इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥[2] इति।

प्रकृतमनुसराम—"महाभाष्यनिगूढाकूतयः" इत्यत्र निबन्धे पूर्वोक्तन्यायेन को विषयो निरूपणीयः, को हि निरूपितो वर्तते इति जिज्ञासानिवारणं यद्यपि ग्रन्थदर्शनेन स्वयं भविष्यति, तथापि ग्रन्थावलोकनोत्साहसंवर्धनाय प्रवृत्तये च संक्षेपतो विषय-निरूपणमवश्यं कर्तव्यमिति धिया विषयपरिचयाभिधानाय प्रयतामहे।

प्रसन्नगम्भीरभाषस्य भाष्यस्य सर्वांश एव निगूढः, तथापि "ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया" इति हर्षोक्तखण्डनखण्डस्थवाक्यन्यायेन फलबलकल्प्यस्वभावस्य सर्वोन्नतत्वादत्रापि क्वचित् क्वचिन्निगूढत्वस्फुरणान्मया तानि स्थलानि प्राग् गृहीतानि। तानि यथाशक्ति पूर्वपूर्वाचार्यपरिपाटी-समाश्रयणमुखेनैव व्याख्यातानि। यथा नागेशभट्टैः शब्दसाधुत्वसाधनाय प्रवृत्तानां सूत्राणां प्रवृत्तिप्रतिबन्धकीभूताव्यवस्थानिराकरणपराणां परिभाषाणामर्थनिर्णयाय परिभाषेन्दुशेखराभिधो ग्रन्थः प्रणीतः। तत्र सूत्रसन्निभानां परिभाषाणामर्थावधारणं दुःशकमप्रतिपत्तिविप्रतिपत्त्यतिप्रतिपत्तिप्रभृतिदूषणग्रस्तञ्चावलोक्य तासां व्याख्यानं समीचीनं कृतम्। एवमेव सर्वत्र ग्रन्थानां प्रणेतॄणाञ्च प्रयत्नो दरीदृश्यते। श्रीमद्भि-र्भगवत्पादैः शङ्कराचार्यैर्दश श्लोकाः प्रणीताः। येषां व्याख्यानं सर्वतन्त्रस्वतन्त्रैः

१. भूति—परिभाषेन्दुशेखरव्याख्या।
२. सञ्जीवनीव्याख्या रघुवंशस्य।

पदवाक्यप्रमाणपारावारीणैरद्वैतसिद्धिप्रभृतिपरमगम्भीरग्रन्थप्रवर्तकैः श्रीमधुसूदनस्वामिमहाराजैः 'सिद्धान्तबिन्दुः' इति ग्रन्थरूपं कृतम्। यत्र सूत्रभूतानां दशश्लोकानां तात्पर्यं स्फुटं भवति, तत्सम्बद्धा अन्येऽपि बहवो विचारा वेदान्तदर्शनसम्मता अन्यदर्शनसम्मताश्च अभिव्यक्ताः। इत्थमेव लघौ महति वा ग्रन्थे व्याख्याने पश्यामः।

व्याकरणमहाभाष्यं पश्यता मया नूनमिदमनुभूतं यदत्र बहुत्र किञ्चिद् वक्तव्यमिति। यद्यपि महाभाष्ये महतां विदुषां प्राचीनानां कैय्यटनागेशभट्टोजिदीक्षितानां प्रदीपोद्द्योतशब्दकौस्तुभाभिधानानि व्याख्यानानि द्योतन्ते। तदनन्तरमपि महाभाष्यतत्त्वाधिगन्तॄणां बहूनां मनीषिणां व्याख्यानोपव्याख्यानटिप्पणादिकञ्च महाभाष्यस्य गाम्भीर्यं व्यनक्ति। तत्र का स्थितिर्मादृशस्य तमश्छन्नदृष्टेः। तथापि "अदृष्टमप्यर्थमदृष्टवैभवात् करोति सुप्तिर्जनदर्शनातिथिम्" इति न्यायेनाहं पठनकाले एव महाभाष्ये बद्धादरः सन् किञ्चिल्लिखितुं प्रवृत्तः। सा च मम प्रवृत्तिः पूज्यानां सकलशास्त्रज्ञानां महाभाष्ये लोकोत्तराधिकाराणामध्यापितानेकशिष्यकदम्बानां गुरुवर्याणां श्रीपण्डितराजरघुनाथशर्मणां कृपयैव। ते एव गुरवो मां व्याकरणमहाभाष्यमपि पाठितवन्तः। तदानीमेव प्रदीपोद्द्योतयोरपि सहैव पाठः प्रारब्धः। छायाटीकापि तदानीमेव तैः पाठिता। यत्र यत्र प्रदीपोद्द्योतयोर्मतभेद आलक्षितस्तत्र गुरुवर्यैः प्रायशः प्रदीपपक्ष एव प्रतिमण्डितः। नागेशोक्तानां खण्डनानां खण्डनं समीचीनया युक्त्या विधाय प्रदीपोक्तिः सङ्गतेति गुरुवर्याणां मतम्। तथाविधेन भाग्याल्लब्धेनाध्यापनेन मादृशस्यापि महाभाष्ये गतिर्जाता। गुरुवर्याः कीदृशा महाभाष्यतत्त्वविद इति तु नाविदितं केषाञ्चिदपि विदुषाम्। तेषां छात्रेण परमविदुषा लेखकेन समालोचनपरिपाटीचणेन श्रीरामशङ्करभट्टाचार्येण गुरुचरणान् प्रति यौ श्लोकौ प्रणीतौ ताभ्यामेव महाभाष्याध्यापनगौरवं गुरुचरणानामभिव्यज्यते—तथाहि—

पातञ्जलमहाभाष्योत्तानता न्यायदृष्टितः।
मया प्रविदिता सम्यग् यस्याध्यापनगौरवात्।
तस्मै श्रीरघुनाथाय शास्त्रिणे शब्दचुञ्चवे।
समर्प्यते श्रद्धयेदं श्रीपातञ्जलदर्शनम्॥ इति।

पूज्यानां गुरुचरणानां ज्ञानं यादृशं तत्प्रकटनाय शब्दा एव न सन्ति अस्माकं पार्श्वे येन प्रकाशयामः। तेषामध्यापनगौरवस्यैवायं प्रभावो यदहमपि भाष्याब्धौ माधुर्यमेवावाप्नुवम्, न कटुताम्।

तत्र ज्ञानमनन्तमधिकम्, ज्ञेयं तु न तथाविधम्, किन्त्वल्पमेवेति दर्शनसिद्धान्तात् नूनमेव महाभाष्यार्थरूपं ज्ञेयमपि ज्ञातमेव पूर्ववर्तिभिर्वर्तमानैश्चेति नापूर्वत्वं वक्तुं शक्यम् । अपूर्वत्वाभावे हि न कथमपि प्रामाण्यस्थापनसम्भवः । अप्रामाणिकञ्च वचो नो वक्तव्यमिति रीत्या मम मौनितैव भगवतीशरणम्, तथापि "बालादपि सुभाषितं ग्राह्यम्" इति न्यानेन सर्वज्ञत्वस्य च जीवावृत्तित्वात् पाणिन्युपज्ञं व्याकरणमिति[1] प्रयोग दर्शनात् "उपज्ञोपक्रमं तदाद्याचिख्यास्याम"[2] इति पाणिनिसूत्राच्च मया महाभाष्यस्थानां केषाञ्चित् स्थलानां यथाप्रतिभानं व्याख्यानं विहितम् । तत्र कानिचिदेव स्थलानि मया गृहीतानि । अनेन कदापि नैव भ्रमितव्यं यदन्यानि निगूढानि न सन्तीति । किन्तु कदाचित् कस्यचित् क्वचिदेव दृष्टिर्यातीति लोके दर्शनात् शास्त्रस्यार्थे च कस्याश्चित् कोटेः कदाचित् स्फुरणादस्फूरणाच्च मम यत्र यत्र दृष्टिस्तादृशी समभूत् तेषां स्थलानां व्याख्या कृता । सन्ति चात्र ग्रन्थे प्रायशो गृहीतानि त्रयोविंशतिसङ्ख्याकानि स्थलानि। प्रथमाध्यायस्थानि विपुलानि विद्यन्ते । अष्टाध्यायेषु महाभाष्यम् । भगवता पाणिनिना प्रणीतं व्याकरणशास्त्रं चकास्ति अष्टसु अध्यायेषु । तत्र तथाक्रमेणैव महाभाष्यमपि विहितम् । अत्र ग्रन्थेऽपि तेनैव क्रमेण महाभाष्यस्थलानि गृहीतानि । तेषु गृहीतेषु त्रयोत्रिंशतिसङ्ख्याकेषु स्थलेषु प्रथमतो महाभाष्यवाक्यमिदं गृहीतम्—

१. "अथशब्दानुशासनम्" इति ।

अत्रास्ति विवादः । केचन वदन्ति यद महाभाष्ये सर्वप्रथममिदमेव वाक्यमुपलभ्यते । वाक्यञ्चेदं सूत्रकृतः पाणिनेरेव । तथा चाष्टाध्याया यस्या भाष्यमभाषि भगवता पतञ्जलिना तस्या सूत्रमिदं प्रथमं पाणिनीयम् । तेषामियमपि युक्तिर्वर्तते यद्भाष्यं तु सूत्रमधिकृत्य प्रवर्तते । तत्र च योगशास्त्रे पूर्वमीमांसायां वेदान्तशास्त्रे च यानि प्रथमसूत्राण्युपलभ्यन्ते तानि सर्वाण्येव अथशब्दघटितान्येव सन्ति—"अथ योगानुशासनम्", अथातो धर्मजिज्ञासा", अथातो ब्रह्मजिज्ञासा" इति। तेन न्यायेन महाभाष्ये समुपलब्धमिदं वाक्यम् "अथं शब्दानुशासनम्" इति भगवतः पाणिनेरेव सूत्रम्, अथशब्दघटितत्वात् प्राथन्येनोपलम्भाच्च । तेषां मते "वृद्धिरादैच्" इति सूत्रं द्वितीयसूत्रम् । उद्देश्यवचनं पूर्वं विधेयं तदनन्तरमिति नियमादादैचोरुच्चारणं पूर्वं कर्त्तव्यं वृद्धिशब्दस्य च पश्चादिति हेतोर्वृद्धिशब्दस्यादौ प्रयोगो मङ्गलार्थ इति महाभाष्य-

१. प्रौढमनोरमा संज्ञाप्रकरणम्, पृ० ३८ ।

२. अष्टाध्यायीसूत्रम्—२-४-२१ ।

प्रवृत्तिस्तु मध्यमङ्गलत्वेनापि योजयितुं शक्येति तेषां मतम्। तेन कैयटप्रभृतिभिरस्य "अथ शब्दानुशासनम्" इति वाक्यस्य महाभाष्यघटकवाक्यत्वमपास्तं भवति।

अत्र च ग्रन्थे मया "अथ शब्दानुशासनम्" इति वाक्यं भगवतो महाभाष्यकारस्य पतञ्जलेरेव, न तु पाणिनीयमिदं सूत्रमिति सहेतुकं स्थापितम्। यतो हि यदीदं वाक्यं पाणिनीयं स्यात्, तर्हि "वृद्धिरादैच्" इति सूत्रं द्वितीयं भवेत्। इत्थञ्च सूत्रकारीयपद्धतिहानप्रसङ्गोऽसङ्गत्यापत्तिश्च स्याताम्। योगमीमांसावेदान्तसूत्रेषु "अथ योगानुशासनम्", "अथातो धर्मजिज्ञासा", "अथातो ब्रह्मजिज्ञासा" इत्येतेषु प्रतिज्ञातानां योगधर्मब्रह्मपदार्थानां तत्तत्सूत्राव्यवहितसूत्रेषु "योगश्चित्तवृत्तिनिरोधः", "चोदनालक्षणो धर्मः", "जन्माद्यस्य यतः" इत्येतेषु लक्षणानि प्रोक्तानि। तया रीत्या द्वितीये सूत्रे शब्दस्वरूपं वक्तव्यं स्यात्। तथा तु नोक्तमिति सूत्रकृतां रीतिरपगता भवेत्। अपरञ्च तदनन्तरमकस्मादेव शब्दस्वरूपोपन्यासमपास्य विषयान्तरवर्णनमसङ्गतं भवेत्। यदा च भाष्यकारीयमिदं वाक्यमिति स्थाप्यते, तदानीं शब्दानुशासनस्य भाष्यकृता प्रतिज्ञातत्वात् शब्दलक्षणं भाष्यकृता वक्तव्यं भवति। तच्च प्रोक्तमेवेति नासङ्गतिः।

किञ्च, भगवता महाभाष्यकृता प्रथमाह्निके पस्पशाह्निकनाम्ना प्रसिद्धे स्वातन्त्र्येण शब्दस्वरूपस्य शब्दसाधुत्वसंसाधकव्याकरणपदार्थस्य च विवेचनं कृतम्। द्वितीयाह्निके चतुर्दश सूत्राणि विवेचितानि। ततः क्रमेण पाणिनीयसूत्राणां भाष्यमारब्धम्। यदि चेत् "अथ शब्दानुशासनम्" इति वाक्यं पाणिनीयसूत्रमेव स्यात्, तर्हि तद्व्याख्यानान्तरं झटित्येव द्वितीयस्य पाणिनीयसूत्रस्यैव भाष्यं कृतं स्यात्। तथा तु न कृतम्, अपि तु चतुर्दशसूत्राणां विवेचनं कृतमिति दृश्यते। यदि च "अथ शब्दानुशासनम्" इति वाक्यं पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारस्तत्सूत्रव्याख्यानं पाणिनिसूत्रव्याख्यासन्दर्भे कुर्यात्, किन्तु तथा तु न कृतम्। यतो हि पाणिनिसूत्रव्याख्यानं तृतीयाह्निकतः प्रारब्धम्। द्वितीयाह्निके माहेश्वरसूत्राणां व्याख्या कृता। अतोऽत्राकामेनापीदमेव वक्तव्यं भवेद् यदिदं वचनं भाष्यकारस्यैव, न तु सूत्रकारस्य। अत एव कैय्यटनागेशप्रभृतयो विद्वांसः प्राचीनाः साम्प्रतिकाश्च भाष्यतत्त्वविद इत्थमेव मन्यन्ते तथैव व्याचख्युरपि।

इदं तु किल एकं निदर्शनं विद्यते। इत्थमेव व्याख्यानं कृतं प्रायः सर्वत्रैव महाभाष्यवाक्यस्थलेषु। पाणिनेरष्टाध्यायीग्रन्थस्य लोकोत्तरव्याख्यानमेव महाभाष्यम्।

यद्धि व्याकरणमहाभाष्यपदेन प्रोच्यते । व्याख्येयक्रमेण व्याख्यानभूते महाभाष्येऽपि सन्ति तथैवाष्टौ अध्यायाः । अत एव मयापि ग्रन्थेऽत्राष्टष्वपि अध्यायेषु कृताद् महाभाष्यात् स्थलानि परिगृहीतानि । तत्र प्रथमाध्यायस्थानि, पुष्कलानि ततोऽन्यतस्तु स्वल्पान्येव गृहीतानि ।

तत्र द्वितीयं स्थलमस्ति—

२. "द्रव्यं नाम तद् गुणो नाम सः"[१] इति ।

अत्रापि कृतो विमर्शो गूढः शास्त्रमर्यादामधिकृत्य । तत्र "अथ शब्दानुशासनम्" इति वाक्येनानुशासनीयत्वेन प्रतिज्ञातस्य शब्दस्य स्वरूपन्तु नूनं परिदर्शनीयम् । तद्धि यावन्न स्पष्टीक्रियते तावद्विषयावधारणाभावाद् व्याख्यानं केवलं नादमात्रमेव स्यात्, नहि प्रेक्षावत्प्रतिपित्सागोचरः । अतो भगवान् महाभाष्यकारो व्याख्येयशब्दस्वरूप-निर्दिधिषया बहुकल्पान् विकल्प्य तदनन्तरं स्फोटध्वनिभेदेन द्विविधं शब्दं दर्शितवान् । स्थलं तु 'अयं गौः' इति ज्ञानं गृहीतम् । अर्थात् 'अयं गौः' इति ज्ञाने प्रतिभा-समानेषु वस्तुषु कः शब्द इति जिज्ञासां विधाय तत्र के प्रतिभासन्ते इति परिदर्श्य तेषां शब्दस्वरूपनिवारणपरमिदं वाक्यं महाभाष्यकारस्य "द्रव्यं नाम तद् गुणो नाम सः" इति । 'अयं गौः' इति ज्ञाने भासमानानां ककुदखुरविषाणप्रभृतीनां शुक्लनील-कपिशादीनाञ्च न शब्दस्वरूपत्वं किन्तु द्रव्यत्वम्, वा गुणत्वं वेति हृदयम् ।

तत्रेदं मया विचारितं यत् शब्दो हि न्यायमते गुणः, मीमांसकमते वैयाकरण-मते च द्रव्यमिति स्थितिः । अस्यां परिस्थतौ द्रव्यत्वेन गुणत्वेन शब्दस्य निराकरणं तु न शास्त्रीयपद्धत्यनुसारि भवितुमर्हति । यतो हि प्रतियोग्यवृत्तिधर्मस्यैव भेदीयानु-योगितावच्छेदकत्वं भवितुमर्हति, तथैव दर्शनात् प्रयोगादबाधाच्च । तद्वैपरीत्ये एव बाधसद्भावात् । तथा च कथमत्र "द्रव्यं नाम तद् गुणो नाम सः" इति भगवता प्रोक्त-मिति प्रश्नमुत्थाप्य समाहितम् । एवमेव सर्वत्र स्थलेषु प्रतिभासमानानां दोषाणाम् अनुपपत्तीनाञ्चोत्थापनं कृत्वा समाधानानि कृतानि । सर्वेषां स्थलानां सूत्ररूपेणापि परिदर्शनाय कृतोद्यमे ग्रन्थभारो भवेदिति कृत्वा द्वित्राणां स्थलानां स्थालीपुलाकन्यायेन निदर्शनं विधाय ततोऽन्यत्र तत्र च विशेषतो व्याख्यानस्थलेषु ग्रन्थेऽत्र द्रष्टव्यमिति निवेद्यैव विरमामि ।

---

१. महाभाष्यनिगूढाकूतयः ।

१. अथ शब्दानुशासनम्

अथ व्याकरणमहाभाष्यस्य संशयविषयीभूतानां गूढस्थलानां यथासम्प्रदायं यथासन्दर्भमनुदक्षरञ्च व्याख्यानं प्रारभ्यते। तत्र व्याकरणशास्त्रस्य परमप्रमाणभूते महर्षिपतञ्जलिनिर्मिते महाभाष्ये सर्वप्रथमम्—'अथ शब्दानुशासनम्' इति वचनमुपलभ्यते। अस्य वचनस्य कृते पक्षद्वयं दरीदृश्यते। तथाहि—केचिद् वदन्ति यद् महाभाष्यकारस्य वचनमिदमिति। अपरे प्राहुर्यन्नेदं महाभाष्यकारस्य वचनम्, प्रत्युत भगवतः पाणिनेः सूत्रकारस्यैवेदं प्रथमं सूत्रमिति। तत्राद्यपक्षे कैयटादयो विद्वांसो महाभाष्यव्याख्यातारः सम्मताः। कैयटव्याख्याने प्रदीपे नागेशकृते उद्द्योते च स्पष्टमेव तथा प्रतिपादितम्। समीचीनमेव तत्, यतो हि "वृद्धिरादैच्" इति सूत्रे कथं वृद्धिरादैच् इति? एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। 'माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति, आयुष्मत्पुरुषकाणि च। अध्येतारश्च वृद्धियुक्ता यथा भवेयुरिति"[1] इति महाभाष्ये प्रोक्तम्। एतद्भाष्यदर्शनेनेदमेव निश्चीयते यद् 'वृद्धिरादैच्' इत्येव भगवतः पाणिनेरष्टाध्याय्याः प्रथमं सूत्रम्, न तु 'अथ शब्दानुशासनम्' इति। इदं तु महाभाष्यकारस्य प्रथमं वाक्यम्।

यद्यपि "अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्"[2] इति भाष्यव्याख्यानादापाततो भाति, यदिदम् 'अथ शब्दानुशासनम्' इति वाक्यं सूत्ररूपमेव, अत एव महाभाष्यकारेण व्याख्यातमिति, तथापि भाष्यकारवचनमेवेदम्, यतो हि भाष्यस्थवचनस्यापि भाष्ये व्याख्येयत्वेऽपि भाष्यस्थत्वमेव, न तु तद्भिन्नत्वम्। अत एवोक्तम्—

सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥ इति।

अत एव कैयटो वाक्यव्याख्याने—'भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनमाह—अथ शब्दानुशासनमिति' इति प्राह।

महाभाष्यकारो भगवान् पतञ्जलिर्महाभाष्यरचनावसरे प्रथमतो वचनमिदमत एवोट्टङ्कितवान्, यतो हि प्रतिदिनं यावन्तमंशं तेन छात्राः पाठिताः स एवाह्निकशब्देन प्रतिनिर्दिष्टः, अह्ना निर्वृत्तमाह्निकमिति व्युत्पत्तेः। "तेन निर्वृत्तम्"[3] इत्यनेन सूत्रेण ठक्। पाठने च शिष्याः सावधाना भवेयुरिति कृत्वा सफलप्रस्तावनार्थं मङ्गलार्थञ्चेदं

१. महाभाष्यम् 'वृद्धिरादैच्' (१-१-१) इति सूत्रे।

२. महाभाष्ये पस्पशाह्निके शब्दकौस्तुभयुते, पृ० ३।

३. अष्टाध्यायी ४।२।६८।

वाक्यं प्रथमत उपात्तम् । अत एव ब्रह्मसूत्रभाष्यव्याख्यानभामतीव्याख्याने कल्पतरु-परिमलकारः 'मङ्गलश्लोके शास्त्रीयविषयप्रयोजनप्रदर्शनेन तथाभूते ब्रह्मणि भाष्यस्य तात्पर्यमिति कृत्स्नं भाष्यं सामान्यतो व्याख्यातम् । इदानीं प्रतिग्रन्थं व्याख्यानं प्रारभ्यते इत्येतदर्थोऽथशब्द इत्यर्थः । यद्यपि प्रारभ्यत इत्यनुक्तेऽपि प्रारम्भादेवेदं प्रारभ्यत इत्यवगन्तुं शक्यम्, तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः । दृश्यते हि तदर्थमेव लोकेऽप्याप्ताः किञ्चिदहं वक्ष्यामीत्युक्त्वा हितमुपदिशन्ति"[१] इति ।

अतोऽत्रायं निष्कर्षः—साधुशब्दज्ञानरूपमुख्यप्रयोजनप्रदर्शनार्थं शिष्याणां सावधानीकरणार्थं मङ्गलार्थञ्च भगवान् भाष्यकारः पतञ्जलिः प्रयुक्तवान् वाक्यमिदम्—"अथ शब्दानुशासनम्"[२] इति ।

अस्य वाक्यस्य विषये बहवो विवादाः प्रचलन्ति । केचन वदन्ति यदिदं वाक्यं न भगवतो भाष्यकारस्य पतञ्जलेः, प्रत्युत सूत्रकारस्य पाणिनेरेव । तेषां का युक्तयः, ताभिश्च कथमस्य पाणिनिकृतमाद्यसूत्रत्वमित्यस्य, वचनमिदं भाष्यकारस्यैव न सूत्रकारस्येत्यत्र कास्तेषां युक्तयः, कथञ्च ताभिरस्य भाष्यवचनत्वमित्यस्य पुनस्तत्र क्षोदक्षमं यथापूर्वैरुक्तं तदुपन्यस्य स्वबुद्ध्यनुसारेण च सारेणात्राहमपि स्वीयं विचार-मुपस्थापयिष्यामि विदुषां मोदाय स्वतोषाय च ।

तत्र केचिद् वदन्ति यदिदम् "अथ शब्दानुशासनम्" इति वाक्यं न महाभाष्य-कारस्य पतञ्जलेः, प्रत्युत पाणिनेरेवेदं प्रथमं सूत्रमिति । तथा च प्राह महर्षिः स्वामी श्रीदयानन्दः 'अष्टाध्यायी-महाभाष्यम्' इति नामके ग्रन्थे 'अथ शब्दानुशासनम्' इति वाक्यविषये—

"इदं सूत्रं पाणिनीयमेव । प्राचीनलिखितपुस्तकेषु आदाविदमेवास्ति । दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु प्रतिज्ञासूत्राणीदृशानि" इति ।

तत्र टिप्पण्याञ्च "अत्र मेधातिथिर्भृगुप्रोक्तसंहितायाः प्रथमश्लोकव्याख्याने एनमेवार्थमादिशत् । पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनमभिधानमाद्रियते । तथाहि भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् 'अथ शब्दानुशासनम्' इति सूत्रसन्दर्भ-मारभते" इति ।

'अथ शब्दानुशासनम्' इति वचनं भगवतो महाभाष्यकारस्य पतञ्जलेरिति प्रतिपादयन्तो महाभाष्यव्याख्याकाराः कैयटनागेशप्रभृतयो महान्तो विद्वांसोऽपि भ्रान्ता हेयवचना इति तेषां समुद्घोषः ।

अन्येऽपि महर्षिदयानन्दप्रणीतस्याष्टाध्यायीमहाभाष्यग्रन्थस्य व्याख्याकाराः—'अथ शब्दानुशासनम्' इति वचनं भगवतः पाणिनेरेवेति, न तु महाभाष्यकारस्य

१. ब्रह्मसूत्रे कल्पतरुपरिमलः 'अथातो ब्रह्मजिज्ञासा' १।१।१ ।

२. महाभाष्ये पस्पशाह्निके ।

पतञ्जलेरिति पक्षं कक्षीकुर्वाणाः प्राहुर्यत् 'यथा अथ योगानुशासनम्'[१] इत्यपि महर्षिप्रणीतमाद्यं सूत्रम्, तथैव पाणिनेरेवेदम् 'अथ शब्दानुशासनम्' सूत्रम्, न भाष्यवचनमिति ।

तेषामयमाशयः—सर्वत्र सूत्रकाराणां शैलीयं दृश्यते यदादौ तथैव सूत्राणि प्रणीतवन्तः । यथा—

योगशास्त्रे—	अथ योगानुशासनम्[२] ।
मीमांसायाम्—	अथातो धर्मजिज्ञासा[३] ।
वेदान्ते—	अथातो ब्रह्मजिज्ञासा[४] ।

एवञ्च महर्षिपतञ्जलिप्रणीतयोगशास्त्रे, महर्षिजैमिनिप्रणीतपूर्वमीमांसाख्ये महति पूजनीये शास्त्रे कृष्णद्वैपायनव्यासप्रणीते वेदान्तशास्त्रे च यदा प्रथममेतादृशं सूत्रं दरीदृश्यते, तर्हि सर्वशास्त्रोपकारके व्याकरणशास्त्रे सूत्रत्वात् तथैव भाव्यमिति हेतोरिदम् "अथ शब्दानुशासनम्" इति वाक्यं पणिनेरेवादिमं सूत्रम्, न तु व्याख्याकृतो महाभाष्यकारस्येति प्रतिपादयन्ति ।

तत्सर्वमविचारितरमणीयमिति । तत्र नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः, किन्तु हेतुप्रतिपादनादिति हेतोरहं यथाशक्ति यथामति यथौचित्यञ्च प्रतिपादये । तथाहि—महर्षिणा दयानन्देन प्राचीनपुस्तकेषु पाठोऽस्य सर्वप्रथममुपलभ्यते इत्यनेन हेतुना वाक्यस्यास्य 'अथ शब्दानुशासनम्' इत्यस्य भगवतः पाणिनेरादिसूत्रत्वे हेतुर्न भवितुमर्हति, यतो हि भ्रमात् प्रमादादविचारात् प्रथमत्वेनोपादानं तस्यादिसूत्रत्वे साधकं भवितुं नार्हति, युक्त्या तस्य बाधेऽकिञ्चित्करत्वात् । तथा चोक्तं गदाधरभट्टाचार्यैः—

"नहि कस्यचिद् ग्रन्थकृतो विपरीतलेखनं युक्तिबलाद् वस्तुसिद्धौ बाधकम्"[५] इति।

किञ्च, भ्रमप्रमादकरणबाधादिदोषा मनुष्यस्य स्वाभाविकाः । अतः केनापि कदाचिद् भ्रमेण विपरीतं वक्तुं लिखितुं वा शक्यते । नहि तेन विपरीतेन वचनेन किञ्चित् प्रामाणिकं वस्तु साधयितुं शक्यते । अत एवोक्तमभियुक्तैः—

प्राचीनमित्येव न साधु सर्वं न नव्यमित्येव भवत्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥[६] इति ।

---

१. योगसूत्रम् १।१।१ ।
२. योगसूत्रम् ।१।१।१ ।
३. मीमांसासूत्रम् १।१।१ ।
४. ब्रह्मसूत्रम् १।१।१ ।
५. व्युत्पत्तिवादे प्रथमाकारके ।
६. मालविकाग्निमित्रम्–१।२ ।

अपरञ्च–प्राचीनपुस्तकान्तर्गतानि महाभाष्यव्याख्याकारैः कैयटनागेशप्रभृतिभिर्विद्वद्भिः प्रणीतानि टीकारूपाणि पुस्तकान्यपि वर्तन्ते, तानि तु प्रमाणरूपाणि वचनानि 'अथ शब्दानुशासनम्' इति वचनं भाष्यकारस्येति प्रतिपादयन्ति। तानि कथं नास्य भाष्यकारीयवचनत्वे मानानीति पृष्टो भवान् व्याचष्टाम्।

या चेयं युक्तिरपरा महर्षिदयानन्दस्वामिभिः प्रोक्ता यत् "दृश्यन्ते च सर्वेष्वार्षेषु ग्रन्थेषु प्रतिज्ञासूत्राणीदृशानि" इति। सापि न वस्तुसाधिका, यतो हि येऽपि ऋषयः प्रतिज्ञारूपेण ईदृशानि सूत्राणि प्रणीतवन्तस्तेषां महर्षीणां पद्धतिर्न विस्मर्तव्या। ते हि प्रतिज्ञासूत्रेण प्रतिज्ञातं वस्तु प्रतिज्ञासूत्रानन्तरमेव (वचनान्तरं वा) लक्षणवचनेन सूत्ररूपेण वा अन्यरूपेण वा लक्षितवन्तः। यथा–"अथ योगानुशासनम्"[१] इति सूत्रेण योगं प्रतिज्ञाय भगवान् पतञ्जलिस्तदनन्तरसूत्रेणैव योगस्य लक्षणं कृतवान्—"योगश्चित्तवृत्तिनिरोधः"[२] इति। एवमेव पूर्वमीमांसायाम्—"अथातो धर्मजिज्ञासा"[३] इति सूत्रेण महर्षिर्जैमिनिर्धर्मं प्रतिज्ञाय तदनन्तरसूत्रेणैव धर्मस्य लक्षणं प्राह—"चोदना लक्षणोऽर्थो धर्मः"[४] इति सूत्रेण। वेदान्तसूत्रेऽपि—"अथातो ब्रह्मजिज्ञासा"[५] इति सूत्रेण जिज्ञास्यं ब्रह्म प्रतिज्ञाय भगवान् व्यासो ब्रह्मसूत्रे तदनन्तरमेव ब्रह्मणो लक्षणमाह द्वितीयेन सूत्रेण—"जन्माद्यस्य"[६] यतः इत्यनेन। ते हि सर्वे महर्षयः, मान्याः सूत्रकाराः प्रतिज्ञासूत्रेणैव लक्षणात्मकेन लक्षितवन्तः। इमां सूत्रकारीयपद्धतिमवेक्ष्य प्रकृतेऽपि विचार्यते।

यदि 'अथ शब्दानुशासनम्' इति वचनं भगवतः पाणिनेः स्यात्, तदाऽवश्यं भगवता तदनन्तरसूत्रेण द्वितीयेन अनुशासनकर्मत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणं लक्षितं स्यात्। एवञ्च येषां महर्षिदयानन्दतदनुयायिवर्गाणामपरेषाञ्च केषाञ्चिन्मतेन यदि 'अथ शब्दानुशासनम्' इति वचनं भगवतः पाणिनेरेवादिमं सूत्रमिति पक्षो वर्तते, तदा द्वितीयं सूत्रं स्यात् 'वृद्धिरादैच्' इति। किन्तु नात्र भगवान् पाणिनिः प्रतिज्ञातस्य शब्दस्य लक्षणं कृतवानिति सूत्रकारीयपद्धतिहानप्रसङ्गः। सूत्रकाराणां च तथैव शैली विद्यते यत्ते प्रतिज्ञातवस्तुनो लक्षणं प्रतिज्ञासूत्रानन्तरमेव चक्रुः। यदा च वचनमिदं भाष्यकारस्येति पक्षः समाश्रियते, तदा न कापि क्षतिः। यतो हि सूत्रकारेण स्वतन्त्रेच्छस्य मुनेर्नियन्तुमशक्यत्वेनेति नियमात् शब्दविषयिणी प्रतिज्ञैव न कृता। अतो न तेन महर्षिणा शब्दस्वरूपं वक्तव्यम्। यदा चेदमङ्गीक्रियते यदिदं

१. योगसूत्रम् १।१।१।

२. योगसूत्रम् १।१।२।

३. मीमांसासूत्रम् १।१।१।

४. मीमांसासूत्रम् १।१।२।

५. ब्रह्मसूत्रम् १।१।१।

६. ब्रह्मसूत्रम् १।१।२।

वाक्यम्—'अथ शब्दानुशासनन्'[1] इति महाभाष्यकारस्य पतञ्जलेः पाणिनिसूत्रव्याख्याकारस्यादिमं वाक्यम्, तदा तेन प्रतिज्ञातस्य शब्दस्य स्वरूपं वक्तव्यम्। तच्च प्रोक्तमेव तेन महर्षिणा पातञ्जलव्याकरणमहाभाष्ये—"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः"[2] इत्यनेन प्रथमेन स्फोटरूपशब्दस्वरूपपरिचायकेन वचनेन। ततश्च—"अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते"[3] इति द्वितीयेन ध्वनिरूपशब्दपरिलक्षकेण लक्षणवचनेन।

एवञ्चात्रेदमाकूतं यद् भगवतः पाणिनेस्तु प्रथमं सूत्रम् "वृद्धिरादैच्"[4] इत्येव, 'अथ शब्दानुशासनम्' इति वचनं तु भगवतो महाभाष्यकारस्य पतञ्जलेरेव। तथा स्वीकारे नियमे बाधाभावात्। पाणिनिसूत्रत्वे तु सर्वथैव सूत्रकारीयपद्धतिहानप्रसङ्गात्। अतोऽत्र 'बुद्धेः सत्पक्षपाततः' इत्युक्तेरनुसारेण वच्मि यद् दुराग्रहं विहाय 'बालादपि सुभाषितं ग्राह्यम्' इति प्रमाणाद् यथाबुद्धि सप्रमाणमुपपादितं पक्षं यत् 'अथ शब्दानुशासनम्' इति वचनं भगवतो महाभाष्यकारस्यैव, न तु पतञ्जलेरिति स्वीकृत्य निष्पक्षपातं पन्थानं प्रशस्तं कुर्वन्तु धीधनाः।

इममेव पक्षं महान् विद्वान् माध्वाचार्यः सर्वदर्शनसंग्रहे स्वीकृतवान्। तथाहि—"नन्वयं प्रकृतिभागोऽयं प्रत्ययभागः" इति प्रकृतिप्रत्ययविभागः कथमवगम्यते इति चेत् पीतपातञ्जलानामेतच्चोद्यं चमत्कारं न करोति, व्याकरणशास्त्रस्य प्रकृतिप्रत्ययप्रतिपादनपरतायाः प्रसिद्धत्वात्। तथा हि पतञ्जलेर्भगवतो महाभाष्यकारस्येदमादिमं वाक्यम्—"अथ शब्दानुशासनम्" (म० भा०, पस्पशा० १।१।१) इति[5]। अस्य वाक्यस्य कश्चन विलक्षणोऽर्थः कृतो माध्वाचार्येण स प्रदर्श्यते प्रसङ्गात्।

अस्यार्थः—अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। अधिकारः प्रस्तावः, प्रारम्भ इति यावत्। शब्दानुशासनशब्देन च पाणिनिप्रणीतं व्याकरणशास्त्रं विवक्ष्यते। शब्दानुशासनमित्येतावदभिधीयमाने सन्देहः स्यात्, किं शब्दानुशासनं प्रस्तूयते न वेति। तथा मा प्रयाङ्क्षीदित्यथशब्दं प्रायुङ्क्त। अथशब्दप्रयोगबलेनार्थान्तरव्युदासेन प्रस्तूयते इत्यस्यार्थस्याभिधीयमानत्वात्। अनेन हि वैदिकाः शब्दाः 'गौरश्वः पुरुषो हस्ती शकुनिः' इत्यादयश्चानुशिष्यन्ते। व्युत्पाद्य संस्क्रियन्ते प्रकृतिप्रत्ययविभागवत्तया बोध्यन्ते इति शब्दानुशासनम्।

अत्रेदमवधेयम्—नहि केवलम् 'अथातो धर्मजिज्ञासा', 'अथातो ब्रह्मजिज्ञासा', 'अथ योगानुशासनम्' इति पूर्वोत्तरमीमांसायोगदर्शनसूत्रदर्शनमात्रेण तथैव सूत्र-

१. महाभाष्यम्।

२. महाभाष्यं पस्पशाह्निकम्।

३. महाभाष्यं पस्पशाह्निकम्।

४. पाणिनिसूत्रम् १।१।१।

५. सर्वदर्शनसङ्ग्रहे व्याकरणदर्शनप्रकरणे।

काराणां शैलीति कल्पयितुं शक्यते, यतो हि महान् प्रमाणज्ञो भगवान् महर्षिः श्रीगौतमः प्रथमतो विनैवाथशब्दं सूत्रं प्रणिनाय। तथाहि—"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"[१] इति।

अपि च यदीदं वाक्यम् 'अथ शब्दानुशासनम्' इति पाणिनिसूत्रं स्यात्, तर्हि महाभाष्यकारः पाणिनिसूत्रव्याख्यानप्रकरणे एवास्यापि व्याख्यानं कुर्यात्। तथा तु न कृतमित्यापाद्यव्यतिरेकनिश्चयस्यापत्तिं प्रति प्रयोजकत्वादत्रेयमापत्तिरेवास्य वचनस्य भाष्यकारीयत्वसाधिका। महाभाष्ये तृतीयाह्निकत आरभ्य एव पाणिनिसूत्राणां विवरणं कृतम्। प्रथमाह्निके पस्पशाभिधे तु महाभाष्यकारः शब्दस्य स्वरूपम्, व्याकरणस्य प्रयोजनं व्याकरणस्य स्वरूपादिकञ्च निर्दधार। द्वितीयाह्निके च माहेश्वरसूत्राणां व्याख्यानं फलमवसरप्राप्तविषयान्तरविवेचनञ्च कृतम्। 'अथ शब्दानुशासनम्' इति वचनं यदि पाणिनिसूत्रं स्यात्, तर्हि पाणिनिसूत्रभाष्यभाषणप्रकरणे एवेदं सूत्रं व्याख्यातं भवेत्; किन्तु तथा तु नास्ति। मध्ये द्वितीयाह्निके माहेश्वरसूत्राणां व्याख्यापि वर्तते। अस्य वचनस्य महाभाष्यकारीयत्वे तु न किमप्यनुपपन्नम्, यतो हि प्रथमाह्निके महाभाष्यकारो भूमिकारूपेण व्याकरणशास्त्रप्रयोजनभूतस्य शब्दसाधुत्वस्योद्देश्यभूतः शब्दः किं स्वरूपः? तन्निष्ठसाधुत्वनिर्धारकं व्याकरणञ्च किमिति? शब्दसाधुत्वं शब्दं वा निर्माति व्याकरणशास्त्रम्, उताहो ज्ञापयतीत्यादिगूढविषयान् विमृष्टवान्। द्वितीयाह्निकतस्तु सूत्राणां व्याख्यानं प्रारब्धम्। न्यायभाष्येऽपि भाष्यकारो वात्स्यायनः प्रथमतः कतिभिर्वाक्यैरवतरणं विधायैव सूत्रव्याख्यानमारब्धवान्। तथाहि—

"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्। प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति, जिहासति वा। तस्येहाजिहासाप्रयुक्तस्य समीहाप्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः। समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुश्च। सोऽयं प्रमाणार्थोऽपरिसंख्येयः, प्राणभृद्भेदस्यापरिसंख्येयत्वात्।"[२] इत्यादि।

वेदान्तशास्त्रेऽपि ब्रह्मसूत्रभाष्यव्याख्यानावसरे आद्यशङ्कराचार्यो ब्रह्मसूत्राणां व्याख्यानतः प्राग् भूमिकारूपेण विषयावतार रूपं स्ववाक्यं सारगर्भितं समायोजितवान्।

तत्रेदमपि बोध्यम्—यद् वृत्तं यत्र कुत्रापि भाष्यमवतरणरूपेण प्रवृत्तं तत्र सर्वत्रैव जिज्ञासा समाधानायैव। यथा ब्रह्मसूत्रे प्रथमतो भाष्ये सूत्राक्षरवर्णनमुपेक्ष्याध्यासानु-

---

१. न्यायसूत्रम्—१।१।१।

२. वात्स्यायनभाष्यम्, पृ० १।

पपत्ति-तन्निरासप्रयासस्तदर्थमेव। यतो हि जिज्ञासेयं जागर्ति यत् किमर्थं ब्रह्म जिज्ञास्यम् ? ब्रह्मजिज्ञासेत्यस्य ब्रह्मविषयकज्ञानेच्छा कर्तव्येति सम्पद्यतेऽर्थः। इच्छा चेष्टविषयिणी भवति। क्वचिद् विषभक्षणादौ अनिष्टेऽपीच्छा या दृश्यते सापि तदानीं विषभक्षणस्यैव स्वेष्टसाधनत्वेन तत्र जायमाना नेष्टविषयतामर्यादामतिशेते। तथा चेयं जिज्ञासा जागर्ति यद् ब्रह्मज्ञानाभावे कानुपपत्तिः, का वा आपत्तिरिति। तस्याः शङ्काया निराकरणं क्रियते यद्विना ब्रह्मप्रमां चिरात् प्रवृत्तोऽयमनादिरनात्मनि देहादावात्माध्यासो महाननर्थो नान्तं यास्यतीति। अतोऽध्यासनिवृत्तिपूर्वकतन्मूलमूलाज्ञाननिवृत्तिसंसाधकं ब्रह्मज्ञानमेष्टव्यम्—इत्येवोत्तरं भवति।

तत्रैव प्रश्नो यदध्यास एव नोपपद्यते, यतो हि शुद्धे स्वप्रकाशे सजातीयविजातीयस्वगतभेदशून्ये सर्वात्मनि परमात्मनि देहादेरनात्मनः कथमप्यध्यास एव नोत्पद्यते यदा, तदा तन्निवर्तनार्थं ब्रह्मज्ञानं नेष्टव्यमिति मनसि निसर्गतो भवति प्रश्नः। तमेव शाङ्करभाष्ये पूर्वमवतार्य समाधाय च पुनः सूत्राक्षरानुगुण्येन विवरणाय प्रवृत्तो भाष्यकारः, तथैव न्यायभाष्येऽपि षोडशपदार्थेषु प्रमाणप्रमेयादिषु प्रथमतः प्रमाणमेकं वस्तु किमर्थं गृहीतम्, यतो हि प्रमाणमन्तरेणापि सर्वाः प्रवृत्तयो भविष्यन्त्येव। नहि केवलं प्रमाणज्ञा एव प्रवर्तन्ते सफला वा भवन्ति, किन्तु सर्वथैवाज्ञा अपि प्रमाणप्रमेयप्रभृतिपदार्थानविजानन्त एव प्रवर्तन्ते लभन्ते च स्वाभीप्सितम्। अत एव 'पशुभिश्चाविशेषात्' इति वचनं प्रामाण्यं बिभर्ति, अतः किमर्थं प्रमाणमभ्युपेयमिति प्रश्नस्य निवर्तनाय वात्स्यायनभाष्येऽन्यत्र चावतरणं भूमिकारूपं प्रवृत्तम्।

तथैव प्रकृतेऽपि व्याकरणमहाभाष्ये पूर्वदर्शिताः प्रश्नाः स्वभावतो जायमानाः समाधेया एव महाभाष्यकृता इति तत्समाधानाय प्रवृत्तेन महर्षिणा भगवता पतञ्जलिना 'अथ शब्दानुशासनम्' इति वचनेनानुषङ्गिकमङ्गलप्रयोजनकेनारम्भार्थाभिधायिना चाथशब्देन घटितेन भाष्यमारब्धवान्। नहि केवलमन्यशब्दं दृष्ट्वा सूत्ररूपतैवेति निर्णयोऽनाग्रहग्रहं जनयति। ब्रह्मसूत्रशाङ्करभाष्यव्याख्यानभूतायां श्रीवाचस्पतिमिश्रप्रणीतायां भामत्यामपि प्रथमस्य वचनस्य मङ्गलानन्तरं प्रवृत्तस्याथशब्दघटितत्वेऽपि सूत्रत्वाभावात्। तत्र हि—"अथ यदसन्दिग्धमप्रयोजनञ्च न तत्प्रेक्षावत्प्रतिपित्सागोचरम्"[1] इत्यादिना प्रवृत्तं व्याख्यानम्। अतोऽनाग्रहेण प्रमात्मकग्रहेण वचनस्यास्य विषये इदमेव वक्तव्यं भवति यदिदम् 'अथ शब्दानुशासनम्' इति न पाणिनिसूत्रम्, किन्तु महाभाष्यकारस्य पतञ्जलेरेवेदं प्रथमं वाक्यमिति ॥ १ ॥

२. द्रव्यं नाम तद् गुणो नाम सः

इदं वाक्यं भगवतो महाभाष्यकारस्य पतञ्जलेः। तत्र "अथ शब्दानुशासनम्" इति प्रतिज्ञाय केषां शब्दानाम्, लौकिकानां वैदिकानाञ्चेत्यभिधाय 'अयं गौः' इति

१. भामती-ब्रह्मसूत्रे—१।१।१।

शब्दोच्चारणेन प्रतिभासमानेषु अनेकेषु वस्तुषु मध्ये कः पदार्थः शब्दशब्देन प्रत्येतव्य इति विचारप्रसङ्गे किं सास्नालाङ्गूलककुदखुरविषाणाणिरूपस्य शब्दत्वम्, उताहो प्रतीयमानस्य शुक्लनीलकपिलकपोतादिरूपस्य गुणस्य शब्दत्वमिति प्राप्ते निषेध-परमिदं भाष्यवाक्यम्—'द्रव्यं नाम तद् गुणो नाम सः' इति।

अयं भावः—यद्यपि 'अयं गौः' इति शब्दोच्चारणेन सास्नालाङ्गूलककुदखुर-विषाणिरूपस्य द्रव्यस्य शुक्लनीलकपिलकपोतादिरूपस्य गुणस्य च भवति प्रतीतिः, किन्तु न तयोः 'गौः' इत्याकारकशब्दरूपत्वम्, भिन्नेन्द्रियग्राह्यत्वात्। तथा च प्रोक्तं कैयटेन "भिन्नेन्द्रियग्राह्यत्वान्न द्रव्यं शब्द इति प्रतीतम्, अपि तु द्रव्यम्। यदि द्रव्या-नुशासनं विवक्षितमभविष्यत् 'अथ द्रव्यानुशासनम्' इत्येवावक्ष्यत्"[1] इति।

विवृतश्चैतस्य कैयटोक्तस्य वचनस्य तात्पर्यं श्रीमता नागेशभट्टेन—"सामान्य-व्यतिरिक्तत्वे सति श्रोत्रेन्द्रियग्राह्यत्वं हि शब्दस्य लक्षणम्"[2] इति। तथा च सास्ना-लाङ्गूलककुदखुरविषाणिरूपस्य द्रव्यस्य शुक्लनीलकपोतादिरूपस्य गुणस्य च 'अयं गौः' इति शब्दात् प्रतीयमानस्यापि न शब्दत्वम्, तल्लक्षणानाक्रान्तत्वादित्याकूतम्।

अत्र विचार्यते—

तर्कव्याकरणे पक्षौ व्युत्पत्तिः पक्षिणी मता।
ताभ्यां विहीनः पुरुषः शब्दव्योम्नि कथं चरेत्॥

इति वचनानुसारेण तर्कव्याकरणयोः सर्वमान्यप्रामाण्ययोः पद्धतिमाश्रित्य भाष्यस्यास्य विचारः क्रियते। तत्र प्रतियोग्यवृत्तिधर्मस्यैव भेदीयानुयोगिताऽवच्छेदकत्वमिति नियमः। अत एव घटो न घटः, घटो न द्रव्यमिति प्रयोगो न भवति। यतो हि तत्र भेदस्य प्रतियोगी घटस्तत्र वृत्तित्वमेव घटत्वस्य द्रव्यत्वस्य च। भवति च घटो न पट इति व्यवहारः। यतो हि तत्रानुयोगिताऽवच्छेदको धर्मः पटत्वम्, तच्च न प्रतियोगिनि घटे वर्तते। यदा चायं नियमो यत्प्रतियोग्यवृत्तिधर्म एव भेदीयानुयोगिताऽवच्छेदकः, तदैव घटो न कलश इत्याकारकभेदबुद्धेराहार्यत्वमेवेति राद्धान्तः स्वीकृतः। प्रति-पादितश्चाद्वैतसिद्धव्याख्यायां लघुचन्द्रिकायां द्वितीयपरिच्छेदेऽखण्डार्थप्रकरणे। तथाहि— "न चैवं घटः कलशः' इत्यादौ लक्ष्यत्वमेव स्वीक्रियतामिति वाच्यम्, अखण्डार्थत्वं हि भिन्नरूपेणोपस्थितिद्वारा स्वार्थयोर्भेदबुद्धिविरोधितादृशानुभवजनकत्वस्यैव। तथा च घटकलशपदार्थयोर्भेदबुद्धेराहार्यत्वेन तां प्रति विरोधित्वस्याप्रसिद्धया न तत्पदयोर-खण्डार्थत्वम्"[3] इति। सिद्धान्तबिन्दोष्टीकायां न्यायरत्नावल्यामपि। "घटो घटो न वेत्यादिज्ञानस्याहार्यत्वेन तन्निवृत्तेरफलत्वात्"[4] इति।

---

१. महाभाष्यटीका कैयटकृता, पस्पशाह्निकस्था।

२. उद्द्योते पस्पशाह्निके।

३. अद्वैतसिद्धौ द्वितीयपरिच्छेदे, पृ० ६६३।

४. सिद्धान्तबिन्दौ न्यायरत्नावल्याम्, पृ० १८

एवमेव शब्दस्य नैयायिकमते गुणत्वात् 'गुणो नाम सः' इति निषेधवचनमनुपपन्नम्, नीलपीतकपोतादीनां रूपाणामपि गुणत्वान्निषेधायोगात् ।

मीमांसकमते शब्दस्य द्रव्यरूपत्वात् 'द्रव्यं नाम तत्' इत्यनेन निषेधोऽनुपपन्नः ।

वैयाकरणमते च वैखरीरूपस्य शब्दस्य गुणत्वात् स्फोटरूपस्य शब्दस्य द्रव्यत्वात् 'द्रव्यं नाम तद् गुणो नाम सः' इत्युभयविधोऽपि निषेधो न युक्तः । तथाहि—'आकाशदेशः शब्दः'[1] इति भाष्येण तार्किकाणामिव वैयाकरणानामपि द्रव्याश्रितत्वेन वैखरीरूपस्य शब्दस्य गुणत्वमनुमतम् । अत एव महाभाष्ये 'षष्ठी'[2] इति सूत्रे वक्ष्यते । एवञ्च खुरककुदविषाणादीनां द्रव्यत्वेनाभिमतानां शुक्लनीलकपिलहरितादीनां गुणत्वेनाभिमतानां कथं शब्दस्वरूपप्रतिषेधः, प्रतियोगिनि शब्दे द्रव्यत्वस्य गुणत्वस्य च मतभेदेन शब्दस्वरूपस्य वैखरीस्फोटभेदेन गुणद्रव्यरूपत्वस्याभिप्रेतत्वेन च निषेधायोगः । प्रतियोग्यवृत्तिधर्मस्यैव भेदीयानुयोगितावच्छेदकत्वात् । अत्र च तथात्वाभावादिति कथं भाष्यसमन्वय इति चेत्, अत्र सूक्ष्मेक्षिकया विमृश्यते । तथा हि शब्दस्तावद् द्विविधः—एको ध्वनिरूपः, एकश्च स्फोटरूपः । तथा च प्रोक्तं भाष्ये[3]—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः ॥ इति ।

अत एव शब्दस्वरूपवर्णनप्रसङ्गे भगवता महाभाष्यकृता शब्दस्य द्विविधं स्वरूपं प्रदर्शितम्—एकं स्फोटात्मकम्, अपरं ध्वन्यात्मकञ्च । तथाहि—'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः', 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' इति । तथा च यदा ध्वनिरूपः शब्दः, तदा तु 'द्रव्यं नाम तद् गुणो नाम सः' इति भाष्यस्य तात्पर्यमिदम् 'अयं गौः' इति ज्ञाने प्रतिभासमानानां द्रव्यादिरूपाणां गुणानाञ्च न शब्दस्वरूपत्वम्, भिन्नेन्द्रियग्राह्यत्वादित्येव । समाहितञ्चापि तथैव कैयटेन प्रदीपे, विवेचितञ्च उद्द्योते नागेशभट्टेन । तस्योल्लेखः पूर्वमेव कृतः । अतो न कश्चिद् दोषो भवति प्रतियोग्यवृत्तिधर्मस्यैव भेदीयानुयोगितावच्छेदकत्वमित्यादिनियमे ।

अयं भावः—ककुदखुरादयो द्रव्यलक्षणेन लक्षिता न शब्दलक्षणेनेति नीलकपिलकपोतादिरूपस्य गुणस्य गुणलक्षणोपेतत्वम्, न शब्दलक्षणोपेतत्वमिति भाष्यभणितेरभिप्रायः ।

यदा तु स्फोटरूपत्वं शब्दस्य, तदा तु 'द्रव्यं नाम तद् गुणो नाम सः' इति भाष्यस्येदं तात्पर्यं भाति यत् ककुदखुरविषाणिनो द्रव्याणि नीलकपिलकपोतादयश्च

---

१. म० भा० १।१।२ सशब्दकौस्तुभे पृ० ९५ ।

२. म० भा०—२।२।८ ।

३. 'तपरस्तत्कालस्य'—म० भा० १।१।७० ।

गुणाः। शब्दस्तु स्फोटरूपः, न द्रव्यम्, न वा गुणः। 'साक्षी चेता केवलो निर्गुणश्च'[1] इति श्रुतिप्रतिपादितस्य शब्दरूपस्य निर्गुणत्वेन गुणवत्त्वलक्षणद्रव्यत्वाभावान्न द्रव्यरूपत्वं शब्दस्य द्रव्याश्रितत्वलक्षणगुणत्वस्य तत्राविद्यमानत्वेन न शब्दस्य गुणस्वरूपत्वमिति कथञ्चिदपि न ककुदखुरविषाणिनां शब्दस्वरूपत्वमिति भाष्यकारस्य हृदयम्। अत एवाग्रिमभाष्ययोजनापि साधु संगच्छते 'क्रिया नाम सा' इति। तथा च प्रतियोगिनि स्फोटरूपे शब्दात्मकब्रह्मणि अवृत्तिनो अवर्तमानस्य धर्मस्यैव द्रव्यत्वस्य गुणत्वस्य च भेदीयानुयोगिताऽवच्छेदकत्वमिति नियमसङ्गतिः। यतो हि शब्दरूपे ब्रह्मणि द्रव्यत्वं गुणत्वञ्च नास्त्येव। यथा वेदान्तिनो ब्रह्मणः परमार्थतो द्रव्यरूपत्वं गुणरूपत्वं वा नाङ्गीकुर्वन्ति, तथैव वैयाकरणा अपि शब्दतत्त्वविदो नाभ्युपगच्छन्ति शब्दस्य द्रव्यरूपत्वं वा गुणरूपत्वं वेति तत्त्वम्। एतदेव समीचीनं प्रतिपादनम्—यतो हि व्याकरणाध्ययनस्यापि धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु मोक्षरूपपुरुषार्थ एव परमप्रयोजनम्। अत एव भर्तृहरिणा[2]—

इदमाद्यपदस्थानं सिद्धसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥

इत्युक्तम्। तत्र भगवान् भाष्यकारः पतञ्जलिरपि व्याकरणाध्ययनस्य संशयराहित्यरूपं प्रयोजनं प्रतिपादयन् मोक्षरूपप्रयोजनमपि दर्शितवान्। तथाहि—'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति। संशयराहित्यमेव ब्रह्मज्ञानस्यापि फलं वेदान्तशास्त्रेषु प्रतिपादितम्, तथाहि—

भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥[3] इति।

एवञ्च यदेव प्रयोजनं ब्रह्मज्ञानस्य तदेव व्याकरणाध्ययनजन्यज्ञानस्यापीति हेतोर्वेदान्तमतसिद्धब्रह्मस्वरूपमेव वैयाकरणानां मते शब्दस्वरूपमिति प्रतिपद्यामहे। इदं तु बोध्यम्—स्फोटरूपं ब्रह्मभावस्वरूपं भावात्मकतत्त्वम्, न तु शून्यवादिबौद्धमतसिद्धं शून्यमिति। तस्य श्रुतिविरुद्धत्वेन वेदाङ्गव्याकरणप्रतिपाद्यत्वाभावात्।

ननु महता प्रयासेन शब्दस्य द्रव्यरूपत्वाभावस्य गुणरूपत्वाभावस्य प्रतिपादनेऽपि भाष्यतत्त्वविदितश्छायाटीकाकृद्भिः श्रीवैद्यनाथपायगुण्डेमहोदयैः सह विरोधापत्तिः। तथाहि तैर्महोदयैः प्रोक्तम्—'गुणो नामेति द्रव्यकर्मेतरसामान्यवत्त्वात् शब्दस्य गुणत्वेऽपि रूपादीनां गुणत्वयोगेनैव शब्दसाधर्म्यम्, न तु शब्दत्वयोगेन'[4]

---

१. श्वेताश्वतरोपनिषद् ६।११।

२. वा० प० ब्रह्मकाण्डे १६ कारिका।

३. मुण्डकोपनिषदि द्वितीयमुण्डके मन्त्रः ८।

४. छायाटीका पस्पशाह्निकस्था।

इति। अस्य छायावाक्यस्य दर्शनेन स्पष्टं भाति यत् शब्दस्य गुणत्वमेव। अर्थात् शब्दो गुण एव। अन्यथा कथं वदेयुर्भाष्यतत्त्वविदश्छायाकाराः 'द्रव्यकर्मेतरसामान्यवत्त्वाच्छब्दस्य गुणत्वेऽपि' इति। तन्न समीचीनम्, छायाकारभावानवबोधात्। यदि हि छायाकाराणां श्रीवैद्यनाथपायगुण्डेमहोदयानां शब्दस्य गुणत्वमिष्टं स्यात्, तर्हि पारिभाषिकगुणत्वाङ्गीकारेऽपि रूपादीनां गुणत्वयोगेनैव शब्दसाधर्म्यम्, न तु शब्दत्वयोगेनेति कथं वदेयुः? अपरञ्च–छायाकारस्तत्र ध्वनिरूपस्य शब्दस्य गुणत्वमङ्गीकृतवन्तः, न तु स्फोटरूपस्य शब्दस्येति न विरोधः।

वस्तुतस्तु भाष्यमेव योजयितुं व्याख्यातुञ्च प्रवृत्तैस्तैर्महानुभावैः सम्यगेव परिष्कृतम्–'द्रव्यकर्मेतरसामान्यवत्त्वाच्छब्दस्य गुणत्वेऽपि रूपादीनां गुणत्वयोगेनैव शब्दसाधर्म्यम्, न तु शब्दत्वयोगेन' इति। तत्र हि शुक्लनीलकपोतप्रभृतीनां गोशब्दात् प्रतीयमानानां गुणत्वेन शब्दसाधर्म्येऽपि न शब्दत्वेन तेषां शब्दरूपत्वं शक्याङ्गीकारमिति भाष्याभिप्रायं योजयन्तस्तत्रभवन्तः छायाकाराः शब्दस्य गुणत्वाङ्गीकारेऽपि गोशब्दात् प्रतीयमानानां तेषां गुणानां नीलकपिलकपोतप्रभृतीनां शब्दस्वरूपत्वं नास्त्येवेति भाष्यतात्पर्यं जानन्तो नोपेक्ष्याः।

एवञ्च कृत्वाचिन्तान्यायेन प्रवृत्तमिदं छायाकारवचनं परमतरीत्या वा पारिभाषिकं शब्दत्वमङ्गीकृत्य प्रवृत्तं कथमपि शब्दस्य गुणत्वाभावं द्रव्यत्वाभावं वा निराकर्तुं न प्रवृत्तमिति यथादर्शितरीत्या धीधनैरवधेयम्॥ २॥

३ येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।

तत्र पूर्वत्र 'अथ शब्दानुशासनम्' इति वाक्येन प्रतिज्ञातस्य शब्दानुशासनस्य मध्ये, अर्थादनुशासनकर्मत्वेनोक्तस्य शब्दस्य किं स्वरूपमिति प्रश्नः। यतो हि वाक्यार्थज्ञाने पदार्थज्ञानं कारणं भवति। यथा चोक्तम्[1]—

आदौ पदार्थावगतिर्हि कारणं
वाक्यार्थविज्ञानविधौ विधानतः।
तत्त्वे पदार्थौ परमात्मजीवका-
वसीति चैकात्म्यमथानयोर्भवेत्॥ इति।

तत्र हि प्रसङ्गो विद्यते 'तत्त्वमसि' इत्यादिमहावाक्यानामर्थबोधनाय वाक्यघटकप्रत्येकं पदानामर्थबोधनमावश्यकम्। अतः 'तत्' पदस्य 'त्वं' पदस्य चार्थः प्रथमतः सम्पाद्य तदनन्तरं सम्पूर्णवाक्यस्यार्थावबोधः सुशकः। अत एवोच्यतेऽभियुक्तैः—

---

१. अध्यात्मरामायणे रामगीतायामुत्तरकाण्डे २५ तमः श्लोकः।

'घटितज्ञाने घटकज्ञानं कारणम्'[1] इति। तथैव प्रकृतेऽपि शब्दानुशासनं कर्तव्यत्वेन प्रतिज्ञातम्। तत्र शब्दानुशासनमिति पदघटकस्य 'शब्द' इति शब्दस्य योऽर्थः स किं स्वरूप इति विचारावतारः। लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति प्रसिद्धिः। एवञ्च सामान्यतः प्रश्नं विहाय भगवता महाभाष्यकृता न ग्रन्थारम्भः कृतः, प्रत्युत 'केषां शब्दानाम्' इत्यनेन शब्दसामान्यस्यानुशासनानर्हत्वेन 'लौकिकानां वैदिकानाञ्च' इत्यनेनानुशासनीयशब्दनिर्णयः कृतः। तदनन्तरं शब्दस्य स्वरूपनिर्णय आवश्यकः। यतो हि ज्ञाते वस्तुनि लोकाभिनिवेशो दृश्यते, नाज्ञाते। एवञ्च शब्दस्य स्वरूपनिर्णयोत्तरमेव तत्राध्ययनाध्यापनाय प्रवर्तेरन् लोका इति हेतोः शब्दस्वरूपविषयकः प्रश्नोऽवतारितः।

तत्रापि विशेषोऽयं द्रष्टव्यो यद् भाष्यकृता यद्यपि सामान्यतः प्रश्नः कर्तव्यो यत् 'कः शब्दः' इति। किन्तु तथा नोपस्थाप्य प्रश्नं पृच्छन्ति–'अथ गौरित्यत्र कः शब्दः' इति। अत्र किं रहस्यमिति विचिकित्सायामिदमेव गन्तव्यं यत्–'निर्विशेषं न सामान्यम्' इति न्यायेन सामान्यविषयकोऽपि कोऽपि प्रश्नो विशेषमन्तरा न पर्यवसन्नः स्यादिति प्रकृताकारमेव 'अथ गौरित्यत्र कः शब्दः' इति प्रश्नः कृतः। अयञ्च ज्ञानाकारोल्लेखः, अर्थाद् गौरिति ज्ञाने भासमानेषु कः शब्दशब्देन ग्राह्य इति। तदनन्तरमनेकान् कल्पान् प्रदर्श्य नेत्याह 'द्रव्यं नाम तद् गुणो नाम सः, इत्यादिना ते सर्वे पक्षा निराकृताः। तदनन्तरं महाभाष्यकृता सिद्धान्तत उत्तरत्वेन प्रतिपाद्यमानयोर्द्वयोर्लक्षणयोर्मध्ये प्रथममिदं लक्षणमाह–'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इति।

वैयाकरणानां मते शब्दो द्विविधः—स्फोटरूपो ध्वनिरूपश्च। तत्र स्फोटस्यैव मुख्यशब्दत्वाद् ध्वनेश्च तदभिव्यञ्जकत्वेन गौणत्वात् प्रथमतोऽस्य स्फोटात्मनः शब्दस्य स्वरूपं भगवता महाभाष्यकृता प्रोक्तम्। तदनन्तरञ्च ध्वनिरूपशब्दस्य। शब्दस्य स्फोटस्वरूपत्वे ध्वनिरूपत्वे च भाष्यं प्रमाणम्, तथाहि—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥[2] इति।

तत्र कैयटः-ध्वनिः स्फोटश्चेति व्यङ्ग्यो व्यञ्जकश्चेत्यर्थः। एवञ्च शब्दानां द्वैविध्यमाकलय्य लक्षणद्वयं शब्दस्वरूपनिरूपणाय प्रणीतमित्यवधेयम्।

स्फोटस्य च स्फुटत्यर्थो यस्मादसौ स्फोटः, स्फुट्यते व्यज्यते (ध्वनिना) इति स्फोट इति द्विधा व्युत्पत्तिः। स च स्फोटः केवलं वैयाकरणैरेव कल्पित इति कदापि

---

१. उपनिषद्वाक्यं महावाक्यत्वेन प्रसिद्धम्। छान्दोग्य० अ० ६, खण्ड० १०, ब्रा० ३०, पृ० ५३० ।

२. म० भा०—१।१।९।६९ ।

न भ्रमितव्यम्, अन्यत्रापि सद्ग्रन्थेषु बहुत्रोपलम्भात्। यद्यपि वैयाकरणमतसिद्धत्वेन स्फोटस्य प्रसिद्धिः, तथापि न केवलं तैरेवादृतत्वं स्फोटस्य। तथाहि—

शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक्।
येन वाग् व्यज्यते यस्य व्यक्तिराकाश आत्मनः॥[१] इति।

इदानीं प्रचलदष्टसु व्याकरणेषु पाणिनीयव्याकरणमेव मुख्यतां बिभर्तीत्यत्र न कस्यापि विमतिः। स्फोटे च भगवतः पाणिनेरिदं सूत्रं प्रमाणम्–'अवङ् स्फोटायनस्य'[२] इति। स्फोटोऽयनं परायणं यस्य स स्फोटप्रतिपादनपरो वैयाकरणः। तस्य स्फोटायनस्य[३]। एवमेव 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'[४] इति सूत्रमपि स्फोटस्य वाचकत्वे प्रमाणम्। अन्यथा प्रत्येकं वर्णानामुच्चरितप्रध्वंसित्वादर्थविषयकबोधजनकत्वरूपाया शक्तेरनाश्रयत्वे सूत्रीयोद्देश्यताया अप्रसिद्ध्या सूत्राणाञ्च स्वीयोद्देश्यतावच्छेदकावच्छेदेने प्रवृत्तेरिदं सूत्रं व्यर्थं स्यात्। न च तदिष्टम्, 'वर्णेनाप्यनर्थकेन न भवितव्यं किमियता सूत्रेण'[५] इति। 'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्'[६] इति भाष्यवचनाच्च दृष्टादृष्टरूपयोः फलयोरन्यतरस्यावश्यंभावित्वान्नास्य सूत्रस्य वैयर्थ्ये कथमपीष्टापत्तेरवसरः। इत्थञ्च निष्कृष्यकृते विचारे सूत्रमिदं स्फोटस्यैव वाचकत्वे प्रामाण्यमुपस्थापयति, वैयर्थ्यमूलकार्थापत्तेः सर्वबलवत्त्वात्। तथा चोक्तम्[७]–

अन्यथाऽनुपपत्तिश्चेदस्ति वस्तुप्रसाधिका।
पिनष्टि दृष्टवैमत्यं सर्ववस्तुबलाधिका॥ इति।

अपरञ्च स्फोटस्य वाचकत्वस्वीकारे एव वर्णा अर्थवन्तोऽनर्थकाश्च इति महाभाष्यकारस्य पतञ्जलेर्व्यवस्था समीचीना स्यात्। यतो हि यत्र पदस्फोटो वाचको यस्याभिव्यञ्जकं पदम्। तत्राभिव्यञ्जकस्य पदस्य घटकाये वर्णास्तेऽनर्थकाः, यस्य समुदायोऽर्थवान् तस्यैकदेशोऽनर्थक इत्यनुभवात्। यथा रामशब्दघटका ये वर्णास्ते प्रत्येकं न वाचकाः। अत एव तेभ्यः प्रत्येकवर्णेभ्यो नार्थवत्त्वात् प्रातिपदिकत्वेन सुबाद्युत्पत्तिः। यत्र च केवलमेकमेव वर्णस्वरूपं वाचकम्, यथा 'इण्' धातोरनुबन्धविनिर्मुक्तस्य केवलस्येकारस्य गतिरूपार्थप्रतिपादकत्वेन 'भूवादयो धातवः'[८] इत्यनेन धातुसंज्ञायां सत्यां पुनर्लकारादयः प्रत्ययास्ततश्च एति, इतः इत्यादीनि रूपाणि निष्पद्यन्ते।

१. श्रीमद्भागवतमहापुराणे १२।६।४० ।
२. अष्टाध्यायी ६।१।१२३ ।
३. तत्त्वबोधिनीटीका सिद्धान्तकौमुद्याः ।
४. पाणिनीयसूत्रम्—१।२।४५ ।
५. महाभाष्यम्—१।१।१ ।
६. ,, ,,
७. खण्डनखण्डखाद्ये शारदायुते प्रथमपरिच्छेदे पृ० ६३ ।
८. पा० सू० १।२४५ ।

एवञ्च वर्णस्टोटे पदस्फोटे च सूत्राणि भाष्याणि च संक्षेपतः प्रमाणत्वेन निर्दिष्टानि। साम्प्रतं वैयाकरणमते वाक्यस्फोटस्य सिद्धान्तितत्वान्मुख्यत्वात् तत्र प्रमाणचिन्ता क्रियते। वाक्यस्फोटस्य मुख्यत्वं वैयाकरणैरत एव मन्यते यतो हि परं प्रति बुबोधयिषितार्थप्रतिपादनाय शब्दप्रयोगः क्रियते। निराकाङ्क्षप्रतिपत्तिश्च वाक्यत एव भवतीति सार्वजनीनोऽनुभवः। यत्र कुत्रापि वाक्यैकदेशप्रयोगेणापि भवति लोकेऽर्थ-प्रतीतिः, तत्रापि लाघवप्रियत्वाल्लोकस्य वाक्यैकदेशप्रयोगेऽपि पदान्तरसमभिव्याहरेण वाक्येनैव निराकाङ्क्षबोधान्नानुपपत्तिः। यत्र हि 'पिधेहि' इत्युच्यते, तत्रापि द्वार-मित्यादिपदानुषङ्गात् पूर्णवाक्ययोजनयाऽर्थप्रतीतिरित्यहो वाक्यबोधकत्वे सामर्थ्यम्। वाक्यस्य वाचकत्वे स्फोटत्वे च 'कृत्तद्धितसमासाश्च'[1] इति सूत्रं प्रमाणम्। सूत्रमिदं नियमार्थम्, भाष्यप्रामाण्यात्। यद्यपि—'विधिनियमसम्भवे विधिरेव ज्यायान्'[2] इति वर्तते कश्चन प्रामाणिको नियमः, तथापि भाष्यप्रामाण्यादत्र नियमार्थत्वमेवाङ्गी-चक्रुर्वैयाकरणाः, यथोत्तरं मुनीनां प्रामाण्यात्। एवञ्च समासस्यैव प्रातिपदिकत्वाद् वाक्यस्य प्रातिपदिकत्वं व्यावृत्तं भवति। तत्र केवलस्य समासस्यैव प्रातिपदिकत्वे स्वीकृते रामादिशब्दानां समासानां कथङ्कारं प्रातिपदिकत्वं स्यादिति हेतोर्नियमाकार ईदृशः क्रियते—'पूर्वोत्तरपदघटितस्य प्रातिपदिकसंज्ञा चेत्, तर्हि समासस्यैव'[3] इति। तेन नियमानाक्रान्तत्वाद् रामादिशब्दानां प्रातिपदिकत्वं सिध्यति। तस्य पूर्वोत्तर-पदघटितत्वाभावात्। विस्तरस्तु नेह प्रतन्यतेऽप्रस्तुतप्रसक्तेः।

इत्थञ्च वाक्यस्य या प्रातिपदिकसंज्ञा व्यावर्त्यते नियमेन तदेव प्रमाणं वाक्यस्य वाचकत्वे स्फोटत्वे चेति प्रतिभाति।

'युष्मदस्मद्भ्यां ङसोऽश्'[4] इति सूत्रेऽशः शित्करणं ज्ञापकं भवति—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशाधिकारे हि नित्यत्वं नोपपद्यते॥[5] इति।

अत्र पदशब्देन सुबन्तमात्रं तिङन्तं वा न गृह्यते, किन्तु प्रकृतिप्रत्ययादिकार्य-मात्रमेव गृह्यते। यद्यपि सर्वाधिकारेऽपि न नित्यत्वरक्षणप्रत्याशा, यथा पयसो दधि-भावमापन्नस्य न नित्यत्वम्, तथापि वचनेऽत्रैकदेशशब्द उपलक्षणं विकारमात्रस्य, अर्थाद् विकारे सति शब्दानां नित्यत्वं न सुरक्षितं स्यादिति हेतोर्न हि शब्देषु स्थान्यादेशभावः,

---

१. पा० सू० १।२।४६।
२. परिभाषेन्दुशेखरः १०९ परि०।
३. वैयाकरणसिद्धान्तकौमुदी, अज० पुं० प्र०।
४. पा० सू० ७।१।२७।
५. प्रौढमनोरमा हलन्तपुंलिङ्गप्र०, म० भा० 'दाधाघ्वदाप्' १।१।२०।

प्रत्युत बुद्धावेवेति भाष्यहृदयम् । अत एव भाष्यव्याख्याने परमविदुषा महावैयाकरणेन भाष्यतत्त्वविदा कैयटेन प्रतिपादितम्—'सर्वे'[1] इति आगमा अपीत्यर्थः । सर्वपदादेशत इति पदशब्देन न सुप्तिङन्तं गृह्यते, अपि तु कार्यं प्रतिपद्यमानं प्रतीयमानं प्रकृतिप्रत्ययादितत्सर्वं पदम् । एकदेशविकारे हीति । यद्यपि सर्वविकारेऽप्यनित्यत्वम्, यथा पिठरस्थस्य पयसः पाकादिषु, तथापि विकाराभावप्रतिपादनपरमेतत् । बुद्धिविपरिणाममात्रं स्थान्यादेशागमागमिभावद्वारेण क्रियते इत्यर्थः । यद्येवं दाशब्दस्य दाप्शब्द आदेशः क्रियते, तदा दाशब्दस्यानर्थक्यप्रसङ्गः । नैष दोषः, नित्यतासमर्थनायादेशपक्ष आश्रितः । प्रक्रियायां तु कल्पितायामागमागमिभाव एव । अन्यथाऽऽगमादेशयोर्भेदेन व्यवहारो न स्यादिति ।

वार्त्तिककृन्मतेऽपि स्फोटवादः प्रसिद्धः । 'सिद्धे शब्दार्थसम्बन्धे'[2] इति वार्त्तिके शब्दस्य सिद्धत्वं नित्यत्वं ब्रुवता श्रीकात्यायनेनापि स्फोटात्मा शब्दः सुष्टु स्वीकृत एव । अत्र हि कात्यायनवार्त्तिके शब्दार्थसम्बन्धपदघटिते यः शब्दशब्दः स स्फोटरूपेऽर्थे एव, अन्यथा शब्दस्य नित्यत्वरूपं सिद्धत्वं कथं स्यात् ?

अपराण्यपि वार्त्तिककृतां वाक्यानि वार्त्तिकरूपाणि शब्दस्य स्फोटस्वरूपत्वे प्रमाणतां भजमानानि शक्यदर्शनानि। तथाहि—'स्वं रूपं शब्दस्याशब्दसंज्ञाया'[3] इति सूत्रे 'शब्देनार्थगतेरर्थस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थस्वरूपवचनम्', 'न वा शब्दपूर्वको इत्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिः' इति वार्त्तिकद्वयं विदधता श्रीमता कात्यायनेन स्फोटवादः सम्यक् समर्थितः। अन्यथा स्फोटातिरिक्तस्य शब्दस्याभिप्रेतत्वे तत्रार्थबोधकत्वासम्मतेनोक्तवार्त्तिकयोरनुत्थानमेव स्यात् । एवमेव बहुत्र वार्त्तिककृता स्फोटात्मा शब्दः समर्थितः ।

किं बहुना, 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इति वाक्येन भगवता महाभाष्यकृता यादृशं शब्दस्य स्फोटस्वरूपमुपदर्शितं तदन्यैरपि महर्षिभिः स्वीकृतम्, यथा महर्षिरौदुम्बरायणो वार्ताक्षश्च स्फुटं स्फोटं समर्थयतः। यथा प्रतिपादितं वैयाकरणशिरोमणिना दार्शनिकेन श्रीभर्तृहरिणा[4]—

वाक्यस्य बुद्धौ नित्यत्वमर्थयोगं च लौकिकम् ।
दृष्ट्वा चतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ ॥ इति ।

वाक्यस्फोटसमर्थकस्य वाक्यस्य स्फोटसमर्थकत्वं वर्तत एव। यथा भवति किलाम्रवृक्षोऽपि वृक्ष एव, ब्राह्मणानां ग्रामोऽपि मनुष्याणां ग्राम इत्येवमेवात्रापि दृष्टिर्विधेया ।

---

१. दाधाघ्वदाप् १।१।२० ।
२. म० भा० १।१।४७ ।
३. पा० सू० १।१।६८ ।
४. वाक्यपदीम् २।३४२ ।

ब्रह्मसूत्रं व्याचक्षाणैः श्रीमद्भिर्भगवत्पादैः शङ्कराचार्यैरपि स्फोटात्मा शब्दो हर्षेण समर्थितः । तत्र हि वर्णानामुत्पन्नप्रध्वंसित्वे तेभ्यो देवादीनां सृष्टिरनुपपन्ना स्यात् । किञ्च, पूर्ववदेवार्थावगतिरपि ततो न सम्भवतीत्यादिकं विमृश्य 'स्फोट-रूपनित्यशब्दात् क्रियाकारकफललक्षणसर्वं जगदभिधेयभूतं प्रभवति'[1] इत्यर्थकमुक्तम् । कृतश्च तत्र शाङ्करभाष्ये भामत्यां कल्पतरौ परिमले च महान् विचारः । नात्र सर्वं प्रदर्श्यते विस्तरभयादप्रस्तुतप्रस्तावाच्च ।

एवमेव योगसूत्रभाष्यविवरणेऽपि–'यथा शिबिकोद्वाहनादि अनेकसाध्यमेकस्यापि वैकल्ये न सम्पद्यते, तथैवार्थस्य प्रतिपादनमप्यनेकसाध्यत्वादन्यतमेन वर्णानामशक्य-मिति पदस्यैव व्यञ्जितारो वर्णा इति स्थितम्'[2] इत्युक्तम् । एवञ्च भाष्यवचनेन प्रतिपादितस्य स्फोटात्मनः शब्दस्य प्रतिपादने दार्शनिकवचसामभिनिवेशो दृश्यमानो नूनमेतस्य स्फोटात्मनः शब्दस्य सर्वप्रमाणसिद्धत्वमिति शक्यं निर्भयं वक्तुम् ।

यद्यपि पूर्वमीमांसादर्शने वर्णस्फोट एव स्वीकृतः, यस्य युक्तायुक्तत्वमत्र विस्तर-भयाद्विवेचयितुं न कामयेऽन्यत्र कृतत्वात्तत्रैव तज्जिज्ञासुभिर्द्रष्टव्यत्वात्, तथापि स्फोटस्तु स्वीकृत एवांशतः । सर्वथा स्फोटस्वीकारस्तु न मीमांसकानां मतेऽपि कथं तैः पूर्वमीमांसकैर्वर्णस्फोटः स्वीकृत इति संक्षेपेणेह प्रदर्श्यते कतिपयैरल्पैरेव शब्दैः । तथा हि–'सत्त्वान्तरे च यौगपद्यात्'[3] इति सूत्रं व्याचक्षाणेन श्लोकवार्त्तिककृता 'नानादेशावगम्य-त्वाद् युगपत्तुल्यबुद्धिभिः'[4] इत्याद्युक्तम् । तत्रैवाग्रिमश्लोके उत्तरार्द्धरूपेण–'अविभुत्वे हि युगपन्नैको नावगम्यते'[5] इत्युक्तम् । तेन नैकस्य युगपदेव नानाधिकारणेषूपलम्भेन वर्णात्मकशब्दस्य विभुत्वं सिद्धत्येव । पुनरग्रे–'प्रायुक्तेन विभुत्वेन व्योमवच्चास्य नित्यता'[6] इति कथनेनापि तस्य विभुत्वनित्यत्वे प्रतीयमाने वर्णस्य स्फोटत्वमवगम्यत एव । मीमांसादर्शनदर्शनेन वर्णस्फोटस्य स्वीकारादंशतः स्वीकृत एव स्फोटवाद इत्यलमतिप्रसक्तेन वचोविन्यासेन ।

स्फोटस्यानङ्गीकारपक्षकक्षीकृतवन्तोऽनेके पक्षा मतमतान्तराणि च प्रसिद्धानि । तेषां का युक्तयः, कथञ्च ताभिर्युक्तिभिः प्रसिद्धस्यावश्यमङ्गीकरणीय-यस्य स्फोटस्य निरासो भवति, कया च रीत्या पुनर्वैयाकरणैर्हृदयस्पृग्भिः समाधान-सुधाधाराप्रवाहैस्ते पक्षा आक्षेपाश्च विलीनीक्रियन्ते इति द्रष्टुं कुतूहलस्य विदुषो भाष्येण तेन विदुषां नूनमवलोकनीयं व्यपगतदर्पेण द्रष्टव्यो हि ग्रन्थः पाणिनीय-

१. ब्रह्मसूत्रे १।३।२।२८ ।
२. योगसूत्रभाष्ये वि० २८–३७ ।
३. मीमांसासूत्रम् १।१।९ ।
४–५. श्लोकवार्त्तिकम् ६।१० ।
६. श्लोकवार्त्तिके ६।३५०

व्याकरणे प्रमाणसमीक्षा इति नामा। तत्र हि पुष्कलैः प्रमाणप्रकारैर्महतीभिश्च युक्तिभिर्निराकृतोऽन्यापादितदोषव्यूहः पूर्वपूर्वपक्षोपपादनपूर्वकम्। स हि ग्रन्थो निर्मितो महावैयाकरणैरासिद्धान्तकौमुदीमहाभाष्यपर्यन्तात्यन्ताभ्यस्तव्याकरणग्रन्थैरनेकदर्शन - निष्णातैः, अधुना वैयाकरणजगति जेगीयमानयशस्कैरहर्निशमध्याप्यमानानेकच्छात्रविद्वत्कदम्बैर्मम गुरुचरणैः डॉ० श्रीरामप्रसादत्रिपाठिभिः प्राचीनव्याकरणदर्शनागमविभागाध्यक्षैर्वाराणसेयसंस्कृतविश्वविद्यालये।

अत्रेदं द्रष्टव्यम्—शब्दस्य शक्तिग्राहकेषु व्याकरणोपमानकोशाप्तवाक्यव्यवहारेषु व्यवहार एव मुख्यः शक्तिग्राहकः। तत्र चोच्चरितस्यैव शब्दस्य शाब्दबोधजनकत्वम्, नानुच्चरितस्य; तथैव लोके दर्शनात्। शब्दस्य च स्वरूपविषये नित्यत्वानित्यत्वयोश्च सन्ति वादिनां विप्रतिपत्तयः। तथा च प्राह श्रीभर्तृहरिः[1]—

दैवीवाग् व्याकीर्णेयमशक्तैरभिधातृभिः।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः॥ इति।

शब्दस्य नित्यत्वं ब्रह्मस्वरूपत्वञ्च वाक्यपदीये प्रथमश्लोके एव प्रतिपादितं हरिणा। तथाहि—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[2] इति।
नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥[3] इति।

शब्दस्य ब्रह्मरूपत्वे निखिलोपनिषत्सारभूता साक्षाद् भगवन्मुखारविन्दादर्जुनं निमित्तीकृत्य निखिलभवतापत्रस्तप्राणिसमुद्धारोद्देश्येन निःसृता श्रीमद्भगवद्गीताऽपि मानम्। तथाहि—

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते॥[4] इति।

यदि शब्दस्य ब्रह्मरूपत्वं न स्यात्, तर्हि कथङ्कारमेवं प्रवदेद् भगवान् श्रीकृष्णः। नहि साधारणमतिरपि जनो ब्रूते—घटः पट इति। अत्र चोच्यते 'शब्दब्रह्म' इति। अतो निश्चीयते यत् स्फोटात्मा शब्दो ब्रह्मेति।

तत्र शब्दस्यानित्यत्ववादिनो नैयायिका नष्टानष्टानां शब्दानां पूर्वोत्तरभावेन 'घटः', 'पटः' इत्याद्यानुपूर्वीसंघटनाद्यभावेन शब्देषु शक्त्याश्रयत्वानुपपत्तिभिया

१. वाक्यपदीयब्रह्मकाण्डे १५५ कारिका।
२. वाक्यपदीयब्रह्मकाण्डे १ कारिका।
३. वाक्यपदीयब्रह्मकाण्डे कारिका।
४. श्रीमद्भगवद्गीता— ६।४४।

पूर्वपूर्ववर्णध्वंसजन्योत्तरोत्तरसंस्कारसध्रीचीनचरमवर्णेन स्मृतशब्दानामेव वाचकत्वमीहन्ते।

वैयाकरणानां मते तु लौकिकपारमार्थिकभेदेन शब्दद्वैविध्यान्नैयायिकानां मतं स्थूलं प्रतिभाति। तन्मतमपि वैयाकरणानामविरुद्धं ध्वन्यभिप्रायेण। ध्वनिमेव नष्टोत्पन्नं मत्वा नैयायिकाः शब्दानित्यत्वं सङ्गिरन्ते। न च तत्र कश्चन व्याकोपो वैयाकरणानाम्। यथा हि वेदान्तिनो वस्तुद्वये ज्ञानशब्दं प्रयुञ्जते। मुख्यार्थस्तु ज्ञानशब्दस्य चैतन्यमात्रम्, 'सत्यं ज्ञानमनन्तं ब्रह्म'[1] इति श्रुतेः। गौणस्तु ज्ञानाभिव्यञ्जकवृत्तिरर्थो ज्ञानशब्दस्य। तथा चोक्तं वेदान्तपरिभाषायाम्—'वृत्तौ ज्ञानत्वोपचारात्' इति। तद्वाक्यं विवरणस्थं परिभाषाकृता प्रकरणानुसारेणोद्धृतम्। नैयायिकप्रभृतयस्तु वृत्तिमेव मुख्यं ज्ञानं मत्वा तस्य न स्वप्रकाशत्वम्, न वा नित्यत्वमिति विवदमाना दरीदृश्यन्ते। किन्तु न तत्र वेदान्तिनां व्याकोपो भवति, तत्र तथात्वस्यैवेष्टत्वात्। वेदान्तिमतेऽपि वृत्तिर्न स्वप्रकाशा साक्षिभास्यत्वात्; न वा नित्या, अन्तःकरणपरिणामत्वेन कार्यत्वादनित्यत्वध्रौव्यात्। तथैव प्रकृतेऽपि ध्वनिरूपं शब्दं मत्वा ये केचनानित्यत्वं सङ्गिरन्ते शब्दानाम्, तत्र न वैयाकरणा समुद्विजन्ते, किन्तु स्फोटरूपमेव शब्दं नित्यमाद्रियन्ते। अत एव भगवता महाभाष्यकृता शब्दाभिव्यञ्जकस्य ध्वनेरपि शब्दत्वेन लोके प्रसिद्धत्वादेकमतिरिक्तं लक्षणं प्रणीतम्—'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते'[2] इति, स्फोटात्मानञ्च मुख्यं शब्दमभिप्रेत्य 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'[3] इति च। यतो हि अभिव्यञ्जकेऽपि स शब्दो लोके प्रयुज्यमानो दृष्टो योऽभिव्यङ्ग्ये प्रयोजनीयः। यथा ज्ञानाभिव्यञ्जिकायामन्तःकरणवृत्तौ ज्ञानशब्दप्रयोगमाञ्जस्येन कुर्वन्ति लोकाः, तथैव मुख्यस्फोटात्मानं शब्दं बुबोधयितुं समर्थं शब्दशब्दं ध्वनिवाचकत्वेन प्रयुञ्जते लोका इति हेतोर्लक्षणद्वयी प्रणीता महालोकज्ञेन पतञ्जलिना महर्षिणा। तथाहि 'एकमेवाद्वितीयं ब्रह्म'[4], 'नेह नानास्ति किञ्चन'[5], 'मृत्योः स मृत्युमाप्नोति य नानेव पश्यति'[6] इति श्रुतिकदम्बप्रमाणेन सजातीयविजातीयस्वगतभेदशून्यमद्वितीयं स्वप्रकाशं नित्यशुद्धबुद्धस्वभावमेकमेव ब्रह्मेति ब्रह्मवादिनोऽद्वैतिनः समुद्घोषयन्ति, तर्कद्वारा प्रतिष्ठापयन्ति स्वमतं श्रुतिसम्मतम्। तथैव वैयाकरणा ध्वन्यभिव्यङ्ग्यं स्फोटमेकमेव मन्यन्ते। प्रक्रियायां तस्याष्टविधत्वं कल्पितमवगन्तव्यम्, न तु मुख्यम्। यथा

---

१. तैत्तिरीयोपनिषद्— २।१।१

२. महाभाष्यं पस्पशाह्निके।

३. महाभाष्यं पस्पशाह्निके।

४. छान्दोग्योपनिषद् ६।२।१।

५. कठ० २।४।११।

६. कठ० २।४।१०।

हि लोके मुख्यचन्द्रदिदर्शयिषया शाखाद्वारा 'शाखायां चन्द्रः' इत्यादिरीतिमनुसृत्य लोके व्यवहारः, तथैव शाखाचन्द्रन्यायेनारुन्धतीवसिष्ठन्यायेन च ब्रह्मस्वरूपप्रतिपत्त्यर्थमनेकत्वं कल्पितमित्यवधेयम्। स्फोटस्यैकत्वं निरवच्छिन्नत्वञ्च साभिनिवेशं सयुक्ति प्रतिपादितं हरिणा। तथाहि—

> एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
> अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥[1] इति।

अत एव 'एकः शब्दः सम्यग् ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति, मातापितरौ च महीयेते'[2] इति प्रमाणिकं वचः। महाभिनिवेशोऽत्र वैयाकरणानाम्, यतो हि ते शब्दतत्त्वविदः। शब्दस्य याथार्थ्यञ्च व्याकरणादेव प्रतीयते। तथा चोक्तं हरिणा[3]—

> अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
> तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥ इति।

'एकः शब्दः सम्यग् ज्ञातः' इत्यत्र प्रयुक्तस्य 'एकः' इत्यस्य रहस्यमिदमेव वर्तते यज्ज्ञातव्यस्तु वर्तते एक एव शब्दः स्फोटात्मा, यस्य ज्ञानेन मोक्षरूपः परमपुरुषार्थः सिद्ध्यति। अनेकत्वं तु तस्य ध्वनिभेदादिति। अत एव श्रुत्या सहैकमत्यं भवति 'एकमेवाद्वितीयं ब्रह्म' इत्यनया। यथा हि—'आत्मा वा अरे द्रष्टव्यः, श्रोतव्यः, मन्तव्यः, निदिध्यासितव्यः'[4] इत्यत्र वाशब्दस्य एवकारार्थत्वम्। अर्थाद् द्रष्टव्यश्चेत्, तर्हि आत्मैव; तदतिरिक्तस्य सर्वस्य कल्पितत्वेन शुक्तौ रजतमिव तद्दर्शनं नेष्टकरम् 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'[5] इति श्रुतेः। एवमेव वेदितव्यश्चेत्, तर्हि एक एव शब्दः स्फोटात्मेति तद्वाक्यस्थस्यैकशब्दस्य स्वारस्यम्। स चैकोऽपि स्फोटात्मा शब्दो ध्वनिरूपोपाधिभेदेनानेक इव प्रतिभाति। यथाद्वैतमते निरस्तसमस्तभेदमद्वितीयं सर्वद्वैताभावमपि ब्रह्मानाद्यनिर्वचनीयाविद्यावशाद् द्वैतमिव भवति। यथा चाह श्रुतिः—'यदा द्वैतमिव भवति, तदा इतरः इतरं पश्यति। यत्र त्वात्मैव सर्वमभूत्ः, तदा केन कं पश्येत'[6], अर्थाद् द्वैतं तु त्रिकालेऽपि नास्त्येव, प्रत्युत द्वैतमिव भवति ब्रह्म। एवमेव स्फोटात्मा शब्द एक एवानेक इव भाति ध्वनिभेदाद् ध्वनिगतद्रुतादिधर्मभेदाच्च। प्रतिपादितश्चायं विषयो वाक्यपदीये भर्तृहरिणा। तथाहि—

---

१. वाक्यपदीयब्रह्मकाण्डे कारिका २।

२. महाभाष्ये पस्पशा०।

३. वा० प० ब्र० का० १३।

४. बृ० उपनिषदि—२।४।५।

५. कठ० उपनिषदि—२।१०।

६. बृ० उपनिषदि—४।५।१५।

स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।
ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥[1]

इत्यादिना ।

एतेन प्रथमेन शब्दलक्षणेन लक्ष्यभूतस्य मुखशब्दस्य स्फोटात्मनोऽभिव्यञ्जको ध्वनिः । स द्विविधः—प्राकृतो विकृतश्च । तत्र शब्दस्य स्वरूपग्रहणे प्राकृतो ध्वनिर्हेतुः । तत ऊर्ध्वं तेषु शब्देषु द्रुतविलम्बितादिवृत्तिग्रहणे वैकृतध्वनिः कारणम् । तदुक्तं हरिणा[2]—

वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥ इति ।

ग्राहकस्य ध्वनेर्भेदेन ग्राह्यस्य (अभिव्यङ्ग्यस्य) स्फोटस्यापि भिन्नत्वं मा प्रतिपद्यन्तां लोका इति हेतोर्महावैयाकरणेन शब्दतत्त्वविदा हरिणा पुनः पुनः स्फोटात्मनो ब्रह्मरूपस्य मुख्यशब्दस्यैकत्वं निर्दिष्टम् । तथाहि—

शब्दस्योद्ध्र्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥[3] इति ।

इदानीमिदमालोच्यते यच्छब्दस्य द्वैविध्यं यदि स्यात्, तदा लक्षणद्वयं प्रणेतव्यं विचारश्च तत्र कर्तव्यः, किन्तु ध्वनिरूपस्य लोकप्रसिद्धस्य मान्यत्वात् तदतिरिक्तस्य गगनकुसुमायमानस्य स्फोटात्मनः शब्दस्य सत्तैव किमर्थमङ्गीकर्तव्येति ।

तत्र नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः किन्तु हेतोरुपन्यासेनेति मनसिकृत्वा महाभाष्यविवरणविधात्रा महावैयाकरणेन कैयटेन एतद्वाक्यविवरणे या युक्तिः प्रदर्शिता, तामुपस्थाप्यानुपूर्वीशः पुनरहं स्वमतेरनुसारं वाक्यपदीयकारोक्तेरनुसारेण समागतामापत्तिमिमामपाकरिष्ये । कैयटोक्तिरधुना स्फोटाङ्गीकारे हेतोरुपास्थानायोपस्थाप्यते । तथाहि—

"वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति, वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात् । आनर्थक्ये प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात्, अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां च वाचकत्वे 'सरो रसः' इत्यादावर्थप्रतिपत्त्यबिशेषप्रसङ्गात् तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः[4]" इति ।

---

१. वा० प० ब्र० का० ७५ ।

२. वा० प० ब्र० का०—७७ ।

३. वा० प० ब्र० का०—७८ ।

४. महाभाष्ये पस्पशाह्निके—येनोच्चारितेनेत्यादिलक्षणव्याख्याने कैयटे ।

वाक्यपदीयेऽपि[1]—

प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥
नादैराहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ इति ।

इत्थं तत्रैव भर्तृहरिणा "अथ शब्दानुशासनम्" इति भाष्यस्थप्रतिज्ञावचनेन कीदृशः शब्दोऽनुशासनीय इत्याकाङ्क्षायां शब्दस्य स्वरूपं प्रोक्तम्[2]—

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥ इति ।

यद्यपि भूषणकारिकाव्याख्यायां वैयाकरणभूषणसारकृता श्रीकौण्डभट्टेन विदुषा स्फोटप्रतिपादककैयटयुक्तिखण्डनाय वैयाकरणभूषणसारे तदुक्तीरुल्लिख्येत्थमुक्तम्—

"यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थापत्तिः, समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसम्भाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कारैर्णैकदा समूहालम्बनरूपसकलज्ञामसम्भवस्तु सरोरसोजराराजनदीदीना साधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः, तत् तुच्छम्; पदज्ञानस्योपपादितत्वाद् वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पग्रासाच्च"[3] इति ।

तत्तु भूषणकारस्यैव कृते भूषणम्, न तु विचारे क्रियमाणे। यतो ह्यनुभवक्रमेणैव वर्णाः स्मृतिगोचरा भवेयुरिति नियमाभावेन जराराजादीनामपि एकार्थप्रतीत्यापत्तेः । प्रोक्तञ्चाभियुक्तैः—

नानुभूतिक्रमाद् वर्णाः क्रमिकाः स्मृतिगोचराः ।
गोचरोऽनुभवो न स्यात् तत्क्रमस्ते कुतः पुनः ॥ इति ।

विकल्पग्रासाच्चेति यदुक्तं तदपि न युक्तम्, "येन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" इति भाष्यस्य व्याख्यायामुद्द्योते नागेशभट्टेनैव तदापत्तेः समाधानस्य कृतत्वात् ।

---

१. वा० प० ब्र० का०—८४-८५ ।

२. वा० प० ब्र० का० ४४ ।

३. वैयाकरणभूषणसारे स्फोटनिर्णयप्रकरणे ।

तथाहि—

"मम तु यथा पटे नानारञ्जकद्रव्याहितनानावर्णोपरागः क्रमेण, तथैकस्मिन्नेव तस्मिन्नुच्चारणक्रमेण क्रमवानेव तत्तद्वर्णस्वरूपानुरागः, स च स्थिरः, तस्य च मनसा ग्रहणमिति न दोषः"[१] इति।

न दोष इत्यस्य सरोरसोजराराजनदीदीनादिशब्देभ्यो नाविशेषरूपेणार्थप्रतीतिरूपो दोष इत्यर्थः।

इत्थञ्च सम्यग्रूपेणोपक्रमोपसंहारन्यायेन सर्वतः कृते शास्त्रसमालोडने स्फोटप्रसाधनप्रकारे भवतु नामाचार्याणां मतभेदः, किन्तु स्फोटविषये तु न कोऽपि विरुद्धः।

अनेन रूपेण व्याकरणशस्त्रसरोवरे कृतेऽवगाहने स्फोटध्वनिभेदेन शब्दस्य द्वैविध्यं सिद्ध्यति। तत्र स्फोटाभिप्रायेण प्रथममिदं महाभाष्यकारीयलक्षणं ध्वन्यभिप्रायेण च द्वितीयमिति तद्वाक्यव्याख्याने विशेषं वक्तव्यं व्यक्तं करिष्यामि।

स्फोटस्यैतेन लक्षणेन स्पष्टतयैतत्स्फोटस्वरूपमभिव्यक्तं भवति। तथाहि—ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणमिति येनोच्चारितेन इत्यस्य 'प्रकाशितेन' इत्यर्थस्य कैयटेन कृतत्वाद् विशेषणांशस्य "सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति" इत्यनेन अर्थविषयकबोधजनकत्वरूपस्य विशेषणांशस्य चोपलब्धेः परिष्कारोऽयं स्फोटस्य लक्षणरूपेण सम्पन्नः। तत्र च भाष्यलक्षणे "अथ गौरित्यत्र कः शब्दः" इत्यस्य वोपक्रान्तत्वादत्र सास्नालाङ्गूलककुदादीनां प्रवेशः। वस्तुतस्तु तदुक्तिरर्थमात्रस्योपलक्षणम्। अत एव स्फोटस्य लक्षणेऽर्थविषयकबोधजनकत्वमिति विशेष्यांशप्रवेश इति सुधीधनैरवधेयम्।

अत्र लक्षणे विशेषणदलाभावे प्रत्यक्षेऽनुमाने चातिप्रसङ्गः। विशेष्यदलाभावे केनचित् क्रियमाणेन चुट्चुरादिध्वनिना अभिव्यक्ते 'इतोऽपसर्तव्यम्' इत्याद्यर्थविशेषेऽतिप्रसङ्गः स्यात्। यदि च ध्वनिपदेन व्यक्त एव ध्वनिर्गृह्येत, तदापि ध्वनिप्रकाश्ये ध्वनिजन्यश्रावणप्रत्यक्षविषये ध्वनावेवातिव्याप्तिप्रसङ्गः स्यात्, लौकिकप्रत्यक्षं प्रति विषयस्य तादात्म्येन हेतुत्वात्, ध्वनिप्रत्यक्षे ध्वनेरपि हेतुत्वात्। अतश्च विशेषणविशेष्योभयसार्थकदलयुक्तमिदं स्फोटस्य लक्षणं सम्पन्नम्। ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वमिति। विशेष्यदले बोधजनकत्वं बोधस्वरूपयोग्यत्वमेव। तेन घटपदे श्रुते कस्यचिदर्थाबोधाभावेऽपि न तत्र स्फोटलक्षणस्याव्याप्तिः।

अत्रेदं द्रष्टव्यम्—शब्दस्य व्याकरणशास्त्रप्रतिपाद्यस्य यदिदं लक्षणं कृतम् 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'[२] इत्यनेन

१. महाभष्ये पस्पशाह्निके उद्द्योते पृ० १२।

२. वेदान्तपरिभाषायां विषयपरिच्छेदे शिखामणियुक्ते २५९ पृष्ठे।

महाभाष्यवचनेन यस्य परिष्कार ईदृशः सम्पन्नः "ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटत्वम्" इति। तदिदं लक्षणम् 'असाधारणधर्मो लक्षणम्।' धर्मेऽसाधारण्यञ्च 'लक्ष्यताऽवच्छेदकव्याप्यत्वे सति लक्ष्यताऽवच्छेदकव्यापकत्वम्' इत्यस्य लक्ष्यमपि लक्षणभेदेषु तटस्थस्वरूपादिषु कीदृशमिति जिज्ञासा जायत एव निसर्गतः। तत्र वेदान्तपरिभाषायां श्रीमद्धर्मराजाध्वरीन्द्रप्रणीतायां द्विविधं लक्षणं भवतीति प्रतिपादितम्। एकं स्वरूपलक्षणम्, अपरञ्च तटस्थलक्षणम्। तत्र 'स्वरूपमेव लक्षणं स्वरूपलक्षणम्'। यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादौ सत्यादिकं ब्रह्मणः स्वरूपलक्षणम्। इतरानिरूप्यं यल्लक्षणं तत्स्वरूपलक्षणमिति शिखामणिकाराः प्राहुः। यद्यपि लक्ष्यबोधनायैव लक्षणस्यापेक्षितत्वात् लक्षणस्य लक्ष्यवृत्तित्वावश्यकत्वात् स्वं प्रति स्वस्य लक्षणत्वं न सुशक्यसमाधानम्, तथापि कथञ्चिदारोपितभेदेऽपि स्वस्मिन् लक्ष्यलक्षणभावोपपत्तेः। तथा चोक्तमभियुक्तैः—

आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः।
अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते॥[१] इति।

यथा हि कार्यकारणयोरत्यन्ताभेदपक्षे कथं कार्यकारणभावोपपत्तिः, कार्यकारणयोरभेदञ्च प्रतिपादितवान् भगवान् व्यासः — "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यनेन सूत्रेण। तथा च यदि कार्यकारणयोरभेदस्तर्हि एकस्मिन् वस्तुनि कारणत्वकार्यत्वयोर्विरुद्धधर्मयोरध्यासे व्यवहारविप्लवप्रसङ्गः। नहि किञ्चिदपि वस्तु स्वं प्रति स्वयं कारणं भवितुमर्हति, कारणत्वस्य कार्याव्यवहितप्राक्क्षणादिघटितत्वात्, स्वस्य च स्वस्मात् प्राक्क्षणेऽवस्थानासम्भवात्। एवञ्च कार्यकारणयोरभेदमते कथं व्यवहारोपपत्तिरिति पूर्वपक्षे तन्मतावलम्बिभिरुत्तरं क्रियते यत्कार्यकारणभावानुपपत्त्यारोपितं भेदमादाय कार्यकारणभावोपपत्तिरिति[३]। समीचीनमिदं तेषां समाधानम्, यतो हि यथा दृश्यते तथा कल्प्यते। तथा चोक्तमभियुक्तैः —

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्॥[४] इति।

कार्यकारणयोरभेदेऽपि भेदकल्पनमावश्यकमिति प्रतिपादितवन्तस्तत्रभवन्तोऽद्वैतसिंहासनलब्धदीक्षाः प्राप्तसारस्वतवैभवा निखिलागमसञ्चारिलोकोत्तरशेमुषीकाः श्रीमधुसूदनसरस्वतीपादाः—"न च कार्यस्य कारणभेदेन तदनाश्रितत्वात् सिद्धसाधनम्, अनाश्रितत्वेनान्याश्रितत्वेन वा उपपत्त्या अर्थान्तरञ्चेति वाच्यम्, अभेदे

१. वेदान्तपरिभाषा-विषयपरिच्छेदे ३०१ पृष्ठे चित्सुखौ।
२. ब्रह्मसूत्रे—२।१।१४।
३. अद्वैतसिद्धिः—३२३ पृष्ठेऽशित्वोपपत्तिप्रकरणे।
४. वेदान्तपरिभाषायां शिखामणौ ५७ पृष्ठे भट्टपादोक्तिरियम्।

कार्यकारणभावव्याहत्या कथञ्चिदपि भेदस्यावश्याभ्युपेयत्वात्। न च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' इत्यधिकरणविरोधः, उपादानव्यतिरेकेणोपादेयं नास्तीत्यस्यैव तदर्थत्वात्"[1] इति।

एवञ्चैकस्मिन्नपि वस्तुनि काल्पनिकभेदमादाय स्वरूपलक्षणव्यवहारः। अत्र विस्तरभयादधिकं न विचार्यते, विचारणीयं तु बहु वर्तते।

लक्ष्यज्ञानायैव लक्षणमपेक्षितं भवति। तदेव वस्तुलक्ष्यं तदेव च लक्षणमिति स्वरूपलक्षणपक्षेऽवश्यं वाच्यत्वाल्लक्ष्यस्य पूर्वमेव ज्ञानत्वेन लक्षणाभिधानवैयर्थ्यापातादित्यादिशङ्काशङ्कवो जायन्ते। तथापि तत्र सूक्ष्मेक्षिकया क्रियमाणे विचारे न कापि क्षतिः। तथाहि यत्पदवाच्यत्वेन लक्ष्यनिर्देशस्तद्भिन्नपदवाच्यत्वेन च लक्षणनिर्देशादनुपपत्तेरभावात्। यथा 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतिवाक्ये ब्रह्मपदवाच्यत्वेन लक्ष्यत्वेन वा लक्ष्यस्य ब्रह्मणो निर्देशः, सत्यादिपदवाच्यत्वेन च सत्यानन्तादिपदार्थानां लक्षणत्वमिति नानुपपत्तिगन्धोऽपीति मन्ये।

द्वितीयञ्च तटस्थलक्षणं भवति। तस्य च लक्षणं वेदान्तपरिभाषायामुक्तम्। तथाहि—'यावल्लक्ष्यकालमनवस्थितत्वे सति यद् व्यावर्तकं तदेव तटस्थलक्षणम्'[2]। 'यथा गन्धवत्त्वं पृथिव्या लक्षणं तटस्थलक्षणम्। महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु चाभावात्।'[3] उत्पन्नं द्रव्यं निर्गुणं निष्क्रियञ्च तिष्ठतीति तार्किकराद्धान्तः। अतो घटादिषूत्पत्तिकाले गन्धाभावेन यावल्लक्ष्यकालानवस्थायित्वेन तटस्थलक्षणत्वोपपत्तिः। ब्रह्मणश्च तटस्थलक्षणं जगज्जन्मादिकारणत्वम्। तत्र श्रुतयः सूत्राणि च मानम्। तथाहि—'यतो वा इमानि भूतानि जायन्ते'[4], 'जन्माद्यस्य यतः'[5] इति। ब्रह्मणः स्वरूपलक्षणे ब्रह्मसूत्रे—'आनन्दादयः प्रधानस्य'[6] इति सूत्रं मानम्। तत्र प्रधानशब्देन ब्रह्मण एव ग्रहणात्। साङ्ख्यप्रसिद्धप्रकृतेरग्रहणाच्च। इत्थञ्च वेदान्तपरिभाषाकृतां श्रीमतां धर्मराजाध्वरीन्द्राणां मते लक्षणस्य द्वैविध्यमेव, स्वरूपतटस्थलक्षणभेदात्।

संक्षेपशारीरककृतां श्रीमतां सर्वज्ञात्ममुनीनां मते तु त्रिविधं लक्षणमिति वेदितव्यम्। तथा चाहुस्ते[7]—

---

१. अद्वैतसिद्धौ अंशित्वप्रकरणे २२३ पृष्ठे।

२. वेदान्तपरिभाषायां विषयपरिच्छेदे ३०१ पृष्ठे शिखामणियुक्ते।

३. तत्रैव।

४. तै० उपनिषद् ३।१।

५. ब्रह्मसूत्रे—१।१।१२।

६. ब्रह्मसूत्रे—३।३।११।

७. संक्षेपशारीरके प्रथमेऽध्याये श्लोकः ५१४।

लक्ष्यस्य लक्षणमिह त्रिविधं प्रसिद्धं
लोके स्वलक्षणममुष्य विशेषणं वा।
यद्वोपलक्षणमिमानि च लक्षणेन
व्यावर्णयामि पृथगेव तु तत्प्रीतीहि[1]॥ इति।

अनेन श्लोकेन त्रैविध्यमुक्त्वा लक्षणस्य पुनस्त्रिभिः श्लोकैराचार्यैः पृथक् पृथक् लक्षणमुक्तम्। तथाहि—

लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्थाद्
निःशेषतो यदतिरिच्य तदर्थवस्तु।
लक्ष्यं निवेदयति लक्षणमेतदाहुः
सामान्यलक्षणमिदं त्रिषु लक्षणेषु॥
लक्ष्यस्वरूपमपि सद्यदमुष्य साक्षा-
दर्थान्तराद् भवति भेदकमेतदाहुः।
अस्य स्वलक्षणतयैव तु लक्षणं स्वं
छिद्रं जलं द्रवमितीदृशमत्र लोके॥
स्वानुरक्तमतिजन्मकारणं
यत्पुनर्भजति लक्ष्यवस्तुनि।
तद्विशेषणतयाऽस्य लक्षणं
केसरादिकमिवाश्ववस्तुनः ॥[2] इति।

एवञ्चाचार्यमतभेदेन लक्षणस्य सामान्यलक्षणं विशेषलक्षणञ्च प्रदर्शितम्। साम्प्रतं प्रकृतमनुसरामो यत् प्रकृते शब्दस्य यल्लक्षणमभ्यधत्त भगवान् भाष्यकारः पतञ्जलिः स्फोटाभिप्रायेण—'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इति वाक्येन तदिदं लक्षणं स्वरूपलक्षणं वा तटस्थ-लक्षणं वेति।

तत्रेदमेव निश्चेतव्यं यदिदं लक्षणं तटस्थलक्षणमेव, यतो हि येनोच्चारितेनेत्यस्य ध्वन्यभिव्यङ्ग्येनेत्यर्थाल्लक्षणे लक्ष्येतरस्य ध्वनेः प्रवेशात् 'इतरानिरूप्यं लक्षणं स्वरूपलक्षणम्' इति शिखामणिकारोक्तेश्च स्वरूपलक्षणासम्भवादिदं लक्षणं तटस्थ-लक्षणमेवेति सुधीधनैरवधेयम्। अधिकं तु नेह प्रदर्श्यते, सिद्धसाधनतापत्तेर्गौरवा-दन्यथोपपत्त्या वैयर्थ्याच्च। विस्तरस्तु द्रष्टव्यो व्याकरणशास्त्रस्यातीवप्रामाणिकेऽनेक-प्रमाणप्रमिते श्रीमदभिर्वैयाकरणकेसरिभिर्गुरुचरणैर्वाराणसेयसंस्कृतविश्वविद्यालये

१. संक्षेपशारीरके प्रथमेऽध्याये ५१४ श्लोकाः।

२. तत्रैव ५१५–५१७ श्लोकाः।

प्राचीनव्याकरणदर्शनागमविभागाध्यक्षैः प्रणीते 'पाणिनीयव्याकरणे प्रमाणसमीक्षा'-नाम्नि ग्रन्थे । कृतस्तत्र महान् विचारः ।

स च स्फोटो वस्तुत एकोऽपि यथार्थबोधाय व्यवहारानुगुण्येन वाष्टविधः । तथाहि—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः । इत्थञ्चैते पञ्चस्फोटाः । पुनश्च वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोटः । सर्वापीयं कल्पना सर्वाधिष्ठानशुद्धब्रह्मरूपशब्दप्रतिपत्त्यर्थमेवेति नैकशब्दसिद्धान्तहानिः । अत एव वैयाकरणभूषणसारे[1]—

पञ्चकोशादिवत् तस्मात् कल्पनैषा समाश्रिता ।
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥ इति ।

ततश्चान्ते तत्रैव[2]—

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥ इति ।

एवञ्च भाष्यकारीयेणानेन लक्षणस्य लक्ष्यस्य च निर्देशः सञ्जातः । स्फोटस्याष्ट-त्रिधत्वं तत्र स्फुटतरप्रमाणोपन्यासश्च सम्यग् विहितः शब्दकौस्तुभे । येनोच्चारिते-नेत्यादिमहाभाष्यकारीयलक्षणविचारावसरे हि शब्दकौस्तुभकृता कृतो महान् विचारः । तत्रैव द्रष्टव्यम् । अत्र तदवतारणे ग्रन्थगौरवापत्तिः । कथं वर्णस्फोटपदस्फोटवाक्य-स्फोटाखण्डपदस्फोटप्रभृतयः सिद्ध्यन्ति, का च तेषामावश्यकतेति प्रतिपादितं तत्रैवा-न्वयव्यभिचाराभ्याम् । कश्चित्तत्रत्यांशोऽत्र मया प्रदर्श्यते । तदीयोपजीव्यता-निबन्धनेनात्र निबन्धे सौरभ्याद् द्रष्टजनानामानन्दोपलब्धेश्च । ते वदन्ति—'वस्तुतस्तु वाचकता स्फोटनिष्ठा । तत्र चाष्टौ पक्षाः—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, तादृग्वाक्यस्फोटः । इत्थं पञ्चव्यक्तिस्फोटाः । वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोट इति । तथाहि—किञ्चिद्वर्णव्यत्यासादिना शक्ततावच्छेदकानु-पूर्वीभङ्गस्य प्रतिपदमौत्सर्गिकत्वात् तत्र च केनचित् क्वचित् प्रथमं शक्तिग्रहात् केन कस्य स्मरणमित्यत्र विनिगमनाविरहाद् ऋषभो वृषभो वृष इत्यादाविव 'कर्-कार्-चकर्' इत्यादीनां प्रयोगसमवायिनां सर्वेषामेव वर्णानां तत्तदानुपूर्व्यवच्छिन्नानां वाचकतेति वर्णस्फोटपक्षः ।

कर्प्रभृतयो वाचका न वेति विप्रतिपत्तिशरीरम्

रामम्, रामेण, रामाय, हरये, हरौ, हरीनित्यादौ परिनिष्ठिते रूपे कियानंशो द्रव्यादिवाचकः कियांश्च कर्मत्वादेरित्यस्य विनिगन्तुमशक्यतया राममित्यादिपरि-निष्ठितं पदमेव वाचकं कर्मत्वादिविशिष्टस्येति पदस्फोटः । दधीदम्, हरेऽव, विष्णोऽवे-त्यादावपि विनिगमनाविरहतौल्याद्वाक्यमेव विशिष्टार्थे शक्तमिति वाक्यस्फोटः ।

१. वैयाकरणभूषणसारे श्लोकः ९।

२. तत्रैव १४ तमः श्लोकः।

'एकः पटः' इतिवदेकं पदं वाक्यं वेत्यबाधितप्रतीतेर्वर्णातिरिक्तमेव पदं वाक्यं वा अखण्डं वर्णव्यङ्ग्यम्। एकत्वप्रतीतिरौपाधिकीति चेत्, पटेऽपि तथात्वापत्तेः। कः पदार्थोऽसाविति चेत्, भावः। भावविशेषेषु क्वान्तर्भवतीति चेत्, त्वत्परिभाषितेषु द्रव्यादिषु मान्तर्भूत्, न ह्येतावता प्रमाणसिद्धं प्रत्याख्यातुं शक्यते। अनियतपदार्थवादे गौरवमिति चेत्, व्यक्तीयत्ता तवापि नास्ति। उपाधीयत्ता तु सर्वैः सुवचा। भावत्वाभावत्वाभ्यां नित्यत्वादिना वा विभजनात्। भावविभाजकोपाधयस्तु घटविभाजकोपाधिवदेवानावश्यकाः। नन्वनुभवसिद्धास्त इति चेत्, व्यञ्जकध्वनिविशेषोपहितस्फोट एव ककाराद्यात्मना व्यवह्रियते इत्यभ्युपगमात्। भट्टमते तारो मन्दो गकार इतिवदद्वैतसिद्धान्ते विषयसम्बन्धजन्यवृत्तिवैचित्र्येण व्यङ्ग्ये स्वरूपसुखे वैचित्र्यवच्च। अत एव वाचस्पतिमिश्रास्तत्त्वबिन्दौ—वस्तुतः ककारादतिरिच्यमानमूर्तेर्गकारस्याभावादिति स्फोटवादिमतमुपस्थापितवन्तः। यथा वा अखण्डेष्वपि ककारादिषु वर्णेषु वर्णान्तरसमानाकारैकदेशावभासस्तथात्र पक्षे वर्णाविभासोऽपि भविष्यति। उक्तञ्च बोपदेवेन—

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्॥ इति।

भर्तृहरिरप्याह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन[1]॥ इति।

तस्मादखण्डं पदं वाक्यं वेति पञ्चापि व्यक्तिस्फोटावान्तरभेदाः। जातिस्फोटवादिनस्तु—घोत्तरटत्वादिकं शक्ततावच्छेदकतया आद्यत्रयपक्षेऽपि यथायथं वाच्यम्, अन्यथा सरो-रस इत्यादावर्थविशेषप्रतीत्यनापत्तेः। तच्च उपाधिरूपम्। उपाधिश्च परम्परया सम्बद्धा जातिरेव। सा च सर्वाधिष्ठानब्रह्मस्वरूपात्मिका। तथा च शक्यांश इव शक्तांशेऽपि न्यायसाम्येनाकृत्यधिकरणरीत्या ब्रह्मतत्त्वमेव तत्तदुपहितं वाच्यं वाचकञ्च। अविद्या आविद्यकधर्मविशेषो वा जातिरिति पक्षे तु सैव वाचिकास्त्वित्याहुः।

अष्टावप्येते पक्षाः सिद्धान्तग्रन्थेषु तत्र तत्रोपनिबद्धाः। तथाहि—'स्थानिवदादेशोऽनल्विधौ'[2] इति सूत्रे 'सर्वे सर्वपदादेशा' इति भाष्यग्रन्थः। 'पद्यतेऽर्थोऽनेनेति अर्थवदिह पदम् न तु सुप्तिङन्तमेव। तथा च एरुरित्यस्य तेस्तुरित्यर्थः' इति टीकाग्रन्थश्च वर्णस्फोटेऽनुकूलः। तथा स्थान्यथाभिधायकस्यैवादेशत्वमिति स्थानेऽन्तरपरिभाषयैव, 'तस्थस्थमिपाम्' इत्यादिषु निर्वाहात्तदर्थं यथासङ्ख्यसूत्रं नारब्धव्यमिति भाष्यमपि। पदस्फोटवाक्यस्फोटौ इहैव प्रघट्टके 'येनोच्चारितेन' इति भाष्यप्रतीकमुपादाय कैयटेन

---

१. वाक्यपदीयम्, ब्र० का० ७३।

२. पा० सू० १।१।५६।

भाष्यार्थतया वर्णितौ। वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वेति वदता तयोरखण्डताप्युक्ता। 'नित्येषु शब्देषु कूटस्थैरविचालिभिर्भवितव्यमिति तत्र तत्र भाष्ये सखण्डतोक्ता।

मायानिश्चलयन्त्रेषु कैतवानृतराशिषु।
अयोघने शैलशृङ्गे शरीराङ्गे कूटमस्त्रियाम्॥ इत्यमरः।

पस्पशायामेव प्रघट्टकान्तरे—'किं पुनः' इत्यादिभाष्यमुपादाय—'केचिद्वर्णस्फोटमपरे पदस्फोटं चाहुः' इति वदता कैयटेन, अ इ उ णित्यत्र व्यक्तिस्फोटजातिस्फोटयोर्बलाबलं चिन्तयता, प्रत्याहारान्तिके' अक्षरं न क्षरं 'विद्यात्' इति भाष्यव्याख्यावसरे 'व्यवहारनित्यता तु वर्णपदवाक्यस्फोटानां, नित्यत्वं तु जातिस्फोटस्य इति प्रतिपादयता, अनुपदमेव—'ब्रह्मतत्त्वमेव हि शब्दरूपतया प्रतिभातीत्यर्थः' इति व्याचक्षाणेन सर्वे पक्षाः सूचिता एव। यदा तु 'अविद्यैव जातिः' इति पक्षस्तदभिप्रायेण जातिस्फोटस्यापि व्यवहारनित्यतेति 'अक्षरं न क्षरं विद्यात्' इत्यस्य कैयटीये पाठान्तरम्। 'आद्यन्तौ टकितौ' इति सूत्रे च भाष्य एव वर्णस्फोटपदस्फोटावुक्तौ। 'असत्यमेव प्रकृतिप्रत्ययविभागं तदर्थञ्चाश्रित्य रेखागवयन्यायेन सत्यस्य पदस्फोटस्य व्युत्पादनमभिप्रेतम्' इति तत्रैव कैयटः। 'अर्थवद्धातुरप्रत्ययः प्रातिपादिकम्', 'स्वं रूपं शब्दस्याशब्दसंज्ञा', 'तपरस्तत्कालस्य' इत्यादिषु सूत्रेष्वपि स्पष्टमिदं भाष्यकैयटादावित्यलं बहुना। जातेश्च ब्रह्मात्मकत्वमुक्तं हरिणा—

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥
तां प्रातिपदिकार्थञ्च ‌‌धात्वर्थञ्च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥ इति।

धातोः स्फोटत्वमपि प्रघट्टकान्तरे स एवाह—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः॥ इति।

यद्यपीहाष्टौ पक्षा उक्ताः, तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम्। तत्रापि जातिस्फोटे इत्यवधेयम्। पूर्वपूर्वोपमर्दनैवोत्तरोत्तरोपन्यासात्। तथा च प्रथमव्युत्पत्तेर्व्यवहाराधीनतया सम्पूर्णस्य वाक्यस्य विशिष्टे प्राथमिकः शक्तिग्रह इति निर्विवादम्। स चावापोद्वापाभ्यामवयवानां शक्तिरिति न्यायोपष्टम्भेन त्यज्यत इति दर्शनान्तराणां पन्थाः। एकादेशादिस्थले उक्तरीत्या विनिगमनाविरहेण कैश्चित्पररूपादिस्थले पूर्वलोपाद्यभ्युपगमेन च व्याकरणानां कलहे सति अवयवशक्तेर्दुरुपपादतया प्राथमिकशक्तिग्रह एव प्रमारूप इति सैद्धान्तिकः पन्थाः। उक्तञ्च हरिणा—

तत्र यन्मुख्यमेकेषां तत्रैवेषां विपर्ययः।

एवञ्च—

ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले ।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥ इति ।

एवं स्थिते 'निपाता द्योतका विकरणा अनर्थकाः' इत्यादिविचारोऽपि प्रक्रियादशायामेवेति बोध्यम् । उक्तञ्च—

अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् ।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृश ॥ इति ।

तादृशोऽखण्ड इत्यर्थः ।

एवञ्च नामार्थयोरभेद एव संसर्गः । प्रत्ययाः प्रधानमित्यादिव्युत्पत्तयोऽपि प्रक्रियाश्रया एव । उक्तञ्च—

किं गर्भजन्ये किं गर्भकी दृग् भातीति नो मते ।
विचारः फलितः सर्वः प्रकृतिप्रत्ययाश्रितः ॥ इति ।

आरोपितस्यापि पारमार्थिके उपायता न विरुद्धा, लिपिस्थूलारुन्धतीशाखाचन्द्रादीनां तन्त्रान्तरसिद्धानां पूर्वत्रासिद्धादीनां, चैतच्छास्त्रसिद्धानां प्रागेव दर्शितत्वात् । तदेव पक्षभेदेन अविद्यैव, ब्रह्मैव वा स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोट इति स्थितम् । आह च—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ॥ इति ।
समारम्भस्तु भावानामनादि ब्रह्मशाश्वतम्' ॥ इति च

तदेवं वटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वासिष्ठरामायणोक्ताभाणकन्यायेन शब्दविचाराय प्रवृत्तः सन् प्रसङ्गादद्वैते औपनिषदे ब्रह्मण्यपि व्युत्पद्यतामित्यभिप्रायेण भगवान् भर्तृहरिर्विवर्तवादादिकमपि प्रसङ्गाद् व्युदपादयत, तत्तु तन्त्रान्तरे स्फुटं प्रकृते नातीवोपयुक्तञ्चेति नेह तन्यते इति । अनेन शब्दकौस्तुभोक्तेन वाक्यकदम्बेन भाष्यकारीयशब्दलक्षणस्य मया च यथामतिकृतस्य विवरणस्य स्वरूपमतीव स्फुटतामेतीति हेतोरत्र मया साभिनिवेशमशेषं शब्दकौस्तुभोक्तमुपस्थापितम् । नात्राप्रासङ्गिकोपस्थापनाय मनीषा मम । किन्तु यत्प्रकरणानुसारि तत्तु नोपस्थाप्य मम चेतो नितरां चेखिद्यते इति कृत्वा साररूपेणोपस्थापितानि तत्तदाचार्यवचांसीति नान्यथादृष्टिमत्र कुर्युर्मान्या विद्वांसश्छात्राश्च ॥ ३ ॥

४—अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते

इदं हि महाभाष्यवाक्यं शब्दस्यैव लक्षणमाचष्टे । शब्द इत्यनेन लक्ष्यनिर्देशादन्यैश्च पदैर्लक्षणनिर्देशात् । आरम्भादेव 'अथ शब्दानुशासनम्' इति भाष्यवचनेन प्रतिज्ञातस्य शब्दानुशासनस्य कर्मीभूतः शब्दः क इत्याकाङ्क्षायाः जायमानायाः

समाधानाय प्रवृत्तो भगवान् महाभाष्यकारः पतञ्जलिर्लक्षणद्वयं प्रणीतवान् । एकं पूर्वत्र व्याख्यातं—'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इत्यनेन वाक्येन । तच्च लक्षणं स्फोटरूपशब्दाभिप्रायेण । साम्प्रतंतु आचार्यो ध्वन्यभिप्रायेण लक्षणमुपस्थापितवान् ।

शास्त्रेषु क्रमोऽयं भवति यत्पूर्वकल्पे यदि कश्चन दोषः सम्भावितो भवति, र्तहि प्रतिपाद्यपदार्थप्रतिपादनाय पक्षान्तरोपन्यासः क्रियते । पूर्वत्रोपस्थापितः पक्षस्तु न ग्रन्थान्निःसार्यते, बुद्धिवैशद्योपपादनार्थत्वेन तस्य सार्थक्यात् । अत एव तत्र तत्र टीकाकृतोऽरुचिं प्रदर्शयन्ति । यदि चारुचिग्रस्तः पक्षो निःसारितः स्यात्, र्तहि अरुचिप्रदर्शनावसराभावेन कथं प्रतिपादनेऽरुचिः, कथञ्च प्रतिपादने सैद्धान्तिकत्वमिति मतिर्न जायेत साधारणलोकानामिति सोऽपि पक्षो ग्रन्थे परितिष्ठति । यथा न्यायसिद्धान्तमुक्तावलीग्रन्थे व्याप्तिलक्षणोल्लेखसमये विश्वनाथपञ्चाननभट्टाचार्यैः—'व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः'[1] इति विलिख्य व्याप्तेर्लक्षणं तस्य केवलान्वयिप्रभृतिसद्धेतुषु संघटनासम्भवेनाव्याप्तिदोषग्रस्तस्वरूपारुचेः सत्त्वाल्लक्षणान्तरमुक्तम् । तथाहि—

अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरेकाधिकरण्यंव्याप्तिरुच्यते ॥[2] इति ।

इयमेव हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपा सिद्धान्तव्याप्तिरभिधीयते । तत्र पूर्वव्याप्तिलक्षणे को दोषविशेष इत्यत्र स्वयमेव भट्टाचार्यैः मूले एवोक्तम् । तथाहि—'ननुकेवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः, किञ्च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुताऽवच्छेदकसम्बन्धेन समवायेनवृत्तेरप्रसिद्धत्वाद्, अत आह—'अथवेति'[3] इति । एवञ्च सिद्धान्तव्याप्तिप्रदर्शनाभावे लक्ष्येष्वव्याप्तेः सिद्धान्तव्याप्तेः प्रदर्शनमावश्यकम् ।

प्रकृते तु वैयाकरणानां स्फोटशब्दस्यैव ब्रह्मरूपत्वेन मुख्यत्वाददुष्टत्वादभ्यर्हितत्वाच्चादौ प्रदर्शनं कृतं प्रथमेन लक्षणेन महाभाष्ये भगवता महाभाष्यकृता पतञ्जलिना "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" इत्यनेन । एवञ्चात्रारुचेरभावाद्भावाच्च युक्तत्वस्य कथमकस्मात् कस्माद् हेतोरत्र द्वितीयलक्षणस्य विलक्षणस्य प्रणयनमिति नूनमाकुलयत्येव जिज्ञासाशङ्कुः शाब्दिकानन्यांश्चापि लक्षणविदः । अतोऽत्रायं विचारो नोपेक्षाकक्ष्यमापातनीय इति हेतोरत्र यथामति यथाध्ययनं यथाशास्त्रं निरूपयितुमहं प्रयते ।

नायमस्ति नियमोऽत्रैकान्तिको यत्पूर्वकल्पस्य दोषग्रस्तत्वादेवारुचौ पक्षान्तरोपन्यास इति । प्रत्युत मतभेदेन बहूनां पक्षाणामुपन्यासः पूर्वस्य कल्पस्य सर्वसाधारण्ये-

१. न्यायसिद्धान्तमुक्तावल्यामनुमानखण्डे पृ०, २१६, कारिका ६८ ।

२. न्यायसिद्धान्तमुक्तावल्यामनुमानखण्डे, कारिका ६९ ।

३. न्यायसिद्धान्तमुक्तावल्यामनुमानखण्डे पृ०, २२० ।

नोपयोगाभावाच्च पक्षान्तरोपन्यास इत्यादि बहूनि कारणानि। यथा हि मधुसूदनसरस्वतीप्रणीतायामत्यन्तमद्वैतसिद्धान्ते मान्यायामद्वैतसिद्धौ मिथ्यात्वस्य पञ्च लक्षणानि प्रतिपादितानि। तत्र नारुचिर्न वा क्लिष्टत्वाविलष्टत्वाशङ्कावसरः, प्रत्युत तत्तदाचार्यभेदेन सम्भाव्यमानमतिभेदेन पञ्च लक्षणानि। एकेनैवाचार्येण वा अनेकानि लक्षणानि कृतानीति दरीदृश्यते। तथा चोक्तं लघुचन्द्रिकायाम्[1]—

आद्यं स्यात् पञ्चपाद्युक्तं ततो विवरणोदिते।
चित्सुखीयं चतुर्थं स्यादन्त्यमानन्दबोधजम्॥
इति पञ्चविधं प्रोक्तं मिथ्यात्वं ध्वान्तनाशकम्। इति।

आद्यम्—सदसत्त्वानधिकरणत्वम्, द्वितीयम्—प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्, तृतीयम्—ज्ञाननिवर्त्यत्वम्, चतुर्थम्—स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम्, पञ्चमम्—सद्विविक्तत्वम्। एतादृशं पञ्चविधं मिथ्यात्वं ध्वान्तस्य—विप्रतिपन्नविश्वमिथ्यात्वाज्ञानतदधीनविश्वसत्यत्वज्ञानस्य नाशकम् अर्थाद् निवर्तकमित्यर्थः। तेन ब्रह्मभिन्नस्यालीकभिन्नस्य च सर्वस्य व्यावहारिकप्रातिभासिकजगतो मिथ्यात्वमेव सिद्ध्यतीति तत्रत्यप्रघट्टकार्थः। तथैव प्रकृतेऽपि ध्वनिमेव केचन शब्दत्वेन व्यवहरन्ति, केचन च स्फोटमेव। तत्र वैयाकरणाः स्फोटमेव मुख्यं शब्दं मन्यन्ते, ध्वनिं तु तदभिव्यञ्जकम्। तत्र वैयाकरणानामुभयत्र शब्दत्वमिष्टम्। यथा वेदान्तिनां वृत्तौ चैतन्ये च ज्ञानत्वम्। किन्तु चिद्रूपे ब्रह्मणि मुख्यं ज्ञानत्वम्। वृत्तौ तु तदभिव्यञ्जकत्वादर्थाद् व्यवहारे घटज्ञानं पटज्ञानमित्यादिरीत्या प्रयोगे वृत्तेरावश्यकत्वाद् ज्ञानत्वमारोपितम्। तथैव वैयाकरणाः प्रक्रियादिकार्यस्य ध्वनिरूपे शब्दे एवोपपत्तेः लोके ध्वनिमेवालक्ष्य शब्दत्वव्यवहाराद् ध्वनेः शब्दत्वमङ्गीकृतवन्तः। एवञ्च मतभेदेन व्यवहारदर्शनेन यथा दृश्यते तथा कल्प्यते इत्युक्तेरनुसारेण महाभाष्ये महाभाष्यकृता तत्रभवता भगवता पतञ्जलिना लक्षणद्वयं प्रणीतम्।

अपरञ्च—"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" इत्यनेन वाक्येन शब्दलक्षणात्मकेन यादृशस्य स्फोटरूपस्य ब्रह्मणो निर्देशः कृतः, तस्य ज्ञानं न सर्वसाधारण्येन सुलभम्। ब्रह्मज्ञानाय यावन्ति बाह्याभ्यन्तरभेदेन साधनानि साधनचतुष्टयात्मकानि श्रवणमनननिदिध्यासनादीनि सत्याजिह्मत्वादयोऽनृतत्वराहित्यादीनि श्रुतिप्रतिपादितानि भवन्ति किलापेक्षितानि तानिसर्वाण्येव स्फोटरूपस्य प्रथमलक्षणनिर्दिष्टस्य ज्ञानायापेक्ष्यन्ते। अत्रेदं द्रष्टव्यं मतिमद्भिर्यद् साधारणो लोकः किं शक्नोति सद्यस्तादृशं लोकोत्तरं लोकेऽश्रुतं ब्रह्मरूपं शब्दमवधारयितुमञ्जसा? नैव शक्नोतीत्येव वक्तव्यं भविष्यति। अस्यां परिस्थितौ मुख्यमधिकारिणमालक्ष्य प्रथमलक्षणप्रणयनं साधारणञ्चावेक्ष्य द्वितीयं लक्षणं प्रणीतमिति विभागः कर्तव्यः। प्राहुश्चात्र छायाकृतोऽमुमेव विषयमधिकृत्य। तथाहि—

१. अद्वैतसिद्धिटीका लघुचन्द्रिका, पृ० २०६।

"ननूक्तलक्षणलक्षितस्य लौकिकबहिर्भूतत्वात् कथमनुशासनम्, तदनुशासने च लौकिकानामित्याद्युपक्रमविरोधापत्तिः। यद्यपीदं कौस्तुभाद्युक्तरीत्या सुसमाधानम्, तथापि 'लौकिकानाम्' इत्यादिभेदेनोक्तेर्बहुवचनान्तेनोक्तेस्तथोदाहृतत्वाच्च तथानभिमतत्वस्य व्यवहारदशायां भगवदिष्टत्वेन तदस्वारस्यादुपक्रमविरोधश्च। किञ्च, यस्मादर्थाप्रतीतिः कारणवशात् तस्य शब्दत्वानापत्तिः। किञ्च, वर्णेभ्योऽर्थाप्रतीतिरेवेति वर्णानां शब्दत्वव्यवहारः सार्वजनीनो विरुध्येत। किञ्च, प्रागुक्तशब्दसामान्यलक्षणानाक्रान्तत्वं तस्य, मनसा तस्य ग्रहणात्, अत आह भाष्ये "अथवेति"[1] इति।

किञ्च "अथ शब्दानुशासनम्" इति वाक्येन शब्दानुशासनं प्रतिज्ञातम्। तच्चानुशासनं स्फोटरूपस्य नादाभिव्यङ्ग्यस्य ब्रह्मणो न सम्भवति। अतोऽत्र द्वितीयलक्षणावतारः। प्रथमलक्षणेन मुख्यः स्फोटात्मा शब्दोऽपि अवश्यं निर्देश्यः, अन्यथा लोका भ्रान्ता भवेयुर्यद् ध्वनिरेव शब्दः, नास्ति तदन्यः स्फोटात्मा शब्द इति। तथा च महान् अनर्थः स्यादिति हेतोर्महाभाष्यकृता मुख्यस्य स्फोटरूपशब्दस्य स्वरूपमुपदर्शितम्। किन्तु प्रकरणप्राप्तस्य प्रतिज्ञातस्यानुशासनस्य योग्यता तु तत्र नास्ति, किन्तु ध्वनावेव तदभिव्यञ्जके इति मनस्याकलय्य द्वितीयं लक्षणं निर्दिष्टमित्यतिश्लिष्टं प्रतिभाति। अत एव द्वितीयलक्षणे लोके ध्वनिः शब्द इत्युच्यते इत्यत्र लोकशब्दः समुच्चारितः। अत्र लोकपदोच्चारणेन पूर्वलक्षणलक्षितस्य स्फोटस्यालौकिकत्वमपि व्यक्तीकृतं ध्वनिरूपशब्दस्य लोकप्रसिद्धत्वमपि। नहि लोकप्रसिद्धस्य कथञ्चिदपि कर्तुं शक्या उपेक्षा, तथा चोक्तमभियुक्तैः[2]—

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम्॥ इति।

अत्रापरमपि बोध्यम्। अत्र लक्षणे महाभाष्यकृता 'ध्वनिः शब्द' इत्युच्यते इत्यनेनातीव महत्त्वशालिना सारगर्भितेन पदेन ध्वनिरूपस्य शब्दस्य सिद्धान्तसम्मतं शब्दत्वं निराकृतम्। लोके उच्यते, वस्तुतस्तु नास्त्येव। कामं भवतु ध्वनिरनुशासनसाधनम् किन्तु तेन तस्य मुख्यशब्दस्वरूपत्वं न भवितुमर्हति। एतादृशं गूढं तत्त्वमेवाविष्कर्तुं भगवता लोके ध्वनिः शब्द इत्युच्यते इत्युक्तमिति न विस्मर्तव्यम्। अस्य लक्षणस्य लौकिकविषयकत्वमेव स्फोरयति भाष्यकारः—'तद्यथा शब्दं कुरु मा शब्दं कार्षीः, शब्दकार्य्ययं माणवकः' इति। एवञ्च लोकप्रसिद्धध्वनिमेव शब्दत्वेन निर्दिष्टवान्। लक्षणे ध्वनिशब्देन वैखरीवागेव गृह्यते इति बोध्यम्।

अत्रेदमवश्यं बोधव्यं यत् पूर्वलक्षणलक्षितस्य स्फोटरूपस्य शब्दस्य यदा शास्त्रेणानुशासनं न सम्भवति, ध्वनिरूपे शब्दे एव प्रक्रियादिसम्भवात्। यदा च

१. छायाटीका पस्पशाह्निकस्था १९ पृष्ठे।

२. भाट्टकारिका शिखामणियुतायां वेदान्तपरिभाषायमुद्धृता ५७ पृष्ठे।

प्रतिज्ञातस्यानुशासनस्य कर्मता ध्वनिरूपे शब्दे एव, तदा स्फोटस्य निर्देशः किमर्थः, इति प्रश्नस्य जागरूकस्य यद्यपि समाधानं यथाप्रतिभानं पूर्वमेव विहितम्, तथापि पुनरत्र प्रतिभातस्यार्थस्योपेक्षितुमशक्यत्वादन्यदपि वैयाकरणरीतिमनुसृत्य समाधीयते। तथाहि—वाक्यप्रयोगे नियमोऽयं वर्तते यदुद्देश्यविधेयवाचकयोः पदयोः कस्य पूर्वमुपादानं कर्तव्यं कस्य च पश्चादिति विचारे उद्देश्यवचनं पूर्वं प्रयोक्तव्यम् विधेयवाचकञ्च पश्चादिति। तथा चोक्तमभियुक्तैः—'उद्देश्यवचनं पूर्वं विधेयं तदनन्तरम्' इति। एवञ्चास्याभाणकस्य प्रामाण्यात् तथा दर्शनाच्च क्वचिद्विधेयवाचकस्य पदस्य पूर्वप्रयोगे लोकानां स्यात् किलासाधुत्वभ्रमः। किन्तु तत्र न साधुत्वव्यतिरेक इति शब्दसाधुत्वप्रमात्मकार्षज्ञानवता भगवता पाणिनिना विधेयवाचकपदानां पूर्वप्रयोगेण तादृशो भ्रमोऽपाकारि। तथाहि—'वृद्धिरादैच्'[1] इति 'अपृक्त एकाल्प्रत्ययः'[2] इत्यादि। एवञ्चाचार्यव्यवहारेणेदमपि ज्ञाप्यते यद्विधेयबोधकपदानां पूर्वप्रयोगेऽपि साधुत्वं न निवर्तते इति। अत एव 'वाक्यं वक्तर्यधीनं हि'[3] इति प्रोक्तम्। अत एव च 'स्थानिवदादेशोऽनल्विधौ'[4] इति सूत्रेऽपि विधेयबोधकस्य 'स्थानिवत्' इति पदस्य न पश्चात् प्रयोगः। यद्यपि वृद्धिशब्दस्य महाभाष्ये मङ्गलार्थत्वं प्रतिपादितम्, तथापि प्रकृतार्थज्ञापनसम्भवेन तदविरोधात्। अन्यत्रापि तथाप्रयोगोपदर्शनेन प्रकृतार्थलाभात्। अत एव 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रस्योपरि शास्त्रार्थविचारकरणावसरे प्रातःस्मरणीयलोकोत्तरप्रतिभायशःसम्पन्नानां सकलशास्त्रनिष्णातमतीनां विद्वन्मण्डलीमुकुटायमानानां पण्डितप्रकाण्डप्रपूजितपादपीठानां प्राप्तशिवप्रसादानां श्रीशिवकुमारमिश्राणां शिष्यत्वमङ्गीकृतवता महाविदुषा श्रीजयदेवमिश्रेण 'शास्त्रार्थरत्नावली' इति नाम्नि ग्रन्थे कृतं समाधानमेतादृशमेव। तथाहि—ननु 'आदेशस्स्थानिवत्' इति सूत्रयितुमुचितम्। यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमित्यभियुक्तोक्त्या उद्देश्यार्थस्य प्रथमं बुध्यारोहेण चोद्देश्यवाचकपदस्यैव प्राथम्यलाभादिति चेत् सत्यम्, आचार्येण नियमेन तथा प्रयोगे पश्चादुपात्तस्य तस्यासाधुत्वमेव प्रतीयेदिति शङ्कया वैपरीत्येन प्रयोगकरणम्। उद्देश्यस्य पश्चात्प्रयोगेऽपि साधुत्वमस्त्येव, केवलं किञ्चिद्विलम्बेन तत्त्वप्रतीत्याऽनुचितत्वमात्रम्'[5] इति।

एवमेव यदि महाभाष्यकृता केवलं ध्वनेरेव शब्दत्वेनोपादानं कृतं स्यात्, नतु स्फोटरूपशब्दस्य, तर्हि भ्रमेल्लोको यद् ध्वनिरेव शब्दः, न तु तदतिरिक्तः कश्चन स्फोटात्मा शब्दो विद्यते इति। तथा न भवेदिति हेतोरत्र पूर्वमेव तस्य स्फोटात्मनः

---

१. पा० सू० १।१।१।

२. पा० सू० १।२।४१।

३. महाभाष्यम् १।१।८।५५। पा० सू०

४. „ १।१।५६।

५. शास्त्रार्थरत्नावल्यां जयदेवमिश्रकृतायाम् १२ तमे पृष्ठे।

शब्दस्य निर्देशो विहितः। यस्य ज्ञानेन परमपुरुषार्थस्य मोक्षस्य सिद्धिं प्रवदन्ति वैयाकरणास्तस्यैव यद्यत्र निर्देशो न स्यात्, तर्हि महती क्षतिर्भवेत्। अतो हेतोराचार्येण महाभाष्यकृता कृतं लक्षणं स्फोटात्मनः शब्दस्य पूर्वमेवेति बोध्यम्। तस्यैव ज्ञानेन मुक्तिं प्रतिपादितवान् श्रीभर्तृहरिः—

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥
अत्रातीतविपर्यासः केवलामनुपश्यति।[1]

इत्यादिभिः कारिकाभिरिति द्रष्टव्यं तत्रैव विस्तरशः।

इदानीमस्मिन् लक्षणे प्रविष्टानां पदानां फलचिन्ता क्रियते। यतो हि लक्षणानां त्रयो दोषाः प्रसिद्धा अव्याप्त्यतिव्याप्त्यसम्भवाख्याः। तर्हि कस्य पदस्याभावे को दोषः प्रसज्येत प्रदत्ते तस्य कथं वारणमिति विचारोऽत्रातीवावश्यक इति मनसि निश्चित्य पदसार्थक्यमनुसन्दधे। अपरञ्च यो हि भगवान् महाभाष्यकारो भगवतः पाणिनेः सूत्रेष्वेकमप्यक्षरमनर्थकं न मनुते दृष्टादृष्टप्रयोजनेन साफल्यात्। यश्चात्यन्तमभिनिवेशेन वदति—'तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण'[2] इति। यश्च महाभाष्यकारो भगवति शब्दशास्त्रप्रणेतरि पाणिनौ बद्धश्रद्धः एवमुद्घोषयति—'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्'[3] इति। तस्य भाष्यकारस्य लक्षणवाक्यमिदं निरर्थकपदघटितं भवेदिति विनिश्चयस्तु शुक्तौ रजतनिश्चयवदेव। निरस्तसमस्तदोषव्यूहस्य प्रतिभासमानसमस्तशब्दगत-साधुत्वासाधुत्वस्य ज्ञातज्ञातव्यस्य परमयोगवतो भगवतो भाष्यकारस्य पतञ्जलेर्लक्षणमिदं कदापि व्यर्थपदवर्णघटितं नैव वर्तते। तथापि कस्य पदस्य किं फलमिति जिज्ञासाया निसर्गत एवोत्पद्यमानायाः शान्तये पदकृत्यविचारः साम्प्रतमारभ्यते।

तत्र यदि केवलं 'ध्वनिः शब्दः' इत्येव लक्षणं स्यात्, तदा काकादीनामपि ये शब्दास्तेषामपि ध्वनित्वादनुशासनं प्रसज्येत। यतो हि 'उद्देश्यताऽवच्छेदकव्यापकत्वं विधेये भासतेऽसति बाधके' इति काचन नियमापरपर्याया मर्यादा वर्तते। यथा 'इको यणचि'[4] इति सूत्रं सवर्णाज्भिन्नाच्पदबोध्यवर्णाव्यवहितपूर्वत्वविशिष्टानामिक्पद-बोध्यानां वर्णानां यणं विधत्ते। अत्र यत्र यत्र सवर्णाज्भिन्नाच्पदबोध्यवर्णाव्यवहित-पूर्वत्वविशिष्टेक्पदबोध्यत्वम् तत्र तत्र सर्वत्र यण् भवतीति रीत्या समन्वयः। 'असति बाधके' इत्ययमंशस्तु नियमेऽस्मिन्नवश्यं प्रदेयः, अन्यथा 'चक्रि अत्र' इत्यादिप्रयोगेषु

---

१. वाक्यपदीयम् १६-१७ तमे कारिके।

२. महाभाष्यम्—१६९ पृष्ठे वृद्धिरादैच् १।१।१ सूत्रे।

३. महाभाष्यम्—'इको यणचि' ६।१।७७ सूत्रे।

४. पा. सू. ६।१।७।

'इको यणचि'[1] इति सूत्राप्रवृत्त्या बाधः स्यात् । यतो हि तत्र सवर्णाज्भिन्नाच्पदबोध्याकाररूपवर्णाव्यवहितेक्पदबोध्यस्येकारत्वस्योद्देश्यतावच्छेदकस्य सत्त्वेऽपि विधेयस्य यणोऽभावेन नियमभङ्गप्रसङ्गादनाश्वासात् कुत्रापि तदप्रवृत्ते व्यवस्थानुपपत्तेः । प्रवृत्ते च तस्मिन्नंशे न काप्यनुपपत्तिः । यतो हि 'इको यणचि' इति सूत्रस्य बाधकं 'इकोऽसवर्णे शाकल्यस्य'[2] इति सूत्रं विद्यते । न चैवं सति 'सुध्युपास्यः, मध्वरिः' इत्यादिप्रयोगेषु कथं न तेन निषेध इति वाच्यम् 'न समासे'[3] इति वचनेन 'इकोऽसवर्णे शाकल्यस्य'[4] इति सूत्रस्य निषेधकवचनेन तदप्रवृत्तेः । 'चक्रि अत्र' इत्यत्र तु समासाभावेन निषेधाप्रवृत्तेः सूत्रप्रवृत्तेः सत्त्वाद् यण्निषेधः । लोकेऽपि 'नीलो घटः' 'पीतो घटः' इत्यादौ घटादिकमुद्दिश्य नीलादिकं विधीयेत इति वर्तते काचन पद्धतिः सर्वलोकप्रसिद्धा । तत्रापि यद्यत्र 'असति बाधके' इत्यंशो न स्यात्, तर्हि महती विडम्बना स्यात् । यतो हि 'नीलो घटः' इति वाक्यजन्यबोधे घटः उद्देश्यः घटत्वमुद्देश्यतावच्छेदकं तद्व्यापकत्वं नीले न विद्यते । यतोहि घटत्वरूपमुद्देश्यतावच्छेदकं तु नीलत्वाभाववति पीतेऽपि घटे वर्तते इति न उद्देश्यतावच्छेदकव्यापकत्वोपपत्तिरिति हेतोरसतिबाधके इत्ययमंशो महाभाष्यकृता लक्षणेऽत्र निवेशितः । एवमेव प्रकृतेऽपि काकादिशब्दानामपि स्यादनुशासनापत्तिः । सा मा प्रसाङ्क्षीदिति हेतोर्लक्षणेऽत्र न केवलम् 'ध्वनिः शब्दः' इत्येवांशः, किन्तु 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' इतीयल्लक्षणं विशेषणविशिष्टं कृतमिति कृतधियो विमृशन्तु । न च 'ध्वनिः शब्दः' इत्येव लक्षणमस्तु । यत्र च लक्षणं याति तल्लक्ष्यमिति कृत्वा काकादिशब्दा अपि शब्दाश्चेत्तर्हि काऽनुपपत्तिरिति वाच्यम्, अत्र येषां शब्दानामनुशासनं कृतं ते न काकादिशब्दा अतो हेतोस्तेषां लक्ष्यत्वस्यायुक्तत्वात् । उक्तञ्चाभियुक्तैः—

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः ।
न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम् ॥[5] इति ।

नहि लक्षणं यातीति कृत्वा कस्यचिदपि लक्ष्यत्वाङ्गीकारः शक्यदर्शनः । तथा सति शृङ्गित्वं गोर्लक्षणमित्यभिधाय महिष्या अपि गोत्वं स्वीकर्तुं शक्यते ।

तत्रायं विशेषो द्रष्टव्यः—'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्' इति वाक्यप्रामाण्यानुसारेण लक्ष्येतरस्माल्लक्ष्यस्य व्यावृत्तये व्यवहाराय वा लक्षणानि

---

१. पा० स०—६।१।७७ ।
२. पा० सू० ६।१।१२७ ।
३. वार्त्तिकम् । कौमुद्यामच्सन्धौ ९१ पृष्ठे ।
४. प० सू० ६।१।१२७
५. कुमारिलभट्टकारिका । वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदे शिखामणिटीकायाम् ५७ पृष्ठे उद्धृता ।

प्रणीयन्ते। एवञ्च व्यवहारस्तु नादिः, किन्तु अनादिकालात् प्रचलन् वर्तते। तदनुसारेणै-वानुगमाय लक्षणानि क्रियन्त इत्येष पन्थाः।

इत्थञ्च यदि अत्र 'ध्वनिः शब्दः' इत्येवानुशासनीयत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणं स्यात्, तर्हि काकवाशितादीनामप्युद्देश्यत्वात् तत्र चानुशासनाभावात् प्रतिज्ञाभङ्गः, अतोऽत्र प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यत इत्यवधेयम्।

नहि काकादिशब्दैः लोकप्रसिद्धा प्रतीतिरित्यतो नातिव्याप्तिः।

ननु काकतन्त्रीप्रभृतिशब्दानामत्र शब्दत्वेनाविवक्षितानां भवतु नाम 'प्रतीत-पदार्थको लोके ध्वनिः शब्दः' इत्याकारकेण लक्षणेन व्यावृत्तिः, अतस्तत्पदं लक्षणे निवेश्यम्, किन्तु 'लोके' इति पदं किमर्थमिति चेन्न, काकादिपशुपक्षिप्रभृतिशब्दैरपि योगिनां योगबलात् प्रत्यक्षात्मकादिज्ञानसम्भवेन तेऽपि प्रतीतपदार्थकत्वात् प्रतिज्ञान्तर्गता एव स्युरिति तत्रापि सत्त्वादुद्देश्यताऽवच्छेदकत्वस्य विधेयस्यानुशासनस्याभावेन प्रतिज्ञाभङ्गो अतो लक्षणे 'लोके' इति पदसार्थक्येनादोषात्। न च निविष्टेऽप्यस्मिन् पदे कथं दोषनिरासः ? लोकान्तर्गतत्वादेव योगिनामपीति चेन्न, लोकशब्दप्रवेशाद् यैः शब्दैः सर्वसाधारण्येन ज्ञानं जन्यते, तेषामत्र विवक्षितत्वेन योगिमात्रग्राह्यार्थकानां काकादिशब्दानामत्राग्रहणेन दोषाभावात्। अत एव (लोकपदेन योगिनामग्रहणादेव) 'उपदेशोऽजनुनासिक इत्'[1] इत्यत्र उपदेशपदेन किं गृह्यते इति विचारे भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां विलिखितम्—'उपदेश आद्योच्चारणम्'[2] इति। तत्र महावैयाकरणेन अनेकशास्त्रविचक्षणेन प्राप्तवाग्देवताप्रसादेन श्रीनागेशभट्टेन या व्याख्या कृता शब्देन्दुशेखरे, या च सम्प्रदायसिद्धा तेन ज्ञायते यदुपदेशपदेनाज्ञातस्वस्वरूपबोधका-नामेवात्रोपदेशपदेन ग्रहणमिति। तथाहि—

'आद्योच्चारणमिति—आद्यमुच्चारणमित्यर्थः, भावे घञिति भावः। तच्च प्रत्यासत्त्यैतच्छास्त्रप्रवर्तकाचार्याणामेव। आद्यत्वञ्च—अज्ञातस्वस्वरूपज्ञापकत्वम्। उपस्याद्यर्थत्वाद् दिशेश्चोच्चारणक्रियत्वात्'[3] इति। अत्र व्याख्यायां नागेशभट्टेन कौमुदीस्थस्य 'उपदेश आद्योच्चारणम्' इति कृतस्योपदेशव्याख्यानस्यांशभूतम् आद्यो-च्चारणमित्यस्य व्याख्यानम्—आद्यमुच्चारणमत एव कृतं येन षष्ठीसमासविभ्रमो मा भूदिति। निषादस्थपतिन्यायेन कर्मधारयस्य प्रशस्तत्वादत्र षष्ठ्यर्थविवक्षाया असत्वाच्च। किन्तु तदनन्तरम्—आद्यत्वञ्च—अज्ञातस्वस्वरूपज्ञापकत्वमिति यत्परिष्कृतम्, तत्र भवति सन्देहो यद् योगिनां ज्ञानस्य विषयत्वात् कथमुपदेशानामज्ञातस्वस्वरूपज्ञापक-त्वमिति। तत्र व्याकरणशास्त्रतत्त्वज्ञा अधीतन्यायशास्त्रपरिष्कारकुशला विद्वांस

१. पा० सू० १।३।२।

२. वै० सि० कौ० संज्ञाप्रकरणे।

३. लघुशब्देन्दुशेखरे संज्ञाप्रकरणे षट्टीकोपेते ६८ पृष्ठे।

एतादृशं परिष्कारं कुर्वन्ति येनोपदेशानामज्ञातस्वस्वरूपज्ञापकत्वमक्षतमेव विद्योतते। स चैतादृशः—अयोगिपुरुषाज्ञातस्वस्वरूपज्ञापकमुनित्रयोच्चारणकर्मत्वविशिष्टसमुदायघटकानुनासिक्यविष्टा वर्णा पाणिनीयसङ्केतसम्बन्धेनैतत्पदप्रयोज्यविषयताश्रया भवन्तीति।

इदमत्राकूतम्—यदि नैतादृशं व्याख्यानं नागेशभट्टेन तदुपजीव्येन तदनन्तरमन्यैरपि च न कृतं स्यात्, तर्हि निर्दुष्टार्थप्रतीतिर्निराकाङ्क्षा च नैव स्यात्, यच्च परमं प्रयोजनं शब्दप्रमाणस्य। निराकाङ्क्षप्रतीतिजननेच्छयैव शब्दप्रवृत्तेः। एवञ्च यथा तत्र दोषव्रातनिराकरणपूर्वकं निराकाङ्क्षप्रतीत्यर्थं परिष्कारकरणमावश्यकम्, एवमेव प्रकृतेऽपि भाष्यवाक्ये यथामति मया परिष्कृत्य दोषवारणाय प्रयत्यते चेदवश्यं तत्रानुपेक्षा दृष्टिर्देया सुधीधनैः। अतोऽत्र—'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' इति भाष्यवाक्ये प्रविष्टानां समेषां पदानां फलं प्रदर्शितम्। अपराणि फलान्यपि भवितुमर्हन्ति। तत्र यदि केवलं लक्षणे 'प्रतीतपदार्थकः शब्दः' इत्येव स्यात्, तर्हि बहुव्रीहिसमाससत्त्वेन कण्ठताल्वादीनामपि अर्थप्रतीतौ साधनत्वेन प्रतीतपदार्थकत्वादनुशासनीयत्वाभावेन शब्दत्वाभावेन च वाक्यार्थवैकल्यप्राप्तेरत्र तथा वक्तुं न शक्यते।

अत्रेयमाशङ्का जायते यत्कश्चिद् धाराप्रवाहेण शब्दं कुर्वन्नास्ते, व्याख्यानं वा कुर्वन् वर्तते तस्य समक्षं तन्निरोधाय कश्चन हस्तेन काष्ठपृष्ठे ध्वनिं घण्टीनिनादं वा करोति, तदा भवति तस्य श्रोतुः प्रत्ययो 'मामयं निरुणद्धि' इति। एवञ्च करतलध्वनेर्घण्टीनिनादस्य च प्रतीतपदार्थकत्वाद् ध्वनित्वाच्च 'प्रतीतपदार्थको लोके ध्वनिः शब्दः' इति महाभाष्यवचसोऽर्थस्य तत्र सङ्घटनादनुशासनाभावाच्च प्रतिज्ञाभङ्गप्रसङ्ग इति चेदत्र विमृश्यते। तथाहि—'अस्मिन् प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' इत्यत्र पूर्वलक्षणात् 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः' 'इत्यस्मादुच्चारितेनेत्यस्यानुकर्षणं विधाय विभक्तिविपरिणामेन प्रथमान्तत्वं सम्पादनीयम्। एवञ्च—य उच्चारितः प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते स शब्दः' इति पूर्णव्याख्येयशब्दलक्षणं सम्पन्नम्। उच्चारणञ्च नाम कण्ठताल्वाद्यभिघाताख्यव्यापारजन्यमिति सुप्रसिद्धम्। नहि करतलध्वनिर्घण्टीनिनादो वा उच्चारणं येन तत्र ध्वनौ विवक्षितध्वनित्वप्रसक्तिः। अतो निर्दुष्टमिदमनुशासनीयशब्दलक्षणमिति विज्ञेयम्।

वस्तुतस्तु—नहि शब्दमात्रस्यानुशासनं विवक्षितम्, येन शब्दस्य लक्षणं वक्तव्यं भवेद् भगवता महाभाष्यकृता। किन्तु येऽनुशासनीयाः शब्दास्ते एतादृशा एव। एवञ्चात्र शब्दसामान्यस्यालक्षितत्वाद्दोष इति शङ्का न कर्तव्या। यथाहि परिभाषेन्दुशेखरे नागशभट्टेन विदुषा—'प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते'[1] 'इति प्रतिज्ञातम्। किन्तु तत्र नहि सर्वासां व्याकरणे प्रसिद्धानां परिभाषाणां

१. परिभाषेन्दुशेखरे भूतियुते ३ पृष्ठे।

तस्मिन् परिभाषेन्दुशेखरे व्याख्या विहितेति प्रतिज्ञाभङ्गापत्तिः। उद्देश्यतावच्छेदक-व्यापकत्वस्य विधेये भानाभावेन नियमभङ्गापत्तिश्च। एतादृशदोषभियैव तत्र वैयाकरणैः व्याख्येयपरिभाषात्वं परिष्कृतम्। अर्थाद् व्याख्येयत्वेनेष्टानां परिभाषाणामत्र व्याख्यानम्, न तु सर्वासामिति दोषनिरासः। तथैव प्रकृतेऽपि महाभाष्ये नहि शब्दसामान्यस्य लक्षणमिदं क्रियते, येनान्येषां काकादिशब्दानामशब्दत्वप्रसङ्गः, प्रत्युत येऽनुशासनीयाः शब्दास्तेषामेवेदं लक्षणमिति हृदयम्। अतोऽत्र लक्षणे केवलं 'प्रतीतपदार्थको-लोके' इत्युच्यते चेत्, तर्हि काकादिध्वनौ लक्षणासङ्ग्रहः, प्रतीतेत्यादिनिःसार्यते चेत्, तर्हि काकादिशब्दानामप्यनुशासनीयत्वापत्तिः। अनुशासनाभावे च प्रतिज्ञा भङ्गइत्याद्युभयतः पाशारज्जुरिति निरस्तम्, अनुशासनीयशब्दलक्षणत्वेन निखिलदोषनिरासात्। व्याख्येय-परिभाषात्वञ्च परिभाषेन्दुशेखरे इत्थं परिष्कृतम्—'सङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारकशास्त्रजन्याप्रामाण्यज्ञानानास्कन्दितबोधे सहकारित्वेन मुन्यभि-प्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम्'[1] इति।

एवमेव 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते'[2] इति परिभाषा याऽऽगमि-ग्रहणेनागमविशिष्टस्य ग्रहणं भवतीत्यर्थिका बहुप्रयोगसाधनाय स्वीक्रियते। यथा 'दाग्रह-णेन युकि सत्यपि दाप्शब्दो गृह्यते। अत एव 'दाधाघ्वदाप्'[3] इति सूत्रेण घुत्वे सति 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च'[4] इति सूत्रेण णत्वे 'प्रणिदापयति' इत्यादिप्रयोगाणां सङ्ग्रहो भवति। तत्र विचा-रणीयमिदं भवति यत् किं नाम 'आगमत्वम्' इति। तत्समाधानाय परिष्क्रियते—'अवयवत्वावच्छिन्नविधेयताश्रयत्वम् आगमत्वम्' इति। किन्तु केचनागमा एतादृशा अपि सन्ति येषामवयवत्वावच्छिन्नविधेयता नास्त्येव। अस्यां परिस्थितौ कथङ्कारं तेषां सङ्ग्रह इत्यापत्तौ समधीयतेऽस्माभिर्यद् यैरागमैर्विशिष्टानामागमिग्रहणेन ग्रहण भवति तेषामेवागमानामिदं लक्षणम्—अवयवत्वावच्छिन्नविधेयताश्रयत्वमिति। ये च न तादृशा न तेषां लक्षणमिति। यथा हि 'अनुनासिकात् परोऽनुस्वारः'[5] इति सूत्रेणा-नुस्वारागमो विधीयते। स चागमः। तथा चोक्तं शब्देन्दुशेखरे—'अयमागमोऽनवयव एव, अवयवत्वे मानाभावात्'[6] इति।

एवञ्चागमत्वमिष्टम् किन्तु अवयवत्वावच्छिन्नविधेयताश्रयत्वं नास्ति। तथा यदागमपरिभाषाव्याख्याने यादृशमागमत्वं भूतिग्रन्थे परिष्कृतं तस्य कथं निर्दुष्टत्व-

---

१. परिभाषेन्दुशेखरे भूतियुते ४ पृष्ठे।

२. परिभाषेन्दुशेखरे परिभाषा ११।

३. पा० सू० १।१।२०।

४. पा० सू० ८।४।१७।

५. पा० सू० ८।३।४।

६. शब्देन्दुशेखरे षट्टीकायुते हल्सन्धौ ३७७ पृष्ठे।

मिति शङ्कायां तदेवोत्तरं यल्लिखितं मया—यैरागमैर्विशिष्टानां शब्दानामागमिग्रहणेन ग्रहणं तेषामागमानामयं परिष्कारः। अत एव नागेशभट्टेन 'अयमागमोऽनवयव' इत्यत्रायमिति शब्दः प्रयुक्तः। अर्थादयं न स्वविशिष्टं शब्दमागमिग्राहकेण गृह्णातीति। सामान्यलक्षणं तु आगमत्वस्य 'टित्किताद्यन्यतमत्वादिरूपमेवान्यत्र परिष्कृतं वेदितव्यम्। अत्र विचारे अकाण्डकाण्डप्रसक्तेः। एवमेव प्रकृते न शब्दस्य सामान्यलक्षणमिदम्, किन्तूपक्रमवचनानुसारेणानुशासनीयशब्दानामेव लक्षणमिति न काप्यनुपपत्तिरत्र लक्ष्यते।

अस्मिन् विलक्षणे शब्दलक्षणेऽपरोऽपि कश्चन विचारः सम्भवति। यथा लक्षणे प्रविष्टानां प्रत्येकं पदानां फलविषयको विचारः कृतस्तथैव 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' इत्यत्र 'प्रतीतपदार्थकः' इत्यत्र कर्मधारयो वा बहुव्रीहिर्वा इत्यस्ति विचारावसरः। यदा च कर्मधारयस्तदा प्रतीतश्चासौ पदार्थः प्रतीतपदार्थ इति कर्मधारयं विधाय स्वार्थे कः। ततश्च तद्बोधके लक्षणां कृत्वा ध्वनेः सामानाधिकरण्यम्। द्वितीयश्च पन्था बहुव्रीहिसमासस्य। प्रतीतः पदार्थो येन स प्रतीतपदार्थस्ततः 'शेषाद्विभाषा'[1] इति सूत्रेण कप्प्रत्ययः। अत्र सम्भाव्यमानयोरनयोर्द्वयोः समासयोः कतरेण भाव्यमिति विषये ये विचाराः सम्पन्नास्तेऽत्र प्रदर्श्यन्ते। तत्र पाणिनिप्रणीतेषु सूत्रेषु प्रथमं महर्षिणा पतञ्जलिना प्रणीतं व्याकरणमहाभाष्यम्। तत्र च कैयटेन महावैयाकरणेन प्रणीता प्रदीपाख्या व्याख्या तदनन्तरं नागेशभट्टेन प्रणीता उद्द्योतनाम्नी व्याख्या। तदुपरि नागेशभट्टस्यान्तेवासिना श्रीवैद्यनाथपायगुण्डेमहोदयेन रचिता छाया नाम्नी व्याख्या इति क्रमः। अस्य व्याकरणशास्त्रव्युत्पाद्यत्वेन प्रतिज्ञातस्य शब्दस्य लक्षणवाक्यव्याख्यानावसरे छायाभिधायां व्याख्यायामुक्तम्—'प्रतीतः पदार्थ इति कर्मधारय एव स्वार्थे कन्। तस्य च तद्बोधके लक्षणा'[2] इति।

ततश्च छायाकारस्य लक्षणवाक्यघटकस्य 'प्रतीतपदार्थकः' इति पदस्य कर्मधारयसमासोक्तिमसहमानानां सर्वतन्त्रस्वतन्त्राणां पदवाक्यप्रमाणपारावारीणनां प्रातःस्मरणीयानामनुकरणीयाचरणानां श्रीपूज्यगुरुचरणानां महाभाष्यतत्त्वविदां श्रीमतां रघुनाथशर्मणामियं युक्तिरस्ति यद्बहुव्रीहिसमासेनैव कार्यनिर्वाहे कर्मधारयसमासस्ततश्च कप्रत्ययः तदनन्तरं तद्बोधके लक्षणेति न युज्यते—गौरवादिति। तैः स्वरचिते महाभाष्यटिप्पणे समुट्टङ्कितः स्वीयः पक्षः। तथाहि—'इदं चिन्त्यं प्रतीतः पदार्थो यस्मादिति बहु—व्रीहिणा लक्षणां विनैवेष्टलाभाद्'[3] (र० ना०) इति। पुनश्च छायाकारोक्तेःखण्डनमसहमानेन'प्राचीनमित्येव न साधु सर्वं न नव्यमित्येव भवत्यवद्यम्।

---

१. पा० सू०—५।४।१५४।

२. महाभाष्ये पस्पशाह्निके।

३. महाभाष्ये छायायुते टिप्पणे—पृ० १९।

सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः' इति न्यायमुल्लङ्घ्य छायाकारोक्तिं प्राचीनामयुक्तां युक्तञ्च नवीनामुक्तिं गुरुचरणानामयुक्तां मन्यमानेन श्री भार्गवशस्त्रिणा विदुषा कर्मधारय एव समासः प्रतिमण्डितः। कर्मधारयसमास एव छायाकारोक्तः समीचीनः कप्रत्यय एव युक्तः तद्बोधके लक्षणापि युक्तैवेति भार्गवशास्त्रिणा भाष्यटिप्पणे प्रतिपादितम् । प्रस्तूयते चात्रास्मिन् । विषये जाता विचारा आनुपूर्वीतः । तत्र प्रथमं कर्मधारयपोषकं भार्गवशास्त्रिवचः प्रस्तूयते तथाहि—

'अत्र छायायां कर्मधारय एव इत्युक्तावपि इदं चिन्त्यमित्युक्त्वा बहुव्रीहिप्रदर्शनं साहसमात्रमेव, तद्बोधके लक्षणां वदतश्छायाकर्तुर्बहुव्रीहिरज्ञात इति वा साहसिकस्याभिप्रायः। वस्तुतस्तु—प्रतीतपदार्थक इति भाष्ये प्रतीतशब्दः प्रसिद्धार्थक इत्युद्द्योतदर्शनादवगम्यते न ज्ञातार्थकः, येन यस्मादिति बहुव्रीहिलब्धस्य पञ्चम्यर्थस्य जन्यत्वस्य ज्ञानांशेऽन्वयः समाशङ्क्यते। एवञ्च प्रसिद्धपदार्थबोधक इत्यर्थो लक्षणां विना दुर्लभ एव । तत्र बहुव्रीह्याश्रयणे प्रसिद्धपदार्थः स्यात् । स च शब्दस्य पदार्थाहेतुत्वान्नैव सम्भवति' इति ।

वचनेनानेन भार्गवशास्त्रिणा छायाकारस्य 'प्रतीतपदार्थकः' इत्यत्र कर्मधारयसमासोक्तिर्मण्डिता खण्डिता च बहुव्रीहिसमासोक्तिः पूज्यानां गुरुचरणानां श्रीरघुनाथशर्मणाम् । तदनन्तरं प्रख्यातविद्यावद्भिर्महावैयाकरणैः पूज्यगुरुचरणैश्चिरकालमध्यापितानेकशास्त्रैस्तेषामनन्यभक्तैः वाराणसेयसंस्कृतविश्वविद्यालये साम्प्रतं प्राचीनव्याकरणदर्शनागमविभागाध्यक्षैः पूर्वं काशीहिन्दूविश्वविद्यालयान्तर्गतसंस्कृतमहाविद्यालये व्याकरणाध्यापकैः श्रीरामप्रसादत्रिपाठिभिः सद्युक्तिभिर्बहुभिरपाकृता किल भार्गवोक्तिरनुमोदिता च गुरुवराणां भार्गवमुपेक्षमाणानां बहुव्रीहिसमासोक्तिः । सर्वं तद्विचारजातमत्र मया विषयनिर्धारणार्थमामूलत आनुपूर्वीतः सङ्गृह्य प्रदर्श्यते, स्मृतत्वे सत्युपेक्षानर्हत्वरुपसङ्गतेः सत्त्वात् । एतादृशवस्तुनोऽप्रकाशकरणे महान् दोष इति नाविदितं विदितवेदितव्यानाम् । तथा चाह हर्षः[1]—

वाग्जन्मवैफल्यमसह्य शल्यं गुणाधिके वस्तुनि मौनिता चेत् । इति ।

एतद्विचाराप्रदर्शने निर्णय एव न स्याद् यदत्र कर्मधारयो वा बहुव्रीहिर्वा समासः। विचारजातस्य समुपस्थापने तु निर्मत्सरा गुणैकपक्षपातिनो विद्वांसश्छात्राश्च सद्युक्तिसमन्वितं पक्षमङ्गीकरिष्यन्ति त्यक्ष्यन्ति च तद्विपरीतं पक्षमितिहेतोः सोत्साहेन मया विषयोऽनुवर्ण्यतेऽत्र । नात्र वचनकदम्बे मत्तप्रलपितत्वमतिः कर्तव्या मत्तप्रलापाभावात् ।

साम्प्रतं श्रीपूज्यानां गुरुवर्याणां साक्षात्कृतव्याकरणप्रतिपाद्यविषयाणां श्रीरामप्रसादत्रिपाठिनां लेखनक्रमः प्रदर्श्यते । तथाहि अत्रेदं वक्तव्यम्—अत्र छायायां

१. नैषधमहाकाव्ये ८–३२ ।

कर्मधारय एवेत्यतिसाहसिकस्याभिप्राय इत्यन्तो भवदीयो ग्रन्थो गौरवाभिप्रायानवबोधहेतुकः, अत एव भवता स्वयमप्युक्तम्—इति वा साहसिकस्याभिप्राय इति। अत्र गुरुभिश्छायाग्रन्थश्चिन्त्य इत्युक्तम्। चिन्ता च विचाररूपा तत्र यद्यपि छायाकृता लक्षणापि ज्ञाता बहुव्रीहिरपि ज्ञातस्तत्र बहुव्रीहिसमासाश्रयणे शक्त्या प्रसिद्धपदार्थबोधत्वलाभसम्भवेन जघन्यवृत्तिर्लक्षणा किमिति स्वीकृता इति चिन्ताबीजम्।

यदपि-वस्तुतस्तु-प्रतीतपदार्थक इति भाष्ये प्रतीतशब्दः प्रसिद्धार्थक इत्युद्द्योतदर्शनादवगम्यते न ज्ञातार्थक येन यस्मादिति बहुव्रीहिलब्धस्य पञ्चम्यर्थस्य जन्यत्वस्य ज्ञानांशेऽन्वयः समाशङ्क्येत। एवञ्च प्रसिद्धार्थबोधक इत्यर्थो लक्षणां विना दुर्लभ एवेति उक्तम्। अत्रेदमवधेयम्–अत्र प्रतीतशब्दः प्रसिद्धार्थको न भवति किन्तु ज्ञातार्थको बहुव्रीह्याश्रयणे इति भवतो भावः अवगम्यते। तत्र प्रसिद्धिप्रतीत्योर्भेदं ब्रुवाणः श्लाघ्यप्रज्ञो भवान्। प्रसिद्धिः प्रतीतिश्चैकमेव ज्ञानम्। प्रकृष्टा सिद्धिः प्रसिद्धिः सिद्धिश्च ज्ञानम्। स्पष्टञ्चेदमद्वैतसिद्धिपदव्याख्यावसरे गौडब्रह्मानन्दयाम्। नैयायिकानामपि सिद्धिर्ज्ञानरूपाऽनुमितिप्रतिबन्धिका।

यदपि तत्र बहुव्रीह्याश्रयणे प्रसिद्धपदार्थहेतुरित्येवार्थः स्यात्, स च शब्दस्य पदार्थहेतुत्वान्नैव सम्भवति इति। इत्युक्तम्, तदपि न युक्तम्, तथाहि—प्रतीतः पदार्थो यस्मादिति बहुव्रीहौ प्रतीतपदार्थे कप्रत्ययनिरूपित–हेतुत्वमेवाभिप्रेतं न तु प्रतीतपदार्थहेतुत्वम्।

दृश्यते च नित्यसाकाङ्क्षस्थले पदार्थैकदेशेऽपि पदार्थानामन्वयः शरैः शातितपत्र इत्यादौ। किञ्च—'पदार्थहेतुत्वमपि शब्दस्य सम्भवत्येव। यतो हि द्विविधो भवति हेतुः, कारको ज्ञापकश्च। तत्र कारको दण्डादिर्घटादेः, ज्ञापको धूमादिरग्न्यादेः। तथा च प्रतीतपदार्थनिरूपितहेतुत्वं शब्दे विद्यमानमपलपतो गजनिमीलिकैव'[1] इति।

अत्र शब्दलक्षणे जातो महानपरत्र विचारोऽपि मया प्रदर्शितः। इदमत्राकूतम्—प्रतीतपदार्थ इत्यस्मिन् पदे बहुव्रीहिसमास एव मन्तव्यः। कर्मधारयसमासपूर्वक लक्षणाकरणमयुक्तमिति गौरवादिदोषगणग्रासापत्तेरिति युक्तमुत्पश्यामः।

५. रक्षोहागमलघ्वसन्देहाः प्रयोजनम्[2]—

इदं भाष्यवचनं व्याकरणाध्ययनस्य कानि प्रयोजनानीति प्रश्नस्योत्तरभूतम्। यतो हि—'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायेन, 'विना प्रयोजनं चेष्टा न कुर्याद्धस्तपादयोः' इति। 'न कुर्यान्निष्फलं कर्म' इति वचनाच्च प्रतिज्ञातस्य व्याकरणानुशासनस्य कानि प्रयोजनानीति प्रश्नोत्थानम्। तथा चोक्तं व्याकरण-

१. महाभाष्यटिप्पणे श्रीपूज्यगुरुचरणै रघुनाथशर्मभिः कृते।

२. महाभाष्यम्—पस्पशाह्निके।

महाभाष्ये—'कानि पुनः शब्दानुशासनस्य प्रयोजनानि'[१] इति। अत्रेदं विचारणीयं विद्यते यद् यादृशं वचनं व्याकरणाध्ययनस्य प्रयोजनप्रश्नभूतं तादृशमेवोत्तरवाक्यं भवेत् 'कानि पुनः शब्दानुशासनस्य प्रयोजनानि' इति प्रश्नवाक्यम्, उत्तरवाक्यञ्च-'रक्षोहागमलध्वसन्देहाः प्रयोजनम्' इति। नियमस्तु वर्तते, यद् विशेष्यवाचकपदाद् यल्लिङ्गसङ्ख्यादिबोधिकाविभक्तिर्दृश्यते तज्जातीयलिङ्गसङ्ख्यादिविभक्तिकत्वमेव विशेषणवाचकपदस्य युक्तमित्यभियुक्तोक्तः पन्थाः। सोऽपि न समासे किन्तु वाक्ये इति बोध्यम्। अत एवाभेदान्वये द्विविधं प्रयोजकं गदाधरभट्टाचार्यैः व्युत्पत्तिवादे प्रतिपादितं समासव्याससाधारण्येन। तथाहि—'अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते यथा नीलो घटः, नीलघटमानय इत्यादौ घटादौ नीलादेः, न तु विरुद्धविभक्तिमत्पदार्थस्य नीलस्य घट इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात्'[२] इति। एवञ्च प्रकृते महाभाष्यवाक्ये उद्देश्यविधेयभूतपदघटिते न समासः किन्तु वाक्यमेव। एवञ्च समानविभक्तिकत्वमावश्यकम्। तथा चोक्तम्—

या विशेष्येषु दृश्यन्ते लिङ्गसङ्ख्याविभक्तयः।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे॥ इति।

तथा च यथा पूर्वोक्तभाष्यवचने व्याकरणाध्ययनस्य प्रयोजनज्ञानाभिप्रायके 'कानि पुनः शब्दानुशासनस्य प्रयोजनानि' इत्यस्मिन् विशेष्यविशेषणवाचकपदयोः समानविभक्तिकत्वादिकम्। एवमेव समाधानपरकेऽपि वाक्येऽत्र समानविभक्तिकत्वमेव स्यात्। 'रक्षोहागमलध्वसन्देहाः प्रयोजनानि' इति। किन्तु तथा कथं न कृतं महावैयाकरणेन यथोत्तरं मुनीनां प्रामाण्यमिति वाक्यानुसारेण परमप्रामाण्यप्रतिष्ठाजुषा भगवता महाभाष्यकृतेति प्रश्नस्तदवस्थ इत्यवश्यमत्र विचारणीयम्।

ननु यथा समानवचनकत्वं कथं नात्रेति शङ्का समुत्थापिता तत्र च गाम्भीर्यमपि प्रदर्शितमवश्यविचारणाय। तथैव समानलिङ्गकत्वमपि विशेष्यविशेषणबोधकपदयोः कथं नाशङ्कितमिति चेन्न, 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'[३] इति सूत्रप्रामाण्येन विरोधाभावात्। रक्षा चोहा चागमश्च लघु च असन्देहश्चेत्येवं रूपेणेतरेतरद्वन्द्वसमासः। एवञ्चानुशासनविशेषबलादत्र कन्यारत्नमित्यादिवल्लिङ्गव्यत्यासस्य साधुत्वेऽपि विभिन्नवचनस्य कथं साधुत्वमिति विचारणीयमिति प्रश्नस्तदवस्थः। यदि च विनैव केनचिन्नियमेन विशेष्यविशेषणवाचकयोरनयोः पदयोः साधुत्व-

---

१. व्याकरणमहाभाष्ये पस्पशाह्निके।
२. व्युत्पत्तिवादे जयायुक्ते—पृ० ७।
३. पा० सू०—२।४।२६।

समर्थनाय दुःसाहसं क्रियते तर्हि वैयाकरणधुरीणधृतपथस्य भङ्गप्रसङ्गः न चैवमकुर्वन् केचन वैयाकरणाः । अत एव वैयाकरणभूषणसारे[1]—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम ॥

इत्यस्याः कारिकाया व्याख्यानावसरे धातुना सह 'स्मृताः' इति कारिकोक्तस्य बहुवचनान्तपदस्य सामानाधिकरण्योपपत्तये 'अत्र स्मृत इति वचनविपरिणामेनान्वयः'[2] इति प्रतिपादितम् । यदि च कथञ्चिदपि विना नियमं स्वच्छन्दरूपेण वाक्यप्रयोगस्य साधुत्वमुपपाद्येत तर्हि स प्रयासः सर्वथैव व्यर्थः स्यात् । किञ्च किमपि केनापि प्रयुक्तं भवेत्तथा च नियमवाक्यादिकं सूत्रवार्त्तिकादिकञ्च व्यर्थमेव भवेत् । यत्र च नेष्टापत्तेरवसरः तथा सति शब्दशास्त्रस्यामर्यादिकत्वापत्तेः ।

यदि वेदाः प्रमाणमित्यादिप्रयोगवदेकत्वमुपपादयितुं यतेत कश्चिद् विपश्चित्तर्हि तेन स्मरणीयं यत्तत्र तु-'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनत्वनियमः'[3] इति गदाधरभट्टाचार्येण व्युत्पत्तिवादे कृतेनानुगतेन बहुपरिष्कृतरूपगर्भितेन नियमेन वेदाः प्रमाणमित्यादिप्रयोगाः साधुत्वं भजन्ते । किन्तु प्रकृतभाष्यवचनं तथा नोपपादयितुं शक्यते, ततो विरुद्धस्थितिकत्वात् । तत्र वेदाः प्रमाणमित्यादौ तु प्रमितिकरणत्वस्यैकत्वेन सुविभक्तेरर्थस्यैकत्वस्यान्वयोपपत्तावपि प्रकृते तथा कर्तुमशक्यत्वात् । वेदाः प्रमाणमित्यत्र विभक्तिवाच्यस्यैकत्वस्यान्वयोपपत्तये प्रोक्तं गदाधरभट्टाचार्यैः स्वरचिते व्युत्पत्तिवादे—'वेदाः प्रमाणमित्यत्र च विशेषणपदोत्तरविभक्त्या बहुत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थताऽवच्छेदके प्रमितिकरणत्वेऽन्वेति । शाब्दप्रमाकरणत्वं यावच्छब्दनिष्ठमेकमेवेति नायोग्यता'[4] इति । किन्तु महाभाष्यवचने—रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इत्यत्र तु न प्रयोजनत्वमेकविधं वेदस्य स्वरूपेण प्रयोजनाभावात्, किन्तु प्रयोजकत्वमेव । अत एवागमस्य प्रयोजनत्वपरस्य भाष्यस्य 'आगमः खल्वपि-'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति । प्रधानं षडङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति'[5] इत्यस्य व्याख्यावसरे कैयटेन व्याख्यातमागमस्य प्रयोजकस्वरूपं प्रयोजनत्वम् । तथाहि 'आगमः प्रयोजकः प्रवर्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति । प्रयोजनशब्देन च

---

१. वैयाकरणभूषणसारे धात्वर्थनिर्णये ।
२. वैयाकरणभूषणसारे धात्वर्थनिर्णयप्रकरणे ।
३. व्युत्पत्तिवादे जयायुते प्रथमकारके १५ पृष्ठे ।
४. व्युत्पत्तिवादे प्रथमकारके गूढार्थतत्त्वालोकयुक्ते १० पृष्ठे ।
५. महाभाष्ये पस्पशाह्निके शब्दकौस्तुभयुते १९ पृष्ठे ।

फलं प्रयोजकश्चोच्यते'[१] इति। एवञ्च प्रयोजनश्च प्रयोजनानि च प्रयोजनम् इत्येवंरूपेण पदस्यास्य साधुत्वेऽपि प्रयोजनत्वं भिन्नभिन्नरूपमेवेति नूनमकामेनाप्यङ्गीकार्यम्। एक: प्रयोजनशब्द: प्रयोजयतीति प्रयोजन इति विग्रहेण बाहुलकात् कर्त्तरि ल्युडन्त: करणे वा प्रयुज्यतेऽनेनेति। उभयथापि वेदस्य प्रयोजकत्व-लक्षणमेव प्रयोजनत्वं पर्यवस्यति नान्यद्रूपम्। इत्थञ्च वेदा: प्रमाणमित्यत्र यथा सर्ववेदगतमेकं शाब्दप्रमाकरणत्वमादायैकत्वोपपत्ति: क्रियते तथा प्रकृते कर्तुमशक्य-तया कथमेकवचनत्वमिति प्रश्नस्तदवस्थ इति समाधानेन शास्त्रीयपद्धत्यनुगामिना शास्त्रवचनस्यास्य प्रामाण्यं रक्षणीयम्।

अत्रत्यप्रयोजनशब्दस्योभयविधत्वमेव शब्दकौस्तुभकृता श्रीभट्टोजिदीक्षि-तेनापि प्रतिपादितम्। तथाहि—'रक्षाप्रभृतीनि फलान्तराण्यपि सन्ति'। तथा च भाष्यम्-'कानि पुन: शब्दानुशासनस्य प्रयोजनानि? रक्षोहागमलघ्वसन्देहा: प्रयोजन-मिति'। अत्र प्रयुज्यते प्रवर्त्यतेऽनेनेति करणल्युडन्त:, प्रयोजयतीति कर्तृव्युत्पत्त्या बाहुलकात्कर्तृल्युडन्तो वा, उभयथापि प्रवर्तकविधिपर: पुंलिङ्ग: प्रयोजनशब्द: एक:। फलपर: क्लीबोऽपर:'[२] इति। एवञ्च 'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्य-सङ्ख्याविरुद्धसङ्ख्याया अविवक्षा तत्र समानवचनत्वमित्यस्य गदाधरभट्टाचार्योक्तस्य शिष्टप्रयोगानुगमकस्य नियमस्य वेदा: प्रमाणमित्यत्र सङ्घटनात् तत्रत्यदोषनिरासेऽपि प्रकृते कस्यचिदुपायस्यावश्यकतया तन्नियमानाक्रान्तत्वेन तन्नियमेनोपपत्त्यभावादस्य दोषस्य निरासाय किं समाधानमिति पूर्वपक्षे समाधीयते। तथाहि तत्र 'रक्षोहागम-लघ्वसन्देहा: प्रयोजनम्' इति भाष्यं 'कानि पुन: शब्दानुशासनस्य प्रयोजनानि' इति शब्दानुशासनप्रयोजनपरस्य भाष्यस्थप्रश्नस्योत्तरार्थं प्रवृत्तम्। तत्रायं विशेष: प्रथमं द्रष्टव्यस्ततस्तदुत्तरं विधास्यते। प्रथमं मुख्यं प्रयोजनन्तु व्याकरणाध्ययनस्य शब्दसाधुत्व-ज्ञानमेव। यत्फलं शब्दानुशासनपदघटकशब्दशब्देन विवक्षितम्। शब्दसाधुत्वरूप-व्याकरणप्रयोजनस्य किं प्रयोजनमिति प्रयोजन-प्रयोजनमपि पिपृच्छिषया प्रवृत्तं किल 'कानि पुन: शब्दानुशासनस्य प्रयोजनानि' इति भाष्यम्। अत एव भगवता शब्दतत्त्व-विदा विदितवेदितव्येन महर्षिणा पतञ्जलिना 'पुन: शब्द: प्रयुक्त:' इति बोध्यम्। अत्र 'भाष्यस्थयोरनयोर्विशेष्यविशेषणवाचकपदयो: विभिन्नलिङ्गकयो: समाधानस्य पूर्वं कृतत्वादिदानीं कथमेकवचनत्वोपपत्तिरिति प्रदर्श्यते, प्रयोजनश्च प्रयोजनानि च प्रयोजनम्। 'नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्'[३] इति सूत्रेणेतरेतरद्वन्द्वसमासा-नन्तरमेकशेषेण नपुंसकमात्राभिधायिपदमवशिष्यतेऽन्यानि लुप्यन्ते इति स्थिति:। एकवद्भावश्चापि सूत्रेणानेनैव क्रियते। एवञ्च एकवद्भावे कृते सति बहुत्ववत्यपि

१. महाभाष्ये पस्पशाह्निके शब्दकौस्तुभयुते कैयटे १९ पृष्ठे।

२. शब्दकौस्तुभे महाभाष्यव्याख्याने १७ पृष्ठे।

३. पा० सू०—१।२।६९।

सूत्रेणातिदिष्टस्यैकत्वस्य विद्यमानत्वेनातिदिश्यमानधर्मविरुद्धस्वाश्रयप्रयुक्तकार्यस्य वैयाकरणैर्निषिद्धतया तत्रैव सुविभक्तिवाच्यस्यैकत्वस्यान्वय इति कुत्र नियमानाक्रान्तिः शास्त्रविरोधादयो दोषाश्च स्युः ।

अयमत्र विशेषः—यथा रामायेत्यादौ प्रयोगे यकारस्य सुप्त्वधर्माभावेन 'सुपि च'[1] इति सूत्रेण दीर्घासिद्धौ प्रसक्तायां 'स्थानिवदादेशोऽनल्विधौ'[2] इति सूत्रेण सुप्त्वाभाववति यकारे सुप्त्वमतिदिश्य तद्बलेन अतिदिष्टं सुप्त्वधर्ममादाय दीर्घोपपत्तिः । तथैवात्रापि सूत्रेण 'नपुंसकमनुपुंसकेनैकवच्चान्यतरस्याम्' इत्यनेनातिदिष्टे एकत्वे एव सुविभक्तेरर्थस्यैकत्वस्यान्वय इति नात्र 'यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षा तत्र समानवचनत्वमिति'[3] नियमस्य व्याकोपः । उभयविधे प्रयोजनत्वे समारोप्यैकत्वं नियमोपपत्तेः । अथवा सुविभक्तेरर्थस्यैकत्वस्यान्वयविषये वर्तते तत्र व्युत्पत्तिवादे पक्षद्वयम् । एकत्वस्य साक्षादेव प्रकृत्यर्थतावच्छेदकेऽन्वयः परम्परया प्रकृत्यर्थे वा अन्वय इति च । 'सम्पन्नो व्रीहिः सुभिक्षं करोति' इत्यादिस्थले एकेन व्रीहिणा सम्पत्तेः सुभिक्षत्वस्य चाभावेन तत्र सुविभक्तेरर्थस्यैकत्वस्य न साक्षाद् व्रीहिष्वन्वयः किन्तु स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वरूपेण परम्परासम्बन्धेनान्वयः क्रियते । तथाहि—स्वमेकत्वं तदाश्रयः प्रकृत्यर्थतावच्छेदकं व्रीहित्वं तद्वत्त्वं व्रीहिष्विति समन्वयः ।

प्रकृते तु स्वाश्रयपदवाच्यत्वसम्बन्धेनान्वयः कर्तव्यः । स्वम् विभक्त्यर्थ एकत्वम्, तदाश्रयः पदं प्रयोजनेति पदं तद्वाच्यत्वं प्रयोजकेऽपि गतमिति समन्वयान्न काप्यनुपपत्तिरिति भाष्यस्थपदयोः प्रामाण्योपपत्तये विचारितः शास्त्रानुसारी पन्थाः ।

असन्देहस्य फलत्वोपपत्तिः

तत्र 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति भाष्यवचनेन प्रयोजकस्य गमस्य प्रयोज्यानां व्याकरणाध्ययनस्य फलानाञ्च कृतो निर्देशः । तत्र समानविभक्तिकत्वस्य समानलिङ्गत्वस्य चोपपत्तिः कृता पूर्वं यथाशास्त्रं युक्त्या च । साम्प्रतमिदं विचार्यते यद् 'असन्देहस्य' कथं व्याकरणाध्ययनप्रयोज्यत्वेन फलत्वमिति । कुतश्चासन्देहस्यापि फलत्वेन निर्देशस्तस्य फलत्वे चास्ति कश्चन विशेष इति नोपेक्ष्योऽसौ विषयः । तत्र यथा गीतायामुक्तम्—'संशयात्मा विनश्यति[4]' इति । तद्वचनप्रामाण्यात् सन्देहस्य नाशकरणत्वान्नाशस्य चानिष्टत्वादिष्टस्येष्टसाधनस्य च सर्वाभिलाषविषयत्वात्

१. तत्रैव–७।३।१०२ ।

२. पा० सू०—१।१।५६ ।

३. व्युत्पत्तिवादे जयायुते पृ० १३ ।

४. श्रीमद्भगवद्गीता—४।४० ।

सन्देहाभावस्य फलत्वम् । यथा च श्रुतौ वेदान्तवाक्यजन्यापरोक्षब्रह्मसाक्षात्काराभावे—'इह चेदवेदीदथ सत्यमस्ति नो चेदिहावेदीन्महतीविनष्टिः'[1] इति वचनेन ब्रह्मज्ञानाभावे विनाशः प्रोक्तः । स च विनाशो जन्मजरामरणलक्षणविलक्षणसंसारप्राप्तिरेव । प्रकृते च व्याकरणाध्ययनाभावे विनाशः साधुशब्दप्रयोगप्रयोज्यपुण्याभावेन कल्मषव्यापायाभावे ज्ञानाधिकारित्वासम्पत्तिस्तद्द्वारा मोक्षासिद्धिरेव । अतः शब्दप्रयोगेषु सन्देह एव न भवेत् कः शब्दः साधुः को वा न साधुरिति हेतोरध्येयं व्याकरणम् ।

इदानीमिदं विचारणीयं विद्यते यद्भाष्ये प्रदर्शितस्यासन्देहरूपफलस्य सन्देहाभावरूपतया को नु नामाभावोऽत्र ग्राह्यः ? यतो हि चत्वारोऽभावाः प्रतिपादिताः सन्ति शास्त्रेषु । प्रागभावप्रध्वंसाभावान्योऽन्याभावात्यन्ताभावभेदात् । तत्रान्योन्याभावभिन्नास्त्रयोऽभावाः संसर्गाभावपदेन व्यवह्रियन्ते । तथा चोक्तं विश्वनाथपञ्चाननभट्टाचार्यैः[2]—

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च ॥
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते । इति ।

एवञ्च व्याकरणाध्ययनस्य फलभूतः सन्देहाभावः सन्देहतामापन्नो यच्चतुर्षु अभावेषु कोऽयमभाव इति । अतोऽसन्देहस्य फलत्वोपपत्तये कोऽयमभाव इति प्रश्नस्य सदुत्तरमवश्यमन्वेषणीयमिति कृत्वा पूर्वाचार्याणां पदवाक्यप्रमाणपारावारीणानां तत्तट्टीकाकृतामुपदेशयुक्तवाक्यरूपं स्मृत्वा स्मृत्वा युक्तिञ्चाश्रित्याभावस्वरूपनिर्णयाय ममैष प्रयासः । यद्यपि न्यायग्रन्थेषु तन्मतसम्मतानामेवाभावानां विभागस्तथापि न स वैयाकरणानामपि विरुद्धः । 'अव्ययं विभक्तिसमीपसद्धिवृद्धयर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पतिसाकल्यान्तवचनेषु'[3] इति सूत्रेऽर्थाभावपदेनात्ययपदसानिध्यादत्यन्ताभावस्यैव विवक्षणात्, अत्ययपदेन ध्वंसाभावस्यैवाभिप्रेतत्वात् । तथा च प्रतिपादितं वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन—'मक्षिकाणामभावो निर्मक्षिकम्, हिमस्यात्ययोऽतिहिमम् । अत्ययो[4] ध्वंसः' इति । एवमेवान्योन्याभावे मानमनेकानि सूत्राणि सन्ति । यथा—'नञ्'[5] इति सूत्रम् । 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्','नगोऽप्राणिष्वन्यतरस्याम्',[6] 'नञस्तत्पुरुषात्'[7]

---

१. केनोपनिषद्—२।५ ।

२. 'न्यायसिद्धान्तमुक्तावली' प्रत्यक्षपरिच्छेदे श्लोक; १२–१३ ।

३. पा० सू०—२।१।६ ।

४. 'वैयाकरणसिद्धान्तकौमुदी' अव्ययीभावप्रकरणे १३ पृष्ठे ।

५. पा० सू०—२।२।६ ।

६. पा० सू०—६।३।७७ ।

७. तत्रैव—५।४।७१ ।

इत्यादीनि बहूनि सन्ति सूत्राण्यभावानां प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावानां बोधकानि। इह तु दिङ्मात्रमेव निदर्शनरूपेण कृतम्। व्याकरणमहाभाष्यतत्त्वविदां कैयटनागेशछायाकारशब्दकौस्तुभकृतां महाविदुषां कैयटनागेशवैद्यनाथपायगुण्डेभट्टोजिदीक्षितानां व्याख्यानाच्चाभावस्य प्रविभागौ वैयाकरणानां मतेऽभावे चतुर्भागविभक्ते 'प्रामाण्यम्' भजते। असन्देहरूपस्य फलस्य च निदर्शनरूपेण महाभाष्ये कृतं व्याख्यानम्। तथाहि—'असन्देहार्थञ्चाध्येयं व्याकरणम् याज्ञिकाः पठन्ति स्थूलपृषतीमग्निवारुणीमनड्वाहीमालभेत' इति। तस्यां सन्देहः—स्थूला चासौ पृषती स्थूलपृषती, अथवा स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति वेति तां नावैयाकरणः स्वरतोऽध्यवस्यति यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति'[1] इति।

अयम्भावः—यदि तत्पुरुषसमासस्तदा 'समासस्य'[2] इति सामान्यसूत्रेणान्तोदात्तो भवति स्वरः। बहुव्रीहिसमासाश्रयणे तु 'बहुव्रीहौ प्रकृत्या पूर्वपदम्'[3] इति सूत्रेण पूर्वपदं प्रकृतिस्वरेण भवेत्। तत्र किंकर्तव्यमिति नावैयाकरणो निश्चेतुं शक्नोति वैयाकरणस्तु—अर्थविशेषाश्रयबहुव्रीहिनिबन्धनपूर्वपदप्रकृतिस्वरमेव मनुते। अतोऽवश्यमध्येयं व्याकरणमिति महाभाष्यतात्पर्यम्। तथा चोक्तं कैयटेन 'स्वरत इति—पूर्वपदप्रकृतिस्वराद्बहुव्रीह्यथावसाय इत्यर्थः' इति। स्थूलपृषतीमित्यत्र स्थूलशब्दः फिट्स्वरेणान्तोदात्तः। बहुव्रीहौ तस्यैव स्वरो विधीयते। शिष्टमनुदात्तम्। तथा च सूत्रम्—'अनुदात्तं पदमेकवर्जम्'[4] इति। तत्पुरुषे तु न तथा। तत्र 'समासस्य' इति सूत्रेणान्तोदात्तत्वविधानादतोऽत्यन्तमन्तरमिति द्रष्टव्यमत्र समासभेदे। न च विना व्याकरणाध्ययनजन्यज्ञानमस्मिन्नतिविकटे कार्ये निर्णयः कर्तुं शक्यः। अत एवासन्देहार्थमपि नूनं व्याकरणमध्येयमिति महाभाष्यकृतां तात्पर्यम्। अत एवात्याग्रहेण महाभाष्ये प्रतिपादितम्—'तां नावैयाकरणः स्वरतोऽध्यवस्यति इति। ताम्—श्रुतिमित्यर्थः। तथा च तत्रैवोद्द्योते—ताम्—अनड्वाहीम्' इति व्याख्यातम्। अत्र वेदनार्थे प्रत्ययः। व्याकरणं वेत्तीति वैयाकरणः। अर्थात् व्याकरणाध्ययनजन्यज्ञानवानेव स्वरसन्ध्यादिकार्येषु निःसन्देहं प्रयोगं कर्तुं प्रभवति नान्यः। वेदनार्थेप्रत्ययविधायकं सूत्रम् 'तदधीते तद्वेद'[5] इति। विशेषस्तु श्रीवैद्यनाथपायगुण्डेमहोदयेन रचितायां छायाव्याख्यायां द्रष्टव्यम्।

---

१. व्याकरणमहाभाष्ये शब्दकौस्तुभयुते २१ पृष्ठे पस्पशाह्निके।

२. पा० सू०—६।१।२२३।

३. तत्रैव—६।२।१।

४. पा० सू० ६।१।१५८।

५. पा० सू०—४।२।५९।

भट्टोजिदीक्षितोऽपि स्वरचिते शब्दकौस्तुभे सारेण यत्प्रतिपादितवानत्र तत् प्रदर्श्यते तत्त्वनिश्चयाय। तथाहि—'असन्देहोऽपि प्रयोजनम्। तथाहि—स्थूलपृषती-मनड्वाहीमालभेत' इति श्रूयते। तत्र सन्देहः कर्मधारयोऽयं बहुव्रीहिर्वेति? तत्र कर्म-धारयपक्षे 'पृषतीशब्देन मत्वर्थलक्षणया पृषत्त्वती बिन्दुमती गौरेवाभिधीयते, स्थूलापि सैव, बिन्दूनां स्थौल्यं तानवं वा यथा तथास्तु। बहुव्रीहौ तु स्थौल्यं पृषत्स्वेवेति, गौस्तु स्थूला कृशा वेत्यनादरः। तत्र लकाराकारे उदात्तत्वं दृष्ट्वा पूर्वपदप्रकृति-स्वरेण बहुव्रीहिं वैयाकरणो निश्चिनोति। ततश्च निश्चयेन प्रतिबन्धात् संशयानुत्पादः। स एवासन्देहः। अर्थाभावे अव्ययीभावादसन्देहमिति स्यादिति चेन्न, पर्यायेणाव्ययी-भावतत्पुरुषसंज्ञाद्वयमपीह भवतीति द्वितीये उपपादयिष्यमाणत्वात्। अत एवोभयथा मुनिप्रयोगः—'अदुतायामसंहितम्, अथाऽसंहितयेति च' एवं 'इन्द्रपीतस्योपहूतो भक्षयामि' इत्यादावपि स्वरेणैव बहुव्रीहिनिर्णये इन्द्रपीताधिकरणमवैयाकरणान् प्रति सार्थकम्। कृत्वा चिन्तान्यायेन वा नेयमिति दिक्' इति।

प्रकृतमनुसरामः—तत्र सन्देहाभावस्य व्याकरणाध्ययनफलत्वं प्रतिपादितं व्याकरणमहाभाष्ये इति नाविदितं भाष्यतत्त्वविदाम्। साम्प्रतमयं विचारः उपक्रान्तः यदभावेषु चतुर्धा विभक्तेषु प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावेषु को नु नामाभावः व्याकरणाध्ययनस्य फलत्वेन निश्चेयः? इति। तत्र नात्यन्ताभावः फलम्, तस्य नित्यत्वात् फलस्य च कार्यत्वात्। अत्रोभयमपि विरुद्धम्। कार्यञ्च भवेन्नित्यञ्चेति। नापि प्रागभावः, तस्यानादित्वेन जन्यत्वाभावेन फलत्वाभावात्। नापि फलमन्योऽन्याभावः, तस्य नित्यत्वात् प्रयोजनत्वासम्भवात्, अतिप्रसक्तेश्च। तथाहि—यद्यत्रान्योऽन्याभावस्य व्याकरणाध्ययनस्य फलत्वमङ्गीक्रियेत तर्हि महा-भाष्ये पठितानां रक्षोहादीनामुपादानं व्यर्थं स्यात्। यतो हि सन्देहभिन्ना एव ते। नहि रक्षादयः सन्देहरूपाः। अन्येषामपि घटपटादीनां सन्देहभिन्नत्वेन व्याकरणाध्ययनस्य फलत्वापत्तेश्च। अतोऽत्रासन्देहपदेन सन्देहान्योऽन्याभावस्य ग्रहणं कर्तुमशक्यम्। अत एव नागेशभट्टकृते उद्द्योते असन्देहरूपफलपरकमहाभाष्यविव-रणावसरे अन्योन्याभावस्य फलत्वेन शङ्कापि न कृता। नापि सन्देहध्वंसः फलम् तत्र सन्देहस्यावश्यकत्वेनाजातसन्देहस्य व्याकरणाध्ययनस्य निष्फलत्वापत्तेश्च। किञ्च व्याकरणाध्ययनाय प्रवृत्तो जनोऽसन्दिहानोऽपि सूत्राण्यधीत्य तं तं साधुप्रयोगं जानीते प्रयुङ्क्ते तत्प्रयोगजन्यपुण्यभाक् च भवति। यदि संशयोत्पत्तेर्नान्तरीयकत्वं स्यात्तर्हि तस्याजातसंशयस्य पुरुषस्य व्याकरणाध्ययनजन्यफलभाक्त्वमेव न स्यात्। न चेष्टापत्तिः, तस्य प्रत्यक्षविरोधात्। अतोऽत्रेदमवश्यं विचारणीयमिदं विद्यते यद् व्याकरणाध्ययनस्य शब्दानुशासनापरपर्यायस्य यत्फलं महाभाष्यकृता महाभाष्ये प्रदर्शितम् असन्देहरूपं तस्य कस्मिन्नभावेऽन्तर्भाव इति।

अत्रेदं समाधानम्—व्याकरणाध्ययनस्य सन्देहप्रागभाव एव फलमित्यवधेयम्। तथा चाह कैयटः "सन्देहस्य प्रागभावोऽत्र द्रष्टव्यो न तु प्रध्वंसाभावः। नहि

वैयाकरणस्य संशय उत्पद्य विनश्यति, इतरस्यैव तदुत्पादात्"[1] इति। यज्जन्यं तदेव फलं यथा यागेन जन्यं स्वर्गरूपं कार्यं फलमुच्यते। प्रागभावस्तु न जन्योऽनादित्वात्। तस्य लक्षणमेवैतादृशम्– "अनादिः सान्तः प्रागभावः" इति। एवञ्चानादेः प्रागभावस्य (सन्देहप्रागभावस्य) कथं व्याकरणाध्ययनस्य फलत्वमिति चेदत्रोच्यते—नहि स्वरूपेण प्रागभावः फलम्, अपि तु तत्परिपालनमेव व्याकरणाध्ययनस्य फलम्। अत्रापि यदीत्थं शङ्केत यद् दृष्टन्तु लोके इदमेव यदुत्पन्नमेव वस्तु रक्ष्यते न त्वनादीति चेत्तर्हि इदं तत्र वक्तव्यम्—यथा नित्यस्य श्रुतिप्रमितानादिभावस्याप्यात्मनः परिपालनप्रयोगः प्रचुरः उपलभ्यते—'आत्मानं रक्षति, आत्मानं गोपायीत' इत्यादिः। न चात्मा जन्यः। परिपालनञ्च प्रयुज्यमानं दृश्यते, तर्हि तस्य लोकशास्त्रव्यवहार-प्रमितस्यात्मोद्देश्यकपरिपालनस्य कोऽर्थो येन विरोधो न भवेदिति चिन्तायां परिष्क्रियते आत्मनः परिपालनं नाम शास्त्रनिषिद्धकर्मजन्यदुरितद्वारणमेव। यथा लोकेऽग्नेर्माणवकं वारयतीत्यादौ प्रयोगे वारणमेव बालकरक्षणं तथैवानिष्टादात्मनो वारणमेवात्मनो नित्यस्यापि रक्षणम्। रक्षधातुस्तु ध्वंसप्रागभावे प्रयुज्यते यथा—'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ। काकादिकर्तृकदधिकर्मकनाशानुकूलव्यापाराभावानुकूलव्यापारस्यैव प्रतीयमानत्वात्। अत एव भगवत्पादैः श्रीमच्छङ्कराचार्यैः—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद् धनम्[2] ॥ इति।

मन्त्रस्य व्याख्यावसरे 'भुञ्जीथाः' इति मन्त्रघटकस्य पदस्य 'पालयेथाः' इति व्याख्यानं कृतम्। तदनन्तरञ्च—"एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठ-तया आत्मा रक्षयितव्य इति वेदार्थः" इति प्राहुः। इत्थञ्च यथा नित्यस्यानादेरात्मनः पालनं विवक्षितप्राकरणिकार्थरूपं गृह्यते तथैव प्रकृते सन्देहस्य प्रागभावः व्याकरणा-ध्ययनेनार्थाद् व्याकरणाध्ययनजन्यसाधुशब्दस्वरूपनिश्चयात्मकज्ञानेन प्रतिपालनीय इति महाभाष्यतात्पर्यम्। अपरञ्च—इत्थमपि सन्देहप्रागभावस्य रक्षणं परिष्कर्तुं शक्यते। तथाहि—प्रागभावस्य प्रतिपालनं नाम—प्रतियोगिजनककारणविध्वंसनम्। प्रागभावस्य प्रतियोगी सन्देहः। यदि सन्देहः स्यात्तर्हि प्रागभावो विनश्येत्, प्रागभावस्य प्रतियोगिजन्मनाश्यत्वात्। एवञ्च यस्याभावः स प्रतियोगीति शिष्टोक्त्या यस्य सन्देह-स्याभावः स एव प्रतियोगी। तस्य जनकं यत्कारणं तस्य विध्वंसनमेव व्याकरणाध्यय-नस्य प्रयोजनम्। इदमेव सन्देहप्रागभावस्य रक्षणं नाम। इत्थञ्च परिष्कारस्यास्य प्रतियोगिजनककारणविध्वंसनलक्षणस्य समन्वयो जातः। तथा प्रतिपादितं नागेश-भट्टेनोद्द्योते—"नन्वसन्देहः सन्देहाभावः। स च नात्यन्ताभावः, तस्य नित्यत्वात्। न च ध्वंसः, तत्तद्व्याकरणज्ञानवतः सन्देहस्यैवाभावेन तदसम्भवात्। यस्य त्वधीतव्याकरण-

१. कैयटे—पस्पशाह्निके प्रकृतवचने महाभाष्ये शब्दकौस्तुभयुते २१ पृष्ठे।
२. ईशावास्योपनिषद्—मन्त्रः १।

स्यापि क्वचित् सन्देहः स तद्विषयकवैयाकरणत्वाभाववानेव, वेदनार्थे प्रत्ययोऽत आह—प्रागभाव इति। तत्परिपालनञ्च शास्त्राध्ययनफलम्, न तु स्वरूपम्, तस्याजन्यत्वात्। तत्पालनञ्च प्रतियोगिजनककारणविध्वंसनम्, प्रागभावस्य प्रतियोगिजन्मनाश्यत्वादिति बोध्यम्[1]" इति।

इदमत्र तत्त्वम्—कार्यसामान्यं प्रति प्रतिबन्धकाभावः कारणमिति सामान्यनियमः। अत एव वैयाकरणभूषणसारव्याख्याने दर्पणे प्रोक्तम्—"सत्येकस्मिन्नपि बाधके समवहितसाधकसहस्रादपि कार्योत्पत्तेरदर्शनात्[2]" इति। एवञ्च सन्देहोत्पत्तौ प्रतिबन्धकाभावोऽपेक्षितः। यथा दाहं प्रति शुष्केन्धनाग्निसंयोगस्य कारणस्य विद्यमानतायामपि प्रतिबन्धकविधया प्राप्तस्य चन्द्रकान्तमणेरभावः कारणम्। यतो हि चन्द्रकान्तमणिसत्त्वे दाहो न जायते तदपसारणे च समुत्पद्यतेऽतः प्रतिबन्धकस्य चन्द्रकान्तमणेरभावः कारणमिति दृष्टचरम्। तथैव प्रकृते कोटिद्वयात्मकस्य सन्देहस्योत्पत्तौ प्रतिबन्धकस्य व्याकरणाध्ययनस्याभावः कारणम्। व्याकरणाध्ययने कृते तु संशयस्य हेतुरेव नष्ट इति कारणाभावात् कार्याभावः। व्याकरणाध्ययनस्याभावः संशयं प्रति हेतुः। यतो हि संशयं प्रति प्रतिबन्धकं व्याकरणाध्ययनम्। व्याकरणाध्ययने संवृत्ते संशयानुपपत्तेः। व्याकरणाध्ययने च कृते व्याकरणाध्ययनप्रागभावस्य नष्टत्वात् प्रतिबन्धकाभावलक्षणकारणस्य विनाशेन संशयानुत्पाद इत्थमेव व्याकरणाध्ययनस्यासन्देहरूपफलं प्रति कारणत्वं हृदि निधाय नागेशभट्टेनानादेरपि सन्देहप्रागभावस्य फलत्वोपपत्तये प्रतियोगिजनककारणविध्वंसनमेव प्रागभावस्य परिपालनम्। तदेव च व्याकरणाध्ययनस्य फलमिति प्रतिपादितम्।

इदानीं महाभाष्योक्तस्यासन्देहरूपस्य सन्देहप्रागभावरूपस्य फलस्यानादित्वेऽपि व्याकरणाध्ययनफलत्वोपपत्तये नागेशभट्टेन कृते परिष्कारे प्रसङ्गात् पदकृत्यं विमृश्यते। तथाहि—तत्र प्रतियोगिजनककारणविध्वंसनमेव व्याकरणजन्यं फलं सन्देहप्रागभावस्य। तत्र प्रतियोगिकारणविध्वंसनमित्येव परिष्कारोऽस्तु कारणे जनकत्वविशेषणं किमर्थमिति चेदत्रोच्यते--यदि प्रतियोगिकारणविध्वंसनमित्येव प्रोक्तं भवेत्, तर्हि महान् दोषः प्रसज्येत। तथाहि कारणं द्विविधं भवति—एकं जनकम्, अपरञ्च ज्ञापकमिति। आद्ये यथा घटं प्रति दण्डः। द्वितीये वह्निं प्रति धूमः। धूमो न वह्निं प्रति हेतुः, किन्तु वह्निजन्य एव, तथापि धूमो वह्निज्ञानं प्रति ज्ञापकतया हेतुरेव। कार्यस्य कारणज्ञापकत्वं भूषणमेव। एवञ्च जनकपदप्रवेशाभावे ज्ञापकस्यापि सङ्ग्रहादत्रानर्थापत्तिः स्यात्। तामापत्तिं वारयितुं परिष्कारे जनकपदप्रवेशः। कथमापत्तिः ? क्व चेति चेदत्र प्रदर्श्यते। तथाहि—'अयम्, एतदर्थविषयकसन्देहात्मकज्ञानवान् सन्देहजनकवाक्यप्रयोक्तृत्वात्' इत्यत्र प्रयुक्तस्य ज्ञापकस्य हेतोः सन्देहाभावस्य प्रतियोगिभूतसन्देहज्ञापकहेतुरूपत्वाद्

१. महाभाष्ये उद्द्योते कैयटव्याख्यानव्याख्याने २१ पृष्ठे।
२. वैयाकरणभूषणसारे दर्पणे १ पृष्ठे।

व्याकरणाध्ययनेन ध्वंसनं प्रसज्येत। तद्वारणाय जनकपदप्रवेशः। तत्प्रवेशे तु न तद्दोषलेशोऽपि ज्ञापकस्य पञ्चम्यन्तपदोपस्थितस्य हेतोः संशयं प्रति जनकहेतुत्वाभावात्, ज्ञापकहेतुत्वस्यैव विद्यमानत्वात्।

पुनरत्र यदि जनकपदमात्रप्रविष्टं स्यात्परिष्कारस्वरूपं न च तत्र कारणपदं भवेत्तर्हि प्रतियोगिजनकविध्वंसनं सन्देहप्रागभावस्य परिपालनमित्येवं परिष्कारे विद्यमाने प्रतियोगिरूपं यज्जनकं तद्विध्वंसनमिति कर्मधारयसमासस्यापि ग्रहणसम्भवेन सन्देहप्रागभावस्य प्रतियोगी संशय एव। स एव च ध्वंसस्य जनकोऽपि, स्वध्वंसं प्रति प्रतियोगिविधया स्वस्य कारणत्वात्। तथा च संशयध्वंसरूपफलपक्षे यथा दोषस्तथैव पुनरपि स्यात्। अतः कारणपद प्रवेशः। तत्प्रवेशे षष्ठी समासस्वीकारेण प्रतियोगिनो जनकं यत्कारणमिति सत्त्वेन दोषाभावः।

अत्रैका शङ्का समुदेति यद् व्याकरणाध्ययनस्यासन्देहः फलमुपपादितः। अनधीतव्याकरणस्यावैयाकरणस्य तु सन्देहाभावो भवितुं नार्हति "तां नावैयाकरणौः स्वरतोऽध्यवस्यति" इति महाभाष्यवचनात्। किन्तु दृश्यते तु लोके यदधीतव्याकरणस्यापि वैयाकरणस्य पुरुषस्य सन्देहो जायते। अत एवाधीयानानां का कथा चिरमध्यापयन्तोऽपि सन्दिग्धा भवन्ति, सन्देहनिराकरणाय तत्तट्टीकां पश्यन्ति तत्तद्विद्यापारंगतानां गुरूणां पार्श्वे च गच्छन्ति। अतो व्याकरणाध्ययनस्यासन्देहः कथं फलमिति प्रश्नः? अपरञ्च व्याकरणमधीयानो वा अधीतव्याकरणो वा अनधीतव्याकरणो वा व्याकरणाध्ययनेन व्याकरणनियमज्ञानेन स्वसंशयं नाशयन्ति। एवञ्च प्रतिदिनमनुभूयते दृश्यते च। अस्यां परिस्थितौ संशयध्वंसो व्याकरणाध्ययनस्य फलं भवितुमर्हत्येव, पुनः कैयटनागेशादिभिः प्रागभावस्यैव फलत्वं कथमङ्गीकृतमित्यप्येको भवत्यत्र महानाक्षेप इति चेद्, अत्र विमृश्यते—व्याकरणाध्ययनेन यस्य प्रयोगसाधुत्वज्ञानं सम्यग् जातं तस्य सन्देहो न भवति, न वा नश्यति, किन्तु यथार्थज्ञानमेव प्रयोगस्य भवति। तेन च संशयप्रागभावस्तिष्ठत्येव। यथा न्यायसिद्धान्ते साध्यसन्देहस्य पक्षता नाङ्गीकृता, विनापि सन्देहं गृहान्तरवस्थितस्य पुरुषस्य घनगर्जनेन श्रुतेन मेघानुमानदर्शनात्। बहुत्र साध्यसन्देहस्य सत्त्वेऽपि क्वचिद् व्यभिचारादनुमितौ च व्याप्तिपक्षधर्मतयोरङ्गतया कतिपयस्थलीयसन्देहाभावेऽप्यनुमितिदर्शनान्न सन्देहस्य पक्षता, तथैव प्रकृते बहुत्र संशयध्वंसस्य दर्शनादपि सम्यग् व्याकरणाध्ययनजन्यज्ञानस्य फलं न संशयध्वंसः, विनापि संशयं कृताध्ययनस्य साफल्योपपत्तये प्रागभावस्यैव फलत्वौचित्यात्।

ननु यस्य पुरुषस्य संशयो जातः, व्याकरणाध्ययनेन च नष्टस्तस्य तु संशयप्रागभावोऽपि नष्टः, संशयजन्मतः संशयोऽपि नष्टोः व्याकरणाध्ययनत इति कथं प्रागभावस्य फलत्वमिति चेन्न, यदा यस्य संशयः प्रयोगविषये तदा तस्य वैयाकरणत्वमेव नास्तीति सिद्धान्तात्। अर्थाद् यथा दैशिकव्याप्तौ कपिसंयोगकपिसंयोगाभावावव्याप्यवृत्ती कालिकव्याप्तौ गन्धोऽव्याप्यवृत्तिरुत्पत्तिकाले घटादावसत्त्वात्पश्चाच्च सत्त्वात्, तथैव वैयाकरणत्वं कालिकाव्याप्यवृत्ति यदा संशयस्तदा वैयाकरणत्वाभावः। यदा यत्प्रयोगविषयकसाधुत्वप्रकारकसंशयाभावस्तदा वैयाकरणत्वमिति व्यवस्थाया

विद्यमानत्वान्नानुपपत्तिलेशः। अधीतव्याकरणशास्त्रस्यापि पुरुषस्य यथार्थज्ञानं भवति न भवतीति च वस्तुस्थितिः। तत्र कार्यसामान्यं प्रति कारणस्यादृष्टस्यैव महत्त्वमिति बोधव्यम्। अत एव भगवान् पाणिनिः—"कालाध्वनोरत्यन्तसंयोगे[1]", "अपवर्गे तृतीया[2]" इति सूत्रे प्रणीतवान्। पूर्वेण सूत्रेण या द्वितीया क्रियते तत्र कालत्वव्यापकत्वं विधेये भासते। यथा 'मासमधीते' इत्यत्र मासत्वव्यापकाध्ययनमित्यर्थो लभ्यते। किन्तु अधीयानस्य देवदत्तादेर्ज्ञानं यथार्थं जातं न वेति निश्चयो नास्ति तद्बोधकप्रत्ययादेरसत्त्वात्। द्वितीयेन सूत्रेण तृतीया क्रियते तेन च तृतीयाविभक्तिकरणेन विधेयस्य सत्त्वमपि प्रतीयते यथार्थत्वञ्च। यथा "मासेनाधीते" इत्यादिस्थले मासपर्यन्तमधीतवान् फलमपि तस्य जातं यथार्थज्ञानरूपमित्यर्थः। यतो हि सूत्रघटकस्यापवर्गे इति पदस्य फलवाचकत्वम्। अत एव सिद्धान्तकौमुद्यां दीक्षिताः प्राहुः—'अपवर्गः फलं तस्मिन् द्योत्ये तृतीया स्यात्'[3]इति।

इत्थञ्च कृतव्याकरणाध्ययनस्यापि पुरुषस्य प्रयोगज्ञानं यथार्थमयथार्थमिति स्पष्टतया प्रतीयते। ब्रवीति च महाभाष्यकारोऽपि भगवान् श्रीपतञ्जलिः 'समानमीहमानानां नाचाधीयाननां कश्चिदर्थैर्युज्यते कश्चिन्न युज्यते[4]' इति। एवञ्च वैयाकरणत्वं नूनमव्याप्यवृत्तीति निश्चीयते अतो न कापि दोषः। अत एव नागेशभट्टेन विदुषा उद्द्योतग्रन्थे—'यस्य त्वधीतव्याकरणस्यापि क्वचित्सन्देहः स तद्विषयकवैयाकरणत्वाभाववानेव, वेदनार्थे हि प्रत्ययोऽत आह प्रागभाव इति[5]' इति। छायाव्याख्याकारेण श्रीवैद्यनाथपायगुण्डेमहोदयेनापि छायायां वैयाकरणत्वस्याव्याप्यवृत्तितैवाङ्गीकृता। अतो सिद्धमिदं यद् व्याकरणाध्ययनस्य प्रयोजनं संशयप्रागभाव एव प्रतियोगिजनककारणविध्वंसनरूपः परिष्कृत इति। न तु संशयध्वंस इति बोध्यम्।

ननु यथा प्रागभावस्यानादेरजन्यस्यापि प्रतिपालनकर्मत्वेन व्याकरणाध्ययनस्य फलत्वमुपपादितम्, तथैव सन्देहात्यन्ताभावस्यापि फलत्वमुपपादयितुं शक्यमिति तु न भ्रमितव्यम्, प्रागभावस्यानादित्वेऽपि ध्वंसप्रतियोगित्वयोग्यत्वाद् ध्वंसात् पालनं भवितुमर्हति। अत एव तस्य फलत्वं शक्यकल्पनम्। अत्यन्ताभावस्य तु नित्यतया न नाशप्रसक्तिरित्यलं प्रसक्तानुप्रसक्तविचारेण। एकस्तु दृष्टान्तोऽत्र न विस्मर्तव्यः। यथाहि लोके काकेभ्यो दधि रक्ष्यतामिति वाक्यघटके काकपदे लक्षणां कृत्वा यावद् दध्युपघातकप्रयोज्यदधिप्रतियोगिकध्वंसप्रागभावतात्पर्येण बोधः क्रियते तथैवात्रापि संशयप्रागभावपरिपालनस्य व्याकरणाध्ययनफलत्वे न शास्त्रपद्धतिहानप्रसङ्गः, न वा लोकानुसारिप्रयोगविपरीतक्रमाक्रमणम्।

---

१. पा० सू० — २।३।५।
२. ,, — २।३।६।
३. सिद्धान्तकौमुद्यां कारकप्रकरणे "अपवर्गे तृतीया" इति सूत्रे।
४. म० भा० १।१।२ प्रत्याहारात्मके 'हयवरट्' इति सूत्रे।
५. म० भा० उद्द्योते २१ पृष्ठे।

यदा तु परमतार्किकश्रीमद्रघुनाथशिरोमणितार्किककुलभूषणमतानुसारेण प्रागभावस्याप्रामाणिकत्वात् फलाभावात् कस्यात्र फलत्वेन ग्रहणं कर्तव्यं व्याकरणाध्ययनस्येति प्रश्ने अत्यन्ताभाव एव व्याकरणाध्ययनस्य फलमिति निश्चेतव्यं दृढेन मनसा। यथा संयोगानुकूलव्यापाराभावानुकूलव्यापारो वारिधात्वर्थ इति[1] शेखरग्रन्थस्यात्यन्ताभावोऽपि फलत्वेन तत्रत्यटीकाकृद्भिर्वर्णितः। अन्यथा ग्रन्थयोजना न स्यात्। यतो हि अत्यन्ताभावो नित्यस्तस्य जनको व्यापारो न प्रसिद्धः। एवञ्च संयोगानुकूलव्यापाराभावानुकूलव्यापारो वारिधात्वर्थः शेखरे वर्णितोऽनुपपन्नो भवेत्। अतोऽत्यन्ताभावस्यापि फलत्वोपपत्तिप्रकारो यथा तत्र समर्थितस्तथैवात्रापि व्याकरणाध्ययनस्य सन्देहात्यन्ताभावः फलं कल्प्यते चेत्, तर्हि न काप्यनुपपत्तिः। यद्यपि अत्यन्ताभावोऽनादिरनन्तश्च, तथापि तस्य फलत्वं नाम तत्परिपालनमेव। अर्थाद् यथा प्रागभावस्य प्रामाणिकत्वपक्षे तस्यानादित्वेऽपि व्याकरणाध्ययनफलत्वोपपत्तये 'तत्पालनञ्च प्रतियोगिजनककारणविध्वंसनं प्रागभावस्यप्रतियोगिजन्मनाश्यत्वादिति बोध्यम्'[2] इत्येवंप्रकारेण नागेशभट्टेन उद्द्योताभिधायां महाभाष्यविवरणव्याख्यायामाख्यायि। तथैव प्रागभावस्यानङ्गीकारपक्षेऽपि अत्यन्ताभावस्यैव फलत्वोपपत्तये प्रकारोऽयं द्रष्टव्यः। तथाहि—शब्देन्दुशेखरे 'कर्तुरीप्सिततमं कर्म'[3] इति सूत्रव्याख्याने प्रसङ्गाद् वारिधात्वर्थ इत्थं वर्णितः—'वारयतेश्च संयोगाद्यनुकूलव्यापाराभावानुकूलव्यापारोऽर्थः'[4] इति। तत्र विचारोऽयं प्रसक्तो यदत्राभावपदेन कस्य ग्रहणम्? चतुर्विधेष्वपि प्रसिद्धेषु तेष्वभावेषु सर्वत्रैव दोषमापाद्य टीकाकृद्भिः श्रीमद्भिर्नित्यानन्दपर्वतीयमहोदयैरत्यन्ताभावस्यापि फलत्वेनोपवर्णनं कृतम्। तथाहि—'नन्वत्र संयोगानुकूलव्यापाराभावपदेन कोऽभावो गृह्यते? न तावदन्योऽन्याभावो धर्तुं शक्यते। यत्र निवारणेतरव्यापारं भृत्यादिर्विधत्ते, न च निवारयति तत्रापि 'वारयति' इति प्रयोगापत्तेः। भेदस्य नित्यत्वेन प्रधानव्यापारे तदनुकूलत्वस्य बाधितत्वाच्च। नाप्यत्यन्ताभावः। तस्यापि नित्यत्वेन मुख्यव्यापारेऽत्यन्ताभावानुकूलत्वस्य बाधितत्वाच्च। नापि ध्वंसः, अननुभवात्। तथाहि—यत्राकृताग्निसंयोगमग्निसंयोगाय समुद्यतं माणवकं निवर्तयति तत्रैव वारयतीति प्रयुज्यते। यत्र चाग्निं संयुञ्जन्तं माणवकं निवर्तयति तत्र तु 'अग्नेर्माणवकं विभाजयति' इत्येव प्रयुज्यते इति। एवञ्चाग्निसंयोगात् प्रागग्निसंयोगरूपप्रतियोगिनोऽसत्त्वेन ध्वंसस्य वक्तुमशक्यत्वम्। नापि प्रागभावः, तस्य प्रतियोगिसमवायिकारणवृत्तित्वशीलस्य स्वप्रतियोग्युत्पादकत्वनियमेन माणवकस्याग्निसंयोगापत्तेरिति चेत्,

१. शब्देन्दुशेखरे कारकप्रकरणे।

२. महाभाष्योद्द्योते पस्पशाह्निके २१ पृष्ठे।

३. पा० सू० १।४।४९।

४. शब्देन्दुशेखरे कारकप्रकरणे सदीपके ४४२ पृष्ठे।

अत्र केचित्—अत्यन्ताभाव एव चात्र संयोगानुकूलव्यापारस्याभावः। तदनुकूलताप्रधानव्यापारे न तज्जनकतारूपा, अपि तु तदभावप्रयोजकाभाव-प्रतियोगितारूपा। तथा च संयोगानुकूलव्यापाररूपतद्भावप्रयोजकाभावप्रतियोगित्वं निवारकवृत्तिव्यापारेऽक्षतम्। अभावयोः प्रयोज्यप्रयोजकभावश्च स्वरूपसम्बन्ध-विशेष एव। व्यापकाभावप्रयोज्यत्वस्य व्याप्याभावे व्यवहारात्। यथा 'वह्न्यभाव-प्रयोज्यो धूमाभावः' इति।

इत्थञ्च, तत्र शेखरोक्तपङ्क्तेर्व्याख्यानं टीकाकृद्भिः कृतं प्रकृतोपयोगि। यथा तत्रात्यन्ताभावस्यापि क्षेमसाधारणप्रयोज्यतामादाय फलत्वव्यपदेशः। एवमेव प्रकृतेऽपि व्याकरणाध्ययनेन संशयस्यात्यन्ताभावः फलत्वेनोपपादयितुं शक्यः।

६. लक्ष्यलक्षणे व्याकरणम्[1]

इदं वाक्यं व्याकरणमहाभाष्ये व्याकरणलक्षणविचारप्रसङ्गे निर्दिष्टम्। अत एव 'अथ शब्दानुशासनम्' इति उपक्रमभूतमहाभाष्यवाक्ये शब्दानुशासनपदेन व्याकरण-शास्त्रं गृह्यते। व्याकरणाध्ययनस्य परमं प्रयोजनं साधुशब्दज्ञानमेव। शब्दा अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य पृथक्कृत्य बोध्यन्तेऽनेनेति करणे ल्युड्विधा-नाच्छब्दत एव तथाविधार्थोपपलब्धेः। अतस्तत्र शब्दानुशासनपदघटकशब्दपदेन साधुशब्दग्रहणात् साधुशब्दज्ञानस्य व्याकरणाध्ययनस्य परमप्रयोजनत्वमवसीयते। अत एव 'साध्वनुशासनेऽस्मिञ्छास्त्रे' इत्युक्तम्। कैयटोऽपि महाभाष्यतत्त्ववेत्ता 'अथ शब्दानुशासनम्' इति महाभाष्यव्याख्यानावसरे प्राह—'भाष्यकारो विवरणकारत्वाद् व्याकरणस्य साक्षात्प्रयोजनमाह—अथ शब्दानुशासनमिति। प्रयोजनप्रयोजनानि तु रक्षादीनि पश्चाद् वक्ष्यन्ते' इति। तत्र घटितज्ञाने घटकज्ञानस्य कारणत्वात् प्रतिज्ञातस्य शब्दानुशासनस्य घटको यः शब्दस्तस्य लक्षणं पूर्वं विधेयमिति धिया भगवता महाभाष्यकृता सामान्यतोऽनुशासनीयशब्दस्वरूपं निर्दिष्टम्। तत्रैकं शब्दस्वरूपं स्फोटरूपशब्दाभिप्रायेण 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इत्यनेन निर्दिष्टम्। अपरञ्च ध्वन्यात्मकशब्दस्वरूपाभिप्रायेण 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' इत्यनेन।

ततश्च साधुशब्दविषयकप्रमात्मकज्ञानसाधनस्य शब्दानुशासनापराभिधानस्य व्याकरणस्य किं वर्तते निर्दुष्टं लक्षणमिति जिज्ञासाया नैसर्गिकत्वात्तत्र महाभाष्ये शङ्कासमाधानदले प्रदर्शिते। पूर्वं महाभाष्ये—'न चान्तरेण व्याकरणम्' तस्मादध्येयं व्याकरणम्[2]' इत्यादिमहाभाष्यवचोभिर्व्याकरणाध्ययनस्यावश्यानुष्ठेयतां प्रतिपाद्य

---

१. महाभाष्ये-पस्पशाह्निके।

२. महाभाष्ये पस्पशाह्निके।

'अथ व्याकरणमित्यस्य कः पदार्थः[१]' इति व्याकरणस्वरूपनिर्दिदिधिषया जिज्ञासा प्रदर्शिता। अत्रायं विशेषः--शब्दप्रमाणस्य प्रमाणान्तरेभ्योऽयं विशेषो विद्यते यदुत्थिताया वा उत्थाप्याया जिज्ञासायाः संशयस्य च निवर्तकत्वमिति। अत्र च व्याकरणाध्ययनस्य शब्दसाधुत्वरूपमुख्यप्रयोजनवतो रक्षोहादिमहाभाष्योक्तप्रयोजन-प्रयोजनवतो भगवता महाभाष्यकृता प्रकरणं प्रारब्धम्। तत्र स्मृतत्वे सत्युपेक्षानर्हत्व-लक्षणायाः प्रसङ्गसङ्गतेः सत्त्वादवश्यं व्याकरणशब्देन व्यवह्रियमाणस्य पदार्थस्य निश्चयो विधेय इति कृत्वा भगवता ग्रन्थोऽयमवतारितः।

'अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः' इति तत्र व्याकरणस्यानेकानि लक्षणानि प्रदर्शितानि। तत्र तत्र चानेके दोषाः प्रदर्शिताः। तेषु लक्षणेष्वन्यतममिदं लक्षणं व्याकरणस्य–'लक्ष्यलक्षणे व्याकरणम्[२]' इति। अत्र किञ्चिद्विमृश्यते— कस्यचिद्वाक्यस्य बुबोधयिषयैव प्रयोगो भवति। प्रयुक्तेन च वाक्येन बोधसम्भवे प्रयुक्तस्य वाक्यस्य व्याख्यानं न युक्तमिति प्राप्ते वदन्ति किल विज्ञाः—'अप्रतिपत्तौ अतिप्रतिपत्तौ वा व्याख्यानं कुर्वन्ति सन्तः' इति। तथा चोक्तं रामरुद्रभट्टाचार्यैः— 'अप्रतिपत्तेरन्यथाप्रतिपत्तेर्वा निरासायैव हि विवरणं कुर्वन्ति सन्तः[३] 'इति। एवञ्च कोऽत्र दोषो यस्य निराकरणाय महाभाष्यकृता 'लक्ष्यलक्षणे व्याकरणम्' इति वाक्यस्य व्याख्यानं कृतम्।

'शब्दो लक्ष्यः, सूत्रं लक्षणम्' इति। सन्ति च लक्षणस्य दोषास्त्रयः। अव्याप्त्यतिव्याप्त्यसम्भवाख्याः। ते एव दोषा सूत्रभूतस्य वाक्यस्य व्याख्याने हेतुभूत-प्रदर्शनेन भट्टाचार्यैरभिहिताः 'अप्रतिपत्तौ अन्यथाप्रतिपत्तौ वा व्याख्यानं कुर्वन्ति सन्तः' इति। एवञ्च प्रकृते के दोषाः सम्भाविता आसन् येषां निरासाय व्याख्यानं कृतमिति प्रश्नः। अत्रोत्तरमिदं वर्तते। तथाहि यदि 'लक्ष्यः ! शब्दो लक्षणं सूत्रम्' इति व्याख्या न कृता स्यान्महाभाष्यकृता तदाऽनेकेषु स्थलेषु दोषः। अतस्तत्र तत्र प्रसक्तामतिव्याप्तिं वारयितुमेव व्याख्यानं प्रवृत्तम्। यदि व्याख्या या कृता सा न स्यात्तदा 'प्रत्ययलोपे प्रत्ययलक्षणम्[४]' इति सूत्रघटकेन लक्षणपदेन बुबोधयिषिते निमित्तेऽर्थेऽतिव्याप्तिः स्यात्। एवमेव 'अनुर्लक्षणे[५]' 'लक्षणेत्थंभूताख्यानभाग-वीप्सासु प्रतिपर्यनवः[६]' इत्यत्र चातिव्याप्तिः। तत्र लक्षणपदेन ज्ञानजनकज्ञानविषयो ग्रहीतुमिष्टस्तत्रातिव्याप्तिः।

---

१. महाभाष्ये पस्पशाह्निके शब्दकौस्तुभयुक्ते ६८ पृष्ठे।

२. ,, ,, ,, ७१ पृष्ठे।

३. न्यायसिद्धान्तमुक्तावलीप्रत्यक्षखण्डे ४६ पृष्ठे रामरुद्रीव्याख्यायाम्।

४. पा० सू० १।१।६२।

५. तत्रैव १।४।८४।

६. ,, १।४।९०।

एवमेव 'सङ्घाङ्कलक्षणेष्वञ्यत्रिञामण्'[१] इति सूत्रे लक्षणपदेन चिह्नरूपेऽर्थेऽतिव्याप्तिः। अत एव तत्र समानार्थकयोरङ्कलक्षणपदयोरुपादानं नूनं पुनरुक्तिं प्रसञ्जयतीति शङ्कायाः स्वाभाविकत्वात्तद्वारणाय विभिन्नार्थकत्वमत्र वर्ततेऽतो न पुनरुक्तिदोष इति दिदर्शयिषया श्रीभट्टोजिदीक्षितेन सिद्धान्तकौमुदीव्याख्याने विभिन्नार्थकत्वमुपपादितमनयोरुभयोः शब्दयोः। कौमुद्यां शैषिकप्रकरणे—'परम्परासम्बन्धोऽङ्कः, साक्षात्तु लक्षणम्'[२] इत्युक्तम्। उपपादितञ्च तत्र तत्त्वबोधिनीव्याख्यायाम्—'यद्यप्यङ्कलक्षणयोः पर्यायत्वं प्रसिद्धम्' 'कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्' इत्यमरः, तथापि पृथग्ग्रहणसामर्थ्यादिह विशेषपरतेत्याह—परम्परासम्बन्ध इति। यथा गवादिनिष्ठः स्वामिना गोद्वारा सम्बन्धः। साक्षादिति—यथा बिदानां विद्या[३] इति। तथाहि-'मतिबुद्धिपूजार्थेभ्यश्च'[४] इति सूत्रे मतिबुद्ध्योरेकार्थयोः शब्दयोरुपादाने पुनरुक्तिर्वैयर्थ्यञ्चेत्यतः पृथग्ग्रहणसामर्थ्यात्तत्र मतिशब्दस्येच्छापरत्वप्रतिपादनेन कौमुद्यां दीक्षितेन महाभाष्यसम्मतपक्षेण दोषनिरासः कृतस्तथैव प्रकृतेऽपि भिन्नार्थकत्वान्न वैयर्थ्यम्, न वा पुनरुक्तिदोषः। एवञ्च तत्र लक्षणशब्देनाभिप्रेतेऽर्थे चिह्नरूपेऽतिव्याप्तिः स्यान्महाभाष्यीयव्याकरणलक्षणस्य 'लक्ष्यलक्षणे व्याकरणम्' इत्यस्य।

अपरञ्च—लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमात् कस्यचिद्वस्तुनो लक्षणं तत्र प्रमाणञ्चावश्यं दर्शनीयम्। तत्र लक्षणस्य किं लक्षणमिति विचारे—'असाधारणधर्मो लक्षणम्' धर्मेऽसाधारण्यञ्च लक्ष्यताऽवच्छेदकसमनियतत्वम्। लक्ष्यताऽवच्छेदकसमनियतत्वञ्च तद्व्यापत्वे सति तद्व्यापकत्वम्। यथा—गोः सास्नादिमत्त्वं लक्षणम्। पृथिव्या लक्षणं गन्धवत्त्वम्। एवञ्च यदि भगवता महाभाष्यकृता 'लक्ष्यलक्षणे व्याकरणम्' इत्येवोक्त्वा विरतं स्यात्तर्हि गवादिलक्षणेषु सास्नादिषु व्याकरणलक्षणस्यातिव्याप्तिः स्यात्। अतस्तत्रत्यामतिव्याप्तिं निरासयितुं व्याख्या विहिता न वैयर्थ्यमासादयितुं शक्या। लक्ष्यपदेन प्रसिद्धेषु गवादिषु चातिव्याप्तिः स्यादतो लक्ष्यपदेन न गवादयो विवक्षिता अत्र, किन्तु शब्दः प्रयोग इति यावदतो न कश्चन दोषः।

ननु यदि 'लक्ष्यलक्षणे व्याकरणम्' इति वचनेन व्याकरणशास्त्रीयव्यवहारे लक्षणशब्देन सूत्रस्यैव ग्रहणात् सर्वाणि सूत्राणि लक्षणपदाभिधेयान्येव भविष्यन्ति। तथा च—'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'[५] इति परिभाषया लक्षणप्रतिपदोक्तयोर्भेदः कथं स्यात्? प्रतिपदोक्तस्यापि लक्षणत्वेन भेदीयानुयोगितावच्छेद-

---

१. पा० सू०—४।२।१२७।

२. व्याकरणसिद्धान्तकौमुद्यां शैषिकप्रकरणे ४४० पृष्ठे बालमनोरमातत्त्वबोधिनीयुतायाम्।

३. वैयाकरणसिद्धान्तकौमुदीशैषिकप्रकरणे ४४० पृष्ठे।

४. पा० सू० ३।२।१८८

५. परिभाषेन्दुशेखरे तृतीयतन्त्रे ११४ परिभाषा, भूतियुते ३२० पृष्ठे।

कत्वाभावात्। न हि भवति विशेषे सामान्यभेदः—घटो न द्रव्यमिति द्रव्यत्वस्य घटे वृत्तित्वेन भेदीयानुयोगितावच्छेदकत्वाभावात्। एवमेवात्रापि प्रतिपदोक्तशास्त्रस्यापि लक्षणत्वेन प्रतिपदोक्तं न लक्षणमिति भेदाग्रहणात् कथं परिभाषायाः प्रवृत्त्या साधुशब्दनिष्पत्तिः? कथञ्च बाध्यबाधकभावोपपत्तिः? एवमेवानेकाः परिभाषा अप्रामाण्यशङ्काकवलितत्वान्निश्चितार्थबोधाजननेन विधिशास्त्रोपकारिका न स्युः। यथा—'लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः',[1] 'यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदप्यनित्यम्'[2], 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'[3] इति। वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन शैषिकप्रकरणे 'शेषे'[4] इति सूत्रे तस्य सूत्रस्य लक्षणत्वमधिकारत्वञ्च प्रतिपादितम्। यदा सर्वाणि सूत्राणि लक्षणपदाभिधेयानि तदा कथं लक्षणाधिकारशास्त्रयोः प्रविभागः कर्तुं शक्यः? उक्तञ्च महावैयाकरणेन महाभाष्यतत्त्वविदा विदुषा श्रीभट्टोजिदीक्षितेन—"शेषे इति लक्षणञ्चाधिकारश्च[5]" इति 'शेषे' इति सूत्रस्थमहाभाष्यविवरणे प्रदीपे कैयटप्रणीते सूत्रस्यास्य लक्षणत्वमुपपादितम्। नागेशभट्टेनापि तथैव प्रतिपादितम्। इत्थञ्च सर्वेषां सूत्राणां महाभाष्यदिशा लक्षणत्वाद्वैयाकरणधुरीणैः प्रामाणिकैराचार्यैः कृतास्तादृशा व्यवहाराः कथं प्रामाण्यसाम्राज्यमासादयेयुरिति चेदत्र विमृश्यते। तथाहि—याः परिभाषाः प्रदर्शितास्तत्र कृतो लक्षणशब्दप्रयोगो लाक्षणिकपरः। अर्थाद् एकः शब्दः स्वयमेव तादृशानुपूर्वीविशिष्ट एकश्च लक्षणेन (सूत्रेण) तादृशीमानुपूर्वीं प्रापितः। तत्र द्वयोरेककार्यप्रसङ्गे यच्च कार्यमनिष्टं कथं व्यवस्था स्यात्, अतस्तास्ताः परिभाषा अनियमे नियमकारित्वाद् विधिशास्त्रस्याप्रामाण्य-ज्ञानानास्कन्दितलक्ष्यधर्मिकसाधुत्वप्रकारकज्ञानजनने साहाय्यमाचरन्ति। यथा 'पा' पाने[6] इति धातुः स्वयमेवाकारान्तः एकश्च 'पै ओ वै'[7] शोषणे इत्यपि धातुः। तत्र चात्वे कृते 'पा' इति सम्पद्यते। तस्य रूपं 'पाति' इति भवति 'पा' पाने इत्यस्य तु पिबति। तत्र लक्षणेन (सूत्रेण) 'आदेच उपदेशेऽशिति'[8] इति सूत्रेणात्त्वे कृते द्वयोरानुपूर्व्याः साम्यात्—'गातिस्थापाघुपाभूभ्यः सिचः परस्मैपदेषु'[9] इति इत्यनेन सिचो लुक् स्यात्। एवमेव—'परमेण

---

१. भूतियुते—पृ० ३२०, द्वितीयतन्त्रे—परि० ४५।
२. भूतियुते—पृ० ३२०, द्वितीयतन्त्रे—परि० ४७।
३. भूतियुते—पृ० ३२०, तृ० तन्त्रे—परि० ८६।
४. पाणिनिसूत्रम्—४।२।९२।
५. वैयाकरणसिद्धान्तकौमुद्यां शैषिकप्रकरणे—पृ० ३८५।
६. धातुपाठः—९२५।
७. भ्वादिप्रकरणे कौमुद्यां मूलमात्रपुस्तके—पृ० ११८।
८. पाणिनिसूत्रम—६।१।४५।
९. पाणिनिसूत्रम्—२।४।७७।

कारकेण'परमकारकेण इत्यत्र 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः[१]' इति सूत्रेण तुल्यस्वरापत्तिः स्यात्, अतो वारितो दोषः परिभाषयाऽनया। अतोऽत्र लक्षण-पदेन लाक्षणिकस्य ग्रहणम्। सूत्रद्वाराप्राप्ततादृशानुपूर्वीमत्त्वम्। अर्थाद् विधिशास्त्र-घटकानुपूर्वीसदृशानुपूर्वी यत्र सूत्रेण निष्पादिता तत्रैव कृतं तादृशम्, न तु सूत्रसहकारेण तादृशानुपूर्वी लाभस्ते भवन्ति प्रतिपदोक्ताः शब्दाः। अत एव गणपाठस्यापि सार्थक्यम्। एवञ्च न ते व्यवहारा आचार्यैः कृता व्यर्थाः। तथा चोक्तं परिभाषेन्दुशेखरे नागेश-भट्टेन—'लक्षणं लाक्षणिकमुपचारात्। तत्तद्विभक्तिविशेषाद्यनुवादेन विहितो हि समासादिः प्रतिपदोक्तस्तस्यैव ग्रहणम्, शीघ्रोपस्थिकत्वात्। द्वितीयो हि बिलम्बोपस्थि-तिकः। 'पै' इत्यस्य 'पा' इति रूपं लक्षणानुसन्धानपूर्वकं बिलम्बोपस्थितिकम्, पिबतेस्तु तच्छीघ्रोपस्थितकम्। इदमेव ह्येतत्परिभाषाबीजम्'[२] इति।

अन्यास्वपि परिभाषासु इत्थमेव दोषनिराकरणं कर्तव्यम्। 'शेषे' इति सूत्रस्थ-सिद्धान्तकौमुदीस्थवाक्यन्तु लक्षणपदेन विधिसूत्रस्य ग्रहणेन संलापनीयम्। अर्थात् 'शेषे' इति सूत्रं विधिसूत्रमपि अधिकारसूत्रमपि। षड्विधानि किल सूत्राणि प्रोक्तानि। तथाहि—'संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्'[३] इति। एवञ्च 'शेषे' इति सूत्रं यदि केवलं विधिरूपमेव स्यान्न च स्याद-धिकारसूत्रं तर्हि उत्तरसूत्रेष्वनुवृत्त्यभावाच्छेषत्वमेव तेषां न स्यात्। उक्तादन्यः शेष इत्युक्तेरपत्यादिचतुरर्थीपर्यन्तार्थातिरिक्तत्वे सति 'तस्य विकारः'[४] इत्यतः प्राग्विहिताः प्रत्ययाः शेषार्थाः। अतः सिद्धान्तकौमुद्यां 'शेषे' इति सूत्रे लक्षणञ्चाधिकारश्चेत्यत्रत्य लक्षणशब्देन विधिशास्त्रस्य ग्रहणम्। एवञ्च 'शेषे' इति सूत्रं विधिसूत्रमपि वर्ततेऽ-धिकारसूत्रमपि वर्तते। अतोऽत्रत्यलक्षणशब्दो भट्टोजिदीक्षितेन प्रयुक्तो विध्यर्थोऽतो न तस्याव्यावर्तकता अधिकारशब्दस्य वैयर्थ्यञ्च। अतो भाष्यस्थस्य 'लक्ष्यलक्षणे व्याकरणम्' इति वाक्यघटकस्य लक्षणशब्दस्य सूत्रपरत्वेन लक्ष्यशब्दस्य प्रयोगपरत्वेन च दोषाभावान्न वचने दोषावसर इति सुधीधनैरवधेयम्। शेषे इति सूत्रस्य किमर्थं विधिशास्त्रत्वमधिकारशास्त्रत्वञ्च इति तत्र सूत्रे एव तत्त्वबोधिन्यामुपपादितम्। विस्तर-भयादप्रसाङ्गिकत्वाच्च तद्विषये नात्र विचारो विधीयते। तत्रैव द्रष्टव्यम्।

७ तस्मात् संज्ञासंज्ञिनावेव

इदं वचनम् 'वृद्धिरादैच्'[५] इति सूत्रे महाभाष्यकृता विन्यस्तम्। अस्य वचनस्योत्थाने किं बीजमिति चेदत्र विमृश्यते। अस्य वचनस्योपक्षेपात् प्राग् संज्ञासूत्रेऽ-

१. पाणिनिसूत्रम्—६।२।२।

२. परिभाषेन्दुशेखरे भूतियुते—पृ० ३२१।

३. शब्देन्दुशेखरे सदीपके संज्ञाप्रकरणे टिप्पण्यामुद्धृतम्— पृ० ३।

४. पा० सू० – ४।३।१३४।

५. तत्रैव – १।१।१।

स्मिन् 'वृद्धिरादैच्' इत्यत्र बहव आक्षेपाः समागताः। भाष्यकारस्य चैयं शैली लोकोत्तरा विद्यते यत्सम्भावितेषु पक्षेषु महतो बहूंश्च दोषान् प्रदर्श्य पश्चात् सिद्धान्त-पक्षं वर्णयति। अनेन प्रकारेण प्रतिपत्तॄणां व्युत्पत्तिरूहापोहकौशलञ्च वर्धते। अतः 'वृद्धिरादैच्' इति सूत्रेऽपि सूत्रमिदं कीदृशं भवितुमर्हतीति पक्षाननेकान् विकल्प्य ततः पश्चात् 'तस्मात् संज्ञासंज्ञिनावेत्र' इति भगवता भाष्यकारेण निर्णीय प्रोक्तम्। तेषु विकल्पितेषु पक्षेषु दोषाः परिलक्ष्यन्ते इति न ते मान्याः पक्षाः, दोषवत्त्वस्य त्याज्यत्वात् तद्रहितस्य च ग्राह्यत्वात्। अत्र के पक्षाः सम्भावितास्तत्र च के दोषा इति प्रदर्श्यते।

साधुत्वविधायकः पक्षो व्याकरणशास्त्रस्य परमं प्रयोजनं साधुशब्द-संसाधनम्। यथाहि—'क्षय्यजय्यौ शक्यार्थे'[1] इति सूत्रेण तयोर्द्वयोः शब्दयोः साधुत्वमर्थ-विशेषे ज्ञाप्यते, तथैवात्रापि वृद्धिरादैजित्यनयोः पदयोः साधुत्वं विधीयते न वेति जिज्ञासा निसर्गतो जायते। यतो हि व्याकरणशास्त्रस्येदं प्रथमं सूत्रम्, व्याकरण-शास्त्रमेव शब्दानां साधुत्वासाधुत्वयोः प्रमाणम्। एवञ्चान्यत्र सूत्रेषु शब्दसाधुत्व-निपातनदर्शनादत्रापि साधुत्वं विधीयते, न वेति विचारः समुदेति। न च 'क्षय्यजय्यौ शक्यार्थे' इत्यत्रान्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगज्ञापनं निपातनं भवितुमर्हति। प्रकृते तु तथाप्रसङ्गाभावात् कथं सन्देहः? तत्र हि शक्यार्थेऽपि क्षेयं जेयमिति मा भवेदतो हेतोस्तत्र निपातनं कृतम्। शक्यार्थे क्षय्यम्, जय्यमित्येव, न तु क्षेयं जेयमिति। अत्र तथा परिस्थितेरभावात् कथमस्य विचारस्यावसर इति चेदत्र विमृश्यते—अत्रापि 'वृद्धिरादैच्' इति सूत्रे 'कृतमनयोः साधुत्वम्' इति महाभाष्यवाक्येऽनयोरिति पदादत्र द्वे एव पदे इति प्रतीयते। तथा चात् च ऐच् च' इत्यनयोः समाहारद्वन्द्वे कृते समासान्तः स्यात् टच् प्रत्ययः। स कथं न? तस्मिन् टज्विधायके सूत्रे विद्यमानेऽत्र टजन्तस्याप्रयोगे नूनमेवैकं शरणं निपातनम्। तथा च टजं विनैवास्य प्रयोगस्य दर्शनात् साधुत्वमपि सूत्रेणानेन निपातनाज्ज्ञापितमिति वक्तुं शक्यमिति चेदत्रायं सिद्धान्तः। तथाहि—नेदं सूत्रं साधुत्वार्थकं भवितुमर्हति। यतो हि तत्रैव निपातनेन कार्यं क्रियते यत्र किमपि विधायकं न भवेत्। यथा 'पृषोदरादीनि यथोपदिष्टम्'[2] इति सूत्रेण। तत्र हि पृषदुदरमिति विग्रहे पृषदुदरमित्येव रूपं प्राप्तं तच्च नेष्टमिति हेतोः सूत्रमिदं प्रवृत्तं 'पृषोदरादीनि यथोपदिष्टम्' इति। अर्थात् दकारस्य लोपे गुणे च पृषोदरमिति सिद्धं रूपम्। यथोपदिष्टशब्दस्य शिष्टैरुच्चारितत्त्वार्थकत्वात्। तथा चोक्तम्—'पृषोदरप्रकाराणि शिष्टैर्यथोच्चरितानि तथैव साधूनि स्युः'[3] इति। तट्टीकायां

---

१. पाणिनिप्रणीताष्टाध्यायी—६।१।८१।

२. पाणिनिसूत्रम्—६।३।१०९।

३. वैयाकरणसिद्धान्तकौमुद्यां समासाश्रयविधिप्रकरणे ६।३।१०९ सूत्रे।

तत्त्वबोधिन्यामपि[१]—'शिष्टैरिति। अध्याहारलभ्यमिदम्। 'यथोपदिष्टम्' इत्यत्र यथार्थेऽव्ययीभावः। उपदिशिश्चोच्चारणक्रियः। 'यानि यानि शिष्टैरुपदिष्टानीत्यर्थः' इति प्रोक्तम्। प्रकृते तु 'वृद्धिरादैच्' इति सूत्रे प्रयुक्तयोरादैच्पदयोः साधुत्वं कृतमेवेति व्यर्थसाधुत्वनिपातनेनेति बोध्यम्। तथा चोक्तं महाभाष्यकृता भगवता पतञ्जलिना—'कृतमनयोः साधुत्वम्। कथम्? वृद्धिरस्मायविशेषेणोपदिष्टः प्रकृतिपाठे—तस्मात् क्तिन् प्रत्ययः। आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः'[२] इति। एवञ्च दृष्टान्तदार्ष्टान्तिकयोर्महतो भेदान्नात्र साधुत्वनिपातनपक्षोपक्षेपावसरः।

नागेशभट्टेन सूत्रस्यास्य व्याख्यानावसरे उद्द्योतग्रन्थे प्रायः सर्वेषां दोषाणां कृत उद्धारः। स च तद्ग्रन्थोपस्थापनेनैव भवितुमर्हति। नहि तदर्थप्रतिपादकशब्दमात्रोपस्थापनेन कश्चिद्विशेष इति नागेशोक्तमेवोद्द्योतग्रन्थस्थमत्र प्रदर्श्य युक्ततामनुभवामि। तथाहि—'वृद्धिरादैच्' द्विपदं सूत्रं 'कृतमनयोः साधुत्वम्' इति भाष्यदर्शनात्। अन्यथोद्देश्यानेकत्वाद् वृद्धिशब्दस्यावृत्तिर्वाक्यार्थबोधाय कार्या स्यात्। द्वन्द्वे तु समाहारस्यैकस्योद्देश्यस्य शब्दतः सम्भवात् तां विनापि सिद्ध्यति। न च समाहारे टच्प्रसङ्गः, समासान्तविधेरनित्यत्वात्। 'प्रतेरंश्वादय'[३] इति सूत्रेऽश्वादिगणे राजशब्दपाठाल्लिङ्गात्। अन्यथा 'राजाहे इति टचा सिद्धे किं तेन? यद्वा पदत्रयं पस्पशायां भाष्ये 'वृद्धिः' 'आत्' 'ऐच्' इति पदविभागदर्शनात्। वृद्धिशब्दस्तु आवृत्त्या योज्यः। अत्र पक्षेऽनयोरिति भाष्यं खण्डयोरित्यर्थकमिति।

प्रयोगनियमार्थपक्षः

तत्र 'संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्' इत्यभियुक्तोक्त्या पूर्वं विधिसूत्रत्वस्य निराकरणेऽपि 'आनर्थक्यात् तदङ्गेषु' इति न्यायेन प्रयोगनियमपक्षः स्यात्। अयं भावः—यथा 'उपसर्जनं पूर्वम्'[४], 'परश्च'[५], 'ते प्राग्धातोः'[६] इत्यादिसूत्रैः प्रयोगनियमः क्रियते। अर्थाद् विनिगमनाभावादुपसर्गाः कदाचिद् धातोः परेऽपि स्युः, कदाचित् पूर्वमिति प्राप्तायामव्यवस्थायां सूत्रेण प्रयोगो नियन्त्रितः। 'ते प्राग्धातोः' उपसर्गा धातोः प्रागेव प्रयुक्ताः साधवः, न तु ततोऽन्यथा प्रयुक्ताः। एवमेव धातुभ्यः प्रातिपदिकेभ्यश्च यथासम्भवं तृतीयचतुर्थपञ्चमाध्यायेषु प्रत्यया विहिताः। ते हि प्रयोगनियामकसूत्राभावे कदाचित् प्रकृतेः

१. 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रे।
२. महाभाष्यम् १।१।१ सूत्रे।
३. पा० सू०—६।१।१९३।
४. तत्रैव—२।२।३०।
५. ,, —३।१।२।
६. ,,—१।४।८०।

पूर्वमपि स्युः, परे वेति कृत्वा कृत्तौ नियमः पाणिनिना—'परश्च' इति। अर्थात् प्रत्ययाः प्रकृतेः परे एव प्रयुक्ताः, साधवः। क्वचित् सति विशेषेऽनुशासने कामं भवतु नामान्यथापि प्रयोगः साधुर्न हि तेन काचन क्षतिः। यथा—ईषदूनः पटुः बहुपटुः इत्यत्र 'विभाषा सुपो बहुच् पुरस्तात्तु'[1] इति सूत्रेण प्रत्ययस्यापि बहुचः प्रकृतेः प्राक्प्रयोगः। समासविधायकेषु सूत्रेषु प्रथमानिर्दिष्टानां शब्दानामुपसर्जनसंज्ञा भवति। या या संज्ञा सा सा फलवतीति न्यायेन तस्य फलमिदमेव यत् 'उपसर्जनं पूर्वम्' इति सूत्रेण तस्य पूर्वं प्रयोगो भवेत्। यदि हि सूत्रमिदं न स्यात्तर्हि 'प्रथमानिर्दिष्टं समास उपसर्जनम्'[2] इति सूत्रेणोपसर्जनसंज्ञायां जातायामपि प्रयोगनियमो न स्याद् यदुपसर्जनसंज्ञकस्य पूर्वं वा प्रयोगः परतो वेति। अतः प्रयोगनियमार्थं सूत्रमिदं प्रवृत्तम्—'उपसर्जनं पूर्वम्' इति। तथैव प्रकृते सूत्रेऽपि 'वृद्धिशब्दात् परे आदैचः प्रयोक्तव्याः' इति।

सिद्धान्तपक्षः—आपाततो दृष्टान्तबलेन च यद्यपि प्रयोगनियमपक्षो रमणीयः प्रतिभाति, तथापि न समीचीनः। ये हि दृष्टान्ता उपस्थापितास्तेभ्योऽत्र महावैलक्षण्यम्। यतो हि प्रत्ययोपसर्गोपसर्जनशब्दाः प्रकृतिधातुसमासादिनियन्त्रितत्वाद् नियन्त्रितप्रयोगकाः। स्वतन्त्रस्य तु वृद्धिशब्दस्य नियमोऽशक्यः। यतो हि वृद्धिशब्दो न प्रकृतिस्तयोर्द्वयोः शब्दयोरादैचः। तथा च प्राह कैयटः—'तस्य स्वतन्त्रस्य पदस्य प्रयुज्यमानस्य नियमो नारभ्यते। अपि तु पदावयवस्य प्रकृतिप्रत्ययोपसर्जनागमादिरूपस्य। लोके तु केवल एव वृद्धिशब्दः प्रयुज्यते इति न तस्यानेन नियमः क्रियते। लोके प्रयुक्तानां हीदमनुशासनम्'[3] इति। एवञ्च प्रयोगनियमपक्षोऽपि द्वितीयः परास्तः। साम्प्रतं प्रयोगनियमपक्षनिरासे पक्षान्तरं सम्भवति न वेति विचार्यते। तथाहि—

आदेशपक्षः—तत्र पूर्वोक्तेन निरासप्रकारेण सम्भाव्यमानयोः साधुत्वप्रयोगनियमपक्षयोर्निरासेऽपि साम्प्रतं सम्भाव्यमान आदेशपक्षः कक्षीकर्त्तव्यः। अयं भावः—यथाहि 'इको यणचि'[4], 'एचोऽयवायावः'[5], 'अस्तेर्भूः'[6] इत्यादिभिः सूत्रैस्तत्तत्स्थानिनां स्थाने तत्तदादेशा उपदिष्टाः। तथैवेहापि 'वृद्धिरादैच्' इति सूत्रेण वृद्धिशब्दस्यादैचो भवन्तु नामादेशाः। तथा च विधायकमेवेदं सूत्रं न संज्ञासंज्ञिभावबोधकत्वेन संज्ञासूत्रमिति। यदि प्रोच्येत यत् 'षष्ठीस्थाने योगा'[7] इति सूत्रसद्भावेन

---

१. पाणिनिसूत्रम्—५।३।६८।

२. „ —१।२।४३।

३. वृद्धिरादैच्—पा० सू० १।१।१ प्रदीपे।

४. पाणिनिसूत्रम्—६।१।१२७।

५. „ —६।१।७८।

६. „ —२।४।५२।

७. „ —१।१।४९।

तत्रैव स्थान्यादेशभावो मन्यते यत्र सूत्रे षष्ठ्यन्तं स्थानिपदं श्रूयते। यथा 'इको यणचि', 'एचोऽयवायावः' इत्यादिस्थले स्थानिबोधकशब्दप्रकृतिकषष्ठीविभक्तिः श्रूयते। अतस्तत्र स्थलेषु स्थान्यादेशपक्षः शक्याङ्गीकारः। 'वृद्धिरादैच्' इति सूत्रे तु नैव षष्ठीविभक्तिर्वृद्धिशब्दप्रकृतिका श्रूयते येन स्थान्यादेशपक्षस्याशङ्कापि सम्भाव्येत। तन्न समीचीनम्, यतो हि विनापि षष्ठ्यन्तपदं विनैव षष्ठीविभक्तिं स्थान्यादेशभावस्य व्याकरणशास्त्रे भूयसो दृष्टत्वात्। तथाहि—'पन्थो णनित्यम्'[1] इति सूत्रं मानम्। अनेन हि सूत्रेण 'पथः ष्कन्'[2] इति सूत्रादनुवृत्तस्य पथिन्शब्दस्य स्थाने 'पन्थ' आदेशो विधीयते। अत्र षष्ठ्यन्तं पदं नास्त्येव कथं स्थान्यादेशभावस्योपपत्तिः? एवञ्च यथा विनापि षष्ठीं तत्र स्थान्यादेशभावस्तथात्रापि सूत्रे कानुपपत्तिः? दृष्टान्ते नहि पथिन्शब्दः षष्ठ्यन्तः किन्तु द्वितीयान्तः। एवञ्च दृष्टान्तस्यापि प्रमाणत्वात् तत्र यदि षष्ठीव्यतिरेको न बाधक आदेशपक्षस्य तर्हि प्रकृतेऽपि बाधाभावात् स्यादेव स्थान्यादेशभाव इति भावः। एवमेव—'तिविंशतेर्डिति',[3] 'हलङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'[4] इत्यादावपि न षष्ठ्यन्तं पदम्। पूर्वेण हि सूत्रेण विंशतेर्भस्य तिशब्दस्य लोपः क्रियते डिति परे। एवमेव द्वितीयेन सूत्रेण 'हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुति-सि इत्येतदपृक्तं हल् लुप्यते' इत्यर्थकेन हल्लोपो विधीयते। लोपोऽत्रादेशः। तस्य स्थानी च हल्। नहि तत्र षष्ठी श्रूयते। लोपस्यादेशत्वन्तु मान्यमेव, अन्यथा 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यादिसूत्रप्रामाण्यानुपपत्तिः प्रयोगासिद्धिश्च प्रसज्येयाताम्। इत्थमेव-'नाभिनभञ्च'[5] इत्यादिवचनान्यपि प्रकृतार्थोपस्थापनेन प्रमाणानि। न च सूत्रमात्रस्यैवात्र शास्त्रे प्रमाणत्वमिति वक्तुमपि शक्यम्, यथोत्तरं मुनीनां प्रामाण्यस्य सर्वैरङ्गीक्रियमाणत्वेन तथाभिधातुमशक्यत्वात्। तत्र हि समानविभक्तिकयोरेव स्थान्यादेशभावो दृष्टः। तथैव प्रकृतस्थलेऽपि वृद्धिशब्दस्य स्थानित्वमादैचश्चादेशत्वमिति पूर्वपक्षः।

सिद्धान्ते निराकरणप्रकारः—यद्यपि आदेशपक्षनिराकरणार्थं महाभाष्ये 'षष्ठीनिर्दिष्टस्यादेशा भवन्ति न चात्र षष्ठीं पश्यामः'[6] इत्येवोक्तम्। तच्च न समीचीनं 'पन्थो णनित्यम्', 'नाभिनभञ्च' इत्यादिसूत्रवार्त्तिकादिप्रमाणदर्शनादिति पूर्वपक्षे बहुश उक्तत्वात्। तथापि 'यथोत्तरं मुनीनां प्रामाण्यात्' इत्युक्तप्रकारेण विचारे

१. पा० सू०—५।१।७६।
२. तत्रैव—५।१।७५।
३. ,, —६।४।१४२।
४. तत्रैव—६।१।६८।
५. गणसूत्रम् ९५. सिद्धान्तकौमुद्यां तद्धिते छयद्विधिप्रकरणे ४७९ पृष्ठे।
६. महाभाष्यम्—१।१।२० सूत्रे।

क्रियमाणे वार्त्तिककारादुत्तरस्य मुनेर्महाभाष्यकारस्य प्रामाण्याधिक्यादत्र च न स्थान्यादेशभावः। अयमत्राभिसन्धिः—

'षष्ठीनिर्दिष्टस्यादेशा भवन्ति, न चात्र षष्ठीं पश्यामः' इति महाभाष्यवचसो निगूढतात्पर्यमिदं वर्तते यत्षष्ठीनिर्दिष्टस्य—स्थानिनो योऽर्थस्तस्य वाचका आदेशा उच्यन्ते इति। तथा च स्थान्यर्थाभिधानसमर्थस्यैवादेशा भवन्तीति कृत्वा वृद्धिरूपार्थवाचकत्वाभावेनैतयोरादैचोर्नादेशत्वमिति। 'न चात्र षष्ठीं पश्यामः' इति भाष्यस्य 'न चात्रादैक्षु षष्ठीनिर्दिष्टस्य स्थानिनोऽर्थाभिधायकत्वं पश्याम इत्यर्थः। यत्रापि विनापि षष्ठीं स्थान्यादेशभावस्तत्र स्थान्यर्थाभिधायकत्वमस्त्येवेति न काम्यनुपपत्तिमाकलयामः। अतस्तत्रत्यदृष्टान्तेनात्र स्थान्यादेशभावो न कथमपि शक्यकल्पनः। अत एव प्रकृतमहाभाष्यवाक्यव्याख्यानावसरे कैयटकृतटीकायां 'स्थानशब्दोऽर्थवाची, तिष्ठन्त्यस्मिन् शब्दा इति स्थानम्। न च वृद्धिशब्दार्थमादैचो वक्तुं शक्ताः। तेनात्र षष्ठ्यर्थाभावादिति तात्पर्यम्। तथाहि—षष्ठ्यभावेऽपि तदर्थसद्भावाद् भवत्येव स्थान्यादेशभावः। तथा—'नाभिनभञ्च' पन्थो णनित्यम्' इत्यादौ।

ननु स्थान्यादेशभावनिराकरणायेयं युक्तिर्न समीचीना यदन्यत्र स्थान्यादेशभावस्थले स्थान्यर्थाभिधानसमर्थो भवत्यादेशः। प्रकृते तु वृद्धिशब्दार्थं न ब्रुवते आदैचः, अतो न स्थान्यादेशभाव इति, यतो हि वृद्धिशब्दः संज्ञासंज्ञिनश्चादैचः। एवञ्च यथा घटशब्दोऽभिधत्ते कम्बुग्रीवादिमन्तं पदार्थं तथैव कम्बुग्रीवादिमान् इत्यादयः शब्दा अपि अभिदधत्ते तमर्थमिति रीत्या वृद्धिशब्दो यथा भवत्यादैचामभिधायकस्तथैवादैच्शब्दोऽपि भवति। आदैचोऽत्र भवन्तु वृद्धिरत्र भवत्विति वाक्याभ्यामेकार्थाभिधानदर्शनात्। अतोऽत्रैकार्थाभिधानसमर्थयोरनयोः खण्डयोरखण्डः किल स्थान्यादेशभावः। कथं तथाविधार्थकल्पनेन भाष्यवचसो भवितुमर्हति निराकरणं स्थान्यादेशभावस्येति चेदत्रेदमुत्तरम्। तथाहि—इयमुक्तिस्तदा प्रामाण्यमाकलयेद् यदा सिद्धः स्यात् संज्ञासंज्ञिभावः। इदानीं संज्ञासंज्ञिभावमनादृत्य स्थान्यादेशभावमङ्गीकृत्य वदता कथमियं युक्तिरुपस्थापयितुं शक्या यद् यमर्थमभिधत्ते वृद्धिशब्दस्तमेवार्थमभिदधति आदैच इति। अतः कथमपि नात्र गन्धलेशोऽपि स्थान्यादेशभावस्येति बोध्यम्। अत्रेदमालोच्यते—

यद्यपि महान् विचारोऽत्रोपक्रान्तः शान्तश्च महाभाष्यकृतो वचोऽनुरूपेण समाधानेन, यद् यत्र स्थान्यादेशभावो भवति तत्र स्थान्यर्थाभिधानसमर्थ आदेशः भवति। तत्र षष्ठ्यभावेऽपि स्थान्यादेशभावे न कापि क्षतिः, 'षष्ठीनिर्दिष्टस्यादेशा भवन्ति' इति भाष्यस्य स्थान्यर्थाभिधानसमर्थ एवादेशो भवतीत्याशयवर्णनात्। यथा—'नाभिनभञ्च', 'पन्थो णनित्यम्' इत्यादौ। तथापि यत्रैकदेशस्यैकारादेः स्थाने यणादयो विधीयन्ते तत्र का स्थितिः? स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति मत्वा वृद्धिशब्दस्य स्थाने नादैचः आदेशाः कृताः। एवमेव सुध्युपास्य इत्यादौ स्थानिन एव

नार्थाभिधायकत्वामादेशस्यार्थाभिधायकत्वाप्रत्याशा तु दूरापास्ता। अस्यां परिस्थितौ कथमीकारादीनां स्थाने यणादय आदेशा इति प्रश्न आकुलीकरोति मानसम्। अत्रेदं समाधानम्—

उपायाः शिक्षमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते[1]॥

इत्यनेन न्यायेन बालव्युत्पादनार्थमिदमुच्यते यदीकारस्य स्थाने यकार इति। वस्तुतस्तु 'कार्यविपरिणामाद्वा'[2] इति भाष्यप्रामाण्यात् कार्यपदाभिलप्य बुद्धिमात्रकृत-स्थान्यादेशभावाभिप्रायेण इकारघटितप्रयोगे यकारघटित एव शब्दः प्रयोक्तव्य इति तात्पर्यान्नात्रैकदेशविकार इति न स्थान्यर्थाभिधानसमर्थस्यादेशतेति सिद्धान्तव्याकोपः। यमर्थमभिधत्ते सुधीभिरुपास्य इति शब्दस्तमेवार्थमभिदधाति—'सुद्ध्युपास्यः' इति शब्दोऽपि। एवञ्च कथञ्चिदीकारादानामेकदेशानां समुदायस्यैवावयवत्त्वेनैकदेशत्वाद-नर्थकानां स्थानिता प्रोक्तापि न काञ्चन क्षतिमावहतीति बोध्यम्। एकदेशस्य स्थानि-त्वमादेशत्वञ्च' नहि सर्वदेशस्य स्थानित्वादेशत्वयोः संसूचकं प्रत्युत बुद्धिकृतपरिणा-मस्य द्योतकमिति बोधयितुमेव वचनमिदं प्रवृत्तम्—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते॥ इति।

न च 'अचः परस्मिन् पूर्वविधौ'[3] इति सूत्रप्रामाण्यात् केवलस्यैकस्थानिनः प्रसङ्गेऽपि जायमानस्यादेशस्य स्थानिवद्भावो भवति। तत्र कथं स्थान्यर्थाभिधान-सामर्थ्यमादेशे कल्पयितुमपि शक्यमिति वाच्यम्, 'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते' इति न्यायेन तत्रापि परम्परयार्थबोधकत्वादननुपपत्तेः। अत एव लघुमञ्जू-षायां नागेशभट्टैः प्रक्रियावादस्य शास्त्रकृद् कल्पितत्वं प्रतिपादितम्। तथाहि—'तत्र प्रतिवाक्ये सङ्केतग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्म—आचार्याः'। एतदेवाभिप्रेत्य 'विभाषा सुपः'[4] इति सूत्रे कैयटः 'अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रेऽर्थ-वत्तापरिकल्पनात्—इत्याह'[5] इति। अतोऽत्र 'अचः परस्मिन् पूर्वविधौ' इति सूत्रेणात्मात्र वृत्तिधर्मस्याप्यतिदेशदर्शनान्न स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति पक्षो न युक्तः

१. वाक्यपदीयकारिका, मनोरमायामजन्तपुल्लिङ्गप्रकरणे उद्धृता २०७ पृष्ठे।
२. महाभाष्यम्—१।१।५५ सूत्रे।
३. पा० सू०—१।१।५६।
४. पा० सू०—५।३।६८।
५. वैयाकरणसिद्धान्तलघुमञ्जूषा कलाकुञ्जिकाटीकाद्वयोपेता ५ पृष्ठे।

इति परास्तम्। अत एव 'पन्थो णनित्यम्'[1] इति सूत्रे 'तिविंशतेर्डिति'[2] इति सूत्रे लोपविधायकस्थले वा प्रदर्शिता दोषा न सम्भवन्तीति बोध्यम्। तत्रापि साक्षात् परम्परया वा स्थान्यर्थाभिधानसमर्थतायाः सत्त्वेन प्रतिज्ञासत्त्वात्।

आगमपक्षः-त्रिविधेषु साधुत्वप्रयोगनियमार्थादेशपक्षेषु निरस्तेष्वपि चतुर्थोऽयम् उपस्थाप्यते आगमपक्षः। तथा चोक्तं पूर्वपक्षरूपेण महाभाष्ये 'आगमास्तर्हीमे स्युः। वृद्धिशब्दस्यादैच आगमाः[3]।' इति। एवञ्च वृद्धिशब्दस्यादैच् आगमा भवन्तु काचित् क्षतिर्नास्ति कथं पुनराग्रहः क्रियते—'तस्मात् संज्ञासंज्ञिनावेव' इति। अस्मिन् पूर्वपक्षे प्राप्ते समाधानमिदं प्रदेयम्। तथाहि निराकरणम् —

ययोरेव समो दोषः परिहारस्तयोः समः।
नैकः पर्यनुयोक्तव्यः समानार्थे······· ।

इति न्यायेन यथा पूर्वोक्तास्ते त्रयः पक्षास्तत्तद्दोषकवलितत्वान्नाङ्गीकृताः, किन्तु संज्ञासंज्ञिभाव एवाङ्गीकृतो यो हि निर्दुष्टः, तथैवास्मिन् पक्षेऽपि बोध्यम्। अर्थादागम-पक्षोऽपि नैवात्र सम्भवति। यतो हि यथा स्थान्यादेशभावस्थले प्रायेण षष्ठीनिर्दिष्ट-स्थाने एवादेशा भवन्ति तथैवागमा अपि षष्ठीनिर्दिष्टानामेव भवन्ति। अत एवागमा-गमिग्रहणेनागमविशिष्टस्य ग्राहिकायाः परिभाषायाः 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते[4]' इत्यस्याः 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रेण गतार्थत्वं न वेति परिभाषेन्दुशेखरे विचारो विहितः। तथाहि—'एवञ्चादेशेष्विवात्रापि बुद्धिविपरिणाम इति न नित्यत्वहानिः। स्थानिवत्सूत्रे च नेदृशादेशग्रहणम्। साक्षादष्टाध्यायीबोधित-स्थान्यादेशभावे चारितार्थ्यात्। किञ्चैवं सति स्थानिबुद्ध्यैव कार्यप्रवृत्त्या 'निर्दिश्य-मानस्य' इति परिभाषाया अप्राप्त्याऽडागमसहितस्य पिबादेशापत्त्या 'लावस्थायामडिति' भाष्योक्तसिद्धान्तासङ्गतिः। स्थानिवद्भावविषये 'निर्दिश्यमानस्येति परिभाषायाः प्रवृत्तौ 'तिसृणामित्यत्र परत्वात् तिस्रादेशे स्थानिवद्भावेन त्रयादेशमाशङ्क्य सकृद्-गतिन्यायेन समाधानपरभाष्यासङ्गतिः।

एरुरित्यादौ स्थानषष्ठीनिर्देशात् तदन्तपरतया पठितवाक्यस्यैव समुदायादेश-परत्वेनादेशग्रहणसामर्थ्यात्तस्य स्थानिवत्सूत्रे ग्रहणेन न दोषः। आनुमानिकस्थान्यादेश-भावकल्पनेऽपि श्रौतस्थान्यादेशभावस्य न त्याग इति 'अचः परस्मिन्नित्यादे-र्नासङ्गतिः[5]' इति। यत्र हि आगमागमिभावस्तत्रावश्यं षष्ठी भवति, आगमिबोधकपदात्।

---

१. पा० सू०—५।१।७६।
२. तत्रैव—६।४।१४२।
३. महाभाष्यम्—१।१।१।
४. परिभाषेन्दुशेखरे परिभाषा ११।
५. परिभाषेन्दुशेखरे नागेशकृतयदागमपरिभाषाव्याख्या।

यथा 'ङमो ह्रस्वादचि ङमुण् नित्यम्'[1] इत्यत्र 'वतोरिड् वा'[2] इत्यादौ च। यद्यपि नागमिवाचकात् सर्वत्र षष्ठी यथा 'नय्वाभ्यां पदान्ताभ्यां पूर्वन्तु ताभ्यामैच'[3] इत्यत्र पञ्चम्यन्तमेवागमिबोधकं पदं श्रूयते, तथापि यथादेशपक्षनिराकरणपरकस्य महाभाष्यवचनस्य 'षष्ठीनिर्दिष्टस्यादेशा भवन्ति। न चात्र षष्ठीं पश्यामः' इत्यस्य लक्षणया स्थान्यर्थाभिधानसमर्थस्यैवादेशता नान्यस्येत्यर्थपरकत्वेन योजना कृता। तथैवात्रापि 'अनागमकानां सागमका आदेशाः' भवन्तीति सिद्धान्तादागम्यर्थाभिधानसमर्थस्यैवागमत्वं भवतीति कृत्वा ऐचोऽप्यागमत्वमक्षतम्। नहि पञ्चम्यन्ततामात्रेण तत आगमत्वमपैतीति बोध्यम्।

वृद्धिसंज्ञास्थले तु न तादृशी स्थितिः। अतो नागमपक्षोऽपि युक्तिसह इति विवेक्तव्यम्। अयञ्च निराकरणप्रकारो मया कैयटोक्तमार्गानुसारेण प्रदर्शितः। प्रोक्तञ्च तत्रैव कैयटे—'अत्राप्यर्थोऽप्येक्ष्यते। अनागमकानामर्थे सागमका इत्यर्थः। आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते लिङ्गेन च। न चात्र षष्ठीं पश्यामः'[4] इति प्रकृतागमपक्षनिराकरणपरमहाभाष्यवाक्यविवरणावसरे कैयटेन प्रतिपादितम्। आदेषः स्थले तु देशविशेषप्रतिपत्त्यर्थयत्नसाध्यागमप्रतीतिर्यत्नाभावे नेष्यते। यत्र च तादृशं लिङ्गं टित्वं कित्वं मित्वं वा तत्र तु सुतरामङ्गीक्रियते आगमत्वम्। 'नय्वाभ्यां पदान्ताभ्यां पूर्वन्तु ताभ्यामैच्'[5] इत्यत्र षष्ठीनिर्देशाभावेऽपि पूर्वमिति पदमेवैच आगमत्वप्रतिपत्त्यर्थं सूत्रे निर्दिष्टम्। अतोऽत्र न षष्ठीव्यतिरेके आगमत्वव्यतिरेकः पूर्वमिति पदग्रहणरूपयत्नस्य 'अणुरपि विशेषोऽध्यवसायकरः' इति न्यायेनागमत्वग्राहकत्वेन सार्थक्यं भजमानस्यैव प्रमाणत्वात्।

नागेशभट्टास्तु—कैयटोक्तमतातिरिक्तमेव मतमाविश्चक्रुः। 'आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते'। महाभाष्यवाक्यव्याख्यानावसरे कैयटेन 'अत्राप्यर्थोऽपेक्ष्यते' इत्युक्त्वाऽऽदेशस्थलवदत्रापि आगम्यर्थाभिधानसमर्थस्यैवागमत्वमिति तत्त्वं प्रकटीकृतम्। नागेशभट्टैस्तु स्वरचिते उद्द्योते—'वस्तुतः अवयवषष्ठ्यैवागमा उच्यन्ते'[6] इति प्रोक्तम्। तस्य गूढोऽयमभिप्रायो यदवयवत्वावच्छिन्नाविधेयताश्रयत्वमागमत्वमिति। तेन स्थानिवत्सूत्रेण यदागमपरिभाषाया गतार्थत्वशङ्कापि न जायते। भवतु यदत्र विस्तरेण वक्तव्यं तत्सर्वम् 'अर्थवतो ह्यागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति 'दाधाघ्वदाप्'[7] इति सूत्रस्थमहाभाष्यवाक्यविवेचनावसरे वक्ष्यामः।

---

१. पा० सू०—८।३।३२।
२. पा० सू०—५।१।२३।
३. पा० सू०—७।३।३।
४. महाभाष्ये—१।१।१ सूत्रे।
५. पा० सू०—७।३।३।
६. उद्द्योते—१।१।१ सूत्रे।
७. पा० सू०—१।१।२०।

परिभाषासूत्रत्वविमर्शः

अत्र 'वृद्धिरादैच्[1]' इति सूत्रे सम्भाव्यमानानिमान् पक्षान् निराकृत्य भगवान् महाभाष्यकारः पतञ्जलिः 'इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तिकत्वञ्च द्वयोश्चैतद् भवति। कयोः, विशेषणविशेष्ययोर्वा, संज्ञासंज्ञिनोर्वा ? तत्रैतत्स्याद्विशेषण-विशेष्ये इति। तच्च न द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषणविशेष्यभावो भवति। न चादैच्छब्दः प्रतीतपदार्थकः, तस्मात्संज्ञासंज्ञिनावेव'[2] इति परमोजस्विसहेतुकवाक्य-कदम्बेन संज्ञासूत्रत्वमेवोररीचकार।

अत्रेदमनुसन्धेयम्—यद् यथा 'इको गुणवृद्धी'[3], 'अचश्च'[4] इत्यादिसूत्राणां परिभाषासूत्रत्वमेव। तत्त्वञ्च स्वदेशे लक्ष्यसंस्कारकाप्रामाण्यज्ञानानास्कन्दितबोधा-जनकत्वे सति विध्येकवाक्यतापन्नत्वेन लक्ष्यसंस्कारकबोधोपयोगित्वम्। अर्थाद् यत्र गुणवृद्धिशब्दाभ्यां गुणवृद्धी विधीयेते तत्रैक इति षष्ठ्यन्तमुपतिष्ठते। ह्रस्वदीर्घप्लुत-शब्दैश्च यत्राज्विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते। एवञ्च तत्र यथा तत्तत्पदोपस्थापनेन विधिवाक्येन सहैकवाक्यतयाऽप्रमाण्यज्ञानानास्कन्दितलक्ष्यधर्मिक-साधुत्वप्रकारकबोधोपयोगिबोधजननरूपकार्यसम्पादनं परिभाषासूत्रैः क्रियते। तथैव प्रकृतेऽपि 'वृद्धिरादैच्' इति सूत्रमपि परिभाषासूत्रमेवास्तु। यत्र वृद्धिपदं श्रूयते विधौ वाऽनुवादे वा तत्रादैचिति पदमनुतिष्ठते इत्यर्थस्य स्वीकारेण पूर्वोक्तस्थलवत् परिभाषा-सूत्रत्वोपपत्तौ संज्ञासूत्रत्वमेव महाभाष्यकृता कथमङ्गीकृतमित्यवश्यं सुधीधनैरवधानेन विचारणीयम्। अत्यन्तविभ्रान्तवाक्येन भगवता महाभाष्यकृता संज्ञासूत्रत्वमेवास्य 'वृद्धिरादैच्' इति सूत्रस्याङ्गीकृतम्। प्रयुक्तमपि वाक्यं 'तस्मात्संज्ञासंज्ञिनावेव' इति। पूर्वोक्तेन प्रकारेण परिभाषासूत्रत्वमपि सूत्रस्यास्य सम्भवति तदा केवलसंज्ञासूत्रत्वमेव कथमङ्गीकृतमिति महाकुतूहलस्य विषयो भवति। न च संज्ञासूत्रत्वमपि भवतु परिभाषासूत्रत्वमपि का क्षतिः, अधिकन्तु प्रविष्टं न क्षतिकरमिति न्यायेन 'शेषे'[5] इति सूत्रस्याधिकारसूत्रत्वं विधिसूत्रत्वञ्चोभयमपि स्वरूपं सिद्धान्तकौमुद्यां दीक्षितेन स्वीकारदर्शनादत्रापि तन्निदर्शनादुभयस्वरूपत्वे क्षतेरभावादिति वाच्यम्, 'तस्मात्संज्ञासंज्ञिनावेव' इत्येवकारघटितवाक्येन रूपान्तरवारणात्। एवञ्च प्रश्नः स तदवस्थ एव यत्कथमस्य 'वृद्धिरादैच्' इति सूत्रस्य संज्ञासूत्रत्वमेव महाभाष्य-कृता भाषितमिति।

---

१. तत्रैव—१।१।१।
२. म० भा०—१।१।१।
३. पा० सू०—१।१।३।
४. पा० सू०—१।२।२८।
५. पा० सू०—४।२।९२।

अत्र निगूढाकूतं यद्भाति तत्प्रकाश्यते। तथाहि—अस्य 'वृद्धिरादैच्' इति सूत्रस्य संज्ञासूत्रत्वमात्रानङ्गीकारे प्रकृतसूत्रे वृद्धिशब्दः स्वरूपपरो वा अर्थपरो वेति निर्णायिकाभावेन 'यत्र वृद्धिर्भवति अर्थाद् येन सूत्रेण वृद्धिर्विधीयते तत्रादैचित्युपतिष्ठते' इत्येव वाक्यार्थे कृते सति लोकप्रसिद्धवृद्धिपदार्थोपस्थितौ यत्रागमेन शब्दस्वरूपवृद्धिस्तत्र 'आर्धधातुकस्येड्वलादेः'[1] इत्यादौ आदैचित्यस्योपस्थितिः स्यात्। न च व्याकरणे स्वं रूपं शब्दस्याशब्दसंज्ञा[2] इति सूत्रबलाच्छब्दस्वरूपस्यैवोपस्थितिर्न तु तदर्थस्य साम्प्रतमशब्दसंज्ञात्वादिति वाच्यम्, पशुरपत्यमित्यदाविवात्रापि अर्थग्रहणसम्भवात्। किञ्च वृद्धिशब्दस्य संज्ञात्वाभावे वृद्धिशब्दस्य आदेचोरुपस्थापकत्वमेव मन्तव्यं भविष्यति, तेन वृद्धिशब्दरूपलिङ्गेनादैच उपस्थितिर्भविष्यति। तथा च सति 'क आदैच्' इत्यादिकमेव लाघवाद् वक्तव्यं स्यात्। न चोक्तं तथा भगवता पाणिनिनेति तर्केणापाद्यव्यतिरेकनिश्चयस्य सद्भावेननास्य परिभाषासूत्रत्वमिति निश्चीयते। न चैवं मङ्गलत्वासिद्धिः, एवमपि 'अ आदैच्' इत्येव वदेत्। तत्र तत्र वृद्धिघटितेषु सूत्रेषु केवलमकारघटितमेव पाठ्यं भवेल्लाघवञ्च स्यात्। न च तथा कृतं सूत्रकृता न भाष्यकृता भाषितिमिति न परिभाषासूत्रत्वमप्यस्य 'वृद्धिरादैच्' इति सूत्रस्य। तस्मात् 'तस्मात्संज्ञासंज्ञिनावेव' इति महाभाष्यवाक्यं सर्वथैव निर्दुष्टं मान्यञ्च।

वस्तुतस्तु—इमाः कल्पना यदि न क्रियन्ते, कृता अपि न मन्यन्ते तथापि भगवता महाभाष्यकृता पतञ्जलिना प्रोक्तं वाक्यमेव महाप्रमाणम्। 'यथोत्तरं मुनीनां प्रामाण्यम्', 'सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्' इति महासामर्थ्यपूर्णवाक्यस्य प्रयोक्तुर्महाभाष्यकृतः शब्दसाधुत्वज्ञाने कस्य न ज्ञानं वर्तते। सर्वे विद्वांसो दार्शनिका लौकिकाश्च जना जानन्ति यद् व्याकरणव्युत्पाद्यान् शब्दान् सर्वान् जानाति स्म पतञ्जलिः। तादृशस्य परमाप्तस्य शब्दसाधुत्वविषये प्रमाणमूर्तेः पतञ्जलेर्वाक्ये विद्यमाने किमन्येन तर्केण वाचारम्भेण वा। तस्मात्संज्ञासंज्ञिनावेवेति महाभाष्यवाक्यं प्रमाणं मत्वा सूत्रस्यास्य संज्ञासूत्रत्वमेवेति बोधव्यम्। परिभाषासूत्रत्वमपि सूत्रस्यास्य 'वृद्धिरादैजित्यस्य महाभाष्यवाक्यादेवावधारणेन विचारितादपगतं भवति। तथाहि—संज्ञासूत्रत्वस्थापनाय या युक्तिः प्रदर्शिता महाभाष्यकृता तथैव परिभाषासूत्रत्वमस्य निराकृतं वेदितव्यमस्माभिः। तत्र हि भाष्ये—सूत्रस्यास्य संज्ञासूत्रत्वोपपादनावसरे—

'इदं खलु भूयः सामानाधिकरण्यमेकविभक्तिकत्वञ्च' इत्यादिना निर्दुष्टो हेतुरुपक्षिप्तः। अर्थात् कुत्रापि परिभाषासूत्रे सामानाधिकरण्यस्यैकविभक्तिकत्वस्य च न सद्भावः। इदं द्वयं द्वयोरेव भवति संज्ञासंज्ञिनोर्वा विशेषणविशेष्ययोर्वा। तयोर्मध्ये

१. तत्रैव—७।२।३५।
२. पा० सू०—१।१।६८।

विशेषणविशेष्यभावश्चात्र दुर्लभः, यतो हि प्रतीतपदार्थकयोरेव विशेष्यविशेषणभावो भवति। न चान्तरेणेदं सूत्रमनयोर्लोके प्रतीतपदार्थकत्वमिति पारिशेष्यात् संज्ञासूत्रत्वमेवास्य सूत्रस्य पर्यवसन्नम्। नहि परिभाषासूत्रेषु हेतुरयमस्ति। न च संज्ञास्थले हेतोरस्य व्यभिचारः। तस्मादतिव्याप्तेरव्याप्तेर्वाऽभावात्संज्ञासूत्रत्वसाधकहेतोरत्र सत्त्वादस्य संज्ञासूत्रत्वमेव सिद्धं भवति, न तु परिभाषासूत्रत्वम्। अपरं चेदमत्र तत्त्वम्—विशेष्यविशेषणभावनिरासप्रकारो यो भगवता महाभाष्यकृता समाश्रितस्तेनैवास्य सूत्रस्य 'वृद्धिरादैच्' इत्यस्य परिभाषासूत्रत्वं व्यपगतं भवति। सामानाधिकरण्यं समानविभक्तिकत्वञ्च द्वयोरेव भवति संज्ञासंज्ञिनोर्वा विशेष्यविशेषणयोर्वेति प्रतिपाद्य ततो विशेष्यविशेषणभावो नात्राङ्गीकृतः, प्रतीतपदार्थकत्वादिति कृत्वा परिभाषात्वनिराकरणमपि जातम्। यतो हि परिभाषासूत्रेषु सर्वत्र प्रतीतपदार्थकत्वमेव भवति। यथा 'इको गुणवृद्धी'[1] इति सूत्रे 'इक्' पदेन इत्संज्ञकककारसहितेकारपदबोध्यानां वर्णानां ज्ञानम् 'आदिरन्त्येन सहेता'[2] इति सूत्रेण कारितमिति तत्र प्रतीतपदार्थकत्वेन विशेष्यविशेषणभावसत्त्वेन संज्ञास्थले च तदभाव इति परिभाषासूत्रत्वं व्यपगतं वेदितव्यम्। सूक्ष्मेक्षिकया कृते विचारे मनीषा या समुन्मेषमाप्ता सात्र प्रकाशिता। एकमन्यदपि द्रष्टव्यम्—

एकस्मिन् वस्तुनि विरुद्धकोटिकसंशयज्ञानसत्त्वे केनचिद्धेतुना तयोर्मध्ये एकस्य निश्चयः क्रियते। विपरीतस्य चापायो भवति। इत्थञ्च संशयघटकयोर्द्वयोर्मध्ये एकस्या एव कोटे निर्णयेऽपरस्या निवृत्तौ संशयो नष्ट इति भवति व्यपदेशः। यथा—पर्वतो बह्निमान् न वेति संशये धूमेन हेतुना वह्नेस्तत्र स्थितिर्निश्चीयते। तथैव प्रकृतेऽपि 'वृद्धिरादैच्' इति सूत्रे परिभाषात्वसंज्ञासूत्रत्वयोः संशयविषयीभूतयोर्मध्ये एकस्य पक्षस्य युक्तत्वप्रतिपादनाय हेतुर्देयः। स च क इति जिज्ञासायां पूर्वोक्तं भाष्यमेव हेतुत्वेन योजनीयम्। तथाहि अनुमानप्रयोगः—

'वृद्धिरादैच'[3] इति सूत्रम्, न परिभाषासूत्रम्, एकविभक्तिकत्वे सति भेदीयविशेषणविशेष्यभावरहितत्वात् यन्नैवं तन्नैवं यथा 'इको गुणवृद्धी'[4] इत्यादिसूत्रम्। संज्ञासूत्रत्वोपपादकप्रयोगश्चेत्थम्—'वृद्धिरादैच्' इति सूत्रमं संज्ञासूत्रम्, समानाधिकृतत्वे सति एकविभक्तिकत्वात्, यथा अयं देवदत्त इत्यादि। व्यतिरेके परिभाषासूत्रमिकोगुणवृद्धी' इत्याद्येव ग्राह्यम्। एवञ्च सम्यग्रूपेण महाभाष्यग्रन्थस्यालोडने कृते सति सूत्रस्यास्य संज्ञासूत्रत्वमेव सिद्धयति, न परिभाषासूत्रत्वमिति हेतोः 'तस्मात् सञ्ज्ञासंज्ञिनावेव[5]' इति महाभाष्यकृतः समुद्घोषः परमप्रामाण्यभागिति सुधियां प्रमोदावहो

१. पा० सू०—१।१।३।

२. पा० सू०—१।१।७१। ३. तत्रैव—१।१।१।

४. ,, —१।१।३।

५. महाभाष्यम् 'वृद्धिरादैच' इति सूत्रस्थम्।

विषयः । नात्र परिभाषासूत्रत्वसाधनप्रयासो विधेयः । विहितोऽपि न सिद्ध्यति । यद्यपि 'तपरस्तत्कालस्य' इति 'अणुदित्सवर्णस्य[1]' इत्यत्र च हेतुर्नास्ति, तथापि न दोषः, साध्यस्य सत्त्वेऽपि हेतोरभावेऽदोषात् । यथाऽयोगोलके धूमरूपस्य हेतोरसत्त्वेऽपि वह्निरूपस्य साध्यस्य सत्त्वेऽपि दोषाभावात् । अतोऽनुमानदोषशून्यत्वात्सद्धेतुसत्त्वाच्चानुमानमत्रमानं भवत्येव परिभाषासूत्रत्वनिराकरणे संज्ञासूत्रत्वसाधने चेति बोध्यम् ।

८. 'न वाऽर्थवतो ह्यागमस्तदगुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र'

इदमनुसन्धेयं स्थलं व्याकरणमहाभाष्यवचनम् । 'दाधाघ्वदाप[2]' इति सूत्रे वाक्यमिदं प्रयुक्तं साभिप्रायम् । यो ह्यत्राभिप्रायः सोऽत्र प्रकटीकरिष्यते । वचनस्यावतरणमित्थं विज्ञेयमत्र, तथाहि पूर्वं प्रनिदारयति प्रनिधारयति इत्यादिप्रयोगेषु 'दाधाघ्वदाप्' इति सूत्रेण प्रसक्तां घुसंज्ञां वारयितुं 'समानशब्दप्रतिषेधोऽर्थवद्ग्रहणात्' इति वार्त्तिकं मुखीकृत्य 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' इत्यनया 'स्वं रूपं शब्दस्याशब्दसंज्ञा[3]' इति सूत्रज्ञापितया परिभाषया समाधानं कृतम् । यदि वारणं न कृतं स्यात्तर्हि सत्यां तत्र घुसंज्ञायां 'नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च[4]' इति सूत्रेण णत्वं स्यात् । अयं भावः—प्रनिदारयति प्रनिधारयतीत्यादौ णिचि सति वृद्धौ च सत्यां 'उरण् रपरः[5]' इति सूत्रेण विधीयमान एवाण् रपरः कृतः । इत्थञ्च वृद्धिरत्र रेफशिरस्का एव सम्पन्ना । अतस्तत्र दार् धार् इत्येवार्थवान्, न तु दा धा शब्दोऽपीति नात्र प्रसक्ता घुसंज्ञा । घुसंज्ञायाः प्रसक्तेरभावेन णत्वाप्रसक्तिः । घुसंज्ञानिषेधायापरोपायचिन्ताऽपि न विधेया । अर्थवतो ग्रहणेनानर्थकस्य 'दा धा' शब्दस्य दार् धार् घटकस्य घुत्वाभावेन सूत्राणाञ्च स्वीयोद्देश्यतावच्छेदकावच्छेदेन प्रवृत्तेरत्र चोद्देश्यतावच्छेदकत्वाभावादप्राप्तेरिष्टप्रयोगसिद्धिः । अत एवात्राप्रसक्तप्रतिषेध इति वचनस्य नावसरः । अपरञ्च 'अनुपसर्गाद्वा'[6] इति वाक्यतद्व्याख्यानद्वारा प्रनिदारयति 'प्रनिधारयति' इत्यादिप्रयोगेषु प्रसक्तदोषवारणं कृतम् । यद्यपि प्रथमसमाधानेनापि दोषवारणसम्भवस्तथापि 'अनुपसर्गाद्वा', 'अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा भवन्ति । न चैतौ दाधौ प्रति क्रिया-

---

१. पा० सू० १।१।६९ ।

२. तत्रैव १।१।२० ।

३. तत्रैव १।१।६८ ।

४, पा० सू० ८।४।१७ ।

५. पा० सू०—१।१।५१ ।

६. तत्रैव—१।३।४३ ।

योगः' इति भाष्योपस्थापनस्येदमेव रहस्यम् । यथा 'गामादाग्रहणेष्वविशेषः'[1] इति परिभाषाबलाद् 'दाधाघ्वदाप्'[2] इत्यत्र, यथा च 'लुग्विकरणालुग्विकरणयोर्लुग्-विकरणस्य ग्रहणम्'[3] इत्यस्याः लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'[4] इत्यस्याश्चानुपस्थापनं भवति, तथैव 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्'[5] इत्यस्या अपि परिभाषाया उपस्थितिर्न भविष्यतीति कृत्वा 'प्रनिदारयति प्रनिधारयति' इत्यादौ अनर्थकस्य 'दा धा' इत्यस्य घुत्वेऽपि तं प्रति प्रशब्दस्योपसर्गत्वाभावेन णत्वाप्रसक्तिरिति कृत्वा न वचनान्तरं कल्पनीयम् । तथा चोक्तं प्रकृतमहाभाष्ये 'अनुपसर्गाद्वा' इति वाक्यव्याख्यानावसरे कैयटेन––'अभ्युपगम्य घुसंज्ञां दोषं परिहरति । घुसंज्ञापेक्षया यस्योपसर्गत्वं तस्मात् परस्य नेर्णत्वं भवति घुसंज्ञके परे सति । अत्र दा-धाशब्दापेक्षया नास्ति प्रशब्दस्योपसर्गत्वं किन्तु दार्-धार्-शब्दापेक्षयेत्यदोषः' इति । स्पष्टीकृतञ्च तत्रैव श्रीमता नागेशभट्टेन––'अदाविति प्रतिषेधार्थेन दैपः पित्त्वेन दोदद्घोः इत्यनेन च परिभाषामात्रानुपस्थापनज्ञापनसम्भवादिति भावः, इति वाक्येन । पूर्वम् अभ्युपगम्य घुसंज्ञां दोषं परिहरतीति कैयटेन प्रोक्तस्य वाक्यस्य तात्पर्यवर्णनं श्रीनागेशभट्टेन कृतम् ।

एवं पूर्वोक्ताभ्यामाभ्यां समाधानाभ्यामलक्ष्यभूतयोः प्रनिदारयति प्रनिधापयति 'इत्यनयोः प्रयोगयोर्णत्ववारणे कृते तत्समाधानानुसारं लक्ष्यभूतयोः 'प्रणिदापयति प्रणिधापयति' इत्यत्र णत्वाप्रसक्त्या लक्ष्यासिद्धिरुद्भाविता—'यद्येवम्– इहापि तर्हि न प्राप्नोति प्रणिदापयति प्रणिधापयति' इति । अत्रापि नैतौ दाधावर्थवन्तौ, नाप्येतौ दाधौ प्रति क्रियायोगः' इति । अयम्भावः—'अथर्वद्ग्रहणे नानर्थकस्य ग्रहणम्' इत्यस्याः परिभाषायाः 'दाधाघ्वदाप्'[6] इत्यत्रोपस्थितिश्चेत्तदा यथा प्रनिदारयति प्रनिधापयतीत्यत्र दाधाशब्दयोरनर्थकत्वेन न घुत्वमत एव णत्वाभावः । तथैव प्रकृते णत्वघटितरूपस्यापि स्थितिः । यतो हि न केवलयोः 'दा' 'धा' इत्यनयोरर्थवत्त्वं किन्तु 'दाप्-धाप्'शब्दयोः । यदि च सामान्यतः परिभाषामात्रानुपस्थापनज्ञापनेन 'लुग्वि-करणालुग्विकरणयोरलुग्विकरणस्य', 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्', 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' इति सर्वासां परिभाषाणामुपस्थितिर्न भवति 'दाधाघ्वदाप्' इत्यत्रेति स्वीक्रियेत तदाऽनर्थयोः 'दा-धा'शब्दयोः घुत्वेऽपि णत्वं न स्यात्, तं प्रत्युपसर्गत्वाभावेन णत्वाप्रसक्तेः । एवञ्च 'ययोरेव समो दोषः परिहारस्तयोः

१. परिभाषेन्दुशेखरे तृतीयतन्त्रे परिभाषा ११५ ।

२. पाणिनिसूत्रम्—१।१।२० ।

३. परिभाषेन्दुशेखरे तृतीयतन्त्रे परिभाषा ९१ ।

४. तत्रैव––११४ ।

५. परिभाषेन्दुशेखरे प्रथमतन्त्रे परिभाषा १४ ।

६. पा० सू० १।१।२० ।

समः' इति 'तुल्यवित्तिवेद्यन्यायेन च प्रनिदारयति प्रनिधापयतीत्यत्रैवात्रापि णत्वा-प्रसक्तिरूपायां जटिलसमस्यायां प्रसक्तायामिष्टसङ्ग्रहार्थमनिष्टनिवृत्त्यर्थञ्चाह भगवान् महाभाष्यकारः–'न वाऽर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते। यथाऽन्यत्र'[1] इति।

तत्र 'न वा' इत्यंशः पूर्वदर्शितदोषदूरीकरणाय प्रयुक्तः। अर्थवतो ह्यागम-स्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र इत्यत्रापि 'यथान्यत्र' इति दृष्टान्तवाक्यम्। व्याख्यातमपि दृष्टान्तत्वेनैव महाभाष्ये। परिभाषारूपेण तु वचनमित्थमत्र प्रतिफलितं भवति—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्येव। तथा च 'प्रणिदापयति प्रणिधापयति' इत्यादौ अर्थवतो 'दा धा' इत्यनयोः शब्दयोरागमौ पुकौ तद्गुणीभूतौ अतस्तद्ग्रहणेन तद्ग्राहकशब्देन गृह्येते। अतश्च पुग्विशिष्टयोर्घुत्वं सिध्यति। सिद्धे च घुत्वे तं प्रत्युपसर्गत्वादत्र णत्वसिद्धिः। प्रनिदारयति प्रनिधापयतीत्यादौ तु नैवं स्थितिः, यतो हि तत्रानर्थक एवागमी आकारः, तस्य य आगमो रेफस्तस्य ग्रहणाप्रसक्तौ नास्याः परिभाषायाः प्रवृत्तिः। शास्त्राणां कस्यचिद्वाक्यस्य च स्वीयोद्देश्यताऽवच्छेद-कावच्छेदेनैव प्रवृत्तेरत्र चार्थवत्वस्योद्देश्यताऽवच्छेदकत्वात्तदभावाच्च प्रनिदारयति प्रनिधापयतीत्यादौ न परिभाषाप्रवृत्तिः शक्यसम्भावनेति न तद्दृष्टान्तेनात्राप्रसक्तिर्न वा णत्वघटितप्रयोगदृष्टान्तेन तत्र प्रसक्तिरिति कथमप्यतिव्याप्तेरव्याप्तेर्वात्राप्रसरान्न दोषलेशसम्भावनापीति न दोषः।

अत्रायं विशेषः— 'अर्थवतो ह्यागमः' इत्यंशे 'अर्थवतः' इत्युपलक्षणम्। तेनानर्थ-कस्याप्यागमविशिष्टस्य ग्रहणं भवति। तथा चोक्तं कैयटेन—अनर्थस्यापगमो व्यपदेश-हानिं न करोति। यथा सत्यपि रेफे आकाराकारयोर्वृद्धिगुणव्यपदेशो भवत्येव। न हि तत्र वृद्धिशब्दो गुणशब्दो वा न प्रयुज्यते इति वक्तुं कोऽपि समर्थः। प्रकृते प्रणिदापयति प्रणिधापयति इत्यनयोः प्रयोगयोः सिद्धेः पूर्वं प्रकृतभूतयोरागमिनोर्दाधाशब्दयोरर्थ वत्त्वादाह महाभाष्यकारः–'अर्थवतो ह्यागमः' इति। प्रकरणानुसारेण प्रयुक्तमेव वाक्यं सद्यो भवति विवक्षितार्थग्राहकम्। तत्र षष्ठ्या अवयवत्वमर्थः। अत एव परिष्कार-कुशलैः परिष्क्रियते अवयवत्वावच्छिन्नविधेयताश्रयत्वमागमत्वमिति। प्रसङ्गानु-सारेणाग्रे विषयोऽयं स्पष्टीकरिष्यते। अर्थवत इत्यंशस्योपलक्षणत्वं ज्ञात्वैव महावैया-करणेन श्रीनागेशभट्टेन परिभाषेन्दुशेखरे परिभाषायाः स्वरूपमीदृशं दर्शितम्—'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते'[2] इति। इदानीं महाभाष्यवाक्ये दृष्टान्त-त्वेनोपात्तस्य यथान्यत्रेति वाक्यस्य विचारः क्रियते। तदनन्तरमन्यांशे विचारयिष्यते। अस्य वचनस्य व्याख्यानं विदधता भगवता महाभाष्यकृता 'यथान्यत्र—तद्यथा—अन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते। क्वान्यत्र? लविता चिकीर्षितेति'[3] इत्युक्तम्।

---

१. महाभाष्यवाक्यम् 'दाधाघ्वदाप्' १।१।२० इति सूत्रे।

२. परिभाषेन्दुशेखरे प्रथमतन्त्रे परिभाषा ११।

३. महाभाष्यम् १।१।२० सूत्रे।

अत्रेदमाशङ्क्यते यत् 'न वार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति वचनप्रामाण्यादेवागमिधर्मवैशिष्ट्यमागमविशिष्टस्य बोध्यते इति लभ्यते। तदानीमेव दृष्टान्तरूपेण लविता, चिकीर्षिता इत्यनयोरुपस्थापनं कथं कृतम् ? यतो हि दृष्टान्तो नामासन्दिग्धो भवति। नहि सन्दिग्धस्यैव दृष्टान्तता, दृष्टोऽन्तो निश्चयो यस्य स दृष्टान्त इति व्युत्पत्तेः। निश्चयात्मकज्ञानविषयत्वं दृष्टान्तत्वमिति यावत्। अत एव पर्वतो वह्निमान् धूमाद् महानसवदिति दृष्टान्तो युज्यतेतराम्। अत्र तु सर्वस्यैव सन्दिग्धत्वात् तथादृष्टान्तोपस्थापनं न युक्तिमिति चेदत्रोच्यते—'भविष्यति गम्यादयः'[1] इति सूत्रप्रामाण्येन प्रयोगस्येड्घटितस्योपलम्भादागमिवृत्त्यर्थवत्त्वस्यागमविशिष्टस्यापीति निश्चितं भवति। अत एव भगवता महाभाष्यकृता इड्घटितयोरेव 'लविता चिकीर्षिता' इत्यनयोरुदाहरणत्वेन उपस्थापनं कृतम्। यतो हि 'भविष्यति गम्यादयः' इति सूत्रघटकेड्घटितभविष्यतीति प्रयोगदर्शनमूलकेड्घटितप्रयोगसाधुत्वानुमितेरत्र भगवता भाष्यकृता इड्घटितयोरेवानयोः लविता चिकीर्षितेति प्रयोगयोर्दृष्टान्तता प्रदर्शिता। निश्चितस्यैव दृष्टान्ततेति पूर्वपक्षोक्तयुक्तेरत्राविरुद्धत्वात्। निश्चितत्वं दृष्टान्तस्य प्रमात्मकज्ञानविषयत्वमेव। तच्च यथा महानसस्य प्रत्यक्षप्रमाणप्रमितत्वात्, तथैव प्रकृतेऽपि पाणिनीयप्रयोगस्येड्घटितस्य दर्शनेनेड्घटितस्य प्रयोगस्य प्रमात्मकज्ञानविषयत्वान्निश्चितत्वाद् भगवता दृष्टान्तत्वेनोपपादनं न विरुद्धम् किन्तु सुतरामनुकूलमेव। किञ्च -'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति भाष्यीयवाक्यमूलकपरिशोधितस्वरूपायाम् 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यते' इति परिभाषायामथवा 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्यत्र वा प्रमाणमपीदं भगवतः पाणिनेर्वचनम् 'भविष्यति गम्यादयः' इति। यदि चागमिवृत्तिधर्मवैशिष्ट्यमागमविशिष्टस्य न स्यात्, तर्हि नैव स्यात्तत्रेड्रूपागमविशिष्टस्य 'भविष्य' इत्यस्यागमि भूधातौ विद्यमानाङ्गत्वरूपधर्मवैशिष्ट्यम्। तथा च कथं तत्र दीर्घः स्यात्। एवञ्च तत्प्रयोगप्रामाण्यमूलकमिदं वाक्यमिष्टप्रयोगसङ्ग्राहकमनिष्टव्यावर्तकञ्च—

'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति। यथाहि 'अव्ययानां भमात्रे टिलोपः'[2] इत्यस्यानित्यतायाम् 'बहिषष्टिलोपो यञ् च' इति वार्त्तिके टिलोपग्रहणम्। अपरञ्च 'मुखपार्श्वतसोर्लोपश्च'[3] इत्यत्र लोपवचनमनित्यतायां मानम्। तथा चोक्तं वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन 'अव्ययात्त्यप्'[4] इति सूत्रव्याख्यानावसरे–'अनित्योऽयं बहिषष्टिलोपविधानात्। तेनेह न 'आरातीयः शाश्वतीयः'[5]

१. पा० सू० ३।३।३।

२. वार्त्तिकम् ४१८७ अव्ययात्त्यप् ४।२।१०४ इति सूत्रे।

३. गणसूत्रम् ७८ सिद्धान्तकौमुद्यां शैषिकप्रकरणे 'गहादिभ्यश्च' ४।२।१३८ सूत्रे।

४. पा० सू०–४।२।१०४।

५. सिद्धान्तकौमुदीशैषिकप्रकरणे।

इति। पश्चाच्च—'गहादिभ्यश्च'[1] इति गणसूत्रमुपस्थाप्य 'मुखपार्श्वतसोर्लोपश्च' इति फलञ्चास्य 'मुखतीयम्, पार्श्वतीयम्' इत्युपपाद्य प्रोक्तं दीक्षितेन 'अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदम्' इति, तथैव प्रकृतेऽपि 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्यस्यैव दृष्टान्तग्राहकम् 'भविष्यति गम्यादयः' इति।

ननु भवतु नाम कथञ्चिद् दृष्टान्तत्वं प्रयोगयोरनयोः, किन्तु विचारणीयमिदं वर्तते यद् दृष्टान्तभूतयोरनयोः प्रयोगयोः 'लविता चिकीर्षिता' इत्यनयोः पूर्वमिडमकृत्वाऽऽर्धधातुकप्रत्ययनिमित्तकं कृताकृतप्रसङ्गित्वलक्षणलक्षितनित्यत्वात् परत्वाच्च गुणमेव विधाय पश्चादिट्प्रत्ययः क्रियेत। तथा च मास्तु आगमिग्राहकशब्दग्राह्यत्वमागमविशिष्टस्य तथा सति कस्यचिद् दोषस्याप्रसक्तेः कथमनयोः प्रयोगयोर्दृष्टान्तत्वेन प्रदर्शनं महाभाष्यकृता कृतमिति चेदत्रोच्यते—

यद्यपि तत्रोभयोरपि गुणेडोः कृताकृतप्रसङ्गित्वलक्षणनित्यत्वं वरीवर्ति, किन्तु परत्वं गुणस्यैवेति कृत्वा गुणविधेः प्राबल्यात्प्रथमतो गुणसत्त्वे तदनन्तरमिड्सत्त्वेऽभीप्सितरूपस्य सिद्धौ सत्यामागमिधर्मवैशिष्ट्यस्यागमविशिष्टेऽनारोपेऽपि क्षतेरभावादनयोरिड्घटितयोः प्रयोगयोः 'लविता चिकीर्षिता' इति दृष्टान्तत्वेनोपादानं न रोचकम्, दार्ष्टान्तिके प्रकृतार्थसाधकं तदभावे तदुपादानप्रयोजनासिद्धेरिति प्रतिभाति भाष्यकृतः प्रयोगयोरनयोर्दृष्टान्तत्वेनोपादानमापाततो व्यर्थम्, तथापि—अल्पापेक्षत्वरूपमन्तरङ्गत्वमिड्विधेरेव विद्यमानमतो हेतोस्तत्र 'असिद्धं बहिरङ्गमन्तरङ्गे'[2] इत्यनया परिभाषया प्रथमत इड्विधौ सति तद्विशिष्टे आर्धधातुकत्वस्याभावे गुणानुपपत्तिरिति हेतोस्तत्र भगवता महाभाष्यकृता—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्यस्यां परिभाषायां प्रयोगयोस्तयोः लविता चिकीर्षिता इत्येतयोरुपस्थानं दृष्टान्तत्वेन फलत्वेन च कृतमिति सूक्ष्मेक्षिकया कृते समालोचने प्रतिभाति। महाभाष्यतत्त्वविदः सरणिमिमामेव कल्पयितुं शक्नुवन्ति। तदभावे कथं भाष्यसङ्गतिः, कथञ्च तस्याः परिभाषाया अनेकप्रयोगसाधिकायाः सिद्धिरिति वेदितव्यं वेतृभिः।

इदमप्यत्र रहस्यं बोध्यम्। तथाहि—दृष्टान्तरूपेण समुपस्थापितयोः 'लविता चिकीर्षिता' इति प्रयोगयोः कृत्यं रूपमिदम्। यदि लुट्लकारस्य तासि रूपमिति प्रोच्यते, तदा भाष्यविरोधः। मूले हि महाभाष्ये—'यथाऽन्यत्र' इति वाक्यविवरणावसरे—'तद्यथाऽन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते। क्वान्यत्र 'लविता चिकीर्षिता' इति प्रोक्तम्। तत्र तास्विशिष्टे रूपे स्वीक्रियमाणे 'अर्थवतो ह्यागमः' इत्युक्तिर्भगवतो महाभाष्यकृतो विरुध्येत। यतो हि 'तास्' इत्यनर्थको विद्यते। तस्यैवानर्थकत्वेन तस्यागमस्य तद्विशिष्टस्यागमिनो वाऽर्थवत्त्वमशक्यम्। अतोऽत्र तृचि प्रत्यये कृते सति रूपद्वयमिदमुपस्थापितमिति पक्षो ज्यायान् प्रतिभाति।

---

१. पा० सू० ४।२।१३८।

२. परिभाषेन्दुशेखरे परिभाषा—५०।

'तद्गुणीभूत' इति परिभाषाघटकीभूतस्यागमविशिष्टस्य ग्रहणे हेतुत्वेनोपात्तस्य पदस्यार्थः कैयटेन इत्थं कृतः । तथाहि—'प्रयोगसम्पादन उपकारक इत्यर्थः' इति । नागेशभट्टेन विदुषा तु परिभाषामर्थवद्ग्रहणस्यानर्थकस्याप्यागमिन उपलक्षणीभूतस्य तथैव कैयटस्यापि सम्मतस्य मन्वानेन 'तद्गुणीभूत' इति महाभाष्यस्थं मूलपदमादाय—'यमुद्दिश्यागमो विहितः स तद्गुणीभूतः शास्त्रेण तदवयवत्वेन बोधितस्तद्ग्रहणेन तद्ग्राहकेण तद्बोधकेन गृह्यते—बोध्यते आगमविशिष्ट इति परिभाषार्थः' इति प्रोक्तम् । तदनन्तरञ्च—'तद्गुणीभूतः' इति पदस्य या व्याख्या कैयटेन 'प्रयोगसम्पादने उपकारक इत्यर्थः' इति वाक्येन कृता तस्याः खण्डनमुद्द्योतग्रन्थे नागेशभट्टेन कृतम् । यथा च तत्र खण्डनाय प्रयुक्तं वाक्यं तदत्र प्रदर्श्यते । तथाहि—'प्रयोगेति — इदं चिन्त्यम्, आगमवत् प्रत्ययादेरपि प्रयोगसम्पादने उपकारकत्वेन तेषामपि प्रकृतिग्रहणेन ग्रहणापत्तिः, मूलयुक्तेस्तुल्यत्वात् । अस्य मूलयुक्तित्वाभावे तु तत्कथनवैयर्थ्यापत्तिः । तस्मान्मदुक्तव्याख्यैव ज्यायसी' इति । अयं भावो नागेशभट्टोक्तस्य वचसः—यदि तद्गुणीभूत इत्यस्य प्रयोगसम्पादने उपकारकः इत्यर्थः क्रियेत, तर्हि व्याप्तिरियं स्याद् यद् यः यः प्रयोगसम्पादने उपकारकः स स तद्ग्राहकग्राह्यताविशिष्टो भवतीति । तथा च प्रत्ययविकरणयोरपि प्रयोगसम्पादकत्वेन प्रकृतिग्रहणाद् ग्राह्यतापत्तौ राजकीयमित्यादिप्रयोगेषु नान्तशब्दत्वं प्रत्ययान्तेऽपि भवेदतिदिष्टम् । तथा च सति 'अल्लोपोऽनः'[1] इति सूत्रेणाकारलोपापत्तिः । तथैव विकरणादिस्थलेष्वपि बोध्यम् ।

इत्थञ्च महाभाष्यस्थमेकं पदमादाय विभिन्नप्रकारेण व्याख्यानस्य दर्शनात् कैयटनागेशयोर्मते महान् भेदः । व्याख्यानयोश्चानयोः कस्य युक्तत्वं कस्यायुक्तत्वमिति विचारे 'शास्त्रेण तदवयवत्वेन बोधितः' इति नागेशभट्टगृहीतवक्रगतेरपेक्षया 'प्रयोगसम्पादने उपकारकः' इति कैयटोक्ता युक्तिरेवावक्रा समञ्जसा प्रतिभाति । परमविदुषो महाभाष्यतत्त्वविदः कैयटस्याभिप्रायमनवगम्यैव प्रत्ययादिस्थले दोषप्रदानं श्रीनागेशभट्टस्य । तत्र प्रयोगसम्पादने उपकारक इति कथनेन नेदमभिप्रेतं कैयटस्य यद् यो यः प्रयोगसम्पादने उपकारकः स स तद्ग्राहकजन्यग्रहग्राह्यताविशिष्टो भवत्येव । किन्तु यो यस्यागमः सन् प्रयोगसम्पादने उपकारकः स तद्ग्रहणग्राह्यताविशिष्टो भवतीत्येतावानेवार्थः । तथा च न प्रत्ययस्थले दोषो न विकारादाविति कैयटस्याचार्यस्य वचसोऽर्थज्ञानेन न कथमपि व्यामोहप्रसक्तिः । अपरञ्च—'अर्थवतो ह्यागम इत्यंशेनैव आगमार्थस्य लब्धत्वेन पुनस्तद्गुणीभूतः' इत्यस्य शास्त्रेण 'तदवयवत्वेन बोधितः' इत्यर्थकरणमनुचितम् । यतो हि आगमपदेन अवयवत्वावच्छिन्नविधेयताश्रय इत्येवार्थो बहुशो गृह्यते । तथा च यो यस्यागमः सन् प्रयोगसम्पादने उपकारकः स तद्ग्राहकशब्दजन्यप्रतीतिविषयीभूतो भवतीत्यर्थः। एवञ्च प्रत्ययादिस्थले

१. पा० सू०–६।४।१३४ ।

यो यस्यागमः सन् इत्यस्य विशेषणस्याभावेन दोषलेशस्याप्यप्रसक्तेः, तत्र दोषप्रदान-प्रयासस्तु नोचित इति मन्ये ।

इदमप्यत्रानुपेक्ष्यं तत्त्वम् । तथाहि—यद्यपि 'अर्थवतो ह्यागमस्तद्गुणीभूत-स्तद्ग्रहणेन गृह्यते' इत्यस्मिन् वचने केवलस्यागमस्यैवागमिग्राहकशब्दजन्यज्ञानग्राह्य-त्वमित्यर्थोऽयत्नलभ्यो भवति, तथापि गृह्यते इत्यस्य कर्म आगमविशिष्ट एव, न तु केवल आगमः । एवञ्चागमिग्राहकशब्दजन्यज्ञानविषय आगमविशिष्टो भवतीत्यर्थः सम्पन्नः । ननु शब्दमर्यादयाऽऽगमस्यैव स्वारसिकी ग्रहणग्राह्यता प्रतीयमाना कथं साऽपोद्यते ? 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति वाक्ये बालेनापि सुज्ञेयस्य ग्राह्यत्वेन प्रतीयमानस्यागमस्य परित्यागे बीजाभावेन, दोषाभावेन चागम-विशिष्टो गृह्यते इत्यर्थकरणमनुचितमिति चेदत्रोच्यते–केचनात्र परिभाषायां विद्यमान-मागमपदमावर्त्य 'आगमा आगमविशिष्टाश्च तद्ग्रहणे गृह्यन्ते' इत्येवं योजनां कुर्वन्ति। अस्मिन् व्याख्याने हेतुश्च तैरुच्यते भाष्यमेव । केवलस्यागमस्यागमिग्रहणेन ग्रहणे प्रमाणन्तु—'ङमो ह्रस्वादचि ङमुण्नित्यम्'[1] इति सूत्रस्थमहाभाष्यवाक्यमेव । तथा च परिभाषेन्दुशेखरे नागेशभट्टेन उट्टङ्कितम्—'किञ्च ङमन्तपदावयवस्य ह्रस्वात्परस्य ङमो ङमुडित्यर्थे कुर्वन्नास्ते इत्यादौ ङमो ङमुडागमे णत्वप्राप्तिमाशङ्क्य यदागमा इति न्यायेनाद्यनस्यापि पदान्तग्रहणेन ग्रहणात् 'पदान्तस्य'[2] इति सूत्रेण णत्वनिषेधः इत्यनया परिभाषया आगमानामागमिधर्मवैशिष्ट्यमपि बोध्यते इत्याशङ्क्य ङमुट्सूत्र-स्थभाष्यासङ्गतिः'[3] इति ।

अपरे तु–'प्रणिदापयति' 'प्रणिधापयति' इत्यादिप्रयोगोपपत्तिपरकोपायभूताया परिभाषाया अस्या आगमविशिष्टस्यैव ग्राह्यतेति वदन्ति । ङमुट्सूत्रस्थं भाष्यन्तु न सिद्धान्तभूतम् । यतो हि ङमन्तपदावयवस्येत्याद्यर्थो न स्वीक्रियते सिद्धान्ते । तदर्थं यदागमपरिभाषायाः केवलस्यागमस्यागमिधर्मवैशिष्ट्यबोधे तात्पर्यकल्पनम-नर्थकमेव । सिद्धान्ते योऽर्थोऽभिप्रेतोऽस्य सूत्रस्य स तु वैयाकरणसिद्धान्तकौमुदीग्रन्थे ग्रथित एव भट्टोजिदीक्षितेन–'ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचोनित्यं ङमुडागमः स्यात्'[4] इति ।

किञ्च—केवलस्यागमस्यागमिधर्मवैशिष्ट्यबोधने परिभाषायास्तात्पर्यपरि-कल्पने रामाणामित्यादिप्रयोगेषु आगमिवृत्तिपदान्तत्वं नकारेऽतिदिश्य 'पदान्तस्य' इति सूत्रेण णत्वनिषेधः स्यात् । यतो हि तत्रामागमिभूतो नुट् चागमः । आम्वृत्ति-

१. पा० सू०—८।३।३२ ।

२. तत्रैव–८।४।३७ ।

३. परिभाषेन्दुशेखरे यदागमपरिभाषाव्याख्यावसरे ।

४. वैयाकरणसिद्धान्तकौमुदी—ङमो ह्रस्वादचि०सूत्रस्था ।

पदान्तत्वञ्चागमे नकारेऽतिदिष्टे णत्वनिषेधापत्तेः। इत्थमेव सर्वेषामित्यादौ आम्-रूपागमिवृत्तिपदान्तत्वस्यातिदेशेन सकारस्य षत्वासिद्धेः। यतो हि 'अपदान्तस्य मूर्धन्यः' इति सूत्रानुवृत्तिमता 'आदेशप्रत्यययोः'[1] इति सूत्रेण षत्वं भवति। साम्प्रतमागमिवृत्तिधर्मस्यागममात्रेऽतिदेशे तद् षत्वं न सिद्ध्येत्। सूत्राणां स्वीयोद्देश्यतावच्छेदकावच्छेदेनैव प्रवृत्तेरत्र च तथातिदेशेऽपदान्तत्वलक्षणस्वोद्देश्यतासम्पादकस्याभावेन सूत्राप्रवृत्तेः षत्वासिद्धेः। अतो हेतोरनेकदोषदर्शनादस्याः परिभाषाया आगमिधर्मवैशिष्ट्यमागममात्रेऽतिदेशने न तात्पर्यमित्येव बोध्यम्। किन्तु—'यो यस्यागमः सन् प्रयोगसम्पादने उपकारकः तद्विशिष्टस्तद्ग्राहकशब्दजन्यप्रतीतिविषयो भवतीति स्वारसिकोऽर्थः। तर्केऽप्रतिष्ठेति न्यायेन यद्यपि न कस्याप्येकस्य मतस्य सर्वथा दोषरहितत्वं युक्तत्वञ्चाभिधातुं सहसैव शक्यम्, तथापि यथामति तथार्थप्रकाशः कृतः। प्रमाणञ्चात्र धीधना एव। तर्केऽप्रतिष्ठेति न्याये जागरूकेऽपि लोके प्रामाणिका व्यवहारा भवन्त्येव, अप्रतिष्ठोक्तेस्तर्हि का गतिरिति चेद्, तत्र कुतर्कमात्रस्याप्रतिष्ठितत्वोक्तेः। अत एव तत्र तत्राभियुक्तेरुक्तम्—'तर्क्यत मा कुतर्क्यताम्' इति। तत्रैव तात्पर्यमस्यापि वाक्यस्य—

> यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
> अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥[2] इति।

अत्र परिभाषाविचारावसरे—

> दृष्टान्तेन विना राम नापूर्वार्थोऽवबुध्यते।
> दीपं विना यथा रात्रौ भाण्डोपस्करणं गृहे ॥

इति वसिष्ठस्य महर्षेर्वचोऽनुसारेण कस्यापि पदार्थस्य साधनाय प्रवृत्तेन जनैन दृष्टान्तोऽवश्यं दर्शनीयः। तेन प्रतिपिपादयिषितो हि पदार्थः सद्यो बुद्धिमारोहति। अत एव न्यायशास्त्रे पञ्चावयवमध्ये दृष्टान्तः समादृतः। 'पर्वतो वह्निमान् धूमाद् महानसवत्' इति। प्रतिज्ञाहेतूदाहरणोपनयनिगमानि पञ्चावयवाः। वेदान्तशास्त्रे सर्वोच्चप्रमाणे उपनिषद्यपि दृष्टान्तेनैव परमात्मावबोधः कारितः "यथा सोम्य एकेन मृत्पिण्डेन ज्ञातेन सर्वं मृण्मयं विज्ञातं भवति"[3] इत्यादिना। इदमत्राकूतं भवति यत्प्रतिज्ञातस्य पदार्थस्य सिद्धये दृष्टान्तस्य परमोपयोगः। इत्थञ्च शिष्टानुगृहीतयोरारोहावरोहक्रमयोर्मध्येऽवरोहक्रम एव गृहीतः। तथा चानेन क्रमेण पूर्वदृष्टान्ते दृष्टेः, ततस्तत्पूर्वपूर्वपदार्थेष्वपि यथाबुद्धिबुद्धोऽर्थोऽत्र प्रकटीकृतः। इदानीमत्र कश्चिदन्योऽपि विचारो यो हि प्रकरणोपयोगी भविष्यति स प्रकटीकरिष्यते।

---

१. पा० सू०—८।३।५९।

२. वाक्यपदीयम्, ब्र० का० ३४ कारिका।

३. छान्दोग्योपनिषद् ६।१।४।

अस्याः परिभाषाया स्वीकारे मुख्यो हेतुः पूर्वमेव प्रदर्शितः । प्रणिदापयति प्रणिधापयतीत्यादौ पुगन्तस्यैवार्थवत्त्वम् नहि केवलस्य दाशब्दादेरिति हेतोः 'दाधाघ्वदाप्'[1] इति सूत्रे विशिष्टरूपोपादानसत्त्वात् 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' इति परिभाषया आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वात् केवलदाशब्दस्य दाप्घटकस्यानर्थकत्वाद् घुसंज्ञाया अभावेन णत्वानापत्तिरूपे दोषे समागते परिभाषया अनया पुग्विशिष्टस्य दाग्रहणेन ग्राह्यता प्रतिपादिता । तथा च दाप् धाप् इत्यादेर्घुत्वे णत्वमुपपद्यते । आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वमिति स्वीकारे भाष्यवाक्यं प्रमाणम् । तत्र हि 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च'[2] इति सूत्रे भगवता महाभाष्यकृता––'सीयुडविशेषितः स्यात्' इत्युक्तम् । यदि आगमसमभिव्याहारेऽपि केवलस्यागमिनोऽर्थवत्त्वं स्यात्, तर्हि भाष्यकृत्कृतेयं व्यवस्था नोपपन्ना भवेत् । यतो हि सीयुटः समभिव्याहारेऽपि तद्रहितस्य भावकर्मवाचकत्वेन 'सीयुडविशेषितः स्यात्' इत्युक्तिरनर्थिकैव स्यात् । न चेष्टापत्तिस्तत्र कर्तुं शक्या, अनेकानर्थापत्तेः । अतस्तद्भाष्यमूलकोऽयं प्रवादः प्रामाणिकः 'आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वम्' इति । इदमेव व्यवस्थितं मतं वैयाकरणैरङ्गीकृत्य कृतो विचारः क्रियते च । फलमपि प्रयोगसिद्धिरूपमेतन्मताङ्गीकारे एवोपपद्यतेतराम् । तथाहि––उशब्देन निपातेन नञ्समासे अनु+अत्र इति स्थिते नुड्रहितस्यानर्थकत्वात् 'निपात एकाजनाङ्'[3] इति सूत्रेण प्रगृह्यत्वाप्राप्तौ 'अन्वत्र' इत्यत्र यण् सिध्यति । रामाणामित्यादिप्रयोगेषु नुट्समभिव्याहारे आमोऽनर्थकतया पूर्वनान्तस्य भत्वाभावेन 'अल्लोपोऽनः'[4] इति सूत्रेणाकारलोपो न भवतीति तस्य वाक्यस्य महाफलम् । साधुप्रयोगसाधनायैव व्याकरणशास्त्रं प्रवृत्तम् ।

ननु 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति वचनं न कार्यम्, वचनान्तरैरेव प्रयोजनसिद्धेः । तथाहि––प्रणिदापयति प्रणिधापयतीत्यादिप्रयोगसाधनायैव परिभाषारूपमिदं वचनं प्रवृत्तम् । तानि च प्रयोजनानि परिभाषान्तरैरेव साधयितुं शक्यानि । 'एकदेशविकृतमनन्यवत्'[5] इति परिभाषया पुग्विशिष्टस्य दाग्रहणेन ग्रहणात् प्रयोजनसिद्धेः । उपायस्योपायान्तरादूषकत्वादिति न्यायात् 'गामादाग्रहणेष्वविशेषः'[6] इति परिभाषया वा निखिलप्रयोगसंसिद्धौ मात्रालाघवप्रियवैयाकरणैः किमर्थमियं परिभाषा मान्याऽपि भवितुं शक्येति चेन्न 'लोपागमवर्णविकारज्ञो हि सम्यग् वेदान्

१. पा० सू०––१।१।२० ।

२. तत्रैव–६।४।६२ ।

३. पा० सू०–१।१।१४ ।

४. पा० सू०––६।४।१३४ ।

५. परिभाषेन्दुशेखरे प्रथमतन्त्रे परिभाषा–३७ ।

६. „ तृतीयतन्त्रे परिभाषा–११५

परिपालयिष्यति'[1] इति महाभाष्यवाक्ये विकारात् पृथगागमग्रहणेन विकारपदेन स्थाने जायमानयोरेव ह्रासवृद्ध्योर्ग्रहणेनागमानामग्रहणात्। इत्थञ्च 'एकदेशविकृतमनन्यवत्' इति परिभाषया 'यदागमा' इति परिभाषाया प्रयोजनानि नैव साधयितुं शक्यानि। अपरया 'गामादाग्रहणेष्वविशेषः' इत्यनया परिभाषया तु तत्प्रयोजनसंसाधनेहा मोघा, तया 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'[2], 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्'[3] इत्यनयोरेव परिभाषयोर्बाधात्। अत्र मानञ्च—'समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात्'[4] इति वचनम्। कथमेतद्वचनं प्रमाणम्? यदा सामान्यतः 'गामादाग्रहणेष्वविशेषः' इति वचनं प्रवृत्तम्। तस्य वचनस्य प्रवृत्तौ सङ्कोचाधायकत्वं कथं वचनस्यास्य येन 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्', लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इत्यनयोरेव परिभाषयोर्बाधो भवति 'गामादाग्रहणेष्वविशेषः' इति वचनेनेति चेदत्रेदं तत्त्वम्—यदि हि 'गामादाग्रहणेष्वविशेषः' इति वचनेन 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणे गृह्यते' इत्यस्यापि परिभाषारूपवचनस्य तया परिभाषया बाधः स्यात्तदा 'समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात्' इति वचनं कथमपि प्रामाण्यं नासादयेत्। यतो हि तेन भाष्यवार्त्तिकेन प्रतिपाद्यते यत् समानशब्दस्य प्रनिदारयति प्रनिधारयतीत्यादेः घुत्वप्रतिषेधो न कर्तव्यः, अर्थवद्ग्रहणात्। नहि प्रनिदारयति प्रनिधारयतीत्यादिप्रयोगान्तर्गता दाधाप्रभृतिशब्दा अर्थवन्तः, किन्तु अनर्थकाः। 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्'[5] इति परिभाषया चानर्थकस्यास्य स्वयमेवाग्रहणात् घुत्वाप्रसक्तेर्न निषेधाय प्रयासोऽपेक्ष्यते। अनेन च भाष्यवचनेन सिद्धं भवति यद् 'गामादाग्रहणेष्वविशेषः' इति परिभाषा न 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्यस्याः प्रबाधनाय क्षमते। तथा सति दात्वाविशेषात् प्रनिदारयति प्रनिधारयति इत्यादावपि घुत्वात् णत्वप्रसक्तो भाष्यवचनमिदमनर्थकं स्यादिति रीत्या तत्त्वमत्रत्यं योजनीयं भवति। एतेन गामादाग्रहणेष्वविशेष इति परिभाषया प्रणिदापयति प्रणिधापयतीत्यादिप्रयोगाणां सिद्धिर्विनैव यदागमपरिभाषया भवति चेत्, तदा किमर्थं यदागमपरिभाषा मन्तव्येति परास्तम्। तथा सति प्रनिदारयति प्रनिधारयतीत्यादावपि घुत्वात् णत्वापत्तेः।

न चैवमपि 'दाधाघ्वदाप्'[6] इति घुसंज्ञाविधायके सूत्रे 'अदाप्' इत्यपि वर्तते। येषाञ्च पुग्वतां 'दाप् धाप्' प्रभृतिप्रयोगाणां घुत्वोपपत्तये 'अर्थवतो ह्यागमस्तद्गुणी-

---

१. महाभाष्यम् १।१।१ पस्पशाह्निकम्, शब्दकौस्तुभयुते १७ पृष्ठे।

२. परिभाषेन्दुशेखरे तृतीयतन्त्रे परिभाषा—११४।

३. परिभाषेन्दुशेखरे तृतीयतन्त्रे परिभाषा ९१।

४. म० भा०—दाधाघ्वदाप् १।१।५।२० सूत्रे।

५. परिभाषेन्दुशेखरे परिभाषा १४।

६. पा० सू०—१।१।२०।

भूतस्तद्ग्रहणेन गृह्यते' इति परिभाषा मन्तव्या। ते च प्रयोगा 'अदाप्' इति निषेधांशेन निवृत्ता भवेयुः। यतो हि पुकि सति प्रणिदापयतीत्यत्र यस्य पुग्विशिष्टस्य घुत्वं 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति परिभाषया घुसंज्ञाकर्तव्यम्, तस्य तु सूत्रस्यैवांशेन 'अदाप्' इत्यनेन निषेधे व्यर्थैव परिभाषेति वाच्यम्' 'पित्प्रतिषेधाद्वा'[1] इति महाभाष्यवार्त्तिकेन फलैक्यप्रतिपादनाय सूत्रमतेऽपि इत्संज्ञकपकारविशिष्टस्य ग्रहणेनादोषात्। 'दाप्' लवने 'दैप् शोधने' इत्युभयोर्बकारानुबन्धकत्वकल्पनया सूत्रे 'अदाप्' इति धस्य चत्त्वेन पकारनिर्देशान्निषेधाप्राप्तेश्च। यतो हि प्रणिदापयतीत्यादौ तु पुगागमः कृतः। तत्र हि पकारोऽनुबन्धः, न बकारः। प्रकृतसूत्रस्थप्रदीपोद्द्योताभ्यां तथाविधोपाय उपलभ्यते।

ननु 'दाधाघ्वदाप्' इति सूत्रांशेन 'अदाप्' इत्यनेन व्यावर्त्यस्य 'दैप् शोधने' इत्यादिधातव एव, कृते सत्यात्त्वे दाप्रूपत्वेन 'अदाप्' इत्यंशार्थसत्त्वान्निषेधोपपत्तेः। किन्तु प्रणिदापयतीत्यत्र निषेधो न प्रवर्तेत, एतदर्थं कृतः प्रयत्नो बकारादिघटितादिकल्पनारूपो निरर्थकः। तत्र 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'[2] इति परिभाषयैव कार्यनिर्वाहादिति चेन्न, परिभाषयाऽनया तत्र निषेधांशाप्रवेशस्याशक्यत्वात्। यतो हि तस्याः परिभाषायाः फलबलात् 'गामादाग्रहणेष्वविशेषः' इति परिभाषया बाधेन तद्बलेन तत्र निषेधबाधाशक्यत्वात्कृतस्य प्रयत्नस्य सार्थक्यात्।

अपरञ्च यदि प्रणिदापयतीत्यादौ ण्यन्ते पुकि सति 'दाप्' इत्यस्य 'दाधाघ्वदाप्' इति सूत्रस्थेन 'अदाप्' इत्यंशेन पुग्विशिष्टस्य घुत्वनिषेधोऽभिप्रेतः स्यात् सूत्रकारस्य, तर्हि महाभाष्यकृता प्रणिदापयतीत्यादौ घुत्वाभावमाङ्क्य 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति परिभाषया घुत्वप्रसाधनप्रयासो विफलः स्यात्। अतो ज्ञायते यदत्र 'अदाप्' इति निषेधो न प्रवर्तते। सूत्रसामर्थ्यादत्र पुग्विशिष्टस्य घुत्वमिति वक्तुं दुःसाहसं कः कुर्यात्, यदा 'प्रणिददाति' इति विना णिचं सम्पद्यमानेषु प्रयोगेषु घुत्वं चरितार्थम्। अतस्तत्र परिभाषोपस्थापनरूपभाष्यकारीयप्रयासप्रामाण्यात्तत्र पुग्विशिष्टे न निषेध इति कल्पनाया ज्यायस्त्वम्। 'यथोत्तरं मुनीनां प्रामाण्यम्' इति सिद्धान्तोऽप्यत्रानुकूलः। इत्थञ्च 'पित्प्रतिषेधाद् वा' इति वार्त्तिकात् परिभाषाबलात् प्रणिदापयतीत्यादौ घुत्वमूलकणकारघटितरूपमहाभाष्यकारीयप्रयासाच्च नात्र निषेधांशप्रवेश इति कल्पनीयम्।

महाभाष्ये प्रकृतसूत्रे (दाधाघ्वदाप्) अलक्ष्येषु प्रनिदारयति-प्रनिधारयतीत्यादिषु दोषमालक्ष्य तद्वारणोपायाः प्रदर्शिताः। तत्रैव प्रसङ्गादलक्ष्यवारणे आतेऽपि लक्ष्ये एव प्रणिदापयति-प्रणिधापयतीत्यादौ घुत्वाभावमाशङ्क्य प्रकृतया 'जार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति वचनेन सदृष्टान्तेन घुत्वमुखेन णात्वमुप-

---

१. म० भा० 'दाधाघ्वदाप्' इति सूत्रे छायायुक्ते २७२ पृष्ठे।

२. परिभाषेन्दुशेखरे परिभाषा ११४।

पादितम् । तेन विज्ञायते यत् 'दाधाघ्वदाप्' इति सूत्रस्थेन 'अदाप्' इति निषेधवचनेन 'प्रणिदापयति'इत्यत्र न निषेधः। किञ्च, यदि 'प्रणिदापयति' इत्यत्र निषेधः क्रियेत चेत्, तथापि प्रणिधापयतीत्यस्य महाभाष्यस्थस्य प्रयोगस्य घुत्वार्थं तु केवलं परिभाषैवेयं हेतुः । तथा च तत्रत्याय मन्तव्या चेत्परिभाषा महाभाष्यप्रामाण्यात्तर्हि प्रणिदापयतीत्यत्रापि घुत्वाय सैव प्रमाणम् । अतोऽत्रादाप् इति निषेधो न प्रवर्तते, घुत्वं भवत्येवेति बोध्यम् । तत्र हि महाभाष्ये—'समानशब्दप्रतिषेधः', 'समानशब्दानां प्रतिषेधो वक्तव्यः ।' प्रनिदारयति, प्रनिधारयति । दाधाघुसंज्ञा भवन्ति इति घुसंज्ञा प्राप्नोति ।

समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात् । समानशब्दानामप्रतिषेधः अनर्थकः प्रतिषेधोऽप्रतिषेधः । घुसंज्ञा कस्मान्न भवति ? अर्थवद्ग्रहणात् । अर्थवतोर्दाधोर्ग्रहणम् । न चैतावर्थवन्तौ । अनुपसर्गाद्वा । अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञा भवन्ति । न चैतौ दाधौ प्रति क्रियायोगः । यद्येवम्, इहापि तर्हि न प्राप्नोति प्रणिदापयति, प्रणिधापयति । अत्रापि नैतौ दाधावर्थवन्तौ, नाप्येतौ दाधौ प्रति क्रियायोगः ।

'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते, यथाऽन्यत्र । न वा एष दोषः । किं कारणम् ? अर्थवत आगमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते, यथान्यत्र । तद्यथा अन्यत्रापि अर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते । क्वान्यत्र ? लविता चिकीर्षितेति' इत्यनेन महाभाष्यवाक्यकदम्बेन यस्य प्रयोगस्योपपत्तये चिन्ता कृता स एवं कथं निषेध्यः स्यात् ?

परिभाषायां पर्याप्तिविचारः

तत्र 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्यस्याः परिभाषायाः सत्ता तु तदैव मन्तव्या भवति यदा मतमिदं व्यवस्थितं भवेत्, यद् परिभाषेयमावश्यकी । तत्तु महाभाष्योपक्रमदर्शनेन मतं मन्तव्यमेव । प्रणिदापयतीत्यादौ घुत्वाभावाशङ्कापरिभाषास्वरूपस्वीकारपूर्वकतत्परिहारदर्शनेन परिभाषाया नितान्तमावश्यकता सिध्यति । तत्रैव 'सीयुडविशेषितः स्यात्' इति भाष्यीयं वचःप्रामाण्यमुपोद्बलयति । फलान्यपि बहूनि संवादसमुपस्थापने सहकारित्वं भजन्ते । किन्तु यदा मतमिदं प्रामाणिकं यत् 'न चैका सिकता तैलदाने असमर्था इति सैकतात् तैलप्रत्याशा' इति वाक्यार्थकमहाभाष्यवचनेन 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति न्यायप्रवेशादागमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वमिति मतेऽपि केवलस्यागमिनो दाप्रभृतेरर्थवत्त्वमक्षतमिति घुत्वं णत्वप्रयोजकं सिद्धमेव किमर्थमेका परिभाषाऽनेकपदघटिता मन्तव्या। 'मात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति हि शास्त्रीयं वचः । तस्मिन्निति महति वचसि विद्यमानेऽपि किमर्थमिदं मन्तव्या ? एतस्याः परिभाषायाः प्रयोजनानि यानि लक्ष्याणि प्रयोगसिद्धिरूपाणि तानि तु 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति न्यायेन भाष्यमूलकेन सिद्धानि ।

यदि च—'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति नियमो नाङ्गीक्रियते, यतो हि तदङ्गीकारे महाभाष्यकृत् कृतोऽन्यत्रत्यनियमो व्याहतः स्यात्। 'कृत्तद्धितसमासाश्च[१]' इति सूत्रे समासग्रहणस्य नियमार्थत्वमङ्गीकृतं महाभाष्ये। तत्र हि—'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्[२]' इति सूत्रेण समासस्थलेऽपि प्रातिपदिकसंज्ञायां सिद्धायां सत्यां पुनः समासस्य प्रातिपदिकत्वमारभ्यते, तद्धि 'सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति' इति रीत्या नियमार्थं भवति समासग्रहणम्। यदि हि सार्वत्रिको नियमः स्यात् 'न ह्यवयवाप्राप्तस्य समुदाये पर्याप्तिरस्ति 'इति' तर्हि तत्रापि समासग्रहणं कथमपि नियमार्थं न स्यात्, यतो हि तत्र समासग्रहणं कया रीत्या नियमार्थं भवतीति विचारे पद्धतिरियमेवाश्रियते तस्य नियमत्वोपपत्तये यद् 'राजन् ङस् पुरुष सु' इत्यस्य प्रत्ययभिन्नत्वात् प्रत्ययान्तभिन्नत्वाद्धातुभिन्नत्वादर्थवत्त्वाच्च पूर्वसूत्रेणैव प्रातिपदिकत्वे सिद्धे पुनः समासग्रहणं तत्प्रातिपदिकत्वाय गृहीतं नियमाय भवति यत् 'पूर्वोत्तरपदघटितसमुदायस्यप्रातिपदिकत्वं चेत्तर्हि समासस्यैव' तेन वाक्यस्य न वैयाकरणमते वाक्येऽपि शक्तिस्वीकारात्। वाक्यस्फोटस्यैव मुख्यतयार्थवत्त्वात्। वाक्यस्फोटस्यैव मुख्यत्वात्। किं बहुना, चतुर्विधेषु प्रत्यक्षानुमानोपमानशब्दरूपेषु प्रमाणेषु शब्दरूपं प्रमाणं वाक्यमेव वैयाकरणमते।

अत एव 'वचोऽशब्दसंज्ञायाम्[३]' इति सूत्रं सङ्गच्छते। अनेन हि सूत्रेण वच्धातोर्ण्यतिशब्दस्य संज्ञा यदा न तदा कुत्वं न भवतीत्यर्थः। अर्थात् शब्दस्य संज्ञायान्तु कुत्वं भवत्येव। इत्थञ्च सूत्रप्रामाण्याद् मुख्यं शब्दत्वं वाक्यस्यैव, पदस्य वर्णस्य च गौणं शब्दत्वम्। अत एव शब्दप्रमाणस्य लक्षणकरणे—'यस्य वाक्यस्य तात्पर्यविषयीभूतः संसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्[४]' इति वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेण लक्षितम्। इत्थञ्च वाक्यस्य शक्तत्वं वैयाकरणानामन्येषाञ्च दार्शनिकानां मान्यमेव। तथा च समासग्रहणनियमेन वाक्यस्य प्राप्ता प्रातिपदिकसंज्ञा व्यावर्त्यते। एतेन वाक्यस्य अर्थवत्त्वाभावादेव प्रातिपदिकत्वाप्रसक्तौ तद्वारणाय नियमोऽनुचितो निष्फलश्चेति परास्तम्, वाक्यस्यार्थवत्त्वे प्रमाणदर्शनात्।

प्रकृतमनुसरामः—यदि हि 'नह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति नियमो मान्यो भवेत्तदा यथा 'दाप्' इत्यस्यार्थवत्त्वप्रतिपादनाय केवलस्यागमिनो दा इत्यस्य नियमबलेनार्थवत्त्वं तथैव 'राजन् ङस्' इत्यस्य प्रत्ययान्तत्वात् 'पुरुष सु' इत्यस्य च प्रत्ययान्तत्वात् तदारब्धत्वात् 'राजन् ङस् पुरुष सु' इत्यस्यापि प्रत्ययान्ततदादित्वात् प्रत्ययान्तभिन्नत्वरूपस्य विशेषणस्याभावेन 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'

१. पा० सू०—१।२।४६।
२. तत्रैव—१।२।४५।
३. पा० सू०—७।३।६७।
४. वेदान्तपरिभाषा—आगमप्रकरणे।

इति सूत्रीयोद्देश्यतावच्छेदकस्य विरहात् सूत्राणाञ्च स्वीयोद्देश्यतावच्छेदकावच्छेदेन प्रवृत्तेरत्राप्रसक्तेः कथं सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति इति नियमादत्र सिद्धत्वाभावाद् न स्याद् नियमः। नियमश्च भाष्यकारेण स्वीकृतः। तथा च समासग्रहणमूलकनियमपरभाष्यप्रामाण्यात् 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति वाक्यं न प्रामाणिकमिति कल्प्यते तदा 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति परिभाषासिद्धिः। यदि च तन्न्यायोऽङ्गीक्रियते तर्हि परिभाषा व्यर्था किन्तु भाष्यविरोधः। भाष्यविरोधश्चानुचित इति कृत्वा यदागमपरिभाषा 'फलमुखगौरवस्यादोषत्वात्' इत्यभियुक्तोक्तेर्मन्तव्या स न्यायो न मान्यः इत्येव स्वीक्रियते, तर्हि महानर्थः। तथाहि 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति न्यायो यदि नाङ्गीक्रियते, तर्हि–'जग्मतुः, जघ्नतुः, चख्नतुः' इत्यादौ दोषापत्तिः स्यात्। तथाहि –'द्विर्वचनेऽचि[1]' इति सूत्रे बहुषु पक्षेषु मध्ये निमित्तसप्तम्यर्थपक्षे द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये इति भवति पर्यवसितोऽर्थः सूत्रस्य। तथा च सति 'जग्मतुः, जघ्नतुः, चख्नतुः' इत्यादौ 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति न्यायानङ्गीकारे वज्रलेपायते दोषः। यतो हि 'गम् हन् खन्' इत्यादिभ्यो धातुभ्यो द्विर्वचने लिटः स्थाने समागतेऽतुसि 'गमहनजनखनघसां लोपः क्ङित्यनङि'[2] इति सूत्रेण पूर्वमेवोपधाभूतस्याकारस्य लोपेनाभ्यासेऽकारो न श्रूयते। तत्र 'द्विर्वचनेऽचि' इति सूत्रन्तु द्वित्वात्प्राग् लोपं निषेद्धुं न प्रभवेत्। तस्य पर्याप्त्या यत्राचि द्वित्वनिमित्तता तत्रैव प्रवृत्त्या 'चक्रे, जग्ले' इत्यादौ चारितार्थ्यात्।

'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यत्र तु अजादौ क्ङिति 'अतुसि' इत्यत्रैव पर्याप्त्या द्वित्वनिमित्ततायाः सत्त्वेन केवलेऽचि तदभावाद् 'द्विर्वचनेऽचि' इति सूत्राप्रवृत्त्याऽभ्यासेऽकारश्रवणाभावात् प्रामाणिकरूपासिद्धिप्रसङ्गादप्रामाणिकविकृतरूपसिद्ध्यापत्तेश्च। यदा च 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति नियमः स्वीक्रियते तर्हि न दोषलेशोऽपि, यतो हि—'अतुसि' पर्याप्ततया विद्यमानस्य द्वित्वनिमित्तत्वस्य तदवयवे अकारेऽपि विद्यमानत्वेन पर्याप्ततया द्वित्वनिमित्तत्वविशिष्टाजव्यवहितपूर्वत्वविशिष्टगमादिधात्ववयवीभूताकारस्य लोपस्य द्वित्वात् पूर्वं निषेधाय प्रवर्तेत एव सूत्रमिदं 'द्विर्वचनेऽचि' इति।

एवञ्च सर्वतोभावेन क्रियमाणे विचारे यदि 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' इति न्यायस्याश्रयणं क्रियते, तर्हि परिभाषैषा 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति नाङ्गीकर्तव्या भवति। यदि च परिभाषारक्षणाय नियमोऽयं न मन्यते, तर्हि 'जग्मतुः, चख्नतुः, जघ्नतुः' इत्यादिप्रयोगाणां सिद्धिरेव न स्यात्। तथा चोभयतः पाशारज्जुरिति दोषस्य गले पतिते सति कोऽत्रोपायोऽनुसर्त्तव्यो

१. पा० सू०—१।१।५९।

२. तत्रैव—६।४।९८।

येन समासग्रहणपरभाष्यविरोधोऽपि न स्यात्, प्रयोगा अपि सिध्येयुः। महाभाष्यकृता भगवता पतञ्जलिना स्वीकृता परिभाषापि एषा—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति। यस्याः स्वरूपं परिभाषेन्दुशेखरे इत्थं दत्तम्—'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति सापि रक्षिता भवेदिति स्थितौ यथाबुद्धि, यथासम्प्रदायम् यथागुरूपदेशं निबन्धे अत्रोपायः प्रदर्श्यते सुधीधनानां चेतसः प्रसादाय कल्पते चेत्तर्हि मम सौभाग्यम्, नो चेत्तथापि तेषां यानि समाधानानि भवेयुस्तेऽपि समक्षं परिस्फुरेयुरिति धिया प्रयत्यते मया समन्वयाय।

तत्र 'कृतद्धितसमासाश्च' (पा० सू० १।२।४६) इति सूत्रघटकसमासग्रहणनियमपरभाष्यात् 'न ह्यवयवापर्याप्तस्य समुदाये पर्याप्तिरस्ति' न्यायो न सार्वत्रिक इति कल्पनेन दोषाभावः। जग्मतुः, 'जघ्नतुः' चख्नतुः, इत्यादिप्रयोगेषु दूषणानि यानि प्रोक्तानि तानि नापतन्ति न्यायाङ्गीकारे, यतो हि—'गमहनजनखनघसां लोपः क्ङित्यनङि[1]' इति सूत्रे सामानाधिकरण्येनान्वयो न कर्तव्यः। किन्तु घटकत्वं सप्तम्यर्थ इति स्वीक्रियते। तथा च क्ङितिघटकाजव्यवहितत्वविशिष्टानामेषां धातूनामुपधाभूतस्य लोप इत्यर्थस्वीकारेण पर्याप्तिसम्बन्धेनैवाचिन्निमित्तता द्वित्वनिरूपिता समागता, किमर्थं भाष्यविरुद्धं परिभाषाखण्डनाय प्रयासक्लेशः कर्तव्यः।

न च सम्भवति सामानाधिकरण्ये वैयधिकरण्यं न युज्यते इति वाच्यम्, फलबलकल्पनस्यैव शरणत्वात्क्वचिद् वैयधिकरण्येनान्वयेऽपि दोषाभावात्। शास्त्रे बहुत्र तथा दृष्टत्वाच्च। यथा हि नियमोऽयं वर्तते यद् 'येन यस्याक्षेपस्तत्रैव तस्यान्वयः' इति। तथापि 'एङ्ह्रस्वात् सम्बुद्धेः[2]' इति सूत्रे सम्बुद्ध्याक्षिप्तस्य अङ्गस्य सम्बुद्ध्यान्वयं परित्यज्यान्यत्रैवान्वयं विधाय फलसाधनं क्रियते, तथैव प्रकृते सामानाधिकरण्येनान्वयाङ्गीकारे कार्यसिद्धौ महाभाष्यकृता स्वीकृताया अनेकफलिकाया यदागमपरिभाषायाः परिरक्षणाय वैय्यधिकरण्येनान्वयाङ्गीकारेऽपि न कोऽपि दोष इति विभावनीयम्। श्रीमता भट्टोजिदीक्षितेन विदुषा वैयाकरणसिद्धान्तकौमुद्यां प्रोक्तम्—'सम्बुद्ध्याक्षिप्तस्याङ्गस्यैङ्ह्रस्वाभ्यां विशेषणान्नेह हेकतरत् कुलेति[3]' इति। तेन फलबलात् क्वचिद् वैयधिकरण्येनान्वयवोऽङ्गीकर्तव्य इति प्रकृते आयातम्। इत्थञ्च 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति परिभाषा निर्दुष्टा, अगतार्था च सिद्धा।

ननु यत्र सूत्रे 'दाधाघ्वदाप्' इत्यत्र 'प्रणिदापयति, प्रणिधापयति इत्यादिप्रयोगसाधनाय भगवता महाभाष्यकृता परिभाषैषा 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति पठिता, फलानि चास्या उद्गीतानि तत्रैव महाभाष्यतत्त्वविदः

---

१. पा० सू०—६।४।९८।

२. तत्रैव—६।१।६९।

३. वैयाकरणसिद्धान्तकौमुदी—अजन्तपुलिङ्गप्रकरणे 'एङ्ह्रस्वात् सम्बुद्धेः' इति सूत्रे।

कैयटाख्यस्य विदुषो व्याख्यामालोकयामो यदा तदा परिभाषेयं कथमपि न स्वीकार्या भवति। यैर्यैरुपायैरियं गतार्थत्वाय विचारिता कथञ्चिच्च परिरक्षिता, तथापि तत्रत्यकैयटोक्तेर्दर्शनेन सयुक्तिवचनत्वात्कैयटोक्तेर्व्याकरणशास्त्रानुसारिणाऽन्यत्रत्यफलोपपादकतया अवश्यमङ्गीकर्तव्यत्वेन निर्धारितेन न्यायेन सर्वेषामस्याः परिभाषायाः फलानामुपपत्तौ किमर्थं परिभाषेयं स्वीकार्या ? तथाहि तत्रैव कैयटेन प्रतिपादितं यत् पुकः पूर्वमेव दाधातोर्धाधातोश्च कृतायां घुसंज्ञायां तत उत्पन्नः पुग्रूप आगमो न कथमप्यनुपपन्न इति। एवञ्च यदितयैवान्तरङ्गपरिभाषया अस्याः परिभाषायाः प्रयोजनं सिद्धम् तर्हि किमर्थमियं परिभाषा स्वीकार्या[1] इति प्रश्नस्तदवस्थ एव। तत्र हि कैयटेन यदुक्तं तदत्र प्रदर्श्यते, तथाहि–'इहाप्यन्तरङ्गत्वात् कृतायां दाधोर्घुसंज्ञायां पश्चादुत्पन्नः पुगागमो घुव्यपदेशं न निवर्तयति, नाप्यर्थवत्त्वमित्यदोषः'[1] इति। एवञ्च महाभाष्यतत्त्वविदः कैयटाख्यस्य विदुष उक्त्या परिभाषेयं न मन्तव्येति प्रतिभातीति पूर्वपक्षः।

सिद्धान्तः

यद्यपि कैयटोक्तिदर्शनेनापाततस्तत इदमेव प्रतिभाति यदन्तरङ्गपरिभाषा सहकारेण प्रणिदापयति-प्रणिधापयतीत्यादिप्रयोगाणां सिद्धौ सत्यां किमर्थं निष्फला अनेकपदघटिता परिभाषा—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्येषा स्वीकार्या ? यदा 'मात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः[2]' इत्येषा पद्धतिर्जागर्ति। तथापि तत्र यत्तात्पर्यं कैयटस्य तत्र दृष्टिर्यदा दीयते, तदा भ्रमोऽयं मूलत एव व्यपगतो भवति, नहि आपाततः प्रतीतस्यार्थस्य प्रामाणिकत्वम्, न वा आपाततो जायमानस्य ज्ञानस्य प्रामाण्यम् किन्तु सम्यक्तया प्रतीतस्याबाधितस्य च। अत एव परिभाषेन्दुशेखरे परिभाषैषावतीर्णा—'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्'[3] इति। एतदर्थज्ञापनार्थमेव व्याकरणशास्त्रस्य मूलभूतचतुर्दशसूत्रघटकसूत्रे णकारद्वयपाठः सार्थकः। तत्र किं तात्पर्यं कैयटवचनस्येति चेदत्रेदमवधार्यं सावधानतया। तत्रायमभिप्रायः कैयटस्य यद् यदा पुगागमं विधातुम् 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ'[4] इति सूत्रं प्रवर्तते 'दा' इत्यस्य 'धा' इत्यस्य चार्थवत्त्वमपेक्षितमेव, यतो हि आदन्तधातुत्वेन रूपेण तस्य ग्रहणाद् भवति पुगागमः, धातुसंज्ञा च क्रियावाचकस्यैव। एवमेव 'दा' इत्यस्य 'धा' इत्यस्य च 'दाधाघ्वदाप्' इति सूत्रेण घुसंज्ञा विधेया। तत्र सत्यपि पुकि पुग्विशिष्टे घुत्वस्यार्थवत्त्वस्य च विद्यमानत्वेन सर्वथाऽनर्थकत्वं नास्त्येव। घुत्वमपि पुग्विशिष्टेऽक्षतमेवेति कृत्वा न विरोधः।

---

१. 'दाधाघ्वदाप्' इति सूत्रे कैयटकृते प्रदीपे।

२. परिभाषेन्दुशेखरे तृतीयतन्त्रे परिभाषा १३३।

३. परिभाषेन्दुशेखरे प्रथमपरिभाषा।

४. पा० सू० ७।३।३६।

अत एवोद्द्योते नागेशभट्टेन—'घुव्यपदेशं न निवर्तयति नाप्यर्थवत्त्वम्' इति कैयटवाक्यस्य व्याख्यानावसरे—'स्वविशिष्टे तयोरानयनादिति भावः' इति प्रोक्तम्। अतो न कैयटवाक्येन कथमपि परिभाषाया अस्या वैयर्थ्यं प्रतिपादयितुं शक्यम्।

९. 'अनुपसर्जनात्' इत्येष योगः प्रत्याख्यायते

इदं वचनम् 'सर्वादीनि सर्वनामानि'[1] इति सूत्रे महाभाष्ये विद्यते। वचनस्यास्यावतारः कथं कृतो भगवता महाभाष्यकृतेति विचारे तत्रत्यप्रसङ्गः संक्षेपतया विषयावधारणोपयोगितया प्रदर्श्यते। तथाहि तत्र 'सर्वादीनि सर्वनामानि' इति सूत्रे बहुविचारावतरणप्रसङ्गे पक्षप्रतिपक्षोपस्थापनोत्तरमयमपि पक्षो भगवता प्रचालितो यत्—'संज्ञोपसर्जनप्रतिषेधः' इति। अर्थात् संज्ञोपसर्जनीभूतानां सर्वादीनां प्रतिषेधः वक्तव्यः। सर्वो नाम कश्चित् 'तस्मै सर्वाय देहि, अतिसर्वाय देहि' इत्यादिमूले एव महाभाष्ये। तत्र संज्ञोपसर्जनप्रतिषेधप्रकारो विशेषेणाविशेषेण चोपपाद्य पुनर्विशेषेणेति पूर्ववादिना फलोपबृंहणेनोपपादितम्। 'सर्वाद्यानन्तर्यकार्यार्थम्' 'प्रयोजनं डतरादीनामद्ड्भावे इत्यादिविधौ च' इत्यादिवचनकदम्बैः। ततः सिद्धान्तमुखेन सर्वनामसंज्ञाविधायकसूत्रस्य दोषवारणाय पूर्वपक्षप्रसङ्गे वक्तव्यत्वेनाक्षिप्तानाम्– 'संज्ञोपसर्जनप्रतिषेधः' इत्यादिवचनानां क्रमेण निराकरणमकारि। तत्रेत्थं क्रमः—'संज्ञाप्रतिषेधस्तावन्न कर्तव्यः' उपरिष्टाद् योगविभागः करिष्यते—'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्' ततः असंज्ञायाम्' इति। 'सर्वादीनि' इत्येवं यान्यनुक्रान्तानि असंज्ञायां तानि द्रष्टव्यानि इति।[2]

ततश्चोपसर्जनप्रतिषेधवचनकरणप्रतिषेधमाह—'उपसर्जनप्रतिषेधश्च न कर्तव्यः' इति। अस्मिन् हि महाभाष्यवाक्ये चकारोऽप्यर्थो द्रष्टव्यः। अर्थात् संज्ञाप्रतिषेधो न वक्तव्यः उपसर्जनप्रतिषेधोऽपि न वक्तव्य इत्यर्थः। तथा चोक्तं छायाकृता श्रीवैद्यनाथपायगुण्डेमहोदयेन छायायाम्–'चोऽप्यर्थे' इति। तथा च नहि प्रतिज्ञामात्रेण वस्तुसिद्धिरुपायस्तत्र वक्तव्य इत्युक्त्या संज्ञाप्रतिषेधनिराकरणप्रकारोपायमिवोपसर्जनप्रतिषेधनिराकरणोपायो द्रष्टव्यः। नहि केवलेन 'उपसर्जनप्रतिषेधो न वक्तव्यः' इत्येवंरूपेण कृतेन प्रतिज्ञामात्रेण निराकरणं सेत्स्यति, किन्तु समाधानवचनविन्यासेन तस्य सिद्धिरिति हृदि निधाय भगवता महाभाष्यकृता उपसर्जनप्रतिषेधवचनरचनामन्तरेणैव तन्निराकरणोपायः प्रदर्शितः– 'अनुपसर्जनात्'—इत्येष योगः प्रत्याख्यायते' इति।

साम्प्रतं विचारणीयमनुसन्धेयञ्चेदं वर्तते यद् विचारस्तु सर्वनामसंज्ञायां विद्यते। तर्हि यथा संज्ञाभूतानां शब्दानां सर्वनामत्वं तत्प्रयुक्तकार्यञ्च न भवेदेतदर्थमापाततो वचनरचनामात्रोपायमेव शरणं मन्वानेन 'संज्ञोपसर्जनप्रतिषेधः' इत्यादिना

१. पा० सू० १।१।२७।

२. महाभाष्ये—सर्वादीनि सर्वनामानि १।१।२७।

वचनमेव वक्तव्यमित्युक्तम् । तस्य निराकरणं भगवता सर्वनामसंज्ञाप्रकरणस्थैरेव सूत्रैरन्यथान्यथायोगविभागेन कृतम् । उपसर्जनप्रतिषेधवचनमन्तरेणैवोपसर्जनीभूतानां शब्दानां सर्वनामत्वं निराकृतं भविष्यतीति मत्वा प्रवृत्तौ महाभाष्यकारो महाशब्दविद् प्रकरणज्ञश्च कस्मात् कारणादप्रकरणस्थं योगं प्रत्याख्याय उपसर्जनीभूतानां शब्दानां सर्वनामसंज्ञां प्रसक्तां वारयितुमुपक्रान्तः । 'अनुपसर्जनात्'[1] इति हि सूत्रं चतुर्थाध्याये वर्तते । तस्य च सूत्रस्य विशेषणमात्रोपस्थापनेन 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्-ठक्ठञ्कञ्क्वरपः'[2] इत्यादिसूत्रैः सहैकवाक्यतासंपादनेन स्त्रीप्रत्ययस्थलेऽनुपसर्जनीभूत-शब्दानामेव ग्रहणम्, न तूपसर्जनीभूतानाम् । अत एव भट्टोजिदीक्षितेन वैयाकरण-सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे 'टिड्ढाणञ्' इत्यादिसूत्रे 'उपसर्जनत्वान्नेह–बहुकुरु-चरा' इति प्रत्युदाहृतम् । इत्थञ्च भवत्येव महाकुतूहलं हृदि यद् प्रथमाध्यायस्थस्य 'सर्वादीनि सर्वनामानि' इति सूत्रस्य विचारप्रसङ्गे यदिदं सूत्रमुपसर्जने मा प्रवर्ततां को हि स्यादत्रोपायो येन साध्वनुशासने व्याकरणशास्त्रे कथमपि साधुशब्दशासने न स्यात् कश्चिदपि विघ्नस्तत्र स्वतन्त्रस्य वचनस्य निराकरणोपायस्य प्रतिभातस्य 'उपसर्जनप्रतिषेधः कर्तव्यः' इत्येवंरूपस्य निराकरणं विधाय प्रसक्तां सर्वनामसंज्ञां निवारयितुमुद्यतो भगवान् महाभाष्यकारो ब्रवीति 'उपसर्जनात्—इत्येष योगः प्रत्याख्यायते' इति ।

स्त्रीप्रत्ययविधायकसूत्रैकवाक्यतापन्नस्य तस्य सूत्रस्य चतुर्थाध्याये पठितस्य निराकरणेन उपर्जनस्थले सम्प्राप्ता सर्वनामसंज्ञा कथं निराकृता स्यादित्येको दोषः । अपरश्च—यदि स योगः प्रत्याख्यायते, तर्हि 'अनुपसर्जनीभूतशब्दमात्रोद्देश्यकाः स्त्रीप्रत्यया उपसर्जनीभूतेभ्योऽपि शब्देभ्यः स्युरित्येतस्य दोषस्य कथं वारणम् ? यदि हि सूत्रमिदं न स्यात् प्रत्याख्यातमेव भवेन्निष्फलत्वञ्चास्य, तर्हि महाभाष्यतत्त्वविदा महावैयाकरणेन भट्टोजिदीक्षितेन कथमभ्यधायि स्त्रीप्रकरणे वैयाकरणसिद्धान्त-कौमुद्याम्—'उपसर्जनत्वान्नेह—बहुकुरुचरा' इति । एवञ्च 'उपसर्जनात्—इत्येषयोगः प्रत्याख्यायते' इति महाभाष्यवचनस्य कोऽभिप्रायः ? कथञ्चान्यत्रत्यप्रकरणस्थस्य तस्य सूत्रस्य निराकरणेन सर्वनामसंज्ञाप्रकरणे प्राप्तस्योपसर्जनसंज्ञास्थलीयसर्वनामत्व-दोषस्य निराकरणमिति विचारणीयम् ।

ननु यदि स्यात् 'उपसर्जनात्' इत्येष योग आवश्यकस्तर्हि कौमुद्यामेव भट्टोजिदीक्षितेन कथं प्रतिपादितं स्यादित्थम्–'अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति' इति । तेन प्रतिभाति नास्त्येवायं योग इति चेन्न, तस्या उक्तेरन्याभिप्रायकत्वात् । तत्र हि स्त्रीप्रत्यये दीक्षितेन यदुक्तं तस्याऽन्योऽभिप्रायः । अस्ति किल व्याकरणे सूत्रमिदम्

---

१. पाणिनिसूत्रम् —४।१।१४ ।

२. पाणिनिसूत्रम्—४।१।१५ ।

'येन विधिस्तदन्तस्य'[1] इति। तस्य सर्वत्र प्रसक्तिर्मा भवेदेतदर्थं वचनमिदं वर्तते 'समासप्रत्ययविधौ प्रतिषेधः' इति। एवञ्च तेन तदन्तविधिप्रतिषेधवचनेन स्त्रीप्रत्ययस्यापि प्रत्ययत्वात् 'समासप्रत्ययविधौ तदन्तग्रहणं नास्ति' इति वचनेनैव तदन्तविधित्वाभावादप्रसक्तः प्रत्ययः। इत्थञ्च 'बहुकुरुचरा' इत्यादिस्थलेषु दोषाभावात् 'उपसर्जनात्' इत्यस्य सूत्रस्य वैयर्थ्याद् व्यर्थं सत्तत्सूत्रं ज्ञापयति–'स्त्रीप्रत्ययेषु तदन्तविधिर्भवति इति। तस्य ज्ञापनस्य फलञ्च 'वनोरच'[2] इति सूत्रे वन्नन्तान्तलाभः। अतस्तत्र तु तत्फलोपपत्तये ज्ञापनायावश्यकः स योगः। नहि तेन कौमुदीस्थेन प्रकारेण महाभाष्यस्थप्रकरणस्य साम्यम् येन तत्रत्यग्रन्थमात्रप्रदर्शनेन उपायाभासेन भाष्यसङ्गतिः कथमपि कर्तुं शक्या।

एवञ्च प्रश्नोऽयं तत्रैव वर्तते यत् तस्य 'अनुपसर्जनात्' इत्यस्य सूत्रस्य प्रत्याख्यानेन सर्वनामसंज्ञाया उपसर्जनस्थले प्राप्तायाः कथं निराकरणमिति।

अत्र समाधानम्—यद्यपि महाभाष्यवचसः आपाततो विरुद्धो वा असङ्गतो वा प्रतीयतेऽत्रार्थः। यतो हि प्रथमाध्यायस्य प्रथमपादे सर्वनामसंज्ञासूत्रम्। तत्र च प्रचलतिप्रसङ्गेऽकस्मात् चतुर्थाध्यायस्थस्य 'अनुपसर्जनात्' इति सूत्रस्य प्रत्याख्यानेन कथमुपसर्जनस्थलीयप्रसक्तसर्वनामसंज्ञाया निषेध इति जायते कुतूहलं मनसि। किन्तु भाष्योक्तेरस्या गम्भीरे विचारे कृते सति प्रतीयमानस्य विरोधस्याप्रसङ्गस्य वा निरासः सुशकः। तथाहि–यद्यपि 'अनुपसर्जनात्'[3] इति सूत्रं प्रथमाध्याये प्रथमपादे पठितस्य 'सर्वादीनि सर्वनामानि'[4] इति सूत्रस्य प्रकरणे नास्ति, तथापि जानन्ति सर्वे व्याकरणतत्त्वविदो यत् षड्विधानि सूत्राणि भवन्ति, संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदात्। तथा चोक्तम्—

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥ इति।

तेषु षड्विधेषु सूत्रेषु 'अनुपसर्जनात्' इति सूत्रं परिभाषासूत्रमङ्गीकृत्य भगवता महाभाष्यकृता पतञ्जलिना तत्प्रत्याख्यानेन सर्वनामसंज्ञाया उपसर्जनस्थले प्राप्ताया वारणं भवति। अत एव उद्योते नागेशभट्टेन विदुषा—'स्त्रीप्रत्ययप्रकरणस्थमपि सूत्रं तत्रानुपयुज्यमानं कार्यान्तरार्थं परिभाषारूपं ज्ञातव्यमिति भावः' इति प्रोक्तम्।

अयं भावः—'अनुपसर्जनात्' इति सूत्रस्य प्रत्याख्यानेन यदा महाभाष्यकारः प्रथमाध्यायस्थस्य सर्वनामसंज्ञाविधायकस्य संज्ञोपसर्जनीभूतार्थवाचकशब्दानां सर्वनामत्वाभावं साधयितुं प्रवृतः, तदा तस्य सूत्रस्य परिभाषारूपत्वाङ्गीकारादन्यःकश्चनोपायो न विद्यते, येन स्वतन्त्रं किञ्चिद् वचनमकृत्वापि उपसर्जनस्य सर्वनामत्वं व्यपगतं

---

१. पा० सू०—१।१।७२।

२. पा० सू०—४।१।७।

३. अष्टाध्यायी ४।१।१४।

४. ,, १।१।२७।

भवेत्। परिभाषारूपत्वे तु सर्वेष्टसिद्धिः, परिभाषायाः सम्पूर्णाष्टाध्यायीस्थानि सूत्राण्यभिसम्बद्धुं समर्थत्वात्। अनियमे नियमकारित्वमेव परिभाषात्वम्। इत्थञ्च यदपूर्वं विधेयं कार्यं तदनुपसर्जनस्यैव भविष्यति। इत्थञ्च सर्वनामसंज्ञास्थलेऽपि तत्सूत्रस्याभिसम्बन्धादुपसर्जनस्थलीयसंज्ञायाः स्वयमेव वारितत्वात् स्वतन्त्रं वचनं न कर्तव्यंभवति।

ननु यदि 'अनुपसर्जनात्' इति सूत्रस्य परिभाषारूपत्वमङ्गीक्रियते, नाधिकारसूत्रत्वम्,तथा चतुर्थाध्यायस्थसूत्रैरेवाभिसम्बन्धप्रसङ्गात् प्रथमाध्याये सम्बन्धासम्भवेन तद्बलात् सर्वनामसंज्ञावारणपरभाष्यासङ्गत्यापत्तेः। वैयाकरणसिद्धान्तकौमुद्यां तु स्वीकृतमधिकारसूत्रत्वमेवास्य, किन्तु तत्तु सर्वनामसंज्ञापरभाष्यमनभिध्यायैव। अधिकारत्वं हि नाम स्वदेशे साक्षाल्लक्ष्यसाधकसाधुत्वप्रकारकबोधाजनकत्वे सति लक्ष्यधर्मिकसाधुत्वप्रकारकबोधोपयोगिबोधजनकसाक्षाल्लक्ष्यसाधकविधिशास्त्रैः सहैकवाक्यत्वम्। तच्च प्रकृतभाष्यावलोकनेन स्वीकर्तुं नैव शक्यते। किन्तु परिभाषासूत्रत्वमेवाङ्गीकर्तुं शक्यते। तथा सति सर्वत्रैवाष्टाध्याय्ययां तस्य सूत्रस्य प्रसरात् सर्वनामसंज्ञाया अपि अनुपसर्जनस्थले एव प्रवृत्तेरुपसर्जनस्थले तस्या अप्रवृत्तये स्वतन्त्रस्य वचनस्य रचनाया अनावश्यकत्वात्।

यत्तु वैयाकरणसिद्धान्तकौमुद्यां प्रोक्तं श्रीभट्टोजिदीक्षितैः—'अनुपसर्जनात्—'अधिकारोऽयम्[1] यूनस्तिरित्यभिव्याप्य' इति। तत्तु 'अनुपसर्जनात्—इत्येष योगः प्रत्याख्यायते' इति महाभाष्यवचनमनभिध्यायैव। अत्र यथा व्यवस्थया महाभाष्यवचसोऽस्योपपत्तिः क्रियते तत्र महान् विरोधः प्रतिभाति। तथाहि यदि 'अनुपसर्जनात्' इत्येष योगः परिभाषारूपेण मन्यते तस्य च सर्वत्र प्रसरोऽङ्गीक्रियते, तर्हि 'अनुपसर्जनात्' इति सूत्रं परिभाषासूत्ररूपेण स्वीकर्त्तव्यम्, न तु प्रत्याख्येयम्। महाभाष्ये तु भगवता महाभाष्यकृता नेदं सूत्रमङ्गीकृतम्, किन्तु खण्डितम्।—'उपसर्जनप्रतिषेधो न कर्त्तव्यः। उपसर्जनादित्येष योगः प्रत्याख्यायते'[2] इत्येव प्रतिपादितम्। इत्थञ्च विरोधः समापतति। तथाहि—उपसर्जनस्थले सर्वनामसंज्ञाया अप्रवृत्तये प्रवृत्तो महाभाष्यकारो यदि सूत्रं तत्स्वीकृत्य परिभाषारूपत्वञ्च तस्य मत्वा सामञ्जस्यं विदध्यात्, तदा तु न विरोधः मार्गस्य च ऋजता भवेत्। तथा न कृतम् किन्तु योग एव प्रत्याख्यातः। तथा च तत्सूत्रप्रत्याख्यानेन परिभाषारूपस्यापि सूत्रस्यासत्त्वात् सर्वनामसंज्ञां निरोद्धुमुपसर्जनस्थलीयां को नु प्रभवेत्। तथा चोपसर्जनस्थले सर्वनामसंज्ञावारणाय वचनमारब्धव्यमेव भवेदिति महान् विरोधः समापतति यत् सर्वनामसंज्ञाया उपसर्जनस्थले प्रवृत्तिर्मा भवतु, महाभाष्यकारस्य यत्नोऽयं सूत्रप्रत्याख्यानरूपो नानुकूलः, प्रत्युत प्रतिकूलतामेव गत इति चेत्। अत्रायं समाधिः—नायं

---

१. वैयाकरणसिद्धान्तकौमुदी स्त्रीप्रत्ययप्रकरणे

२. महाभाष्ये—'सर्वादीनि सर्वनामानि' १।१।२७ इत्यत्र पृ० ३२४ सशब्दकौस्तुभे।

प्रतिकूलोयत्नो महाभाष्यकृतो यतो हि तस्यान्यतात्पर्यम् । किमिति चेत्तर्हि विशेषोऽयमत्र द्रष्टव्यः–'अनुपसर्जनात्' इति सूत्रमधिकारसूत्रत्वेन प्रणीतमिति वैयाकरणानां सम्प्रदायः। अत एव वैयाकरणसिद्धान्तकौमुदीग्रन्थे भट्टोजिदीक्षितैरभ्यधायि 'अधिकारोऽयम्, यूनस्तिरित्यभिव्याप्य' इति । एवञ्चाधिकारत्वमात्रमस्य खण्डितं भगवता महाभाष्यकारेण, न तु सूत्रमेव खण्डितम् । न चाधिकारत्वमात्रनिषेधे तात्पर्यं यदि महाभाष्यस्येति निर्धार्यते तर्हि 'अनुपसर्जनात्' इति परिभाषासूत्रं मन्यते एवान्यथोपसर्जनस्थलीयप्रसक्तसर्वनामसंज्ञानिषेधाय स्वतन्त्रवचनारम्भस्यावश्यकर्तव्यत्वापत्तेः ।

एवञ्च यदा परिभाषासूत्ररूपेण सूत्रमिदं स्वीकृतं यद्बलेन सर्वनामसंज्ञाया उपसर्जनस्थले न प्रवृत्तिः, तर्हि महाभाष्यग्रन्थविरोधः । तथाहि—तत्र हि महाभाष्ये प्रथमत उपसर्जनस्थले सर्वनामसंज्ञानिषेधाय वचनारम्भनिषेधो न कर्तव्य इति प्रतिज्ञाय तस्य फलस्य कथमुपपत्तिरिति मनसि निधाय सूत्रस्यान्यथैव व्याख्यानं कृतम् । तथाहि– 'उपसर्जनप्रतिषेधश्च न कर्तव्यः । अनुपसर्जनादित्येष योगः प्रत्याख्यायते तमेवमभिसंभन्त्स्यामः अनुपसर्जन-अ-अदिति । किमिदम्-अ-अदिति ? अकारात्कारौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ'[1] इति। यदि हि सम्पूर्णायामष्टाध्याय्यां परिभाषारूपेणानुपसर्जनादिति सूत्रस्य प्रभावं मन्येत महाभाष्यकारस्तर्हि सूत्रस्यान्यथा व्याख्यानमेव कुतो विदध्यात् ? विदधाति च इत्यतो निश्चिनुमो वयं यन्नेदं सूत्रं परिभाषारूपेण मतम् । न मतं चेत्तर्हि कथमुपसर्जनस्थलीयायाः प्रसक्तायाः सर्वनामसंज्ञाया विना स्वतन्त्रवचनं वारणम् ? अधिकारसूत्रत्वे हि सर्वादिगणेऽप्रसरान्नोपसर्जनव्यावृत्तिसम्भवः, परिभाषारूपत्वे तु कुत्रापि कस्मिंश्चिदपि कार्ये विधेये विधायकसूत्रेषु अस्याः परिभाषाया उपस्थितेरावश्यकत्वादुपसर्जनस्थले प्रसक्तायाः सर्वनामसंज्ञाया वारणं सुशकमेव, सर्वनामसंज्ञाविधायकस्थलेऽस्या उपस्थित्या उपसर्जनानुपसर्जनयोर्विरोधादुद्देश्यतावच्छेदकावच्छेदेन सूत्रस्य प्रवृत्तेरसति बाधकेऽवश्यंभावादुपसर्जनस्थले न सर्वनामत्वप्रसङ्गः । अयमेवासीद् ऋजुः पन्थाः। अनयैव प्रक्रियया महाभाष्यव्याख्याने तत्रत्यस्य प्रसङ्गस्य नैर्मल्यमालोकितं भवति। किन्तु महाभाष्यकारेण कृतं व्याख्यानं कमपि पन्थानमाश्रयितुं न करोति स्वतन्त्रम् । तस्य प्रत्याख्यानस्य केवलमधिकारसूत्रत्वखण्डनतात्पर्यरूपेण निर्णयायापि वयं समर्थाः, यतो हि सूत्रप्रत्याख्यानं प्रतिज्ञाय यदि महाभाष्यकारोऽग्रे न ब्रूयात्, तर्हि फलदर्शनेनार्थादुपसर्जनीयस्थलीयसर्वनामसंज्ञानिषेधरूपफलप्रत्याशया तस्य महाभाष्यवचनस्याधिकारसूत्रत्वमात्रनिषेधे तात्पर्यमुपवर्णयितुमपि शक्यते। किन्तु तथा नास्ति प्रख्यानं प्रतिज्ञाय पुनस्तस्य सूत्रस्य स्वतन्त्रं किमपि व्याख्यानं सन्देहे एव निमज्जयति। किमभिप्रैति महाभाष्यकारो यदत्रोपसर्जनस्थलीयप्रसक्तसर्वनामसंज्ञावारणाय स्वतन्त्रं वचनमपि नाङ्गीकरोति 'अनुपसर्जनात्' इति सूत्रं यथान्यासं परिभाषारूपं मत्वापि न प्रचलति ।

---

१. महाभाष्यम्—'सर्वादीनि सर्वनामानि'—१।१।२६ ।

अपरञ्च–'अ अत्' इति व्याख्यानेन अष्टाध्यायीमध्ये क्वापि विधीयमानो द्वावपि अकारात्कारौ भवतां नामोपसर्जनस्य तेन कथङ्कारमुपसर्जनस्थलीयाया: प्रसक्ताया: सर्वनामसंज्ञाया निरास इति नूनं कस्यापि भवेन्मनसि कुतूहलमिति वाच्यम्, महाभाष्यतात्पर्यावधारणे सर्वदोषनिरासात् । तथाहि–प्रथमतो महाभाष्ये उपसर्जनस्थले अतिसर्वायेत्यादौ प्रसक्तां सर्वनामसंज्ञां वारयितुं कर्तव्यत्वेन प्रसक्तं वचनान्तरं वारयितुं महाभाष्यकारोऽस्य 'अनुपसर्जनात्' इति सूत्रस्य प्रत्याख्यानमकरोत् । तेन च न किमपि सिद्धं समीहितमतो यावदनुपपन्नं तावत्सर्वं कल्प्यमिति न्यायादस्य भाष्यस्याधिकारसूत्रत्वमात्रखण्डने तात्पर्यमुपवर्ण्यते महाभाष्यतत्त्वविद्भि: । एवञ्च 'अनुपसर्जनात्' इति सूत्रमधिकारसूत्रं न, किन्तु परिभाषासूत्रत्वमापन्नम् । तेन च परिभाषारूपतामापन्नेन सूत्रेण सर्वत्राष्टाध्यायीस्थलेषु विधिसूत्रेषु प्रवृत्त्या सर्वनामसंज्ञाविधायकसूत्रेऽपि प्रवृत्तेरुपसर्जनस्थले अतिसर्वायेत्यादावपि सर्वनामसंज्ञाया अप्रवृत्त्या तत्रत्याय स्वतन्त्रं वचनं नारब्धव्यमिति । किन्तु तत्रैव यदि महाभाष्यकारस्य यत्नो विरत: स्यात्, तर्हि समीचीनं भवेत् । तथा तु नास्त्येव मत्वापि परिभाषासूत्रत्वमस्य पुनरपि विशेषरुपेण व्याख्यानं सन्देहसन्दोहमान्दोलयति ।

तत्र किञ्चिद् ब्रवीमि—सूत्रमिदं यदि केवलं परिभाषारूपमेव मत्वा विना व्याख्यानं निवर्तेत महाभाष्यकारस्तर्हि प्रसक्ताया सर्वनामसंज्ञाया: विनापि स्वतन्त्रं वचनं वारणं भवेदतिसर्वायेत्यत्र । किन्तु तथाङ्गीकारे परिभाषासूत्रस्यास्य सर्वत्रैव प्रसरात् 'त्रेस्त्रय:'[1] इति सूत्रेऽपि प्रवृत्त्या प्रियत्रयाणामित्यादिप्रयोगाणां सिद्धिर्न स्यात् । यतो हि त्रयाणामित्यादिप्रयोगेषु अनुपसर्जनस्थले चरितार्थं तत् सूत्रं प्रियत्रयाणामित्यत्र त्रयादेशार्थं न प्रवर्तेत । तथा 'उपायं चिन्तयन् धीमानपायमपि चिन्तयेद्' इति न्यायेन प्रथमत: परिभाषारूपतामस्य मत्वा अधिकारसूत्रत्वञ्च निराकृत्य प्रवृत्तौ महाभाष्यकार: सूत्रस्य व्याख्यानं कृतवान् । येन तादृशस्थले एव सूत्रस्यास्य प्रवृत्तिर्भवतु । अत एव तदनन्तरमकारात्कारस्थले यद्यस्यानुपसर्जनादिति परिभाषासूत्रस्य प्रवृत्ति:, तर्हि—'यथैवमतियुष्मदस्मदिति न सिध्यति इति शङ्का तत्समाधानञ्च सङ्गच्छतेतराम् । अतोऽत्र न तत्रासूया कर्तव्या यत्रानुगम: क्रियते' इति न्यायेन महाभाष्यवचसि न कश्चन दोष: ।

ननु प्रियत्रयाणामित्यत्र 'त्रेस्त्रय:' इति सूत्रप्रवृत्तये यथान्यासं यथावदर्थवच्चेदं सूत्रं न स्वीक्रियते। किन्तु भाष्यदर्शनेन विपरिवर्तितं भवति सूत्रमिदम् 'अनुपसर्जनात्'[2] इति । तथापि न कार्यसिद्धि:, यतो हि प्रियत्रयाणामित्यादौ 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय:'[3] इति परिभाषाबलेन 'त्रेस्त्रय:' इति सूत्रस्याप्रवृत्त्या रूपासिद्धिस्तदवस्थेति

---

१. अष्टाध्यायी ७।१।५३ ।

२. पाणिनिसूत्रम्—४।१।१४ ।

३. परिभाषेन्दुशेखरे प्रथमतन्त्रे—परिभाषा १५ ।

हेतोरनुपसर्जनादिति परिभाषासूत्रं विना विशेषव्याख्यानं यथावदेव सर्वत्र विधिसूत्रेषु सम्बध्नातु इति चेन्न, 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इत्यस्याः परिभाषायाः पदकार्यमात्रविषयकत्वस्य फलबलेन परिभाषेन्दुप्रभृतिग्रन्थेषु निर्णीतत्वात् तत्राप्रवृत्तेः। तथा च यदि 'अनुपसर्जनात्' इति सूत्रं यथान्यासं यथा श्रुतार्थकमेव प्रवर्तेत, तर्हि प्रियत्रयाणामित्यादिप्रयोगाणामसिद्धिरापतेदिति कृत्वा तस्य व्याख्यानं कृतमिति वेदितव्यम्।

ननु क्रियतामस्य सूत्रस्य यथाकथञ्चिदपि व्याख्यानम्, किन्तु तथापि दोषस्तु तदवस्थ एव। नहि व्याख्यानेनानेन 'अतिसर्वाय' इत्यादिस्थले सर्वनामसंज्ञाप्रसक्ता न भवत्येव। तद्वारणार्थं स्वतन्त्रम् 'संज्ञोपसर्जनीभूतास्तु न सर्वादयः' इत्येवंरूपेण वचनं कर्तव्यमेव। अन्यथा तत्राकारात्कारयोर्विधीयमानत्वाभावात् कथं सर्वनामसंज्ञानिषेधः? निषेधाभावे च स्वतन्त्रनिषेधकवचनमन्तरा कोऽभ्युपायो भवेद्वारणाय। अवारणे च प्रतिज्ञाभङ्गान्निग्रहस्थानग्रस्तत्वात् कथं प्रामाण्यमिति चेत्, अत्रेदं तत्त्वम्—अतिसर्वायेत्यादौ दोषस्तु पक्षेऽस्मिन् गृहीतेऽपि तिष्ठत्येव। परिभाषारूपत्वं वा भवेदधिकारसूत्रत्वं वा उभयत्रापि तत्र दोषसद्भावात् तत्रत्यदोषवारणाय तु महती सर्वनामसंज्ञैव कल्पते। तत्र च सर्वेषां वाचकत्वाभावान्न सर्वनामसंज्ञा। कथं तर्हि महाभाष्यकारेण पक्षोऽयं परिभाषास्वीकाररूपोऽङ्गीकृत इति चेत्, तर्हि—बुद्धिवैशद्यसम्पादनायेति ग्रहीतव्यम्। उपायस्योपायान्तरादूषकत्वन्यायो यद्यपि प्रकृते न क्रमते, तस्यातिसर्वायेत्यादौ दोषवारणे एव प्रसरात्। किन्तु बुद्धिवैशद्यसम्पादनाय गृहीतोऽयं पन्था इति स्वीकारे न कापि क्षतिः। तथा चोक्तं कैयटेन—'अति सर्वायेत्यादौ त्वविशेषकार्यपरिहृतमेव'[1] इति। तत्रैव महाभाष्ये कृतभूरिपरिश्रमेण श्रीनागेशभट्टेन विदुषा व्याख्यातमपि—'अपरिहृतमेवेति—एवञ्चैतदपरितोषाद्भाष्ये पक्षान्तरमिति भाव इति केचित्'[2] इति। ततश्च—'परे तु इदं समाधानं सर्वाद्यानन्तर्यकार्यार्थं प्रतिषेधो वक्तव्य इत्यस्यैवार्थस्य'[3] इत्यादि।

श्रीमन्तो महाभाष्यतत्त्वविदः शब्दकौस्तुभकृतो भट्टोजिदीक्षिता अपि शब्दकौस्तुभे तथैव सिद्धान्तं महाभाष्यस्य व्यवस्थापितवन्तः। तत्र हि प्रकृतसूत्रस्य 'सर्वादीनि सर्वनामानि' इत्यस्य व्याख्याने महाभाष्यरीतिमनुसृत्य तस्य महाभाष्यस्याभिप्रेतं तत्त्वं प्रकटीकृत्य 'अनुपसर्जनात्' इति सूत्रस्य प्रत्याख्यानं तेन च कथं कार्यसिद्धिः, अथवा प्रयोजनसिद्धिः केन प्रकारेणेति सम्यगुपपादितम्। यथा च तत्र ग्रन्थस्तथा प्रदर्श्यते आञ्जस्येन तत्त्वनिर्णयहेतुत्त्वात्। तथाहि—'पूर्वपरावरेति गणसूत्रेऽसंज्ञायामिति योगं विभज्य पूर्वोत्तरयोः शेषो व्याख्येयः। उक्ताः सर्वादयोवक्ष्यमाणाः स्वादय-

---

१. महाभाष्ये 'सर्वादीनि' सूत्रे कैयटे कौस्तुभयुते—पृ० ३२५।

२. म० भा० 'सर्वादीनि' सूत्रे कैयटे कौस्तुभयुते उद्द्योते ३२५ पृष्ठे।

३. " " " " " " "।

श्चासंज्ञायाम् इति। तस्मादुपसर्जनव्यावृत्तिरेवान्वर्थसंज्ञाश्रयणस्य मुख्यं फलम्। नन्वनुपसर्जनादिति योगं प्रकारान्तरेण व्याख्याय तद्बलेनैवान्तर्गणकार्यं वारितं भाष्ये। तद्यथा—अनुपसर्जनेति लुप्तषष्ठीकं पदम्। अः आदिति चच्छेदः। अश्च अच्च तयोः समाहारः आत्। अकारात्कारौ अ अत् इत्यादेशौ यत्र क्रियेते तत्रानुपसर्जनस्य ग्रहणमिति परिभाषार्थः। तेन त्यदाद्यत्वमद्डतरादिभ्य इत्यद्ड्भावश्च गौणतायां न भवति। अकारात्परत्वेन विशेषणं किम्? पञ्चम्या अत्। युष्मानतिक्रान्तेभ्योऽतियुष्मत्। एकवचनस्य च युष्मानतिक्रान्तानतियुष्मत्। न ह्ययमकारात्परो विधीयत इति। तथा चोपसर्जनव्यावृत्तेरन्यथासिद्धौ किं महासंज्ञयेति चेन्न, अतिसर्वायेत्यादिवारणस्य तदेक साध्यत्वात्। न हीदमनुपसर्जनादित्यनेन साधयितुं शक्यते। एतदपरितोषादेव हि भाष्ये पक्षान्तराश्रयणमिति दिक्।

एवञ्चानुपसर्जनादिति सूत्रं परिभाषात्वेनापि नोपयुज्यत इत्यर्थात् प्रत्याख्यानमेव भवतीत्यवधेयम्।

इत्थञ्च सर्वतोभावेन महाभाष्यग्रन्थपर्यालोचनेन इदमेव निर्णीतं भवति यत् 'उपसर्जनप्रतिषेधो न कर्तव्यः। अनुपसर्जनादित्येष योगः प्रत्याख्यायते' इति हि वचांसि भगवतो महाभाष्यकारस्यानेकव्युत्पत्तिसम्पादकानि कानिचित् फलानि साधयितुमक्षमाण्यपि बुद्धिवैशद्यसम्पादनाय समर्थानि समर्थनीयानीति।

ननु भवतु नाम 'अनुपसर्जनात्' इत्यस्य सूत्रस्य प्रत्याख्यानमेव। उपसर्जनस्थले अतिसर्वायेत्यादौ वार्यतां च कामं सर्वनामसंज्ञा अन्वर्थत्वमाश्रित्य। अन्ततोगत्वा सूत्रस्यास्य फलानि यानि वैयाकरणसम्प्रदाये प्रसिद्धानि तानि कथं साधयेयुः। यथाहि वैयाकरणसिद्धान्तकौमुदीग्रन्थे भट्टोजिदीक्षितैः—'अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति'[1] इति ज्ञापनं कृतम्। फलञ्च तस्य ज्ञापनस्यातिधीवरीप्रभृतिप्रयोगसिद्धिरित्युच्यते। तथा च तस्य फलकदम्बस्य कथं सिद्धिरिति प्रश्नस्तु तदवस्थ एवेति चेत्, अत्राभिधीयते—अस्य प्रश्नस्य यत्समाधानं तत्र कैयटेन तदनन्तरं नागेशभट्टेन च सम्यगभिहितम्, किन्तु ततोऽपि सम्यक्तया क्रमबद्धरीतिमनुसरता यावदपेक्षितपक्षविपक्षोपस्थापनपूर्वकं विचारितं शब्दकौस्तुभे तथाऽन्यत्र नास्ति। अतोऽत्रविषये शब्दकौस्तुभोक्तिमत्र संयोज्य प्रकृतविषयं परिपूर्य अन्यस्थले विचारो विधास्यते। तथाहि—'स्यादेतत्–कौम्भकारेयसिद्धये सूत्रमारम्भणीयम्, तत्र हि 'कुम्भकारी' शब्दादेव ढगुत्पादयितव्यः। अन्यथा कुम्भेत्युकारस्य वृद्धिर्न स्यात्। तथा च विशिष्टस्य स्त्रीप्रत्ययान्तताप्येष्टव्या। सा च तदेव निर्वहति यदि टिड्ढाणञिति सूत्रे प्रत्ययग्रहणपरिभाषयाऽणित्यनेन अणन्तग्रहणे तेन च प्रातिपदिकविशेषणादणन्तान्तं प्रकृतिः स्यात्। तच्च 'समासप्रत्ययविधौ प्रतिषेधः' इति 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति प्रतषेधाद् दुर्लभम्। अनुपसर्जनादित्युपसर्जनप्रतिषेधसामर्थ्यात्तु प्रधानेन तदन्तविधौ

१. वैयाकरणसिद्धान्तकौमुदी—स्त्रीप्रत्ययप्रकरणे।

ज्ञापिते कौम्भकारेयः सिध्यतीति स्पष्टमेव । न च 'कृद्ग्रहणे गतिकारकपूर्वस्यापि' इति परिभाषया कुम्भकारशब्दादेव स्त्रीप्रत्ययोऽस्त्विति वाच्यम्, अणिति हि तद्धितोऽपि गृह्यते । औपगवीति यथा । कृद्ग्रहणपरिभाषा तु कृन्मात्रग्रहणे प्रवर्तते, न तु कृदकृद्ग्रहणेऽपि । एवमर्थमेवेदं सूत्रमिति भाष्यकृतैव चतुर्थे स्थापयिष्यते । तत्कथमिहोक्तमनुपसर्जनादित्ययं योगः प्रत्याख्यायत[1] इति ।

अत्रोच्यते—चतुर्थे सूत्रकाराभिप्रायवर्णनमात्रं करिष्यते । निष्कर्षे तु क्रियमाणे सूत्रवैयर्थ्यमेवायातीत्याशयेनेह भगवतोक्तं प्रत्याख्यायत इति । तथाहि—कारशब्दान्ङीबुत्पत्तावपि कौम्भकारेयः सिध्यत्येव, 'ष्यङः सम्प्रसारणमित्यत्र भाष्यकृता पठिष्यमाणया वाचनिक्या 'स्त्रीप्रत्यये चानुपसर्जनेति परिभाषया अनुपसर्जने स्त्रीप्रत्यये तदादिनियमनिषेधेन कुम्भकारीशब्दाड्ढगनुत्पत्तेः । अत एव हि परमकारीषगन्धीपुत्र इत्यत्र ष्यङन्तस्योच्यमानं सम्प्रसारणं परमकारीषगन्ध्याशब्दस्यापि भवत्येव । न चैवमतिकारीषगन्ध्यापुत्र इत्यादावतिप्रसङ्गः, अनुपसर्जन इत्युक्तत्वेनोपसर्जने तदादिनियमसत्त्वात् । न चैवमर्धपिप्पलीत्यादौ हलङ्यादिलोपो न स्यादिति वाच्यम्, हलङ्यादिसूत्रे दीर्घग्रहणसामर्थ्येन तत्रोपसर्जनेनापि तदादिनियमो नास्तीति ज्ञापितत्वात् । वस्तुतस्तु–निष्कौशाम्ब्यादौ समुदायस्याङ्याबन्तत्वेऽप्यवयवस्य ङ्याबन्ततया ततः परस्य सोर्लोपप्राप्तेर्नैतज्ज्ञापकम् । अर्धपिप्पल्यादावप्यवयवस्य ङ्यन्ततयैव निर्वाहः । न च विहितविशेषणता वक्तुं शक्या, या सेत्यादावव्याप्तेः । न च हलन्ताद्विहितत्वेन निर्वाहः, कर्ता हर्तेत्यादावलोपापत्तेः, यः स इत्यादौ लोपापत्तेश्च । यद्वा–सुतिसीतिप्रत्ययैः प्रकृतिराक्षिप्यते । हलन्त्यसूत्रे कैयटग्रन्थनिर्वाहाय विवरणे तथैव वर्णनात् । एवञ्च ज्ञापकं सुस्थम्, एकदेशस्याप्रकृतित्वात् । अत एव पञ्चमसमाप्तौ 'गोस्त्रियोरुपसर्जनस्य'[2] इति सूत्रे कैयटेन ज्ञापकत्वपक्ष एवोक्तः । ननूभयथापि मालादृष्टेत्यादौ समुदायादाबन्तत्वप्रयुक्तः सुः स्यात् ततश्चैकपद्यैकस्वर्ययोरापत्तिः । एकवाक्यतया विधिरिति पक्षेऽपि पचतिकल्पमित्यादिसिद्धये एकवचनमुत्सर्गइत्यस्यावश्याश्रयणीयत्वादिति चेन्न, ङ्याबग्रहणस्यान्यार्थतया यथाकथञ्चित् प्रातिपदिकग्रहणे लिङ्गविशिष्टग्रहणेन ङ्याबन्तत्वात्सुबुत्पत्तेश्च वक्ष्यमाणत्वात् । इह च समुदायस्याप्रातिपदिकत्वात् । अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति हि स्थास्यति । न चैवमपि कदाचित् कारीशब्दाड्ढक् स्यादेवेति वाच्यम्, एकाज्द्विर्वचनन्यायेन समुदायादेवोत्पत्तेः । कुम्भेनैकार्थीभूतस्य निष्कृष्यापत्येन योग इति वक्तुमशक्यत्वाच्च । किञ्च सूत्रमारभमाणस्याप्येषैव गतिः । औपगवीत्यादाविव केवलात्कारशब्दादपि कदाचिन्ङीष्प्रसङ्गेन कुम्भकारेयेति पाक्षिकदोषस्य त्वन्मतेऽपि तुल्यत्वात् ।

---

१. पा० सू० १।१।२७ शब्दकौस्तुभे पृ० १५ ।

२. अष्टाध्यायी—१।२।४८ ।

स्यादेतत्—अक्रियमाणेऽस्मिन् सूत्रे कुम्भकारीशब्दान्ङीवेव न स्यात्। कुम्भेनैकार्थीभूतस्याणन्तस्य स्त्रीत्वेनायोगात्। यस्य च स्त्रीत्वेन योगो विशिष्टस्य, न तदणन्तम्। तस्मादमहत्पूर्वादिति निषेधेन ज्ञाप्यमानस्तदन्तविधिरुत्तरत्राप्यभ्युपगन्तव्यः। स च यथा पूर्वत्रोपसर्जनेनापि भवति। 'न 'षट्स्वस्रादिभ्यः''[1] इति प्रियपञ्चा द्रौपदी—'वनोरच'[2] इति अतिधीवरीति तथा टिदादावपि स्यात्। तथा च बहुकुरुचरेत्यादावतिप्रसङ्गः। अतो निषेधसूत्रमिदं सार्थकम्।

ननु पूर्वत्रोपात्तं तदन्तञ्च स्त्रियामित्यनेन विशेष्यते, टिड्ढाणञित्यादौ तूपात्तं टिदादिकमेव, तेन बहुकुरुचरेत्यादौ टिदादेरस्त्रीत्वान्न ङीप्। कुम्भकारीत्यादौ त्वणन्तस्य स्त्रियां वृत्तेस्तदन्तादपि ङीप् भविष्यतीति चेन्न, एतद्विषयविभागस्य दुरूहतया तज्ज्ञानार्थमेव सूत्रारम्भस्योचितत्वात्। नैतदेवम्, आरब्धेऽप्यस्मिन् सूत्रे व्याख्यानस्यैव शरणीयत्वात्[3]। अन्यथा पञ्चाजीत्यत्राजानामस्त्रीत्वेऽपि तदन्तस्य स्त्रियां वृत्त्या टाप्प्रसङ्गात्। अतो विशेषणविशेष्यभावं प्रति कामचारादजाद्यतष्टाबित्यत्र टिड्ढाणञित्यादौ[4] चोपात्तं स्त्रीत्वेन विशेष्यते, वनोरचेत्यादौ[5] तूपात्तं तदन्ते चेति सकलेष्टसिद्धेः सूत्रं व्यर्थमेव।

स्यादेतत्—तदन्तविधिज्ञापनार्थमेवेदं सूत्रमारम्भणीयम्। न चामहत्पूर्वेत्यनेनैव तत्सिद्धिरिति वाच्यम्, तस्य ज्ञापकत्वायोगात्। पञ्चाजीत्यादिसिद्ध्यर्थमजादिभिः स्त्रीत्वं विशेष्यते इति हि वक्ष्यते। तथा च महाशूद्रीत्यत्र समुदायस्य स्त्रियां वृत्तावपि अवयवस्यातथात्वेन सत्यपि तदन्तविधौ टाप् न प्राप्नोतीति कथं तदन्तविधिं ज्ञापयित्वा निषेधः पर्यवस्येत्।

मैवम्, इतरैरजादिभिः स्त्रीत्वविशेषणेऽपि शूद्रशब्देनाविशेषणात्। एवञ्च स्पष्टमेव ज्ञापकपर्यवसानम्। न चैवं पञ्चशूद्रीत्यत्रापि प्रसङ्गः, जातिरित्यनेन शूद्रस्य विशेषणात्। स्यादेतत्–पूर्वसूत्रनिर्देशो वापि आपिशलमधीत इतीति कात्यायनोक्तरीत्या सूत्रं सार्थकम्। तथाहि–अप्रधानमुपसर्जनम्। तथैव पूर्वाचार्यसूत्रेषु लोके व्यवहारात्। ततश्चापिशलिना प्रोक्तम्—इञश्चेत्यण्। ततोऽध्येत्र्यां तदधीत इत्यण्। तस्य 'प्रोक्ताल्लुक्'[6] इति लुगिति—आपिशला ब्राह्मणी। अत्र प्रोक्तार्थस्याणोऽप्रधान-

१. पा० सू०—४.१।१०।

२ तत्रैव—४।१।७।

३. अत एव वैयाकरणैः परिभाषेषा प्रमाणत्वेन स्वीकृता—'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति।

४. पा० सू०—१।१।१५।

५. तत्रैव—४।१।७।

६. ,,—४।२।६४।

त्वात्तदन्तान्न ङीप्। अण् यः अः अनुपसर्जनमप्रधानमिति विशेषणात्। न चैवमप्यध्येत्र्यामुत्पन्नस्याणोऽनुपसर्जनतया तदाश्रयो ङीप् स्यादेवेति वाच्यम्, तस्य लुप्तत्वात्। न च प्रत्ययलक्षणं[1] शक्यम्, वर्णाश्रये तन्निषेधात्'[2]। टिड्ढाणञित्यत्र ह्यत इत्यनुवर्तते, अणा चाकारो विशेष्यते। अणोऽकार इति। न तु विपरीतो विशेषणविशेष्यभावः। वर्णस्याप्राधान्ये प्रत्ययलक्षणापत्तेः। अतृणेडित्यत्र तृणह् इम्वत्।

ननु स्त्रियामित्यनेनाणो विशेषणान्नोक्तदोष इति चेन्न, काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी, तामधीते काशकृत्स्ना ब्राह्मणी। अत्र द्वितीयेऽणि प्रोक्ताल्लुगिति लुप्ते प्रथमोऽप्यण् स्त्रियामेवोत्पन्न इति तदन्ताद् ब्राह्मण्यां वर्तमानान् ङीप् स्यात्। तस्मात् प्रधानाद् यथा स्यादप्रधानान्मा भूदित्येतदर्थमारम्भणीयं सूत्रमिति अत्रोच्यते-अध्येत्र्यामभिधेयायामण ईकारेण भवितव्यम्। यश्चेहाध्येत्र्यामणुत्पन्न स लुप्त एव, यश्च श्रूयते तस्मादीकार उत्पन्नो लुप्तश्चेति पुनर्न भवति, सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्। तस्मादनुपसर्जनादित्ययं योगः प्रत्याख्यायत इति भगवदुक्तिर्निबाधैवेति दिक्'[3] इति।

यद्यपि चतुर्थाध्याये—'अनुपसर्जनात्'[4] इति सूत्रमधिकृत्य कृतो भगवता महाभाष्यकृता महान् विचारः, किन्तु सोऽपि प्रकृतार्थे एव दार्ढ्यमाकलयतीति बोध्यम्। शब्दकौस्तुभोक्तप्राञ्जलविचारदर्शनेन सर्वापि शङ्का सर्वथैव विनाशिता भवतीति नात्र संशयलेशोऽपि।

१०. इति करणोऽर्थनिर्देशार्थः

'इति करणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति' इति। वाक्यमिदं महाभाष्ये 'न वेति विभाषा'[5] इति सूत्रे प्रयुक्तम्। अस्य महाभाष्यवचसोऽवतरणमित्थं विज्ञेयम्। तत्रहि 'न वेति विभाषा' इति सूत्रे शङ्केयं जाता यत्-'स्वं रूपं शब्दस्याशब्दसंज्ञा'[6] इति सूत्रप्रामाण्यात्--विभाषा दिक्समासे बहुव्रीहौ', विभाषाश्वेः' इत्यादौ 'नवा' शब्दयोरादेशत्वापत्तिः स्यात्। तामापत्तिं वारयितुं सिद्धानुगममात्राय व्याकरणस्य प्रवृत्तेः सूत्रे नवाशब्दयोरर्थस्य संज्ञेति वचनं कार्यमिति। तथा चोक्तम्--'नवेति विभाषायामर्थग्रहणं कर्तव्यम्'[7] इति व्याख्यातमपि तत्रैव भाष्ये--

---

१. प्रत्ययलोपे प्रत्ययलक्षणमित्यनेन वर्णाश्रये नास्ति प्रत्ययलक्षणम्।

२. परिभाषेन्दुशेखरे प्रथमतन्त्रे परिभाषा २१।

३. शब्दकौस्तुभे १।१।२७ सूत्रे।

४. पा० सू०—४।१।१४।

५. पा० सू०—१।१।४४।

६. पा० सू०—१।१।६८।

७. महाभाष्ये—१।१।४४ सूत्रे।

'न वेति विभाषायामर्थस्य संज्ञा कर्तव्या । न वा शब्दस्य योऽर्थस्तस्य संज्ञा भवतीति वक्तव्यम्' इति । अर्थसंज्ञाकरणाय करणीयस्यास्य वचनस्य प्रयोजनमपि तत्र दर्शितम् । तथाहि—'शब्दसंज्ञाया ह्यर्थासंप्रत्ययो यथान्यत्र' इति । ततश्च शब्दयोः संज्ञावारणाय—'न वा शब्दस्य योऽर्थस्तस्य विभाषा संज्ञा भवतीति वक्तव्यस्य वचनस्याकरणेऽपि दोषो वारितोऽनेन वचनेन–इति करणोऽर्थनिर्देशार्थः' इति । इतिकरणः क्रियते सोऽर्थनिर्देशार्थो भविष्यति' । इत्येवं रूपेण भाष्यव्याख्यानेन च स पक्षो मण्डितः । अस्य वचनस्य 'इति करणोऽर्थनिर्देशार्थः' इत्यस्यावतारप्रकारोऽयमेव । 'इतिकरणः क्रियते' इति भाष्यन्तु सामान्यविशेषनिर्देशप्रयुक्तम् । अन्यथा पुनरुक्तिः स्यात् । सामान्यविशेषभावेनान्वये तु नैव पुनरुक्तिर्दूषयिष्यति । पाकं पचति, वचनं वक्ति, पाठं पठति' इत्यादिप्रामाणिकप्रयोगदर्शनात् । साधुत्वन्तु पदस्यास्येत्थं विज्ञेयं क्रियते इति करणः कर्मणि बाहुलकात् ल्युट् । इतिश्चासौ करणश्चेति— 'विशेषणं विशेष्येण बहुलम्'[1] इति सूत्रेण कर्मधारयसमासः । तत्र पूर्वनिपातो विशेषणवाचकस्य करणशब्दस्यैव प्राप्तः, यतोहि—'प्रथमानिर्दिष्टं समास उपसर्जनम्'[2] इति सूत्रेण समासविधायके 'विशेषणं विशेषेण बहुलम्' इति सूत्रे प्रथमा निर्दिष्टं विशेषणवाचकं पदं करणपदम् । तस्यैव—'उपसर्जनं पूर्वम्'[3] इति सूत्रेण पूर्वनिपातः प्राप्तः । किन्तु पूर्वप्रयोगस्यानित्यत्वात्प्रयोगस्यास्य साधुत्वं बोधव्यम् । पूर्वनिपातस्यानित्यत्वञ्च अनेकसूत्रप्रमाणप्रमितमिति बोध्यम् । तथाहि—'लक्षणहेत्वोः क्रियायाः'[4], 'समुद्राभ्राद्घः'[5] इत्यादिसूत्राणि मानानि । यदि हि पूर्वनिपातोऽनित्यो न स्यात्तदा कथं भगवान् पाणिनिः 'अल्पाच्तरम्'[6] इति सूत्रस्याल्पाचः पूर्वप्रयोगविधायकस्य विद्यमानत्वेऽपि प्रदर्शितसूत्रस्थले तथा न कृतवान् । बह्वच्कस्य पूर्वप्रयोग एव पूर्वनिपातस्यानित्यतां ज्ञापयतीति बोध्यम् ।

अत्रेदं बोध्यम्—'न वेति विभाषा'[7] इति सूत्रे उच्चारित इति शब्दः काकाक्षिगोलकन्यायेनोभयत्र न वा शब्देन विभाषाशब्देन च सह सम्बध्यते । स चार्थविपर्यासकृद् भवति । तेन निषेधो विकल्पश्च न वा शब्दार्थः संज्ञी, विभाषाशब्दार्थो विकल्पः संज्ञा । अस्मिन् व्याकरणशास्त्रे संज्ञी क्वचित् शब्दः क्वचिच्चार्थो भवति । यथा—

१. पा० सू०—२।१।५७ ।
२. पा० सू०—१।२।४३ ।
३. पा० सू०—२।२।३० ।
४. पा० सू०—३।२।१२६ ।
५. पा० सू०—४।४।११८ ।
६. पा० सू०—२।२।३४ ।
७. पा० सू०—१।१।४४ ।

अकारस्य एकारस्य ओकारस्य च शब्दस्य गुण इति संज्ञा, 'अदेङ्गुणः'[1] इति सूत्रात्। एवमेव आकारस्य ऐकारस्य ओकारस्य च शब्दस्य वृद्धिरिति संज्ञा, 'वृद्धिरादैच्'[2] इति सूत्रप्रामाण्यात्। अर्थस्य संज्ञित्वं शब्दस्य च संज्ञात्वं यथा—'स्वतन्त्रः कर्ता'[3] इत्यादौ। तत्र हि अर्थ एव संज्ञी शब्द एव संज्ञा। क्रियायां स्वातन्त्र्येण विवक्षितस्यार्थस्य कर्ता संज्ञा तेन क्रियते। अतस्तत्रार्थस्य संज्ञित्वं कर्तृशब्दस्य च संज्ञात्वम्। तथा चोक्तं कौमुद्यां भट्टोजिदीक्षितेन—'क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्'[4] इति। यद्यपि शब्दोऽपि क्वचित्कर्तृत्वेन व्यवह्रियते, यथा—गुणपदमदेङं बोधयतीत्यादौ गुणपदस्यैव कर्तृत्वम्, तथापि तत्र पदार्थत्वेन बोधनकर्तृत्वम्, न तु शब्दत्वेनेति विवेक्तव्यम्। इत्थञ्चात्रेदमेवाकूतं यदस्मिन् व्याकरणशास्त्रे शब्दानामर्थानाञ्च संज्ञित्वं, संज्ञात्वन्तु केवलं शब्दानामेवेति। शब्दाः संज्ञा एव भवन्ति। संज्ञिनश्च क्वचित् शब्दाः क्वचिच्चार्था इति।

किन्तु तत्रैव व्याकरणशास्त्रे इदमेव सूत्रमेकमीदृशं दृश्यते यत्र विपरीतं दृश्यते, यतो हि अत्र अर्थस्यैव संज्ञात्वं संज्ञित्वमपीति। तथा च प्रतिपादितं तत्त्वबोधिन्यां सिद्धान्तकौमुद्या व्याख्यायाम्—'अत्रेदं बोध्यम्—इति शब्दः काकाक्षिन्यायेनोभाभ्यां संबध्यते, स च पदार्थविपर्यासकृत्, तेन निषेधो विकल्पश्च न वा शब्दार्थः संज्ञीति विभाषाशब्दार्थो विकल्पः संज्ञा'[5] इति। ततोऽग्रे-'संज्ञात्वमर्थस्यैव न तु विभाषा शब्दस्येति व्याख्यानस्य' हृकोरन्यतरस्याम्' इत्यादौ वैरूप्योद्धारः फलम्' इति प्रोक्तम्। तेनेदमेव सिद्ध्यति यदत्रार्थस्यैव संज्ञात्वमर्थस्यैव संज्ञित्वमिति। अयमत्र विशेषः—यत्र हि शब्दस्य संज्ञात्वं वर्तते तत्र तच्छब्दश्रवणेन संज्ञिनां प्रत्ययो भवति। यथा—अदेङो गुण इति संज्ञा। एवञ्च यत्र सूत्रे गुणपदं श्रूयते तत्रैवादेङ उपस्थितिर्भवति। यथा—'आद्गुणः' इत्यत्र। किन्तु तथैव यद्यत्रापि 'विभाषा' इति शब्दः संज्ञा स्यात् निषेधविकल्पौ चार्थौ तर्हि विभाषापदमात्रघटिते एव शास्त्रे निषेधविकल्पयोरुपस्थितिः स्यान्न च स्यात् 'हृकोरन्यतरस्याम्'[6], 'जरया जरसन्यतरस्याम्'[7] इत्यादौ। अर्थस्य संज्ञात्वे तु विभाषाशब्दार्थो विकल्पः। तथा च यत्रैव क्वचन विकल्परूपार्थकः शब्दः श्रूयते स च विभाषाशब्दो वा विकल्पशब्दो वा अन्यतरस्यामिति शब्दो वा तत्र सर्वत्रैव निषेधविकल्पयोरर्थयोरुपस्थितिर्जायते, शब्दस्य संज्ञात्वे तु

१. पा० सू०—१।१।२।
२. पा० सू०—१।१।१।
३. पा० सू०—१।४।५४।
४. वैयाकरणसिद्धान्तकौमुदी-कारकप्रकरणे।
५. वैयाकरणसिद्धान्तकौमुदी-संज्ञाप्रकरणे ३२ पृष्ठे।
६. पा० सू०—१।४।५३।
७. पा० सू० ७।२।१०१।

कथमपीयं व्यवस्था न स्यात्। अपरञ्च—यदि विभाषाशब्दस्य संज्ञात्वं भवेत्तर्हि नायमेक एव दोषो यद् यत्र विभाषाशब्दः श्रूयते तत्रैव निषेधविकल्पयोरर्थयोरुपस्थितिः, नान्यत्रेति। किन्तु 'जराया जरसन्यतरस्याम्', 'ह्वक्रोरन्यतरस्याम्' इत्यादौ 'स्वं रूपं शब्दस्याशब्दसंज्ञा'[1] इति सूत्रप्रामाण्यात् तादृशानुपूर्वीविशिष्ट आपन्नः स्यादादेशः। स च महानिष्टः। अत एवार्थस्यैव संज्ञात्वं संज्ञित्वञ्चेति विवेकः। तथा चाह कैयटोऽपि—'तत्र लोके क्रियापदसन्निधाने न वा शब्दयोर्योऽर्थो द्योत्यो विकल्पप्रतिषेधलक्षणः स संज्ञीत्यर्थः। अन्यथा विभाषाप्रदेशेषु न वा शब्दाविवादेशौ स्याताम्'[2] इति। अतः समीहितशब्दसाधुत्वोपपत्तये नवेति सूत्रेऽर्थस्यैव संज्ञात्वं संज्ञित्वञ्चान्यत्रादृष्टचरमप्यङ्गीकृतं भगवता पाणिनिना महाभाष्यकृता च तथैव व्यवस्था कृतेत्यहो कीदृशी शब्दसाधुत्वज्ञानपराकाष्ठा महर्षीणाम्।

अर्थस्यैव संज्ञात्वमर्थस्यैव संज्ञित्वं भवेद् येन समीहितशब्दसाधुत्वोपपत्तिरनिष्टापत्तिश्च न स्यातामेतदर्थं' न वेति विभाषा' इति सूत्रे 'नवेति विभाषायामर्थग्रहणं कर्तव्यम्'[3] इति वचनेन न वा शब्दस्य योऽर्थस्तस्य संज्ञा भवतीति वक्तव्यमित्येवंरूपेण स्वतन्त्रवचनकर्तव्यता पूर्वं प्रतिपादिता। तदनन्तरं—'न वक्तव्यम्'[4] इति प्रतिज्ञावचनं भाष्यकृता प्रयुक्तम्। तत्र हि नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः किन्तु हेतुनेति सर्वलोकसिद्धन्यायमाश्रित्य हेतुदलमपि भगवता प्रयुक्तम्। येन अर्थस्यैव संज्ञात्वव्यवस्थायै स्वतन्त्रवचनाकरणेऽपि न क्षतिः। तदेव वचनमनुसन्धेयस्थलत्वेनात्र गृहीतं यत्र विचार्यते। तदिदम्—'इति करणोऽर्थनिर्देशार्थः' इति। अर्थात् शब्दस्य संज्ञात्वं नात्र किन्तु अर्थस्यैव संज्ञात्वमिति व्यवस्थायै न स्वतन्त्रं वचनमिष्ट्यादिरूपेण रचितव्यं किन्तु तादृशार्थस्य सूत्रेणैवोपलब्धेः व्यर्थोऽत्रान्यः प्रयासः। इममेवाभिप्रायमाकलय्य भगवता महाभाष्यकृता कृतेयं व्यवस्था—'इति करणोऽर्थनिर्देशार्थः' इति। अत्रायं प्रयोगः—

न वा शब्दस्य योऽर्थस्य संज्ञा भवति, इति वचनं, न कार्यम्, अर्थानिर्देशकोच्चारितेति शब्दगतार्थत्वात्' इति। तत्रानुमानप्रयोगे प्रयुक्तस्य हेतुदलस्य स्वरूपासिद्धिर्मा भवेदिति कृत्वा प्रयुक्तं हेतुमुपपादितवान् भगवान् भाष्यकारः शङ्कासमाधानदलाभ्यां भाष्ये। तथाहि—'किं गतमेतदितिना? आहोस्विच्छब्दाधिक्यादर्थाधिक्यम्? गतमित्याह। कुतः? लोकतः[5]।' इति वाक्यार्थोपपादनार्थं प्रयुक्तं 'लोकतः' इति हेतुवचनं शक्तिग्राहकं व्यवहारं स्मारयति। तथा चोक्तमभियुक्तैः—

१. पा० सू०—१।१।६८।

२. न वेति विभाषा इति सूत्रे ३५९ पृष्ठे सशब्दकौस्तुभे भाष्ये।

३. महाभाष्यम्—१।१।४४। सूत्रे।

४. म० भा०—१।१।४४ सूत्रे।

५. म० भा०—'न वेति विभाषा' १।१।४४ इति सूत्रे।

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः ॥ इति

अयं भावः--इति शब्दः शक्त्या (सामर्थ्येन) द्योतकत्वेनेति रूपेणार्थनिर्देशको भविष्यति तदर्थं वार्तिकं स्वतन्त्ररूपेण न पठितव्यमिति तद्वार्तिकतद्भाष्याशयः। हेतुत्वेन प्रयुक्तस्य 'लोकतः' इति शब्दस्य व्याख्यानमपि विषयस्पष्टतायै कृतं महाभाष्यकृता । तथाहि—तद् यथा गौरित्ययमाह इति गोशब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो । याऽसावर्थपदार्थकता तस्याः शब्दपदार्थकः सम्पद्यते । एवमिहापि न वा शब्दादितिकरणः परः प्रयुज्यमानो न वा शब्दं स्वस्मात्पदार्थात्प्रच्यावयति । सोऽसौ स्वस्मात्पदार्थात्प्रच्यावयति । सोऽसौ स्वस्मात्पदार्थात्प्रच्युतो याऽसौ शब्दपदार्थकता तस्या लौकिकमर्थं सम्प्रत्यायति न वेति यद् गम्यते न वेति यत्प्रतीयते[1] इति ।

अयम्भावः—शब्दस्य द्वौ अर्थौ एकः स्वस्वरूपमानुपूर्वीविशिष्टम्, अपरश्च—अर्थक्रियाकारित्वविशिष्टो घटपटादिः । तत्र लोके शब्दस्यार्थप्रत्यायनार्थं प्रयुक्तत्वादितिशब्दप्रयोग आनुपूर्वीविशिष्टं शब्दस्वरूपमेव प्रत्याययति । व्याकरणशास्त्रे तु—'स्वं रूपं शब्दास्याशब्दसंज्ञा'[2] इति सूत्रप्रामाण्यादानुपूर्वीविशिष्टं शब्दस्वरूपं विशेष्यम् । इतिशब्दप्रयोगेण विपर्यासादर्थस्य बोध इति 'इति' शब्दस्यार्थविपर्यासकत्वम् । यद्यपि--'सिद्धे शब्दार्थसम्बन्धे'[3] इति सिद्धान्तादर्थस्य शब्देन सह नित्यसम्बन्धसत्त्वान्न कथञ्चिदपि 'इति' शब्दोऽर्थविपर्यासकृद् भवितुमर्हति । तथा सति शब्दार्थयोर्नित्यसम्बन्धभङ्गप्रसङ्गापत्तेः, तथापि लोकप्रसिद्धविशेष्यरूपार्थातिरिक्तविशेषणीभूतार्थस्य विशेष्यसमर्पकता मात्रमिति पदेन क्रियते न तु शब्दार्थयोः सम्बन्धविच्छेदो येन दोषप्रसक्तिः स्यात् । विशेष्यताप्रकारतयोर्व्यत्यासेऽपि सम्बन्धस्य सत्त्वात् । नहि पर्वतविशेष्यकर्बाह्निप्रकारकानुमितिसत्त्वे, बह्निविशेष्यकपर्वतप्रकारकानुमितिसत्त्वे वा बह्निपर्वतयोः सम्बन्धस्योच्छेदः । न्यायशास्त्रे कस्यचिन्मते—पर्वते धूम इति परामर्शाद्--पर्वते बह्निः, पर्वतो धूमवान् 'इति परामर्शात् पर्वतो बह्निमान्' इति स्वीकारेण साध्यविशेष्यकस्य पक्षविशेष्यकस्य च ज्ञानस्याङ्गीकारः। तथा चोक्तम्--'व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम्, तच्च पक्षे व्याप्य इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा, अनुमितिस्तु पक्षे व्याप्य

१. म० भा०—१।१।४४ सूत्रे ।
२. पा० सू०—१।१।४४ ।
३. वार्त्तिकम् । महाभाष्ये पस्पशाह्निके सशब्दकौस्तुभे ४७ पृष्ठे ।

इति ज्ञानात् पक्षे साध्यमित्याकारिका, पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका'[1] इति।

अत एवेति पदस्यार्थविपर्यासकत्वरूपसामर्थ्यापि न व्यपगमः, इतिशब्दतदर्थयोर्नित्यसम्बन्धस्य रक्षा च भवति। अन्यथार्थविपर्यासकत्वरूपार्थेन सह इति पदस्यानित्यसम्बन्धापत्तिः स्यात्। अत एवेदमवश्यं मन्तव्यं यदितिपदेन क्वचिदर्थविशेष्यकशब्दविशेषणकार्थस्य शब्दविशेष्यकार्थविशेषणाकार्थकत्वानयनम्, क्वचिच्च शब्दविशेष्यकार्थविशेषणकार्थस्यान्यथानयनमेव सम्पाद्यते इति न नित्यसम्बन्धभङ्गप्रसङ्गः। यद्यप्यापाततोऽत्र शङ्केयं जायत एव, तथापि सूक्ष्मेक्षिकया क्रियमाणे विचारे सा व्यपगता भवति। यथा च न नित्यसम्बन्धभङ्गप्रसङ्गस्तथा प्रोक्तं कैयटेन—'यद्यपि नित्ये शब्दार्थसम्बन्धे उपात्तस्यार्थस्य त्यागो नास्ति, तथापि प्रसिद्धिवशादेतदभिधीयते—अर्थपदार्थकतायाः प्रच्युत इति तत्त्वतस्तु आदावेव स्वरूपपदार्थकगोशब्दः प्रयुक्तः, सादृश्यात्तु तमर्थमभिव्यनक्ति' इति शब्दो द्योतयतीति पदार्थविपर्यासकृद्-इतिरुच्यते'[2] इति।

इत्थञ्च विद्यमानमेवार्थं द्योतयन्निति शब्दो न कथञ्चिदपि नित्यसम्बन्धभङ्गाय कल्पते। केवलं लोकप्रसिद्धमर्थविपर्यस्यतीतीयान् विशेषः। अस्तु—इदानीमत्रत्यमत्यन्तनिगूढमिदं तत्त्वमालोचयामहे यत्—'न वेति विभाषा' इति सूत्रे महाभाष्यकृता इति शब्दस्य 'इतिकरणोऽर्थनिर्देशार्थः' इति वचनेनार्थपरकत्वं व्यवस्थापितम्। व्याकरणेशास्त्रे हि या काचन परिभाषा, यः कश्चन नियमोऽङ्गीकृतस्तदनुसारेणैव शब्दसाधुत्वव्यवस्था क्रियते। यथा—'वार्णादाङ्गं बलीयः'[3] इति। 'असिद्धं बहिरङ्गमन्तरङ्गे'[4] इति। तत्र हेतवोऽपि परिदर्शिताः। लोकदृष्टान्तेन शास्त्रीयदृष्टान्तेन च सर्वत्र व्यवस्था कृता विद्यते। आगमिवृत्तिधर्मस्यागमविशिष्टेऽतिदेशाय शब्दसाधुत्वोपदेशाय च प्रवृत्तायाः 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इत्यस्याः परिभाषाया व्याख्यानावसरे लोकदृष्टान्तेन परिभाषार्थः संसाधितः। तत्र हि अङ्गाधिक्ये सत्यपि आगमस्थानीयेनाङ्गाधिक्येन विशिष्टस्य देवदत्तादेर्देवदत्तादिशब्देन ग्रहणं भवति तथैवागमविशिष्टस्यापि तत्तच्छब्दस्यागमिवाचकशब्दजन्यप्रत्ययविषयत्वमङ्गीक्रियते इति। तथा च प्रतिप्रादितं नागेशभट्टेन परिभाषेन्दुशेखरे—'लोकेऽपि देवदत्तस्याङ्गाधिक्ये तद्विशिष्टस्यैव देवदत्तग्रहणेन ग्रहणं दृश्यते'[5] इति। एवञ्च लौकिकवैदिकदृष्टान्तेन समाश्रितैर्नियमैर्व्याकरणशास्त्रे तच्छास्त्रसंपाद्यं शब्दसाधुत्वं

---

१. न्यायसिद्धान्तमुक्तावल्यामनुमानखण्डे दिनकरीयुते २१२ पृष्ठे।

२. कैयटे न वेति विभाषा सूत्रे।

३. परिभाषेन्दुशेखरे परिभाषा ५६।

४. ,, ,, ५१।

५. परिभाषेन्दुशेखरे ११ परिभाषाव्याख्याने।

निर्णीयते। अत एव वैयाकरणैरिदमुद्घुष्यते—'अनियमे नियमकारित्वं परिभाषात्वम्' इति। तत्र च शब्दतत्त्वविद्भिः शिष्टैः महापुरुषैः स्वसामर्थ्यमहिम्ना शास्त्रज्ञानप्रकर्षेण च या व्यवस्था क्रियते तयैव व्यवस्थया लक्षणचक्षुष्कैरस्माभिः शब्दसाधुत्वावगमो-निभाल्यते। तथाहि—

'त्यदादीनामः'[1] इति सूत्रस्य त्यदादित्वावच्छेदेन प्रयोगस्तदेकदेशेषु वेति संशये भगवता महाभाष्यकृता व्यवस्था प्रादायि यत्—'द्विपर्यन्तानामेवेष्टिः' इति। तयैव प्रक्रियया प्रयोगसाधुत्वमस्माभिर्ज्ञायते। एवमेवान्यान्यपि बहूनि सन्ति विस्तर-भिया नेह प्रदर्श्यन्ते।

प्रकृतमनुसरामः—

यथा हि दर्शितेषु स्थलेषु तत्तत्सूत्रवार्तिकभाष्यवचनैः प्रयोगाः साधवः ख्याप्यन्ते मन्यन्ते च तथैवास्माभिः। यथाहि—सुद्ध्युपास्य इत्यादिप्रयोगेषु 'संयोगान्तस्य लोपः'[2] इति सूत्रेण 'हलोऽनन्तराः संयोगः'[3] इति सूत्रानुसारेण संयुक्तेषु संयोगसंज्ञा प्राप्तेषु वर्णेष्वन्तो यकारो लोपतां प्राप्तस्तथापि—'यणः प्रतिषेधो वाच्यः'[4] इति वार्तिकप्रामाण्यान्न तस्य लोपः। इत्थञ्च सूत्रवार्तिकभाष्यवचनबलेनास्माभिः प्रयोगाणां साधुत्वं ज्ञायते व्यवह्रियन्ते च ते प्रयोगाः। ततश्च स्वर्गरूपं फलं प्राप्यते। यस्य स्वर्गादेः साधनाय 'स्वर्गकामो यजेत' इति वेदवाक्येन साधनत्वेना-वगतस्य यागस्यासाधारणकारणत्वम्। यश्च यागो महाव्ययायाससाध्यः। तस्य च स्वर्गस्य सिद्धिः शब्दसाधुत्वज्ञानपूर्वकसाधुशब्दप्रयोगेण भवतीति स्थितिः। अत एव वचनमिदं प्रामाण्यपराकाष्ठामाश्लिष्यति—

'एकः शब्दः सम्यग् ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति माता-पितरौ ह्यस्य मोदेते' इति। तादृशस्य च स्वर्गसाधनत्वेन प्रसिद्धस्य किं बहुना मोक्षसाधनायापि समर्थस्य शब्दसाधुत्वज्ञातस्य सिद्धिः पाणिन्यादिसूत्रतत्रत्यवार्तिक-तद्भाष्यप्रामाण्याद्भवतीति व्याकरणशास्त्रस्य मर्यादा। तथा च प्रतिपादितं परि-भाषेन्दुशेखरे प्रारम्भ एव नागेशभट्टेन—'प्राचीनव्याकरणतन्त्रे वाचनिकानि अत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबद्धानि यानि परिभाषा-रूपाणि तानि व्याख्यायन्ते'[5] इति।

इत्थञ्च यथा तत्र तत्र प्रयोगसाधनाय सूत्रवार्तिकतद्भाष्यादिसामग्रीबलाच्छ-ब्दसाधुत्वावगतिस्तद्बलेन साधुप्रयोगजनितपुण्यार्हत्वञ्च भवति तथैवानेन वचनेनापि

---

१. पा० सू०—७।२।१०२।

२. पा० सू०—८।२।२३।

३. पा० सू०—१।१।७।

४. वार्त्तिकम् ४८०६।

५. परिभाषेन्दुशेखरे प्रारम्भे एव।

या व्यवस्था भाष्यकृता कृता—'इति करणोऽर्थनिर्देशार्थः'[1] इति। अनया च युक्तिगर्भितया व्यवस्थया व्याकरणशास्त्रे यत्र क्वापि श्रुत इति शब्दः स स्यादेवार्थ-निर्णयाय। तथा च युक्तिर्या प्रदर्शिताऽत्र यल्लोके शब्दा अर्थपरा अत इति शब्दप्रयोगेण शब्दपरकत्वं तेषां व्यवस्थाप्यते शास्त्रे च—'स्वरूपं शब्दस्याशब्द-संज्ञा'[2] इति सूत्रबलाच्छब्दस्य शब्दस्यानुपूर्वी वाच्या भवति अतो यत्र इति शब्द-सान्निध्यं भवति। भवति तत्रान्यथाप्रत्यायकत्वं तस्येति रीत्या शब्दप्रामाण्याच्छब्दपरस्य शब्दस्येति शब्दसाहचर्यादर्थपरत्वमिति। अत एव शास्त्रेऽव्यवस्थापत्तिभि या न विभाषाशब्दनिष्ठा संज्ञा तथा सति 'हृकोरन्यतरस्याम्।' इत्यादावप्रवृत्तेरव्यवस्थापत्तेः। अतोऽर्थपरकत्वव्यवस्थापनार्थं वचनं स्वतन्त्रमत्र कर्तव्यमिति पूर्वपक्षस्य ततो न वचनं स्वतन्त्रं करणीयं भविष्यति सर्वाव्यवस्था 'नवेति विभाषा' इति सूत्रघटकेन इति शब्देनैव इति मन्वानेन भगवता महाभाष्यकृता वचनमिदमङ्गीकृतम्—'इति करणो-ऽर्थनिर्देशार्थः' इति।

साम्प्रतम्—इदानीमत्यन्तं निगूढमिदं तत्त्वमालोचयामहे इति वाक्येन मया यद्वक्तव्यत्वेन प्रतिज्ञातं तदाविष्क्रियते। सर्वस्य दृष्टान्तत्वे न परिदर्शितस्य स्थलस्येदमेव तात्पर्यमासीद् यद् यथा तैस्तैर्वचनैः प्रामाणिकैः प्रयोगाः साध्यन्ते तथैव तु वचन-मिदमपि—'इति करणोऽर्थनिर्देशार्थः' इति। एवञ्च—यथा—'नवेति विभाषा' इति सूत्रघटक इति शब्दोऽर्थपरः तथैव—'द्वित्रिचतुरिति कृत्वोऽर्थे'[3] इति सूत्रेऽपि श्रूयमाण इति शब्दः किं शब्दपरो वाऽर्थपरो वा। शब्दपरश्चेत्तर्हि—'नवेति विभाषा' इति सूत्ररीतिपरित्यागे किं बीजम्। तत्र तु शास्त्रघटकानामिति शब्दानामर्थविपर्यासित्वं व्यवस्थापितमत्रापि तथैवस्थितेः सत्त्वात्कथं सा रीतिः परित्यज्यते।

द्वितीये—अर्थपरकत्वस्वीकारे दोषो भवति नवेति विचारणीयम्। तत्र यदि नवेति सूत्रोदीरितरीतिमनुसृत्य विचार्यते तर्हि तत्रत्या स्थितिरन्या अत्र चान्यैवेति वेदितव्यम्। तत्र तु अर्थपरकत्वमात्रस्वीकारे एवेष्टसिद्धिरत्र तु न तथा यतो हि तत्र शब्दपरकत्वस्वीकारे केवलं विभाषाशब्दघटिते शास्त्रे एव तस्य सूत्रस्य सूत्रार्थस्य वा प्रसक्त्या—'हृक्रोरन्यतरस्याम्'[4] इत्यादिसूत्रेष्वनुपस्थित्या व्यवस्थोच्छद्येत। अर्थ-परकत्वस्वीकारे तु न कापि क्षतिः। अत एव शब्दशास्त्रत्वेऽप्यर्थनिष्ठा संज्ञा मता। शब्दसाधुत्वसिद्धिप्रयोजनकेन शास्त्रेण तथैवानुष्ठानस्य प्रशस्तत्वात्। किन्तु तामेव-तत्राभितामवक्लृप्तां रीतिमनुसृत्यात्रापि—'द्वित्रिचतुरिति कृत्वोऽर्थे'[5] इति सूत्रे

---

१. 'न वेति विभाषा' इति सूत्रभाष्ये।

२. पाणिनिसूत्रम्—१।१।६८।

३. पा० सू०—८।३।४३।

१. पा० सू०—१।४।५३।

२. पा० सू०—८।३।४३।

व्यवस्था क्रियेत तर्हि महाननर्थः। तथाहि—यत्र द्वित्वं प्रतीयेत तत्रापि षत्वापत्तिः स्यात्। यथा—'भवन्तो घटं मा कार्षुः कार्षुः' इत्येतादृशेषु वाक्येषु द्विरुच्चारणेन द्वित्वं प्रतीयत एव। तत्र विसर्गस्य षत्वं दुर्वारमेव। यतोहि व्याकरणशास्त्रे सूत्रेषु ये इति शब्दास्तेऽर्थपरा एव। अत्र इति–'द्वित्रिचतुरिति कृत्वोऽर्थे' इति सूत्रेऽपि वर्तत एव शब्दः। एवमेवानेकानि सूत्राणि वर्तन्ते यत्र शब्दः श्रुतोऽर्थपरः स्यात्तथा चानर्थव्रातप्रसङ्गः। तथाहि—

'तस्मादित्युत्तरस्य'[१]

'तस्मिन्निति निर्दिष्टे पूर्वस्य'[२]

'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्'[३]

'अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयां क्रियाद्विदामक्रन्निति च्छन्दसि'[४]

'सख्यशिश्वीति भाषायम्'[५]

'तदस्यास्त्यस्मिन्निति मतुप्'[६]

'इत्थम्भूतेन कृतमिति च'[७]

'दाधर्तिदर्धर्तिदर्धर्षिबोभूतु—तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्ममृज्यागनीगन्तीति चे'ति।[८]

एतेषु सर्वेषु सूत्रेषु श्रूयते किल इति शब्दः, तथा च तेषु सूत्रेषु सर्वत्रैवेतिशब्दस्यार्थपरकत्वात्ततच्छब्दार्थकशब्दयोगेऽपि तानि तानि कार्याणि स्युः। यतोहि भगवतो महाभाष्यकृत् कृतो नियमोऽयं वर्तते—'इति करणोऽर्थ-निर्देशार्थः'[९] इति।

न च भवन्तु तेषु सर्वेषु सूत्रेषु घटका 'इति' शब्दा अर्थपरा काऽनुपपत्तिरिति वाच्यम्, तथा सति यथा –'द्वित्रिचतुरिति कृत्वोऽर्थे'[१०] इति सूत्रे श्रूयमाणस्येति शब्दस्यार्थपरकत्वेऽतिप्रसङ्गो दर्शितस्तथैवातिप्रसङ्गव्यूहापत्ते। एवमेवान्यत्रापि दोषा ज्ञेया

१. पा० सू०—१।१।६६।

२. पा० सू०—१।१।६७।

३. ,, —३।१।४१।

४. ,, —३।१।४२।

५. ,, —४।१।६२।

६. ,, —५।२।९४।

७. ,, —६।२।१४९।

८. ,, —७।४।६५।

९. महाभाष्यम्—१।१।४४ सूत्रे।

१०. पा० सू०—८।३।४३।

इति चेदत्र विमृश्यते—'इतिकरणोऽर्थनिर्देशार्थः' इति महाभाष्यवाक्यं यत्र प्रकरणे प्रवृत्तं तत्रान्यत्र चार्थपर एवेति न संशयः। तथात्वानवगमे 'न वेति विभाषा' इति सूत्रे प्रदर्शितानेकदोषापत्तेः। यद्यपि—'द्वित्रिश्चतुरिति कृत्वोऽर्थे' इति सूत्रेऽपि श्रुतोऽस्ति किलेति शब्दः, तत्र चार्थपरकत्वाङ्गीकारे दोषो दर्शित एव, तथापि भूयसा व्यपदेश इति न्यायेन क्वचिल्लक्ष्यसिद्धावप्यतिव्याप्तिरापतति चेत्, तर्हि तत्रेति-शब्दस्यनार्थपरकत्वमिति मन्तव्यम्। तथा च—'द्वित्रिश्चतुरिति कृत्वोऽर्थे' इति सूत्रे श्रूयमाणस्येतिशब्दस्य शब्दस्वरूपपरकत्वमेवेति निश्चेयम्।

यत्तु—'तस्मादित्युत्तरस्य', 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति सूत्रयोरितिशब्दौ श्रुतौ तत्र का गतिरिति प्रश्नः, स च न विपरीतः। यतो हि तत्र श्रूयमाणेतिशब्दयो-रर्थपरकत्वमेवेति 'इति करणोऽर्थनिर्देशार्थः' इति महाभाष्यीयवाक्यकृतव्यवस्थया सह न विरोधः। अत एव महाभाष्ये—'किमुदाहरणम्'[1] इति महाभाष्यवाक्यस्य विवरणावसरे कैयटेन—'तस्मिन्निति, तस्मादिति, किमुदाहरणमिति इतिकरणस्य गौरित्ययमाहेत्यादौ स्वरूपपदार्थकत्वेन व्यवस्थापकत्वदर्शनात् प्रश्नः' इति व्याख्यातम्।

एवञ्च पूर्वपक्षीयग्रन्थदर्शनेन समापातमिदं यत्तत्र स्वरूपार्थकस्येतिशब्दस्य स्वीकारे दोषापत्तिः प्रश्नो वा। अर्थपरकत्वाङ्गीकारे च न दोष इति। अत-स्तत्रार्थपरक एवेतिशब्द इति सिद्धान्तो विज्ञेयः।

तथा च न कोऽपि दोषः न वा भाष्यकृत्कृतव्यवस्थाविरोधः। तथा चैतयो-र्द्वयोः सूत्रयोः 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'तस्मादित्युत्तरस्य' इत्यनयोः श्रूयमाणयो-रितिशब्दयोरर्थपरकत्वमेवेति सिद्धान्तः। अतएव 'इदं चाप्युदाहरणम्—इको यणचि' 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इति कथम्? सर्वनाम्नायं निर्देशः क्रियते। सर्वनामा च सामान्यवाची। तत्र सामान्ये निर्दिष्टे विशेषा अप्युदाहरणानि भवन्ति'[2] इति महाभाष्यवाक्यस्य व्याख्यानकरणावसरे तस्य ग्रन्थस्य हृदयं स्फोरयता महाभाष्य-तत्त्वविदा कैयटेन विदुषा प्रदीपे प्रकाशो दत्तो यदत्रेतिशब्दयोरर्थपरकत्वमेवेति। आपाततो महाभाष्यार्थकरणेन नार्थप्रत्ययो यथार्थो भवितुमर्हति। किन्तु सम्यक्तया समालोच्य उपक्रमोपसंहारदर्शनेन चेति विज्ञेयम्।

यच्च कैयटेन सिद्धान्तितं येन च ग्रन्थदर्शनेनात्र 'इतिकरणोऽर्थनिर्देशार्थः' इति महाभाष्यवाक्यार्थे प्रतीयमानो दोषो दूरीकृतः स्यात् स कैयटग्रन्थोऽयमस्ति। तथाहि—'इदं चापीति'। सिद्धान्तवादी। इतिकरणोऽत्रार्थनिर्देशार्थ एव। स्वरूपमिति वचनात् स्वरूपग्रहणे प्राप्ते—सर्वनाम्नायमिति। सूत्रान्तरोपात्तस्य तस्मिन्नित्यस्य तस्मादित्यस्य च नैतदनुकरणम्। किं तर्हि? सर्वनाम्ना निर्देश इत्यर्थः। तेन यत्र

१. महाभाष्यम्—१।१।६६ सूत्रे।

२. महाभाष्यम्—१।१।६६ सूत्रे।

सप्तम्यर्थनिर्देशः पञ्चम्यर्थनिर्देशश्च तत्रोभयोरुपस्थानम् । विशेषा अपीति अपिसम्भावनायाम्, न समुच्चये । नहि विशेषपरित्यागेनेह शास्त्रे सामान्यमस्ति, यदुदाहरणं स्यात् । तस्मात् सर्वे विशेषा इहोदाहरणमित्यर्थः । सामान्यस्य सर्वविशेषेषु भावात्'[1] इति ।

अनेन प्रमाणेन नूनं सन्देहोऽपाकृत एव यत्तयोः सूत्रयोः श्रुतयोरितिशब्दयोरर्थपरकत्वं न वेति । कैयटेन स्पष्टतया सिद्धान्त एव कृतो यत्तत्रेतिशब्दस्यार्थपरकत्वमेवेति शङ्कानिरासः ।

यत्तु—'विदां कुर्वन्त्वित्यन्यतरस्याम्' इति सूत्रे पठितस्येतिशब्दस्यार्थपरकत्वं न वेति शङ्का, तन्मूलकदोषापत्तिश्चेति प्रदर्शितम्, तत्तु निर्मूलमेव । यद्यपि सूत्रस्यास्य भाष्यं नोपलभ्यते, तथापि तत्र न दोषलेशः । तथाहि—इति शब्दस्तत्राप्यर्थपरक एव । स्वरूपनिर्देशपुरःसरमप्यर्थपरकत्वमितिशब्दस्य लोकप्रसिद्धत्वात्तत्राहतमिति स्वीकारेणादोषात् । तथा चोक्तं सिद्धान्तकौमुद्यां दीक्षितैः—'विदांकुर्वन्त्वित्यन्यतरस्याम्—वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते, इतिशब्दात्'[2] इति । तत्र व्याख्याने—'इतिशब्दादिति—तस्य प्रकारवचनस्य लोकप्रयोगानुसारित्वादिति भावः'[3] इति बालमनोरमायां स्पष्टीकृतम् । तथा च तत्रापि दोषपङ्कप्रक्षालनं जातमेव ।

'अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयां क्रियाद्विदामक्रन्निति च्छन्दसि' इति सूत्रेऽपि विद्यते इतिशब्दस्तत्र का गतिरिति प्रश्नस्य विषये तु इदं बोध्यम्—सूत्रेणानेन प्रयोगा इमे निपात्यन्ते । निपातो हि अन्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगसंसाधनम्, तच्च कृतमेव । अतोऽत्र सूत्रे इतिशब्दः स्वरूपार्थकः । अर्थादेतादृशस्वरूपाः प्रयोगा बोध्याः । इतिशब्दसंयोजनेनान्यादृशप्रयोगसंशयनिवृत्तिरेव जायते ।

अत्रेदं तत्त्वं वेदितव्यम्—इतिशब्दस्य स्वरूपनिर्धारकत्वं यद्धि लोकसिद्धं तत्तु वर्तत एव । किन्तु शास्त्रेषु—'इतिकरणोऽर्थनिर्देशार्थः' इति महाभाष्यकृत्कृतनिर्देशानुसारेणार्थपरकत्वमपीति । तथा च यथावसरं यथालक्ष्यं यथाप्रयोजनञ्च तस्येतिशब्दस्य शास्त्रेष्वपि क्वचिदर्थपरकत्वं क्वचिच्छब्दपरकत्वमिति व्यवस्था बोध्या । तत्रायं विशेषो यद् यत्रानुवादमात्रं तत्र तु स्वरूपमात्रबोधकत्वम्, यत्र न तथा तत्रार्थपरकत्वमिति । यथा प्रकृतसूत्रे—अभ्युत्सादयमित्यादौ स्वरूपपरकत्वमेव । यतो हि सूत्रेणानेन प्रयोगा इमे निपातिताः । अतो निपात्य प्रयुक्ता इमे शब्दा नान्यादृशा इत्यभिप्रायेण भगवता पाणिनिना इतिशब्दोऽनुश्लेषितोऽत्र । अतोऽवश्यमत्र स्वरूपमात्रावबोधक एवेतिशब्द इति निर्णयमिति भाति । यदि काचनापरापि व्यवस्था चेन्नहि ततोऽन्यत्र ममाभिनिवेशः, निर्दुष्टवचसो मान्यत्वात् , बुद्धेः सत्पक्षपातित्वस्यैव श्रेष्ठत्वात् ।

---

१. प्रदीपे १।१।६।६ सूत्रीयमहाभाष्ये ।

२. भट्टोजिदीक्षितकृतायां सिद्धान्तकौमुद्यामदादिप्रकरणे ।

३. बालमनोरमाव्याख्या ३।१।७९ सूत्रे ।

कथमत्र सूत्रे निपातनमिति जिज्ञासायां तत्रैव कौमुद्यां सम्यगुपपादितम्। तथाहि--'आद्येषु चतुर्षु लुङि आम् अक इत्यनुप्रयोगश्च। अभ्युत्सादयामकः। अभ्युदसीषददिति लोके। प्रजनयामकः। प्राजीजनदित्यर्थः। चिकयामकः। अचैचीषदित्यर्थे चिनोतेरां द्विर्वचनं कुत्वं च। रमयामकः। अरीरमत्। पवायां क्रियात्। पाव्यादिति लोके। विदामक्रन्। अवेदिषुः'[1] इति। 'सख्यशिश्वीति भाषायाम्' इति सूत्रेऽपीतिशब्दोऽनुकरणपरः। तथा चार्थपरकः सन् स्वरूपनिदर्शनकः स्यात्। तथा च दर्शितं कौमुद्यां मूले एव। तथाहि—'इतिशब्दः प्रकारे भाषायामित्यस्यानन्तरं द्रष्टव्यः। तेन छन्दस्यपि क्वचित्'[2] इति। इदमपि सूत्रं महाभाष्ये व्याख्यातं नोपलभ्यते।

'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रघटकस्येतिशब्दस्यार्थपरकत्वमेव। सम्बन्धसामान्ये वाधाराधेयभावरूपेऽर्थे वा मतुप्प्रत्ययः साधुरित्यर्थः। तथा चोक्तं महाभाष्ये—'मतुप्-प्रभृतयः सन्मात्रे इति चेदतिप्रसङ्गः। मतुप्प्रभृतयः सन्मात्रे इति चेदतिप्रसङ्गो भवति। इहापि प्राप्नोति व्रीहिरस्य, यवोऽस्येति। तस्माद् भूमादिग्रहणं कर्तव्यम्। के पुनर्भूमादयः?

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः[3] ॥

इति ग्रन्थेन महाभाष्ये वचनरूपेण पाठायापत्तिरुक्ता। ततश्च समाधानावसरे महाभाष्यकृता—'उक्तं वा। किमुक्तम्? अनभिधानादिति' इत्युक्त्वा 'इतिकरणः खल्वपि क्रियते ततश्चेद्विवक्षा, भूमादियुक्तस्यैव च विवक्षा' इति सिद्धान्तितम्। तस्य महाभाष्यस्येदमेव तात्पर्यमिति बोध्यं यदत्रेतिशब्दोऽर्थपरः। इतिशब्दो हि निपातः, निपाताश्चानेकार्था भवन्ति। तथा चेतिशब्दः प्रोक्तः स्वरूपनिर्देशनपुरःसरमर्थमपि नियमयति चेत्, तर्हि भूषणमेव तस्य निपातत्वात्। निपातस्यानेकार्थकत्वेनार्थशब्दस्य प्रयोजनरूपार्थोपस्थापकत्वेन भूमादिरूपविशेषार्थोपस्थापकत्वे न शब्दमर्यादातिक्रमणम्। तथा चाह कैयटः—'इति करण इति। इतिशब्दस्य बह्वर्थत्वादिह विवक्षार्थत्वमिति'[4] इति। ततश्चोद्द्योते नागेशभट्टः--'बह्वर्थत्वादिति–निपातत्वादिति भावः'[5] इति प्राह। तेन च दृष्टेन ग्रन्थप्रमाणेन 'न वेति विभाषा'[6] इति सूत्रे कृतया महाभाष्यकारीयया व्यवस्थया 'इतिकरणोऽर्थनिर्देशार्थः' इत्यनया न कोऽपि विरोध इति विवेक्तव्यम्।

---

१. सिद्धान्तकौमुद्यां वैदिकीप्रक्रियायां तृतीयाध्याये--पृ० ३८७।

२. सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे बालमनोरमातत्त्वबोधनीसहितायाम्–पृ०५७७।

३. महाभाष्यम्--५।२।९४।

४. प्रदीपे--५।२।९४ सूत्रे महाभाष्ये।

५. उद्द्योते--५।२।९४ सूत्रे महाभाष्ये।

६. पा० सू०--१।१।४४।

सिद्धान्तकौमुद्यास्तत्त्वबोधनीव्याख्यायां तद्धितप्रकरणे 'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रव्याख्यानावसरे प्रोक्तम्—'इतिशब्दो विषयविशेषलाभार्थः । तथाहि—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

अस्तिविवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु विषयेषु भवन्तीति वार्त्तिकार्थः'[1] इति । तथा च सर्वत्र तद्विषये कृते दृग्निक्षेपे न कोऽपि विक्षेप इति निष्कर्षः ।

इदानीमत्र—'इत्थंभूतेन कृतमिति च' इति सूत्रे प्रविष्टस्येति शब्दस्य कोऽर्थ इति विविच्यते । तत्रेतिशब्दोऽर्थपर एवेति सिद्धान्तः । नहि तत्र इत्थंभूतशब्दोऽपेक्षितः, किन्तुतस्यार्थः । यद्यपि सूत्रस्यास्य भाष्यं दृष्टिगोचरं न भवति, तथापि सूत्रेऽत्रेतिशब्दोऽर्थपर एवेति बोध्यम् । तथा सत्येवार्थसङ्गतेः प्रयोगसिद्धेश्च । तथैव सूत्रस्यास्य व्याख्यानमपि सिद्धान्तकौमुद्यां दीक्षितेन कृतम् । तथाहि—'इत्थम्भूतेन कृतमिति च । इत्थंभूतेन कृतमित्यर्थे यः समासस्तत्र क्रान्तमुत्तरपदमन्तोदात्तं स्यात्'[2] इति । अतो नात्रापि दोषलेशः ।

इदानीमेकमिदं सूत्रं विशालं समक्षमेति यत्रेतिशब्दः किमर्थ इति जिज्ञासा मुखरीकरोति वक्तुम् । तत्रेदं तत्त्वं वेदितव्यम्—सर्वेऽमी शब्दा निपातिताः । निपातितानां तेषां शब्दानां स्वरूपनिर्धारणे इतिशब्दः नात्रार्थपरः । अतो निपातस्येतिशब्दस्यात्र व्याकरणशास्त्रे भूयसा तु अर्थपरकत्वमेव, क्वचित्तु शब्दपरकत्वं सदपि तस्य निपातत्वाददोषाय कल्पते । अतो न क्वापि 'इतिकरणोऽर्थनिर्देशार्थः' इति महाभाष्यकृद्दर्शितदिशि दोषलेशः ।

किं बहुना, ब्रह्मसूत्रेऽपि यदा पश्यामः सूत्रं तदा महाभाष्यकारीयवचनमेव शरणं दिग्दर्शकञ्च भवति । तथाहि—वर्तते किल तत्रैकं सूत्रमद्वैतमतेन जीवब्रह्मणोरैक्यबोधकम्—'आत्मेति तूपगच्छन्ति ग्राहयन्ति च'[3] इति । नहि तत्रात्मशब्दः परमात्मा, किन्तु तस्य शब्दस्य प्रसिद्धो योऽर्थो जीवात्मा स परमात्मैवेति कृत्वा विगतसमस्तोपाधेर्जीवस्य परमात्मरूपत्वमेवेति सूत्रार्थः । विस्तरस्तु शाङ्करभाष्यादौ द्रष्टव्यम् । अन्ततोगत्वा भगवतो महाभाष्यकारस्य येयं व्यवस्था सातीव प्राञ्जलेति मन्तव्यं भवति । कृतया नूनमनया 'इतिकरणोऽर्थनिर्देशार्थः' इति महाभाष्यकारीयव्यवस्थया व्याकरणशास्त्रे तु महानुपकारो जात एव शास्त्रान्तरेष्वपि महान् कृत उपकार इति न संशीतिलेशोऽपि । यदि न स्यादियं व्यवस्था तर्हि कथङ्कारं ब्रह्मसूत्रस्यार्थनिर्णये साहाय्यं लब्धं भवेद् यद् बलादर्थनिर्णयः ? विनाऽर्थनिर्णयं कथमनुभावनम्,

---

१. तत्त्वबोधिनी ५।२।९४ सूत्रे मतुबर्थीयप्रकरणे ५७० पृष्ठे बालमनोरमातत्त्वबोधिनीयुक्तायां कौमुद्याम् ।

२. सिद्धान्तकौमुद्यां समासस्वरप्रकरणे ६।२।१४९ सूत्रे ५८२ पृष्ठे ।

३. ब्रह्मसूत्रम्—४।१।३ ।

तेन च विना कथमात्माक्षसाक्षात्कारः। उपायमात्रावलम्बनत्वादुपेयस्य। अतो महाभाष्यवचनस्यास्य सर्वमेव शास्त्रजातमधमर्णतां भजते इति निवेदयितुं शक्यते।

११. 'आदेशमात्रं स्थानिवद् यथा स्यात्'

वाक्यमिदम्—'स्थानिवदादेशोऽनल्विधौ'[1] इति सूत्रे महाभाष्यकृता प्रयुक्तम्। तत्र हि भाष्ये स्थानिवत्सूत्रघटकप्रत्येकपदप्रवेशफलविचारावसरे भाष्यकृता स्वयमेव विजिज्ञास्य, विजिज्ञास्यफलमपि स्वयमेव तस्य तस्य पदस्य प्रदर्शितम्। तथा च तत्र सूत्रे प्रयुक्तस्य 'आदेश' इति पदस्य किं प्रयोजनमित्यपि जिज्ञासितम्। तत्रादेशप्रवेशाभावेऽपि 'स्थानिवदनल्विधौ' इत्येतावन्मात्रेणापि सूत्रेण सकलेष्टसिद्धौ नैव तत्रादेशपदं कस्मैचिल्लौकिकप्रयोगसाधनरूपफलाय मन्तव्यम्। कस्मिंश्चित्प्रयोगे साधुत्वासिद्धिप्रयुक्ताव्याप्तौ अनिष्टप्रयोगापत्तिरूपातिव्याप्तौ वा तत्र तत्र सुत्रेषु प्रवेश्यन्ते पदानीति हि रीतिः। अत्र तादृश्याः कस्याश्चिदप्यापत्तेरप्रसरात् किमर्थमिदमादेशपदमिति धियाऽऽदेशपदवैयर्थ्यापादनं भगवतो महाभाष्यकृतः। वर्तते किल काचन शब्दानां मर्यादा। कश्चिद्धि सम्बन्धिवाचकः शब्दः प्रयुक्तः स्वार्थमुपस्थापयन् स्वार्थसम्बन्धिनमप्यर्थमाक्षिपति तं बिना निराकांक्षबोधानुपपत्तेः। यथा हि—'पुत्र इति प्रयुज्यते चेत्तर्हि जायते खलु स्वारसिकी जिज्ञासा वोच्यतामाकाङ्क्षा वेति—कस्य पुत्रः इति। तथैव प्रकृतेऽपि 'आदेश' इति पदाभावेऽपि 'स्थानिवदनल्विधौ' इत्येतावन्मात्रन्यासकरणेऽपि स्थानिवच्छब्दस्य सम्बन्धिशब्दत्वाद् विधेयतासम्पादकत्वाभावप्रयुक्ततदन्यथानुपपत्तिरूपप्रमाणपरिकल्पनया नूनमेव स्वार्थसम्बन्ध्यर्थानुभावकार्थकल्पत्वं स्यादिति रीत्या शाब्दिकमर्यादाक्रमेण सम्भवत्यर्थवत्त्वे किमर्थमिदं पदमिति भाष्याशयः। तथा च पितृवदधीते इत्युक्ते पितृगताध्ययनसदृशाध्ययनकर्तृत्वेन पुत्रस्य बोधो भवति, यतो हि पितृशब्दः सम्बन्धिवाचकः शब्दः। पितुश्च पुत्रेण गुरोश्च शिष्येण नित्यसम्बन्धात्। अत एव नित्यसाकाङ्क्षस्थले सापेक्षेऽपि भवति समासः, यथा देवदत्तस्य गुरुकुलमित्यादौ। इत्थञ्च—'स्थानिवदनल्विधौ' इत्येतावन्मात्रेणापि सूत्रस्वरूपेण सर्वेष्टसिद्धौ सत्यामस्मिन् सूत्रे किमर्थमादेशग्रहणमिति प्रश्ने जागरूके भगवता महाभाष्यकृता समाधानाय प्रवृत्तेन—'इदं तर्हि प्रयोजनम्' इत्यभिधाय 'आदेशमात्रं स्थानिवद् यथा स्यात्'[2] इति वचनेन व्यवस्था कृता।

अत्र च प्रयुक्तस्यास्य वाक्यस्य इतरांशे विचारात् प्राग् वाक्यघटकपदसाधुत्वविचार आवश्यकत्वात् क्रियते। यतो हि वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वं

---

१. पा० सू०—१।१।५६।

२. महाभाष्ये 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रे।

विद्यते। पदार्थविचारप्रसङ्गे चोपस्थापकस्य पदस्य साधुत्वचिन्ता परमावश्यकी। व्याकरणशास्त्रं हि शब्दसाधुत्वव्यवस्थात एव प्रामाण्यं भजते। शक्तिग्रहोऽपि व्याकरणतो भवत्येव, नहि तत्र संशयलेशोऽपि। तथापि नहि शक्तिमत्त्वरूपं साधुत्वम् वैयाकरणानां मते अपभ्रंशतोऽप्यर्थावबोधात्। अतोऽर्थनिर्णयस्तु तथा प्राधान्यं नालम्बते व्याकरणशास्त्रप्रतिपाद्यत्वेन, यथा साधुत्वमिति ध्रुवम्। अत एव—

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणाद् ऋते॥
नानर्थिकामिमां कश्चिद् व्यवस्थां कर्तुमर्हति।
तस्मान्निबध्यते नित्या साधुत्वविषया स्मृतिः[१]॥

इति वाक्यपदीये हरिणाभिनिवेशेन साधुत्वस्यैव प्राधान्येन व्याकरणप्रयोजनत्वं व्यवस्थापितम्। नागेशभट्टेनापि विदुषा परिभाषेन्दुशेखरे 'असन्दिग्धानुष्ठानसिद्धर्थेऽत्र शास्त्रे सन्दिग्धोच्चारणरूपाचार्यव्यवहारेण सन्देहनिवृत्ते व्याख्यानातिरिक्तनिमित्तानपेक्षत्वं बोध्यत इति यावत्'[२] इत्यभिहितम्। अतोऽत्र वाक्ये प्रयुक्तस्य 'आदेशमात्रम्' इत्यस्य साधुत्वसंसाधनरीतिप्रदर्शनपुरःसरमग्रे विचारो विधास्यते।

अत्र मात्रशब्दः कात्स्न्र्यरूपेऽर्थे वर्तते। मात्रशब्दस्य हि द्वौ अर्थौ कात्स्न्र्यमवधारणञ्च। अवधारणञ्च—इतरनिषेधपूर्वकप्रकृत्यर्थावबोधकत्वम्। यथा—'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[३] इति सूत्रे प्रयुक्तो मात्रशब्दोऽवधारणार्थकः। तेन प्रातिपदिकार्थेतराबोधकत्वे सति प्रातिपदिकार्थबोधकात् प्रतिपदिकात् प्रथमा साधुरिति सूत्रार्थः सङ्गच्छते। एवमेवान्येनापि सूत्रघटकेन पदेन सहान्वये बोधो भवतीति बोध्यम्। तथा चोक्तं वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन 'मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये सङ्ख्यामात्रे च प्रथमा स्यात्'[४] इति। कात्स्न्र्यरूपोऽर्थस्तु महाभाष्यघटकेऽत्र पदे विवक्षितः। तथा सर्व आदेश आदेशमात्रमित्यस्वपदविग्रहः। 'मयूरव्यंसकादयश्च'[५] इति सूत्रेणनित्यसमासः। तत्र सूत्रे पठितेनानेन वार्त्तिकेन वा समासः। तथाहि—'मात्रान्तरयोर्नित्यसमासवचनं क्लीबत्वञ्च' इति। यथा च चिदेव चिन्मात्रमित्यत्र मात्रशब्दस्य विशेषणवाचकत्वेऽपि अन्यो राजा राजान्तरमित्यत्रान्तरशब्दस्य विशेषणवाचकत्वेऽपि न पूर्वप्रयोगस्तथात्रापि—'आदेशमात्रम्' इत्यत्र न मात्रशब्दस्य पूर्वप्रयोगः। मात्रशब्दस्य कात्स्न्र्य-

१. वाक्यपदीये ब्रह्मकाण्डे—१३, १९ का०।
२. परिभाषेन्दुशेखरे प्रथमपरिभाषाव्याख्याने।
३. पा० सू०—२।३।४६।
४. वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे प्रातिपदिकार्थसूत्रे।
५. पा० सू०—२।१।७२।

रूपोऽर्थः कोशादेव लभ्यते। तथाहि—'मात्रं कात्स्न्र्येऽवधारणे' इत्यमरे। शक्तिग्राहकश्च मानं कोशोऽपि। तथा चोक्तमभियुक्तैः—

> शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
> वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति।

स एव कोशोक्तोऽर्थोऽत्र गृहीतो भाष्ये। तथा च सर्वे आदेशाः स्थानिवृत्तिधर्मवन्तो भवेयुरित्याकारकार्थविशेषोपलब्धये लाघवप्रियोऽप्याचार्यो भगवान् पाणिनिः सूत्रेऽस्मिन्नन्यथोपपत्त्या व्यर्थतामापन्नमप्यादेशपदं गृह्णाति। तदभावे एतादृशोऽर्थो न लभ्येत। तद्ग्रहणे च—'शब्दाधिक्यादर्थाधिक्यम्' इति न्यायात् 'अणुरपि विशेषोऽध्यवसायकरः' इति युक्त्या च विशेषार्थलाभ इति बोध्यम्। आदेशग्रहणस्य वैयर्थ्यापत्तितत्समाधानपरभाष्यस्यायमेवाशय इति विवेक्तव्यम्।

अयं भावः—संज्ञापरिभाषाविधिनियमातिदेशधिकारभेदात् सूत्राणि भवन्ति षड्विधानि। तत्रातिदेशसूत्रारम्भः किमर्थं भवतीति विचारे इदमेव वक्तव्यं भवति यद् आदेशे सति स्थानिनः स्वरूपभेदात् सूत्राणां प्रवृत्तिर्बाधिता भवति, अतोऽतिदेशसूत्रारम्भः। यथा—रामायेत्यादौ।

'सुपि च'[1] इति सूत्रस्य प्रवृत्तिरिष्टा, किन्तु सा बाधिता भवति। कुत इति चेत्तर्हि—सूत्रार्थासङ्घटनादिति बोध्यम्। यञादौ सुपि परे सति सूत्रमिदमदन्ताङ्गस्य दीर्घं विधत्ते। अत्र च यञादित्वेऽपि तत्र सुप्त्वाभावात्सूत्राप्रवृत्तिः। अतः 'स्थानिवदादेशोऽनल्विधौ'[2] इति सूत्रमारब्धम्। तेन च सूत्रेण सुप्त्वव्यतिरेकाद् दीर्घाप्रवृत्तिर्निराकृता, यतो हि सुप्त्वाभाववत्यपि यकारे ङे स्थानिके ङे वृत्तिसुप्त्वरूपो धर्मो यकारे समारोप्यते। तथा च यन्निमित्तवैकल्यप्रयुक्तवैकल्यवती सूत्रप्रवृत्तिस्तन्निमित्तमतिदेशमहिम्ना लब्धमिति शब्दसाधुत्वसम्पादनरूपव्याकरणशास्त्रसाध्यं प्रयोजनं सिद्धमित्यहो अतिदेशशास्त्रप्रभावः। तत्र चातिदेशसूत्रे आदेशग्रहणं किमर्थमिति प्रश्नस्य तदुत्तरस्य च विशेषोऽवधार्यः। 'आदेशमात्रं स्थानिवद् यथा स्यात्' इति फलं प्रदर्श्य महाभाष्यकृता तत्र सूत्रे गृहीतस्यादेश इति पदस्य सार्थक्य प्रतिपाद्य न तस्य वैयर्थ्यमिति कृत्वा सूत्रे आदेशग्रहणमपेक्ष्यत एवेति व्यवस्थापितम्।

अत्र 'आदेशमात्रं स्थानिवद् यथा स्यात्' इति महाभाष्यवाक्यश्रवणान्निसर्गत एव केचन प्रश्ना मनसि जागरूका भवन्ति। येषां समाधानमत्यावश्यकम्। अन्यथा केवलं तत्र सूत्रे आदेशग्रहणं किमर्थमिति प्रश्नः—'अतिदेशमात्रं स्थानिवद् यथा स्यात्' इति चोत्तरमित्येव ज्ञानमस्माकं स्यात्। यच्च ज्ञानमापातत एव। किन्तु किं रहस्यं तादृशस्योत्तरस्य भगवता महाभाष्यकृता कृतस्येति महतो विषया-

---

१. पा० सू०—७।३।१०२।
२ पा० सू०—१।१।५६।

दालोचनीयाद् वयं वञ्चिताः स्याम। अतोऽत्र ये प्रश्नाः स्वयमुत्थिता भवन्ति तान् प्रदर्श्य तत्र च यथाप्रतिमानं समाधानं कर्तुं प्रयतनीयम्।

किम् 'स्थानिवदनल्विधौ' इत्येतावन्मात्रसूत्रोपन्यासे स्थानिशब्दस्य पितृशब्दवत्सम्बन्धिशब्दत्वेन तद्द्वाराऽऽक्षिप्तस्यादेशपदस्य सर्वादेशपरत्वं न भवितुमर्हति? यदर्थमतादेशपदप्रवेश आवश्यकः? यदा च चकास्ति मतमिदं वैयाकरणानाम्—'मात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः'[1] इति, तदा कतिपयमात्रापदघटितस्यास्य 'आदेश' इति पदस्य सार्थक्यं कथं प्रतिपाद्यते भगवता महाभाष्यकृता?

यद्यप्येकोऽप्यादेश आदेशत्वावच्छिन्नः तथापि नहि तन्मात्रपरत्वमादेशपदस्य वक्तं शक्यम् 'नह्येकमुदाहरणं योगारम्भं प्रयोजयति' इति सिद्धान्तात्। यद्यप्येकस्यापि प्रयोगस्य साधनाय सूत्रं स्वतन्त्रं प्रणीतं परिदृश्यते यथा—'अग्नेर्ढक्'[2], 'मित्रे चर्षौ'[3], 'एण्याढञ्'[4], 'चटकाया ऐरक्'[5] इत्यादिसूत्रेषु, तथापि न तन्नियमविरोधस्तदप्रामाण्यं वा, यतो हि 'नह्येकमुदाहरणं योगारम्भं प्रयोजयति' इत्यत्र एकप्रयोगसाधनाय सामान्यधर्मावच्छिन्नोद्देश्यताकं सूत्रं न क्रियते इति हि तस्यार्थः। अत्र च सामान्यधर्मावच्छिन्नोद्देश्यतावर्तते आदेशत्वावच्छिन्ना। आदेशत्वावच्छिन्नमुद्दिश्य स्थानिवृत्तिधर्माश्रयत्वं विधीयते कार्यविशेषे। तथा च नात्र तथा वक्तुं शक्यं यदेकप्रयोगसाधनाय सूत्रं प्रवृत्तमिति। एवञ्च–'स्थानिवदनल्विधौ'[6] इत्येतावन्मात्रैणापि सूत्रेण आदेशपदाघटितेन स्थानिशब्दस्य सम्बन्धिशब्दत्वेन तद्बलादाक्षिप्तस्यादेशपदस्यादेशत्वावच्छिन्नमात्रोपस्थापकत्वसम्भवात् सकलादेशलाभे किमर्थं व्यर्थमत्रादेशपदसाफल्यप्रदर्शनप्रयासो भगवतो महाभाष्यकृतो लाघवप्रमाणस्य व्याकरणेऽङ्गीकृतत्वात्। तथाहि—'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति स्वयमेवाह भाष्ये भाष्यकारः। अतो यो हि प्रयोजनविशेषो विनापि सूत्रेऽत्रादेशग्रहणं सिद्ध्यति तत्साधनायादेशग्रहणसाफल्यं प्रदर्शयन् महाभाष्यकारः पिष्टपेषणन्यायमेवादृतवान्। अतोऽत्रादेशग्रहणं मास्तु तदभावेऽपि—

'आदेशमात्रं स्थानिवद् यथा स्यात्'

इतीदं प्रयोजनं सिद्ध्यत्येव, स्थानिपदमहिम्नाक्षिप्तादेशपदात्।

यद्यप्यत्रेत्थं समाधातुं प्रभवेत् कश्चिद् यद् आदेशो द्विविधः—प्रत्यक्षः, आनुमानिकश्च। तथा च यदि 'स्थानिवदनल्विधौ' इतीदमेव सूत्रं स्यात्, न च स्यादादेशग्रहणमत्र तर्हि, केवलं प्रत्यक्षतया समुच्चरितस्यैव आदेशस्य स्थानिवृत्तिधर्मवत्त्व-

१. परिभाषेन्दुशेखरे ३ प्रकरणे परिभाषा १३४।

२. पा० सू०—४।२।३३।

३. पा० सू०—६।३।१३०।

४. पा० सू०—४।३।१५९।

५. पा० सू०—४।१।१२८।

६. पा० सू०—१।१।५६।

रूपातिदेशः स्यात्, न तु तथैव आनुमानिकस्येति। यतो हि व्याकरणशास्त्रेऽनियमे नियमकारिण्यः शब्दसाधुत्वसाधने साधनत्वेन मताः परिभाषा विद्यन्ते, तासु—'श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्'[१]

इति परिभाषया केवलं श्रुतस्यैवादेशस्य ग्रहणं प्रसज्येत, न त्वनुमितस्यापीति महानिष्टम्।

न च कृतेऽप्यादेशग्रहणे सर्वेषामादेशानां ग्रहणं न स्यात्, अस्याः परिभाषाया रतदानीमपि विद्यमानत्वेन तया संकोचकरणे संकोचाभावात्। यथाहि भोजनरूपप्रकरणबलात् लवणाश्वयोरुभयोरप्यर्थयोर्वाचकस्यापि सैन्धवपदस्य क्वचन लवणपरत्वं क्वचिच्चाश्वपरत्वम्। यथा—यदि भोजनं कुर्वन् कश्चिद् ब्रवीति 'सैन्धवमानय' इति तदा लवणस्यैव बोधः। यदि च यात्राप्रसङ्गे तथा वदति तर्हि तदानीमश्वस्यैव ग्रहणम्। ऽस्मृतशक्तेः शब्दस्यार्थविशेषकत्वव्यवस्थापकोपायेषु प्रकरणस्यापि परिगणितत्वात् तेन संकोचात्। तथा चोक्तम्—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दस्यार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[२]॥ इति।

एवञ्च कृतेऽप्यादेशग्रहणे परिभाषयातया केवलस्य श्रुतस्यैवादेशस्य स्थानिवृत्तिधर्मलाभे को लाभः? श्रम एव हि केवलमिति वाच्यम्, कृते सत्यादेशग्रहणे तया परिभाषया संकोचाभावेनानुमितस्यापि ग्रहणेन फलविशेषसत्त्वान्नैकरूपत्वेनादोषात्, यतो हि—'शब्दाधिक्यादर्थाधिक्यम्' इति न्यायः, 'अणुरपि विशेषोऽध्यवसायकरः', 'पुरुषारम्भोऽपि क्वचिन्निवर्तको भवति' इति वाक्यप्रामाण्याच्च प्रत्यक्षस्यादेशस्य 'अस्तेर्भूः'[३] इति 'ङेर्यः'[४] इत्यादेः आनुमानिकस्य–'एरुः'[५] इत्यादेशश्च सङ्ग्रहसम्भवः।

अत एव 'देवदत्तः पचतु' इत्यादेर्वाक्यस्य 'पदस्य'[६] इति सूत्राधिकारस्थाने तिङ्ङतिङः[७] इति सूत्रेण अतिङन्तदेवदत्तपदात्परस्य तिङन्तपदस्य 'पचतु' इत्यस्य निघातसिद्धिः। एतद्धि फलं न कथमपि सेद्धुमर्हति यदि न स्यादत्रादेशपदस्य

१. परिभाषेन्दुशेखरे परिभाषा १२३।
२. लघुमञ्जूषा ११० पृष्ठे।
३. पा० सू०—२।४।५१।
४. पा० सू०—७।१।१३।
५. पा० सू०—३।४।८६।
७. पा० सू०—८।१।१६।
८. पा० सू०—८।१।२८।

ग्रहणम् । तथा चोक्तं कैयटेन—'द्विविध आदेशः--प्रत्यक्षश्चास्तेर्भूरित्यादिआनुमानिकश्चैरुरित्यादिः । अत्र हि--इकारेणोकारान्तः स्थान्यनुमीयते, उकारेणोकारान्तः आदेशः । ततः तैस्तुरिति सम्पद्यते । तत्र प्रत्यक्षस्यैव ग्रहणं स्यात्, नानुमानिकस्येति भावः'[1] इति । अयञ्च कैयटग्रन्थ आदेशपदप्रवेशाभावे दोषपरक इत्यवधेयम् । अत एवाग्रे सूत्रे अनुवृत्तस्यादेशपदस्य फलपरकमहाभाष्यवाक्यस्य—'आदेशमात्रं स्थानिवद् यथा स्यात्' इत्यस्य व्याख्यानावसरे 'आदेशमात्रम्' इति प्रतीकमादाय—'प्रत्यक्षमनुमितञ्चेत्यर्थः' इति कैयटेन व्याख्यातम् । ततश्च तत्रैव--'एरुरित्यत्र प्रत्यक्षमुकारस्यादेशत्वमिकारस्य च स्थानित्वम् । न च किञ्चिदिकारस्य कार्यमस्ति यदुकारेऽतिदिश्येत । तिशब्दकार्यंतु तुशब्दस्यातिदिश्यत इति पदत्वसिद्धिः'[2] इति ।

ननु--'एरुः[3]' इत्यत्रानुमानिकः स्थान्यादेशभाव उक्तः । अनुमानञ्च नाम पञ्चावयववाक्यरूपं भवति । अत्र च कीदृशं तदिति चेदत्रोच्यते—'एरुरिति सूत्रम्, शब्दानित्यत्वपक्षेऽपि इकारान्तस्य लोडादेशस्य स्थाने उकारान्त आदेशकर्तव्य इत्याकारकबोधजनकत्वप्रकारकपाणिनितात्पर्यविशेष्यतावद् नित्यत्वपक्षैकवाक्यतया अत्रापि पक्षे तत्पक्षसिद्धनिघातादिफलसम्पत्तिप्रयोजकत्वात्' इति ।

इत्थञ्च—द्विविधस्याप्यादेशस्यादेशग्रहणेन ग्रहणं भवेदेतदर्थमेवात्रादेशग्रहणमिति चेदत्रोच्यते--'स्थानिवदनल्विधौ' इति न्यासेऽनुमितादेशस्थले दोषापत्तिभिया कृतमादेशग्रहणमिति पर्यवसन्नम् । किन्तु विचार्यतामिदमत्रोत्सार्यमात्सर्यं धीधनैर्यत् कैयटप्रभृतिप्रमुखाचार्यव्याख्यानाद् द्विविध आदेश इति सिद्धम् । तत्र यथा—'एरुः'[4] इत्यस्यानुमानिकस्येकारान्तस्थाने जायमानस्यानुमानिकस्योकारान्तरूपस्य 'पचतु' इत्यादेः स्थानिवृत्तितिङ्त्वरूपधर्मवत्तया—'सुप्तिङन्तं पदम्'[5] इति सूत्रार्थसंघटनात् पदत्वसिद्धिमूलकः 'तिङ्ङतिङः' इति सूत्रेण निघातः सिद्धः । तथैव—'अनागमकानां सागमका आदेशाः' इति, 'दाधाघ्वदाप्'[2] इति सूत्रीयमहाभाष्यकृद्वचनप्रामाण्यादानुमानिकस्यागमस्थलीयस्यैव अनागमकस्थलीयस्याप्यादेशस्यानागमकस्थानिकस्य तुल्यवित्तिवेद्यन्यायेन ग्रहणं सम्भवत्येव । तथा च प्रतिपादितं महाभाष्ये दाधाघ्वदाविति सूत्रे—'आदेशस्तर्हि इमे स्युः अनागमकानां सागमकाः । तत्कथम् ?

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥

---

१. 'स्थानिवदादेशोऽनल्विधौ' कैयटीये प्रदीपे ।
२. 'स्थानिवत्सूत्रे' कैयटीये प्रदीपे ।
३. पा० सू --३।४।८६ ।
४. पा० सू०--३।४।८६ ।
५. पा० सू०--१।४।१४ ।
६. पा० स०--१।१।२० ।

इति वाक्यविन्यासेन ।

अत्र उभयतः पाशारज्जुः, तथाहि—पूर्वप्रदर्शितेन भाष्येण तन्मूलकविचारेण चेदं सिद्धं भवति, यच्च तर्कप्रमितं यद् यथा—एरुरित्याद्यानुमानिकस्यादेशस्य ग्रहणाय कृतेनादेशग्रहणेनैव तद्यथा साध्यते तथैव—'अनागमकानां सागमका आदेशाः' इति-भाष्यवचनसहकारेणागमस्थलीयोऽप्यादेशो ग्राह्यः । इष्टापत्तौ—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते'[1] इति वचनेनानेकफलसाधकेन परिभाषारूपेण भाष्यकृता स्वीकृतेन यानि फलानि आगमस्थलीयानि सन्ति तेषां समेषामादेशविशेषत्वादादेशत्वेन ग्रहणात् कार्यसिद्धौ सा परिभाषा व्यर्था स्यात् । यदि च सा परिभाषा स्वीक्रियते, तर्हि 'आदेशमात्रं स्थानिवद् यथा स्यात्' इति महाभाष्यवचनं विरुद्धं स्यात् । यतो हि स्थानिवत्सूत्रे कृतमादेशग्रहणं व्यर्थं सदेव तदेव तु ज्ञापयित्वा सफलं भवति । तत्रापि यदि ज्ञापिते सर्वस्यादेशस्य ग्रहणं न स्यात्तर्हि भाष्यवचनमेव व्यर्थं स्यात् । विरुद्धत्वञ्च तस्यापद्येत । यतो हि यस्मै प्रयोजनाय सर्वेषामादेशानां ग्रहणाय सूत्रे कृतेनादेशग्रहणेन ज्ञापनं क्रियते, तदेव च प्रयोजनं सर्वविधादेशग्रहणरूपं न सम्पन्नं तर्हि विरुद्धं वचः । यदि च अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति वचनेन केवलमागमस्थलीय एवादेश आगमिविशिष्टग्राहकत्वेन समर्थ्यते । तर्हि—'आदेशमात्रं स्थानिवद् यथा स्यात्' इति भाष्यस्य वैयर्थ्यम् ।

एवञ्च कथञ्चिदेकस्य प्रामाण्ये सार्थक्ये च व्यवस्थापितेऽपरस्य वैयर्थ्यमप्रामाण्यञ्चापद्यते । एवमेव विनिगमनादिविरहेण पूर्वभाष्यस्योत्तरभाष्यस्य वा कथञ्चिदप्येकस्यैव प्रामाण्यसमर्थनं शक्यव्यवस्थापनमित्यापतत्यत्रोभयतः पाशारज्जुरिति महान् पूर्वपक्षः ।

अत्रायं निगूढाभिसन्धिर्महाभाष्यस्य । तथाहि—आदेशो यद्यपि द्विविधः प्रत्यक्ष आनुमानिकश्च । अत एव—'श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्'[2] इति परिभाषा प्रामाण्यमावहति, तथापि—'फलबलकल्प्यः स्वभाव एव शरणम्' इति न्यायमाश्रित्य—आनुमानिकादेशस्य स्वरूपद्वयमाश्रयितव्यम् । एकमानुमानिकम्, अपरञ्च केवलमानुमानिकम् । तत्रानुमानिकस्थले—'एरुः' इत्यादौ 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रस्य प्रवृत्तिर्भवति, न च भवति केवलानुमानिके 'अनागमकानां सागमका आदेशाः' इति वाक्यमूलकागमस्थलीयादेशस्थले ।

ननु केवलप्रतिज्ञात एव कश्चन पक्षो न सिद्ध्यति, किन्तु दोषसत्त्वे त्याज्यत्वम्, गुणसत्त्वे ग्राह्यत्वम् । गुणदोषयोस्तद्धेतुत्वात्, अन्यथातिप्रसङ्गादिति चेन्न, 'अपिबत्' इत्यादावडागमविशिष्टस्य पिबाद्यादेशापत्तिरूपदोषस्य विद्यमानत्वात् । तथा चोक्त-

---

1. महाभाष्यम्—१।१।२० सूत्रे ।
2. परिभाषेन्दुशेखरे परिभाषा ११३ ।

मुद्द्योते नागेशभट्टेन—'यथा एरुरित्यादौ अवयवयोः श्रौतस्थान्यादेशभावेऽपि नित्यत्वानुपपत्तिमूलकः समुदाययोरपि स कल्प्यते, एवमवयवत्वेन विद्यमानेऽपि अर्थापत्तिमूलकवाक्यान्तरकल्पनेन निरत्रय सावयवबुद्ध्योर्विपरिणाममात्रेणादेशत्वव्यवहारो गौणो नित्यत्वरक्षणाय कल्प्यत इति। यथा च तत्र कल्प्यमानस्थान्यादेशभावेन श्रौतावयवस्थान्यादेशभावस्य न त्यागः, अत एव अचः परस्मिन्नित्यादीनामुक्तिसम्भवः। तथात्रापि श्रौतावयवावयविभावस्य न त्याग इति यदागमा इत्येतत्प्रवृत्तिरव्याहतैवेति ईदृशस्थान्यादेशभावे स्थानिवत्त्वस्य न प्रवृत्तिः। स्थानिवादति श्रुतेः श्रौतस्थान्यादेशभावानुपपत्तिमूलकतया कल्प्यमानस्थान्यादेशभावके 'एरुः' इत्यादावेव तत्प्रवृत्तेः। न त्वत्र केवलानुमानिके। अत एव लावस्थायामडितिपक्षेऽडादिविशिष्टस्य 'अपिबत्' इत्यादौ न पिबाद्यादेश इति दिक्"[1] इति।

इत्थञ्च 'आदेशमात्रं स्थानिवद् यथा स्यात्' इति महाभाष्यवाक्यस्य विचारो यदा पूर्वोत्तरग्रन्थपरिशीलनपूर्वकं क्रियतेः, तदा न कोऽपि दोषो यो हि सम्भाव्यते आपाततः कृते सति विचारे। शब्दनित्यत्ववादरक्षणाय बुद्धिविपरिणामस्य—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविचारे हि नित्यत्वं नोपपद्यते[2]॥

इति वाक्येन प्रसिद्धि गतस्य भाष्ये विद्यमानत्वेन 'अनागमकानां सागमका आदेशाः' इति भाष्यवाक्यस्यावतारः। नहि भाष्येणानेनेत्थं भ्रमितव्यं यत्—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते'[3] इतिमहाभाष्यवचनस्य वैयर्थ्यमिति। यतो हि आगमस्थलीयादेशस्यापि यदि स्थानिवद्भावोत्, तद्त्वेन ग्रहणं स्यात्तदा 'अपिबत्' इत्यादौ दोषो वज्रलेपायितः स्यात्। अतो वैयाकरणैरवश्यमयं प्रकारो हृष्टचेतसा अङ्गीकार्यो यदानुमानिकस्य भवति किल भेदद्वयम्—१. आनुमानिकस्थान्यादेशभावः। २. केवलानुमानिकस्थान्यादेशभावश्चेति। तत्र श्रौतावयवस्थान्यादेशभावमूलकस्य नित्यत्वान्यथानुपपत्त्या कल्पितस्यानुमानिकस्यादेशस्य स्थानिवत्सूत्रेण ग्रहणं भवति। किन्तु आगमस्थलीयश्रौतावयवावयविभावस्थान्यादेशभावमूलकानुमानिकस्य नित्यत्वान्यथानुपपत्त्या कल्पितस्य न स्थानिवत्सूत्रेण ग्रहणम्। अत एव केवलानुमानिके न स्थानिवत्सूत्रं प्रवर्तते इत्युद्द्योते श्रीनागेशभट्टेन महाभाष्यतत्त्वविदा विदुषा सिद्धान्तितम्।

एवञ्च 'अपिबत्' इत्यादौ दोषापत्तिभिया आगमस्थलीये केवलानुमानिके स्थान्यादेशभावे 'स्थानिवदादेशोऽनल्विधौ' इति सूत्राप्रवृत्त्या 'प्रणिदापयति' इत्यादि-

---

१. 'दाधाघ्वदाप्' इति सूत्रे भाष्ये।

२. महाभाष्यम्—१।१।१२ सूत्रे।

३. महाभाष्यम् १।१।१२० सूत्रे।

प्रयोगेषु 'दा' इति बुद्धिप्रसङ्गे दाप्बुद्धिः कर्तव्या, इत्यादिस्थान्यादेशभावकल्पनाया अप्रसरादागमविरोधिनि नित्यत्वपक्षेऽपि–'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते। इत्यवंस्वरूपा—'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इति भाष्यवचन-सारांशभूता परिभाषाङ्गीकार्यैव। तथा चोक्तं नागेशभट्टेन उद्द्योतग्रन्थे—'आद्यन्ता-वित्याद्येकवाक्यतयाऽऽर्धधातुकस्याद्यावयव इडित्यर्थे वृत्ते नित्यत्वानुपपत्तिमूलकवाक्या-न्तरकल्पनेन केवलं तव्यबुद्धौ प्रसक्तायामिकारादिः साधुरिति बोधः। तेनात्रापि बुद्धिविपरिणाममात्रस्यैव सत्त्वेन न नित्यत्वहानिरिति भावः। यदागमा इति न्यायस्य चात्रापि पक्षे सत्त्वात् 'प्रणिदापयति' इत्यादौ न दोषः। ये त्वत्र पक्षे आगमत्वं नास्त्ये-वेति वदन्ति ते तु मान्याः, अनागमकानामित्यादिव्यवहारासङ्गतेः। निरवयवकबुद्धि-निमज्जनसावयवकबुद्ध्युन्मज्जनेनागमव्यवहारस्यापि निर्बाधत्वात्"[1] इति।

अतो महाभाष्यतत्त्वविदां विदुषां लेखदर्शनेन स्वयं विचारकरणेन चेदमत्राकूतं भवति यत् 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रे कृतेनादेशग्रहणेन तन्मूलकस्यास्य वाक्यस्य—'आदेशमात्रं स्थानिवद् यथा स्यात्' इत्यस्य सत्त्वेऽपि नहि तत्प्रामाण्य-प्रभावादागमस्थलीयादेशानां तेनैव सूत्रेण कार्यसिद्धौ वैयर्थ्यं तत्रत्यकार्यनिर्वाहिकायाः-'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इत्यस्याः परिभाषाया इति। अत आपा-ततो भाष्यविरोधः कामं प्रतिभासतां नाम, नहि तत्रास्माकं प्रद्वेषः, किन्तु सम्यग्विचारे कृते सति न कस्यापि वचसः—'आदेशमात्रं स्थानिवद् यथा स्यात्' इत्यस्य वा 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यन्ते' इत्येतन्महाभाष्यवाक्यफलीभूतायाः "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इत्यस्या वा वैयर्थ्यम्, फलबलकल्प्य-स्वभावत्वेन फलस्य सत्त्वादवश्यं मन्तव्यत्वात्।

इदानीमिदं विचार्यते यदागमस्थलीयस्थान्यादेशभावे—'स्थानिवदादेशोऽन ल्विधौ' इति सूत्रप्रवृत्तिसत्त्वे—'अपिबत्' इत्यादिप्रयोगेषु दोषापत्तिर्भवति ततो हेतो-स्तस्या केवलानुमानिकसंज्ञाप्रदानेन तत्र स्थानिवत्सूत्रस्याप्रवृत्तिः कल्पिता। अस्याञ्च व्यवस्थायां जातायां सत्याम् 'प्रणिदापयति इत्यादावपि न स्थानिवत्सूत्रप्रवृत्तिरिति कृत्वा स्वीकृताया अनेकफलोपबृंहिताया महाभाष्यकृता शब्दतस्तु—'अर्थवतो ह्यागमस्तद्-गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्येवंरूपेण, अर्थतस्तु—'यदागमास्तद्गुणीभूतास्तद्ग्रह-णेन गृह्यन्ते' इत्येवंस्वरूपायाः सर्वैर्वैयाकरणैः प्रमाणत्वेन स्वीकृताया बहुशो व्याख्यातायाः परिभाषायाः स्थितिर्व्यवस्थीयते। किन्तु समालोचनीयमिदं वर्तते यत् 'अपिबत्' इत्यादौ लावस्थायामटि सति तत्र स्थानिवत्सूत्रप्रवृत्तौ यथा दोषापत्ति-स्तथैव—'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषायाः प्रवृत्तौ दोषः स्पष्ट एव। तथाहि—'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमन-

---

१. 'दधाघ्वदाप्' इति सूत्रे उद्द्योते।

यच्छपश्यच्र्छद्यौशीयसीदाः'[1] इति सूत्रेण बोधितस्यागमिनः पाशब्दस्य ग्रहणेनागमविशिष्टस्य 'अपा' इत्यस्यापि शब्दस्य ग्रहणं स्यादेव। तथा च लावस्थामटि सति यथा पिबादेशापत्तिरापाद्यते तत्र स्थानिवत्सूत्रप्रवृत्तौतथैव यदागमपरिभाषासत्त्वेऽपि दोषो वज्रलेपायित एव।

तथा च द्वयोः पक्षयोर्दोषदुष्टत्वाविशेषात्—

ययोरेव समो दोषः परिहारस्तयोः समः।
नैकः पर्यनुयोक्तव्यः समानार्थविचारणे॥

इति न्यायेन स्थानिवत्सूत्रस्य परमावश्यकत्वात्तस्य प्रवृत्तिरस्तु दोषवारणायोपायचिन्ता विधेया। अनागमस्थलीयादेशस्य स्थानिवृत्तिधर्मलाभाय 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रमावश्यकमेव। तथा चागमस्थलातिरिक्तस्थलीयादेशस्थले फलबलादवश्यमङ्गीकर्तव्यत्वेन प्रसिद्धस्य स्थानिवत्सूत्रस्यागमस्थलेऽपि प्रवृत्तिरस्तु। अपिबदित्यादिद्वित्रप्रयोगेषु दोषवारणचिन्ता विधेया। यतो हि स्वीकृतायामप्यस्याम्—'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इत्यस्यां परिभाषायां तत्र दोषा आपतन्त्येव। तर्हि परिभाषास्वीकारपक्षे यथा तत्र दोषवारणम्, तथैव परिभाषामस्वीकृत्य स्थानिवत्सूत्रे प्रवृत्तेरपि दोषवारणं भवितुमर्हत्येव। एवञ्च यथा प्रणिदापयतीत्यादौ णत्वोपपत्तये आगमविशिष्टस्य स्थानिग्रहणेन ग्रहणे तत्रापि च स्थानिवत्सूत्रप्रवृत्तौ न दोषः किन्तु 'अपिबद् इत्यादौ दोषः।

तथैव यदागमपरिभाषास्वीकारेऽपि दोषो विद्यत एवेति कथं तत्रत्यदोषवारणमिति चेत् अत्रोच्यते। अनियमे नियमकारिण्यो भवन्ति परिभाषा इति हि विद्यते वैयाकरणानांसंकेतः। अर्थादिष्टस्थलसङ्ग्रहपुरःसरमनिष्टस्थव्यावृत्तिस्तासां परिभाषाणां फलम्। इत्थञ्च—प्रणिदापयतीत्यादीष्टप्रयोगसङ्ग्रहाय यदागमपरिभाषासङ्ग्रहः। किन्तु परिभाषायामस्यां जागरूकायां सत्याम्—'उदस्थात्', 'अपिबत्' इत्यादावागमविशिष्टानां शब्दानां तिष्ठपिबाद्यादेशाः प्रसक्ता इति तद्वारणाय—'निर्दिश्यमानस्यादेशा भवन्ति'[2] इति परिभाषा स्वीकृता। तथा च सति 'अपिबत्' इत्यत्र 'अपा' इत्यस्य निर्दिश्यमानत्वाभावेन पिबादेशभाव इति न दोषशङ्कावकाशः। अतो न यदागमपरिभाषास्वीकारे दोषः। ते चादेशा यदागमपरिभाषाया अस्वीकारे न कथञ्चिदपि प्रतिरोद्धुं शक्याः। अतः कदापि—'आदेशमात्रं स्थानिवद् यथा स्यात्'[3] इत्येतद्वाक्यमात्रेण सर्वत्र कार्यसिद्धिप्रत्याशा नूनं घोरतमसा तमोनिनीषेव प्रतिभाति।

---

१. पा० सू०—७।३।७८।

२. परिभाषेन्दुशेखरे—१३ परिभाषा।

३. महाभाष्ये स्थान्रेनिसूवः।

अत्रेदं विचार्यते, यथा--'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इत्यस्याः परिभाषायाः सत्तायां विद्यमानायामपि 'अपिबत्' इत्यादिप्रयोगेषु प्राप्तस्यानिष्टरूपस्य वारणाय—'निर्दिश्यमानस्यादेशा भवन्ति'[१] इति परिभाषा समर्था। तथा च न दोषप्रसक्तिः। तथैव तुल्यवित्तिवेद्यन्यायेन—'ययोरेव समो दोषः परिहारस्तयोः समः' इति न्यायेन च 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रस्य प्रवृत्तौ सत्यामपि तया दोषवारणसमर्थया निर्दिश्यमानपरिभाषया दोषदलदलनसम्भवाद् वृथैव यदागमपरिभाषापरिरक्षणप्रयासेनेति चेत्, अत्रेदमुत्तरम्—यदागमपरिभाषासत्त्वे तस्या लक्ष्यं व्यावर्तकबुद्ध्या 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषा विषयीकरोति। तदभावे तस्या। लक्ष्ये च स्थानिवत्सूत्रप्रवृत्तिस्वीकारे सा व्यवस्था न शक्या, तथा सति भाष्यविरोधात् अत एव नागेशभट्टेन परिभाषेन्दुशेखरे प्रोक्तम्--"स्थानिवत्सूत्रे च नेदृशादेशग्रहणम्, साक्षादष्टाध्यायीबोधितस्थान्यादेशभावे चारितार्थ्यात्।

किञ्चैवं सति स्थानिबुद्ध्यैव कार्यप्रवृत्त्या—'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषाया अप्राप्त्या अडागमसहितस्य पिबादेशापत्त्या लावस्थायामडिति भाष्योक्तसिद्धान्तासङ्गतिः। स्थानिवद्भावविषये निर्दिश्यमानस्येति परिभाषायाः प्रवृत्तौ 'तिसृणाम्' इत्यत्र परत्वात्तिस्रादेशे स्थानिवद्भावेन त्रयादेशमाशङ्क्य सकृद्गतिन्यायेन समाधानपरभाष्यासङ्गतेः'[२] इति।

अत्रायं विशेषः--परिभाषेन्दुशेखरे नागेशभट्टेन विदुषा यया युक्त्या स्थानिवद्भावविषये 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषायः प्रवृत्तौ दोषः प्रदर्शितः, सा तु युक्तिः समीचीना, किन्तु तत्र प्रमाणत्वेन प्रदर्शितभाष्यांशप्रदर्शनं न युक्तम्। तथाहि—तत्र परिभाषेन्दुशेखरे स्थानिवत्सूत्रविषये 'निर्दिश्यमानस्यादेशा भवन्ति' इत्यस्याः परिभाषायाः प्रवृत्तौ सत्यां भाष्यानुपपत्तिः प्रदर्शिता। यदि हि तत्रापि तस्याः परिभाषायाः प्रवृत्तिः स्यात, तदा परत्वात् त्रिस्थाने त्रयादेशं बाधित्वा पुनः स्थानिवद्भावेन त्रिशब्दबुद्धौ त्रयादेशमाशङ्क्य 'सकृद्गतौ यद्बाधितं तद्बाधितमेवेति न्यायेन समाहितं तत्सर्वमसङ्गतं भवेत्, यतो हि तत्र प्राप्तिरेव नास्ति त्रयादेशस्य। यतो हि षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयत्वं निर्दिश्यमानत्वं भवति। तिस्रादेशे जाते पुनः स्थानिवद्भावेन त्रयादेशकरणावसरे द्वितीया या त्रिशब्दत्वबुद्धिः, सा न निर्दिश्यमानत्वप्रयोजिका, प्राथमिकोपस्थितिस्तत्रापेक्षणात्। अयमेवाशयः परिभाषेन्दुशेखरे प्रतिपादितग्रन्थस्य।

ननूपायस्योपायान्तरादोषादिति न्यायेन सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायेन त्रयादेशशङ्कासमाधानं कृतम्। यद्यपि निर्दिश्यमानस्यादेशा

१. परिभाषेन्दुशेखरे परिभाषा १३।

२. परिभाषेन्दुशेखरे यदागमपरिभाषाव्याख्याने।

भवन्तीति परिभाषयापि वारणं सम्भवति तथापि समाधानान्तरस्यापि समालम्बने दोषाभावान्नात्र तद्भाष्यप्रामाण्येन स्थानिवद्भावविषये निर्दिश्यमानपरिभाषायाः प्रवृत्तिर्निरोधव्या। इत्थञ्च तयैव परिभाषया स्थानिवद्भावविषये प्रसक्तान् दोषान् निवारयितुं यदा शक्नुमस्तदा किमर्थं यदागमपरिभाषा मन्तव्या? सिध्यतु नाम प्रयोगराशिः केवलम्—'आदेशमात्रं स्थानिवद् यथा स्यात्' इति भाष्यवाक्येनैव। प्रसक्ताश्च दोषावारिताः स्युर्निर्दिश्यमानस्यादेशा भवन्तीत्यनया परिभाषयेति चेन्न, पूर्वपक्षस्यैवासङ्गतेः। तथाहि—'उपायस्योपायान्तरादोषात्' इति हि न्यायो न प्रकृते युज्यते, यतो हि यदि 'निर्दिश्यमानस्यादेशाभवन्तिइति' परिभाषया वा 'वार्यतां सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवइति' न्यायेन वा निवार्यतां न कश्चन विशेषो भवतीति कथनस्य तात्रावसरः।

निर्दिश्यमानपरिभाषा हि यदागमपरिभाषाविषये न प्रवर्तते इत्यस्यायं भावो यत् संग्राहकबुद्धया न प्रवर्तते, व्यावर्तकबुद्धया तु प्रवर्तते एव। अन्यथाऽगम-विशिष्टस्यागमिग्रहणेन ग्रहणात् तेषु 'अपिबत्' 'उदस्थात्' इत्यादिप्रयोगेषु का गतिः स्यात्? अतो यदागमस्थलेऽन्या स्थितिः। स्थानिवत्सूत्रे तु सङ्ग्रहकबुद्धयैव निर्दिश्य-मानपरिभाषा प्रवर्तते। यदि हि सङ्ग्राहकबुद्धया न प्रवर्तेत तर्हि त्रयादेशात्परत्वेन तिस्रादेशे सम्पन्ने सति स्थानिवद्भावेन त्रयादेशापत्तिरेव न स्यात्। दर्शिता च भगवता महाभाष्यकृता। प्राप्तिं प्रदर्श्य—'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'[1] इति परिभाषया त्रयादेशो वारितोऽपि। अयं सर्वोऽपि भाष्यग्रन्थोऽनुप-पन्नो भवेद् यदि यदागमपरिभाषास्थलमिवात्रापि स्थानिवत्सूत्रे निर्दिश्यमानपरिभाषा-व्यावर्तकबुद्धया प्रवर्तेत इत्याशयो नागेशभट्टानां परिभाषेन्दुशेखरे। अत्र प्रकरण-प्राप्तत्वाद्विषयोऽयमतिचर्चितः, स्मृतत्वे सत्युपेक्षानर्हत्वलक्षणसङ्गतेः सत्त्वात्। अतः कथमपि तत्रोपायस्योपायान्तरादोषादिति न्यायस्यावसर एव नास्ति। यद्यप्यापात-तोऽत्र प्रतिभाति यत्तेन न्यायेन तत्रत्यदोषवारणसम्भवाद् यदागमपरिभाषाया अभावे-ऽपि दोषाभावेन मास्तु परिभाषा विराजताञ्चैकमेवेदं वाक्यं प्रमाणभूतम्—'आदेश-मात्रं स्थानिवद् यथा स्यात्' इति। तेनैव सर्वप्रयोगोपपत्तौ सत्यां नावश्यमङ्गीकार्या यदागमपरिभाषेति। किन्तु सम्यग् रूपेण तत्रत्यस्थलविचारे कृते सति सर्वोऽपि पक्षो-ऽयं प्रखञ्जनप्रभिन्नवारिदपटलमिव सर्वथैवादृश्यो भवति। उपायस्योपायान्तरादोषा-दिति न्यायस्य तत्राप्रसक्तेः। यदागमपरिभाषापेक्षया स्थानिवत्सूत्रप्रवृत्तेर्महाविपरीत-त्वात्। यथा च वैपरीत्यं वैजात्यं तथानुपदमेवोपपादितमिति न तदर्थमितोऽधिकविदा वेदयितुं शक्यते।

इत्थञ्च गुणदोषविचारकरणेन फलाफलविचारकरणेन ग्रन्थविमर्शेन चेदमायातं

---

१. परिभाषेन्दुशेखरे परिभाषा, ४०।

यत्—'आदेशमात्रं स्थानिवद् यथा स्यात्'[1] इति महाभाष्यवाक्यस्य 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रे गृहीतादेशपदवैयर्थ्यमूलकस्यानुमानिकस्थान्यादेशभावे प्रवृत्तौ सत्यामपि न केवलानुमानिके प्रवृत्तिरिति। आगमस्थलीय एव स्थान्यादेशभावः केवलानुमानिकपदेनाभिप्रेतः। अत एव परिभाषेन्दुशेखरे यदागमपरिभाषाव्याख्यानावसाने नागेशभट्टेन विदुषा स्पष्टीकृतं यत् स्थानिवत्सूत्रे गृहीतादेशपदसामर्थ्येन 'एरुः' इत्यादिस्थानषष्ठीनिर्देशबलेन तदन्तपरकवाक्यस्यैव स्थानिवत्सूत्रेण ग्रहणमिति। तथा चोक्तं तत्र—'एरुः' इत्यादौ षष्ठीनिर्देशात् तदन्तपरतया पठितवाक्यस्यैव समुदायादेशपरत्वेनादेशग्रहणसामर्थ्यात्तस्य स्थानिवत्सूत्रे ग्रहणे न दोष इति।

मन्ये यत् सागमकादेशस्थले स्थातिवत्सूत्रापत्तिभियैव 'स्थानिवत्सूत्रभाष्ये—'एकदेशविकृतस्योपसंख्यानं चोदयिष्यति तन्न वक्तव्यं भवति' इत्येवोक्तम्। न तु यदागमपरिभाषा न वक्तव्या भवतीति प्रोक्तम्। अस्या उक्तेरुपलक्षणत्वस्वीकारेण यदागमपरिभाषाविषयेऽपि स्थानिवत्सूत्रप्रवृत्तौ स्वीकृतायां सत्यां पूर्वोक्तो दोषो बोध्यः। स च 'अपिबत्' 'उदतिष्ठत्' इत्यादिप्रयोगस्थलेषु सम्पूर्णस्याडागमविशिष्टस्य पिबादेश-तिष्ठादेशापत्तिरूपः।

अत्रेदं समालोच्यते—भाष्यवचनप्रामाण्येन सङ्कोचाभावेन सर्वविधादेशस्थले स्थानिवत्सूत्रप्रवृत्तौ स्वीकृतायां सत्यां यत्र च सूत्रस्थादेशपदमूलकमहाभाष्यवाक्यमेव मूलं वर्तते—'आदेशमात्रं स्थानिवद् यथा स्यात्'[2] इति महान् दोषः समापतति। क्व दोषः ? 'अपिबत् उदतिष्ठत्' 'उदस्थात्' इत्यादिस्थलेषु। अतस्तादृश उपायः प्रत्यूहितो येन भाष्यवाक्यप्रामाण्यमपि रक्षितं भवेत्, दोषा अपि न स्युः। स चोपायः साक्षाच्छ्रुतस्थान्यादेशस्थले आनुमानिके च स्थानिवत्सूत्रप्रवृत्तिः, न केवलानुमानिके इत्येवं व्यवस्थारूपः। केवलानुमानिकशब्देन चागमस्थलीयस्थान्यादेशभावस्य ग्रहणम्। तथा च—'आदेशमात्रं स्थानिवद् यथा स्यात्' इत्यनेन भाष्यवाक्येनानुमानिकस्यैव एरुः' इत्यादेः स्थान्यादेशभावस्य ग्रहणम्। तदग्रहणे पदत्वादिसिद्धिर्न स्यात्। आगमस्थलीयस्थान्यादेशभावस्थले तु न स्थानिवत्सूत्रप्रवृत्तिः। तथा च यदागमन्यायपरिरक्षामूलकप्रदर्शितदोषप्रसक्त्यभावोऽपि भवति, भाष्यमपि आञ्जस्येन प्रामाण्यं भजते। तथा च न कोऽपि दोष इति प्रघट्टकार्थः। किन्तु येषां दोषाणां निराकरणाय यदागमपरिभाषा स्वीक्रियते, महाभाष्यवाक्यस्य चास्य—'आदेशमात्रं स्थानिवद् यथा स्यात्' इत्यस्य सङ्कुचितार्थकत्वं व्यवस्थाप्यते। तेषां दोषाणामन्येनैवोपायेन व्याकरणशास्त्रे प्रयोगान्तरसाधुत्वाय स्वीकृतेन वारणे सिद्धे एतद्द्वयमपि परिभाषास्वीकरणरूपगौरवं महाभाष्यवाक्यस्य सङ्कुचितार्थकत्वञ्च करणीयं भवति। प्रवर्ततां नाम महाभाष्यवाक्यप्रामाण्येन स्थानिवत्सूत्रं सर्वत्र, का क्षतिः।

१. महाभाष्यम् १।१।५६।

२. महाभाष्यम् १।१।५६।

ननु—'अपिबत्, उदतिष्ठत्, उदस्थात्' इत्यादिस्थलेषु दोषप्रदर्शनात् कथमुच्यते दोषनिरास इति चेन्न, उपायान्तरेण वारणस्य शक्यत्वात्। कः स उपाय इति चेत्तर्हि श्रूयतां व्याकरणशास्त्रपरिबोधित उपायः वर्तते किल कश्चन विलक्षणो नियमो व्याकरणशास्त्रे यच्छब्दसाधुत्वसाधनमेव व्याकरणस्य मुख्यं प्रयोजनम्। यत्र च क्वचन साधुत्वायानुष्ठितस्योपायस्यान्यातिप्रसञ्जकत्वं भवति, तत्र—'अनियमे नियमकारिण्यः परिभाषाः प्रवर्तन्ते' इति। अतः सर्वत्र स्थान्यादेशभावस्थले 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रस्य प्रवृत्तिस्वीकारे बहुत्र प्रयोगेषु साधुत्वोपपत्तावपि 'रामाय पचतु' इत्यादौ दोषा अपि प्रसक्ता भवन्ति यदा 'अपिबत्, उदस्थात्' इत्यादौ तथा पूर्वोक्तनियमानुसारेण 'अनियमे नियमकारित्वं परिभाषात्वम्' इत्यनेन प्रवर्तते किल प्रकृते 'असिद्धं बहिरङ्गमन्तरङ्गे'[1] इति। तयैव परिभाषया प्रसक्ता दोषा वारयितुं शक्यन्ते, पुनः किमर्थं यदागमपरिभाषा मान्या लाघवप्रियैर्वैयाकरणैरिति प्रश्नो जागरूको भवति।

'असिद्धं बहिरङ्गमन्तरङ्गे' इतीयं परिभाषा तु बाध्यबाधकभावोपपत्तयेऽङ्गीकार्यैव। तदैव तु वचनमप्येतत्प्रामाण्यं परिचुम्बति 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः'[2] इति।

इत्थञ्च—जातबहिरङ्गस्य समकालिकबहिरङ्गस्य च बाधनायान्तरङ्गपरिभाषा मन्तव्यैव। जातबहिरङ्गस्य 'पचावेदम्' इत्युदाहरणम्, समकालप्राप्तिकस्य 'उञ्छति' इत्यादि।

एवमेव भाष्येऽपि 'अचः परस्मिन् पूर्वविधौ'[3] इत्यत्र 'कत्र्यर्था हत्र्यर्था' इत्युदाहृतमुदाहरणं बोध्यम्। तथा च तत्र तत्र साधुत्वोपपादनार्थमङ्गीकृतया तया 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनया परिभाषया सकलदोषनिरासासम्भवे किमर्थं, 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति परिभाषा स्वीकार्येति प्रश्नस्तदवस्थप्राय एव भवति।

इत्थञ्च तस्या यदागमपरिभाषाया वैयर्थ्यापादने यत्किञ्चिज्ज्ञातं प्रदर्श्यते। तथाहि—काममपिबदित्यत्र केवलं पाधातोः पिबादेशः क्रियताम् 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया। तत्र परिभाषाप्रवृत्तिनिमित्तस्यान्तरङ्गत्वस्य-बहिरङ्गत्वस्य च विद्यमानत्वेन दोषाभावात्। अन्तर्भूतनिमित्तकत्वमन्तरङ्गत्वमित्यस्यांशस्य 'अपा' घटके पाशब्दे विद्यमानत्वेन तस्यैव च पिबादेशस्येष्टत्वेनान्तरङ्गत्वेन च दोषाभावात्। किन्तु नहि तयैव परिभाषया सर्वत्र कार्यनिर्वाहः शक्यशङ्कः, यतो हि 'उदस्थात्' इत्यादिप्रयोगेषु विना 'यदागमपरिभाषां दोष-

१. परिभाषेन्दुशेखरे परिभाषा, ५०।

२. परिभाषेन्दुशेखरे द्वितीयप्रकरणे परिभाषा ३८।

३. पा० सू०—१।१।५७।

निवृत्तिरशक्या। 'असिद्धं बहिरङ्गमन्तरङ्गे'[1] इत्यनया परिभाषया नात्र कार्यसिद्धिः शक्या कुतः ? इति चेत्तर्हि वेदितव्यं तत्र तत्त्वमिदम्। अपिबदित्यत्रान्या स्थितिः, उदस्थादित्यत्र चान्या। तत्रापिबदित्यत्राडागमस्य पिबादेशेऽनपेक्षितत्वात् पामात्रस्यैवापेक्षितत्वात् प्रभवति तत्रान्तरङ्गपरिभाषा नूनमपेक्षितया मात्रांशग्रहणेऽनिष्टांशपरित्यागे च। किन्तु 'उदस्थाद् इत्यत्र च विपरीतमेव वर्तते। तत्र हि—'उदःस्थास्तम्भोः पूर्वस्य'[2] इति सूत्रेण उदः परस्य स्थास्तम्भोः पूर्वरूपं विधीयते। तथा चोदव्यवहितपरत्व-विशिष्टांशस्याडागमविशिष्टे सत्त्वेनान्तर्भूतनिमित्तकत्वादडागमविशिष्टस्य पूर्वरूपापत्तिः स्यात्, अतो नान्तरङ्गपरिभाषया निर्वाहः।

न च स्वीकृतायामपि यदागमपरिभाषायां कुतो न तत्र पूर्वरूपत्वापत्तिरिति वाच्यम्, तया परिभाषयाऽऽगमविशिष्टस्य स्थात्वेन ग्राह्यापत्तौ सत्यामपि 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषया वारणात्। अनया हि परिभाषया प्रथमोपस्थितस्य षष्ठीप्रकृतिजन्योपस्थितिविषयस्य स्थाने आदेशो भवतीति नियमः क्रियते। तथा च यदागमपरिभाषाबलाद् द्वितीयोपस्थितिरिति हेतोर्नहि तया परिभाषयातिदेशेन प्राप्तस्य स्थानिनोऽत्र ग्रहणमिति न दोषसम्भावना। अत एव परिभाषेन्दुशेखरे यदागमपरिभाषाव्याख्यानानन्तरं दोषमापाद्य पुनर्निराकरणं नागेशभट्टेन कृतम्। तथा हि—'नन्वेवम् उदस्थादित्यादौ स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णापत्तिः, अत आह—'निर्दिश्यमानस्यादेशा भवन्ति'[3] इति।

ननु मास्तु यदागमपरिभाषा, मास्तु च तद्विषयनिवर्तनाय 'निर्दिश्यमानस्यादेशा भवन्ति' इति परिभाषा, उदस्थादित्यत्र च न दोषः। यतो हि नहि केवलम्—उतः परत्वमात्रेण स्थास्तम्भोः पूर्वसवर्णत्वम्, किन्तु उतोऽव्यवहितपरत्वे सत्येव तयोः पूर्वसवर्णत्वं शास्त्रानुमतम्। वर्तते हि 'तस्मादित्युत्तरस्य'[4] इति परिभाषाऽनियमे नियमकारिणी। तस्मिन् परिभाषासूत्रे विद्यमाने क्वातिप्रसक्तिसन्देहोऽपि ? यतो हि—उदस्थादित्यत्र उतोऽव्यवहितत्वं नास्त्येव स्थाधातोः, अडागमेनाव्यवहितत्वरूपनिमित्तनिवर्तनात्। अकारव्यवधाने सति तद्विपरीतस्याव्यवहितत्वस्य निवृत्तेः। तथा चौदव्यवहितोत्तरत्वविशिष्टस्य स्थाधातोः पूर्वसवर्णः साधुरित्याकारकार्थासङ्घटनान्नात्र दोषप्रसक्तिरिति चेन्न, भावानवबोधात्।

अपिबदित्यत्रत्यदोषवारणाय समाश्रितया 'असिद्धं बहिरङ्गमन्तरङ्गे'[5] इत्यनया परिभाषया उदस्थादित्यत्रत्यो दोषो वारयितुं न शक्यः। यतो हि तत्र

---

१. परिभाषेन्दुशेखरे परिभाषा ५१।

२. पा० सू०—८।४।६१।

३. परिभाषेन्दुशेखरे प्रथमप्रकरणे परिभाषा १२ भूतियुक्ते ६० पृष्ठे।

४. पा० सू०—१।१।६७।

५. परिभाषेन्दुशेखरे परिभाषा ५१।

परिभाषामिमामाश्रित्यागमविशिष्टस्य पूर्वरूपत्वं वारयितुं न शक्येत, प्रत्युत विपरीतमेव प्रसज्येत।

यत्तु प्रोक्तं सूत्रार्थो न संघटते' अतो न पूर्वरूपापत्तिः, अडागमेन व्यवधानादिति तन्न, अन्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धत्वेऽपिकृतेऽसिद्धत्वाभावात्। अन्तरङ्गे कर्तव्येऽडागमे पूर्वरूपस्यासिद्धत्वेऽपि कृते सिद्धत्वेन तद्विशिष्टस्य पूर्वरूपत्वापत्तिः। न चैवमपिबदित्यत्रापि दोषस्तदवस्थ एवेति वाच्यम्, अत एव तु यदागमपरिभाषा ? निदश्यमानपरिभाषा च स्वीकृतेति दोषाभावात्। अन्तरङ्गपरिभाषया दोषवारण प्रकारेऽनुमतिस्तु कृत्वाचिन्तान्यायेन प्रदर्शिता, न मनसेति न दोषः।

अत्र यत्किञ्चित् प्रतिभातं तद् यथामति लिखितम्। अधिकं तु तत्र तत्र द्रष्टव्यं कल्पनीयञ्च व्याकरणशास्त्रसरोवरे कृतावगाहनैर्जनैः।

यद्यपि कञ्चिन्नियममाश्रित्य सूत्रं वा काचित् परिभाषा वा सूक्ष्मसूक्ष्मतरपरिष्काराविष्कारेण गतार्थयितुं शक्या, तथापि 'न तत्रासूया कर्तव्या यत्रानुगमः क्रियते' इति न्यायेन साक्षाच्छास्त्रबाधो वा परिभाषाबाधो वा न युक्त इति धिया अस्याः परिभाषायाः 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' इत्यस्याः परिरक्षणाय कृतो मया यत्नः। पूर्वाचार्यैरपि नागेशभट्टप्रभृतिभिर्मन्ये पूर्वोक्तं हेतुमेवाकलय्य परिभाषाया अस्याः रक्षणाय कृतो महान् यत्न इति।

१२. 'तिसृणां संज्ञानां करणसामर्थ्यात्'

इदं हि भाष्यवाक्यं भगवता महाभाष्यकृता—'ऊकालोऽज्झ्रस्वदीर्घप्लुतः'[1] इति सूत्रे हेतुतया प्रयुक्तम्। तत्र हि भाष्ये—'ह्रस्वादिषु समसङ्ख्याऽप्रसिद्धिः' इति वार्त्तिकेन—'ह्रस्वादिषु समसंख्यात्वस्याप्रसिद्धः, किं कारणं निर्देशवैषम्यात्। तिस्रः संज्ञा एकः संज्ञी। वैषम्यात् संख्यातानुदेशो न प्राप्नोति' इति वार्त्तिकव्याख्यानभूतभाष्येण च सूत्रे समागतामनुपपत्ति वारयितुं—'सिद्धन्तु समसंख्यातत्वात्' इति वचनं प्रयुक्तम्। प्रयुक्तस्य च तस्य वाक्यस्यार्थसंसाधनाय—'कथं समसंख्यत्वम्' इति शङ्कापुरःसरं 'त्रयाणां विकारनिर्देशः' इति वार्त्तिकेन, 'त्रयाणां प्रश्लिष्टनिर्देशः' इति भाष्येण च दोषवारणाय प्रतिज्ञा कृता। किन्तु सा न सङ्गता भवति। यतो हि वाक्यार्थबोधस्य विद्यते काचन मर्यादा। सा चेयं यत् योग्यताकांक्षासत्तितात्पर्यज्ञानं हेतुरिति। योग्यता चार्थाबाधरूपा। प्रकृते च बाधो विद्यते। प्रमाणान्तरेण विपरीतार्थनिश्चयस्यैव बाधत्वादत्र प्रत्यक्षेण श्रावणात्मकेन केवलं दीर्घ ऊकारो विषयीक्रियते। तथा चोक्तं कैयटेन—'प्रत्यक्षेणैकस्यैव शब्दस्य श्रवणाद् भेदावगमे प्रमाणाभाव इति भावः', इति। उक्तञ्च भाष्यकृता 'त्रयाणामयं प्रश्लिष्टनिर्देशः', इति तथा च नादमात्रमेवेदं वाक्यं स्यात् न तु प्रमापर्यवसायीति प्राप्ततदभिप्रायवान् एव

१. पा० सू०—१।२।२७।

महाभाष्यकारः शङ्कामुत्थापितवान्—'कथं पुनर्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देशः[1]' इति। अस्या जिज्ञासायाः समाधानाय नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः, किन्तु प्रामणेनेति तात्पर्यादुत्तरमुक्तम्—'तिसृणां संज्ञानां करणसामर्थ्यात्' इति। अयमेवास्य वाक्यस्य भाष्यस्थस्यावतारप्रकारः।

अयं भावः—यदि संज्ञिनो भिन्ना न स्युः, तर्हि संज्ञा कथं भिन्ना स्यात्? एवञ्च तिसृणां संज्ञानां प्रत्यक्षतः श्रवणात् कल्प्यते यत्संज्ञिनोऽपि भिन्ना एव। अर्थापत्तिप्रमाणस्य सर्वबलवत्त्वादत्र संज्ञिनामपि त्रयाणां कल्पना क्रियते। यथा हि दिवाऽभुञ्जानस्य पीनत्वं रात्रिभोजनं विनाऽनुपपन्नं रात्रिभोजनं कल्पयति, तथैव संज्ञिनां बहुत्वं विनाऽनुपपन्नाः तिस्रः संज्ञाः संज्ञिनामपि त्रित्वं कल्पयन्ति। अर्थापत्ति-प्रमाणस्य विवादग्रस्तत्वात् तत्पूर्वस्यानुमानस्य च द्वयोर्मान्यत्वात् 'तिसृणां संज्ञानां करणसामर्थ्यात्' इति भाष्यवचनस्य हेतुपरकत्वमङ्गीकृत्य पञ्चावयवात्मकवाक्य-कदम्बस्य न्यायपदवाच्यत्वादत्र प्रयोगं परिदर्शितवन्तो भवन्तो नागेशभट्टमहोदयाः—'विमताः संज्ञाभिन्नसंज्ञिविषया नानासंज्ञात्वादिति'[2] इति।

समीचीना किल शाब्दिकशिरोमणीनां पद्धतिरियम्, यतो हि विना प्रमाणो-पन्यासं कस्यापि वस्तुनः सिद्धिं नैव मन्यन्ते प्रामाणिकाः, अन्यथातिप्रसङ्गात्। अत एव तत्र तत्र शास्त्रकारैः सप्तमरसस्यापि सिद्ध्यापत्तिः परिदर्शिता। तथा चोक्तं श्रीश्री-हर्षमिश्रैः खण्डनखण्डखाद्ये—

'घटसत्तां हि व्यवहरता प्रामाणिकेन प्रमाणसद्भावो वाच्यः। यदि प्रमाण-मनुपन्यस्य साऽस्तीत्येवमङ्गीक्रियते, तदा वैपरीत्यमेव किन्न स्यात्। ततश्च घटसत्तायां प्रमाणसत्ता दर्शनीया। तथा च प्रमाणसत्तापि तत्प्रमाणसत्तामन्तरेण प्रामाणिकस्य नाङ्गीकारार्हा, सर्वप्रमाणसत्तानिवृत्तेर्वस्तुसत्तानिवृत्तिनियतत्वात्, अन्यथा सप्तम-रसादेरप्यापत्तेः' इति।[3]

तस्य खण्डनखण्डखाद्यग्रन्थप्रघट्टकस्यायमेवाशयो यद् यस्य वस्तुनो यत्र प्रमाणसामान्याविषयत्वं तस्य तत्रासत्त्वमिति यथा षड्रसातिरिक्ते रसत्वम्। इत्थञ्च यदि तत्र ह्रस्वदीर्घप्लुतसंज्ञानां तिसृणां संज्ञिबहुत्वसाधनाय प्रमाणं नोपन्यस्यते, तर्हि तेषां भेदो न सिद्ध्येत। यतो हि विशेषप्रमाणोपन्यासाभावे तत्प्रयोज्यप्रमाण-सामान्योपन्यासाभावापत्त्या प्रमाणसामान्याविषयत्वस्य वस्तुसत्तासामान्याभावव्याप्य-त्वाद् व्याप्यस्य व्यापकाक्षेपकत्वादत्र संज्ञिनां बहुत्वासिद्धिः स्यात्। अतोऽनुमानमत्र मानमुपदर्शितं नागेशभट्टैरुद्द्योते। प्रमाणसद्भावदर्शनाय एव कैयटेन प्रदीपे—'तिसृणां संज्ञानां करणसामर्थ्यात्' इति भाष्यव्याख्यानावसरे—'अनुमानाद् भेदावसाय इति

१. महाभाष्यम्—'ऊकालोऽज्ह्रस्वदीर्घप्लुतः इति' सूत्रे १।२।२७।

१. महाभाष्ये 'ऊकालोऽज्ह्रस्वदीर्घप्लुतः' इत्यत्रोद्द्योते।

२. खण्डनखण्डखाद्ये प्रथमपरिच्छेदे शारदायुक्ते, पृ० ५०।

भावः' इति व्याख्यातम्। तस्यैव कैयटग्रन्थस्योपपत्तये नागेशकृते उद्द्योतेऽनुमानप्रयोगः कृतः—'अनुमानादिति। अनेकसंज्ञाकरणात् संज्ञिनां शब्दतो भेदावसाय इत्यर्थः। प्रयोगस्तु—विमताः संज्ञाभिन्नसंज्ञिविषयाः, नानासंज्ञात्वादिति' इति।

अनेन प्रकारेण तिसृणां संज्ञानां करणसामर्थ्यात् पाणिनिसूत्रमूलकात् संज्ञिनां भेदमनुमापयता ह्रस्वदीर्घप्लुतसंज्ञा विहिताः। अतः 'तिसृणां संज्ञानां करण सामर्थ्यात्' इति मूलभाष्यस्थहेतुवचनस्य तन्मूलककैयटग्रन्थहेतुकोद्द्योतग्रन्थोक्तानुमाने प्रयुक्तस्य च।

'नानासंज्ञात्वात्' इत्यस्य निर्दुष्टत्वं विचार्यते। तत्र यत्र यत्र नानासंज्ञात्वं तत्र तत्र भिन्नसंज्ञिविषयत्वं नास्ति। तथा हि एकस्यैवैकमात्रिकस्याकारस्य ह्रस्वसंज्ञा, लघुसंज्ञा संयोगपरकत्वे च गुरुसंज्ञा विधीयन्ते। न च तत्र भिन्नसंज्ञिविषयत्वम्। यदि च प्रत्युच्चारणं शब्दा भिद्यन्ते इति पद्धतिमाश्रित्य प्रोच्यते, तर्हि प्रकृते बाधः, एकस्यैव प्रत्युच्चारणं भिन्नत्वेन सिद्धसाधनात्। अभिप्रेतानेकसंज्ञिबाधश्चापद्येत। अतस्तत्र प्रत्युच्चारणपक्षस्त्याज्य एव भविष्यति। इत्थञ्च प्रयुक्तोऽयं हेतुर्व्यभिचारितः कथं संज्ञिनां भेदं साधयितुमर्हेत्। प्रयुक्तस्य हेतोः पञ्चहेत्वाभासशून्यस्यैव प्रकृतसाध्यसाधनक्षमत्वात्। अत एवाव्यभिरितत्वासत्प्रतिपक्षितत्वाबाधितत्वपक्षसत्त्वविपक्षासत्त्वादीनां हेतौ भवति किल सापेक्षता। तथाविधत्वाभावे तस्य दुष्टत्वेन तथास्थितावपि प्रयोगे वादिनोऽप्रामाणिकत्वं पराजयो निग्रहस्थानादिकञ्च भवन्ति। प्रकृते प्रयुक्तोऽयं हेतुरकारादौ कृतानां तिसृणां ह्रस्वलघुसंयोगसंज्ञानां सत्त्वेऽपि संज्ञिभेदाभावेन व्यभिचरित इति।

अपि च सुऔजस्प्रभृतीनां विभक्तिसंज्ञा, प्रत्ययसंज्ञा, सुप्संज्ञा च वर्तन्ते, 'विभक्तिश्च[1]', 'प्रत्ययः[2]', 'आदिरन्त्येनसहेता[3]', 'सुपि च'[4] इति सूत्राणाञ्च प्रामाण्यात्। एवमेव कृदादिसंज्ञास्थलेऽपि व्यभिचारसत्त्वात् कथं भगवतो महाभाष्यकारस्य तदनुयायिनोर्विदुषोः कैयटनागेशयोश्चानुमानप्रयोगः प्रामाण्यभावहेतुरिति चेत् अत्र विमृश्यते। तथाहि—'तिसृणां संज्ञानां करणसामर्थ्यात्'[5] इति महाभाष्यस्थहेतुवाक्यस्य तन्मूलकस्य नागेशभट्टप्रयुक्तस्य च हेतुवाक्यस्य व्यभिचरितत्वेनापाततो यद्यपि प्रामाण्यपरिरक्षणमशक्यमिवावलोक्यते, तथापि सूक्ष्मेक्षिकया तद्विचारे नाप्रामाण्यशङ्काशङ्कुरपि मनो दुःखयति। कोऽसौ प्रकार इति चेत् तर्हि श्रूयतां यदि कुतूहलम्। यद्यपि वैयाकरणानां मते संज्ञासु प्रायो बाध्यबाधकभावो न भवतीति स्थितिः। तथा

---

१. पा० सू० १।४।१०४।
२. पा० सू० ३।१।१।
३. पा० सू० १।१।७१।
४. पा० सू० ७।३।१०२।
५. भाष्यम् 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' १।२।२७ इति सूत्रे।

दर्शितमपि स्थलमत्रैव पूर्वपक्षोपस्थापने। लोकेऽपि एकस्यैव देवदत्तादेः कतिपयाः संज्ञा दृश्यन्ते। प्रायेण संज्ञासु बाध्यबाधकभावाभावादेव—'आकडारादेका संज्ञा'[1] इति सूत्रं चरितार्थम्।

अन्यथा संज्ञासु परस्परं बाध्यबाधकभावे या पराभवेत् अथ च स्यादनवकाशा सैव संज्ञा स्यात्। पुनः सूत्रमिदं किमर्थम्? यदा च संज्ञासु प्रायेण बाध्यबाधकभावो न भवति तदा सूत्रं चरितार्थम्। सूत्रारम्भेऽपि पराया अथ चानवकाशाया एव प्राबल्यमपेक्ष्यते। अत एव मूले सिद्धान्तकौमुदीग्रन्थे भट्टोजिदीक्षितेनोक्तम्—'या परा अनवकाशा च'[2] इति। तव्यतव्यानीयरादौ कृत्कृत्यप्रत्ययसंज्ञानां समावेशदर्शनादेकस्यापि व्याकरणशास्त्रेऽनेकाः संज्ञा क्रियन्त एव परस्परमविरोधात्।

तथा च कथमत्र प्रयोगोऽयं कृतः 'विमताः संज्ञा भिन्नसंज्ञिविषया नानासंज्ञात्वादिति' इति प्रश्नो जागरूकः, तथापि समाधानकरणेनास्तमियादेव। तथाहि—अत्र हेतुदले-प्रयोजनराहित्ये सति नानासंज्ञात्वादिति हेतुस्वरूपनिरूपणेनादोषात्। तथा चेदृशः प्रयोगोऽत्र स्यात्—'विमताः संज्ञा भिन्नसंज्ञिविषया प्रयोजनराहित्ये सति नानासंज्ञात्वात्' इति।

एवञ्च सति यत्रानेकाः संज्ञाःसंज्ञी चैवस्तत्र तासां संज्ञानां फलानि भिन्नानि भिन्नानि भवन्ति। यथाहि—तव्यतव्यानीयरादौ हि एकस्य शब्दस्य या अनेकाः संज्ञाः क्रियन्ते, तासां सर्वासां प्रयोजनानि वर्तन्ते। प्रत्ययसंज्ञायाः फलमन्यत्, कृत्संज्ञायाः फलमन्यत्, कृत्यसंज्ञायाश्च फलमन्यत्। तथाहि—प्रत्ययसंज्ञाया या या संज्ञा सा सा फलवतीति नियमात्—'आद्युदात्तश्च'[3] इति सूत्रेणाद्युदात्तत्वं: फलम्। कृत्संज्ञायाश्च—'कृत्तद्धितसमासाश्च'[4] इत्यनेन प्रातिपदिकसंज्ञाफलम्। कृत्यसंज्ञायाश्च—'तयोरेव कृत्यक्तखलर्थाः'[5] इत्यनेनार्थविशेषनिर्धारणम्।

इत्थञ्च यत्र क्वापि व्याकरणशास्त्रे एकस्य शब्दस्यानेकाः संज्ञाः, तत्र फलानि भिन्नानि भिन्नानि। प्रकृते चैकस्यैव ऊकारस्य यदि तिस्रः संज्ञाः क्रियेरन्, तर्हि तस्याः फलं किञ्चिदपि नास्ति। अतो हेतुदले 'फलराहित्ये सति' इति विशेषणप्रक्षेपेण प्रसक्तनिखिलदोषनिर्वहणसत्त्वान्निःसपत्नमिदमनुमानं मानं संज्ञिभेदसाधने।

अपि च यद्यत्रैकस्यैव संज्ञिनः तिस्रः संज्ञा ह्रस्वदीर्घप्लुतरूपाः क्रियेरन्, तर्हि महान् विप्लवोऽपि स्यात्। तथाहि एकमात्रिकस्याप्यचस्तिस्रः संज्ञाः स्युः। तथा चैकमा-

---

१. पा० सू० १।४।१।

२. सिद्धान्तकौमुद्याम् 'आकडारादेकासंज्ञा' १।४।१। इति सूत्रे

३. पा० सू० ३।१।३।

४. पा० सू० १।२।४६।

५. पा० सू० ३।४।७०।

त्रिकस्य दीर्घसंज्ञायां सत्याम् 'सुपि च'[1] इति सूत्रेण विहितो दीर्घो व्यर्थः स्यात्, यतो हि एकमात्रिकस्याप्यकारस्य दीर्घसंज्ञा सिद्धैव। यदि च द्विमात्रिकस्य तिस्रः संज्ञाःतर्हि द्विमात्रिकस्याचो ह्रस्वस्यापि सत्त्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य'[2] इति सूत्रेण श्रीपम् इत्यादौ द्विमात्रिकस्य विधीयमानं ह्रस्वत्वं वैयर्थ्यमापद्यते। तथैवान्यत्रापि ज्ञेयम्।

तथा चेदमेवात्राकूतं भवति यत्—'तिसृणां संज्ञानां करणसामर्थ्यात्' इति महाभाष्यवचसोऽनेकफलमूलकस्य हेतुगर्भितस्य तन्मूलकस्य कैयटनागेशवचनयोश्च प्रामाण्यं वर्तते एव। नागेशभट्टप्रयुक्तस्य अनुमानवाक्यस्य—'विमताः संज्ञा भिन्न-संज्ञिविषयाः, नानासंज्ञात्वात्' इत्यस्य च हेतुदले फलराहित्ये सति नानासंज्ञात्वादिति परिष्कृतेन निखिलदोषदलनसम्भवादनाविलत्वमेव।

साम्प्रतमिदं विचार्यते यदत्र कृतो योऽयं प्रयोगः—विमताः संज्ञा भिन्नसंज्ञि-विषयाः प्रयोजनराहित्ये सति नानासंज्ञात्वात्' इति। तत्रान्वयिहेतुत्वं वा व्यतिरेकि-हेतुत्वं वेति? अथवा केवलव्यतिरेकि वा। भवन्ति किल अनुमानस्य तिस्रो गतयः—अन्वयि, अन्वयव्यतिरेकि, केवलव्यतिरेकि च। अन्वयि एवानुमानं केवलान्वयिपदेन व्यवह्रियते। इत्थञ्च तासु तिसृषु विधासु अत्र कः पन्थानिर्दुष्ट इति जिज्ञासा स्वाभा-विकी। तत्र जिज्ञासायां को हेतुरिति चेत्तर्हि प्रयोगे तद्विशेषसूचकप्रकाराभाव एव विज्ञेयः। 'विमताः संज्ञा भिन्नसंज्ञिविषयाः, नानासंज्ञात्वात्' इत्येव प्रयोगः कृतो नागेशभट्टेन। तथा च तत्र केवलं प्रतिज्ञाहेत्वोरेव प्रदर्शनादन्वयि वा व्यतिरेकि वेति जिज्ञासाया अनिवृत्तेराङ्क्षाक्षा जागर्ति एव।

तादृशजिज्ञासानिवर्तकसमाधानाभावेऽनुमानस्यास्य प्रामाण्यं सन्दिग्धं स्यादिति चेत्, अत्रायं विमर्शः—यद्यपि प्रतिज्ञाहेत्वोरेव तत्र प्रदर्शितत्वात् तन्मात्रेणान्वयव्यति-रेक्यादिनिर्णयोऽसम्भवस्तथापि 'अनुक्तमप्यूहति पण्डितो जनः' इत्युक्तेरत्रोहः कर्तव्यः, तथा सति सञ्जातसन्देहनिरासात्।

कथमत्रोह इति चेत् तर्हि उच्यते—द्विधा हि अनुमानं भवति, पक्षतावच्छेद-कावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्येन च। तत्र पक्षतावच्छेदकावच्छेदेन यदानुमानं प्रवर्तते तदा पक्षतावच्छेदकव्यापकत्वं विधेये भासते। विधेयञ्च साध्यं वा साध्यसंसर्गो वा भवति। पक्षतावच्छेदकसामानाधिकरण्येन प्रयोगे वाक्याकारत्वसा-म्येऽपि पक्षविशेषनिष्ठसाध्यसद्भावस्तत्संसर्गो वा भासते इति रीतिः। तत्र यदा पक्षतावच्छेदकावच्छेदेनानुमानप्रयोगः, तदा पक्षैकदेशस्यापि दृष्टान्तत्वसम्भवादिद-मनुमानमन्वयीति बोध्यम्। यथा वेदान्तग्रन्थेषु पक्षतावच्छेदकावच्छेदेन प्रयोगे पक्षैक-देशस्यापि दृष्टान्तता बहुशः उपलभ्यते।

---

१. पा० सू०, ७।३।१०२।

२. पा० सू० १।२।४७।

वेदान्तपरिभाषायां ब्रह्मभिन्ननिखिलप्रपञ्चं पक्षीकृत्य मिथ्यात्वसाधने प्रपञ्चैकदेशस्य रजतादेर्मिथ्यात्वेन दृष्टान्तता। निखिलदर्शनतत्त्वविदां श्रीमधुसूदनस्वामिनां ग्रन्थे सर्वमान्ये अद्वैतसिद्धिनाम्नि प्रपञ्चमात्रस्य पक्षत्वेऽपि पक्षैकदेशस्य रजतादेर्दृष्टान्तत्वं दरीदृश्यते। तथाहि—'ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वाद् यदेवं तदेवं यथा शुक्तिरूप्यम्'[1] इति, 'विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तिरूप्यवदिति'[2] इति। तत्रापि विवादविषयीभूतस्य सर्वस्य पक्षत्वेऽपि तदेकदेशस्य शुक्तिरूप्यस्य दृष्टान्तता परिदर्शिता। तथैव प्रकृतेऽपि 'विमताः संज्ञा भिन्नसंज्ञिविषया नानासंज्ञात्वात्' इत्यत्र पक्षैकदेशस्य द्वयोः संज्ञयोर्ग्रहणेनान्वयित्वम्। तथात्वाभावे च व्यतिरेकित्वमिति बोध्यम्। तत्रायं विशेषोऽवश्यमनुसन्धेयो यद् व्यतिरेकितासम्पादनदशायां परिष्कृत एव हेतुर्बोधव्यः। विमताः संज्ञा भिन्नसंज्ञिविषयः प्रयोजनराहित्ये सति नानासंज्ञात्वात्' इति। एवञ्च यत्र यत्र नाना संज्ञित्वाभावस्तत्र तत्र प्रयोजनराहित्ये सति नानासंज्ञात्वाभावः, यथा तव्यतव्यानीयरादिषु। तत्र यद्यपि नानासंज्ञात्वाभावोनास्ति, तथापि प्रयोजनराहित्यविशिष्टनानासंज्ञात्वाभावस्तु विद्यते एव। विशेषणाभावप्रयुक्तविशिष्टाभावाभ्युपगमात्। यदि हि केवलं यथाश्रुत एव हेतुः' 'नानासंज्ञात्वात्' इति प्रयुक्तः स्यात्, तदा तु व्यतिरेकित्वमसम्भवि स्यात्। तव्यादेः प्रत्येकं नानासंज्ञित्वाभावेऽपि नानासंज्ञात्वाभावाभावात्। व्यतिरेकित्वस्य च साध्याभावव्यापकाभावप्रतियोगिहेतुकत्वरूपत्वात्। अतोऽत्रान्वयित्वं व्यतिरेकित्वमुभयमपि प्रकारविशेषाश्रयणेनोपपादयितुं शक्यम्। अतोऽत्र भाष्यप्रयोगे तन्मूलकोद्द्योतप्रयोगे च न कश्चन दोष इति बोध्यम्।

अत्र भाष्यानुसारेण सिद्धार्थानुष्ठानरूपप्रयोजनस्य व्याकरणसाध्नत्वेन यादृशाः प्रयोगाः प्राप्यन्ते, तथैव विचारे क्रियमाणे—'ऊकालोज्झ्रस्वदीर्घप्लुतः[3]' इति सूत्रे संज्ञिनोऽपि त्रय इति सिद्धम्। तत्र उकारस्य उमेशस्मारकत्वात् स्वतन्त्रेच्छस्य मुनेर्नियन्त्रयितुमशक्यत्वात् प्रातः सूत्रप्रणयनसमये कुक्कुटरुतेनोकारमात्रसंस्कारस्योद्बोधाच्च सूत्रे उद्देश्यत्वेन गृहीतत्वेऽपि तन्मात्रासदृशमात्रावन्तोऽन्येऽपि वर्णा अच्प्रत्याहारघटका भवन्ति ह्रस्वदीर्घप्लुतसंज्ञकाः। तत्र सूत्रे एकमात्रिकद्विमात्रिकत्रिमात्रिकाणां दीर्घं कृत्वा निर्देशाद् विधेयताप्रयोजकानां शब्दानां ह्रस्वदीर्घप्लुतानां क्रमशः श्रवणात् केन क्रमेणान्वय इति विचारे 'योग्यं योग्येन योजयेत्', 'यक्षानुरूपो बलिः', 'उत्क्रमात् क्रमो बलीयान्', 'फलबलकल्प्यस्यैव शरणत्वात्' इत्यादिभिर्न्यायैरत्र क्रमेणैव एकमात्रिकद्विमात्रिकत्रिमात्रिकाणां सन्निवेशो बोधव्यः। तथा च एकमात्रिको

१. वेदान्तपरिभाषायामनुमानखण्डे।

२. अद्वैतसिद्धौ प्रथममिथ्यात्वसाधनावसरे प्रथमपरिच्छेदे, पृ० ३१।

३. पा० स० १।२।२७।

कारसदृशमात्रिकाणामचां ह्रस्वसंज्ञा । द्विमात्रिकोकारसदृशमात्रिकाणामचां दीर्घसंज्ञा । त्रिमात्रिकोकारसदृशमात्रिकाणामचां प्लुतसंज्ञा भवन्तीति व्यवस्था । ह्रस्वदीर्घप्लुतशब्दघटिते शास्त्रे 'अचश्च'[1] इति परिभाषोपतिष्ठते ।

तथा चोक्तं सूत्रस्य वृत्तौ श्रीभट्टोजिदीक्षितेन—'ह्रस्वदीर्घप्लुतशब्दैर्यत्राज् विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते'[2] इति । तथा च क्रमिकान्वय एवात्र कर्तव्यः । तत्र प्रमाणजिज्ञासायां सूत्राण्येव प्रमाणत्वेन दर्शनीयानि । तथाहि—'ऊकालोऽज्झ्रस्वदीर्घप्लुतशब्दानां त्रयाणां श्रूयमाणत्वादुद्देश्यकोटिप्रविष्टानामुकाराणामपि त्रित्वं मन्तव्यमेव, क्रमिकत्वमपि तेषां मान्यम् । तत्र प्रमाणानि सूत्राण्येव । यथाहि संज्ञिकोटौ केवलस्यैकस्यैव उकारस्य प्रवेशे तिसृणामपि संज्ञानामेकसंज्ञिकत्वाद्दीर्घादिविधायकशास्त्राणामप्रमाण्यप्रसङ्गः परिदर्शितो यथाबुद्धि । तथैवोद्देश्यकोटौ संज्ञिप्रदर्शनाय त्रयाणां प्रवेशस्वीकारोऽपि क्रमिकत्वेनान्वयास्वीकारे दोषप्रसङ्गो बोधव्यः ।

यदि हि प्रथमो द्विमात्रिक उकारः स्यात् तस्य च ह्रस्वसंज्ञां विदध्यात् सूत्रं तर्हि—'ह्रस्वो नपुंसके प्रातिपदिकस्य', 'केऽणः', 'गोस्त्रियोरुपसर्जनस्य' इत्यादीनि[3] सूत्राणि व्यर्थानि स्युः । तथाहि—पूर्वसूत्रेण द्विमात्रिकस्य नपुंसके ह्रस्वो विधीयते । यदि च द्विमात्रिकस्य प्रथमतः सन्निवेशः स्यात् 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इत्यत्र, तर्हि तस्य ह्रस्वसंज्ञया ह्रस्वत्वं विदितमेवेति पुनरारभ्यमाणं ह्रस्वविधायकं शास्त्रम्—'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति व्यर्थं स्यात् । एवमेव 'केऽणः' 'गोस्त्रियोरुपसर्जनस्य' इत्यादिस्थलेऽपि बोध्यम् ।

यदि चैकमात्रिकस्य दीर्घसंज्ञां विदध्यात्, तर्हि 'सुपि च' 'अतो दीर्घो यञि[4]' इत्यादीनि दीर्घविधायकानि सूत्राणि व्यर्थानि स्युः । तानि चैकमात्रिकस्याचो दीर्घविधानायोपक्रान्तानि । यदि चैकमात्रिकस्य दीर्घसंज्ञाविहितैव, तर्हि तेनैव सूत्रेणैकमात्रिकस्याचो दीर्घत्वादपूर्वविधायकत्वाभावाद् दीर्घविधायकानि सूत्राणि व्यर्थानि स्युः । यतो हि स एवापूर्वविधिर्भवति यो हि केनापि प्रमाणेनाप्राप्तं कार्यं विधत्ते । सिद्धमेव साधयतु शास्त्रं प्रामाण्यं न भजते । अत एव सिद्धकार्यसाधकस्य शास्त्रस्य वैयर्थ्यमापाद्य तत्र तत्र शास्त्रे ज्ञापकत्वं नियमार्थत्वञ्च व्यवस्थापितं सङ्गच्छते । यदि च नाम शास्त्रं विहितमपि विदध्यात्तर्हि सा सर्वापि शास्त्रीया पद्धतिर्विलुप्येत । तथा चोक्तम्—'सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति' इति । विधित्वाय तु प्रामाणान्तराबाधे सति प्रमाणान्तरासिद्धिरपेक्षिता । तथा चोक्तम्—

---

१. पा० सू०, १।२।२८ ।

२. वैयाकरणसिद्धान्तकौमुदी परिभाषाप्रकरणे ।

३. पा० सू०—१।२।४७, ७।४।१३, १।४।४८ ।

४. पा० सू०—७।३।१०१ ।

विधिरत्यन्तमप्राप्तो नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तो परिसंख्येति गीयते ॥ इति ।

अतोऽत्र सूत्रे यथा संज्ञाविधायकानि पदानि ह्रस्वदीर्घप्लुतरूपाणि क्रमेण सन्निविष्टानि, तथैवोद्देश्यदलनिविष्टानि वर्णस्वरूपाण्यपि बोध्यानि। अत एव महाभाष्ये तथैव सन्निवेशाय कृतः किल प्रयासः ।

तथाहि—'यद्यपि तावत्तिसृणां संज्ञानां करणसामर्थ्याज् ज्ञायते—त्रयाणामयं प्रश्लिष्टनिर्देश इति। कुतस्त्वेतदेतेनानुपूर्व्येण सन्निविष्टानां संज्ञा भविष्यतीति आदौ मात्रिकस्ततो द्विमात्रस्त्रिमात्र इति । न पुनर्मात्रिको मध्ये वान्ते वा स्यात् । तथा द्विमात्र आदौ वा स्यादन्ते वा । तथा त्रिमात्र आदौ वा मध्ये वा स्यात्'[1] ? इति ग्रन्थेन पूर्वपक्षमुपस्थाप्य ततः समाधानं यथाव्याकरणसूत्रं कृतं भगवता महाभाष्यकृता ।

यथा च समाधानं तत्र कृतं तथा प्रदर्श्यते—'अयं तावत् त्रिमात्रोऽशक्य आदौ वा मध्ये वा कर्तुम् । कुतः ? प्लुताश्रयो हि प्रकृतिभावः प्रसज्येत । मात्रिकद्विमात्रिकयोरपि ध्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यति'[2] इति ।

अनेन हि भाष्येण क्रमेण मात्रिकद्विमात्रिकत्रिमात्रिकोकाराणां सन्निवेशाभावे या वैरूप्यापत्तिः प्रदर्शिता साऽतीव समीचीना । अधीतव्याकरणशास्त्रस्य पुरुषस्येतोऽधिकानन्दप्रदमपरं समाधानं किमपेक्षितं स्यात् ? अन्यैरेव शब्दैर्भगवता महाभाष्यकृता परमकारुणिकेन कीदृशं समाधानं दत्तम् ? अत एव तत्रत्यभाष्यवचसस्तात्पर्यावधारणाय शङ्कासमाधानाभ्यां तत्त्वस्फोरणं नागेशभट्टेन कृतम् । तथाहि—'भाष्ये-प्लुताश्रय इति । न च मध्ये करणे कथं प्लुताश्रयः प्रकृतिभाव इति वाच्यम्, मध्ये त्रिमात्रसत्त्वे पूर्वेण दीर्घे त्रिमात्रस्यैवापत्तौ लोकाश्रयप्लुतत्वमादायाग्रिमेण सन्धौ कर्तव्ये प्रकृतिभावापत्तिः'[3] इति ।

तदनन्तरमस्य 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इत्यस्य व्याख्यानावसरे सूत्रे क्रमेण सन्निवेशविषये यथा विचारो भगवता महाभाष्यकृता कृतः स दर्शनीयतमः ।

तेन सिद्धमिद्धं भवति यत् कस्यापि सिद्धान्तस्य व्यवस्थापनाय कियती किलोपपत्तिरपेक्षिता भवति। प्रमाणोपस्थापनपुरःसरमेव प्रतिज्ञातविषयस्य निर्धारणं सुशकम्, नान्यथेत्यपि द्योतितं महाभाष्यकृता। अपरञ्च प्रमाणे प्रदर्शितेऽपि न केवलं तेनैव तत्त्व निर्णयः शक्यः, किन्तु तदुपोद्वलकस्य तर्कस्यापि तत्रावश्यकता। अत एव—'यस्तर्केणानुसन्धत्ते स वेदं वेदनेतरः' इति वचनं प्रवृत्तम्। किन्तु तत्र तर्कपदेन श्रुतिशास्त्रसम्मतस्तर्को मतः, न तु कुतर्कः । तस्यानर्थकारित्वात्तत्त्वविनिर्णयावरोधित्वाच्च । अत एव

१. महाभाष्यम् 'ऊकालोऽज्झ्रस्व' १।२।१।२७—इति सूत्रे ।

२. महाभाष्यम् 'ऊकालोऽज्झ्रस्व'—इत्यत्र ।

३. उद्द्योते 'ऊकालोऽज्झ्रस्व' इत्यत्र ।

कुतर्कनिषेधः कृतः पञ्चदश्याम्—'तर्क्यतां मा कुतर्क्यताम्' इति। द्रष्टव्यञ्च तत्रत्यं महाभाष्यवचनम्। तथाहि—'यत्तावदुच्यते–अयं तावत् त्रिमात्रोऽशक्य आदौ मध्ये वा कर्तुं प्लुताश्रयो हि प्रकृतिभावः प्रसज्येतेति। प्लुताश्रयः प्रकृतिभावः। मध्ये वा स्यात् प्लुतसंज्ञैवास्य न स्यात्, कुतः प्रकृतिभावः? यदप्युच्यते मात्रिकद्विमात्रिकयोरपि भविष्यतीति। ह्रस्वाश्रया हि घिसंज्ञा ह्रस्वसंज्ञा चानेनैव। यदि च मात्रिको मध्ये वान्ते वा स्यात्, ह्रस्वसंज्ञैवास्य न स्यात्, कुतो घिसंज्ञा पूर्वनिपातः? एवमेषा व्यवस्था न प्रकल्पते।' इति।

समाधानभाष्यम्—'एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—न मात्रिकोऽन्ते भवतीति। यदयम्—'विभाषा पृष्टप्रतिवचने हेः'[1] इति मात्रिकस्य प्लुतं शास्ति। कथं कृत्वा ज्ञापकम्? योऽन्ते स प्लुतसंज्ञः। यदि च मात्रिकोऽन्ते स्यात् प्लुतसंज्ञाऽस्य स्यात्। तत्र हि मात्राकालस्य मात्राकालवचनमनर्थकं स्यात्।

मध्ये तर्हि स्यादिति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति—न मात्रिको मध्ये भवतीति। यदयम् 'अतो दीर्घो यञि', 'सुपि च'[2] इति दीर्घत्वं शास्ति। कथं कृत्वा ज्ञापकम्? यो मध्ये स दीर्घसंज्ञकः। यदि च मात्रिको मध्ये स्याद् दीर्घसंज्ञाऽस्य स्यात्। तत्र हि मात्राकालस्य मात्राकालवचनमनर्थकं स्यात्।

द्विमात्रस्तर्ह्यन्ते स्यात्। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति—न द्विमात्रोऽन्ते भवतीति। यदयम् 'ओमभ्यादाने' इति द्विमात्रिकस्य प्लुतं शास्ति। कथं कृत्वा ज्ञापकम्? योऽन्तं स प्लुतसंज्ञः। यदि च द्विमात्रोऽन्ते स्यात् प्लुतसंज्ञास्य स्यात्। तत्र द्विमात्राकालस्य द्विमात्राकालवचनमनर्थकं स्यात्। मात्रिकेण चास्य पूर्वनिपातो बाधित इति कृत्वा क्वान्यत्रोत्सहते भवितुमन्यहतो मध्यात्। एवमेषां व्यवस्था प्रक्लृप्ता'[3] इति।

इत्थञ्च त्रयाणां संज्ञिनां साधनाय प्रवृत्तं भाष्यस्थतन्मूलकोद्द्योतकारवचनमबाधितमव्यभिचरितमसत्प्रतिपक्षितं च सत्स्वसाध्यसाधनाय समर्थं भवति। तदनन्तरमपि त्रयाणां संज्ञिनां स्वीकारेऽपि व्युत्क्रमेणापि निर्देशो मा भवतु। तथा सति व्याकरणशास्त्रमर्यादानुसारेण नियमदर्शनेनानेकसूत्रप्रवृत्तिप्रयोज्यानर्थव्रातमालोच्य क्रमशः एकमात्रिकद्विमात्रिकत्रिमात्रिकाणामुकाराणां सन्निवेश इति सिद्धान्तः। अतोऽत्र एकमात्रिकस्य ह्रस्वसंज्ञा, द्विमात्रिकस्य दीर्घसंज्ञा त्रिमात्रिकस्य च प्लुतसंज्ञेति व्यवस्था। तथा च सति न लोकव्यवहारविरोधः, न वा व्याकरणशास्त्रविरोधः, न वा प्रमाणभूतसूत्रनिर्देशानुपपत्तिः, न वा प्रयोगेष्वतिव्याप्त्यादिदोष इति बोध्यम्।

'तिसृणां संज्ञानां करणसामर्थ्यात्' इति महाभाष्यवाक्यस्य तन्मूलककैयटोद्द्योतादिप्रयोगदर्शनेन च तेषां सर्वेषां व्याकरणतत्त्वविदामाचार्याणां न्यायादिशास्त्र-

---

१. पा० सू०—८।२।९३।

२. पा० सू०—७।३।१०१।१०२।

३. माहाभाष्यम् 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रे।

तत्त्ववित्त्वं प्रकटीभवति। सामान्यत: सर्वशास्त्रसिद्धान्तज्ञत्वे सति विशेषत एकस्मिन् शास्त्रे परिनिष्ठितत्वमेव लोकोत्तरवैदुष्यम्। अत एव 'बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति' इति। यत्रापि कुत्रापि तर्कस्य विगानं तत्तु कुतर्कपरमिति शास्त्र-सिद्धान्तः। अतो न 'तर्काऽप्रतिष्ठानात्'[1] इति व्याससूत्रविरोधः। सत्तर्कस्य श्रुति-शास्त्राविरुद्धस्य तु पदार्थनिर्णयसाधकत्वेन महान् समादरः शास्त्रेषु। अत एव दशकुमारचरिते 'एकं शास्त्रं शास्त्रान्तरानुबन्धि' इति प्रतिपादितम्। इत्थञ्च तर्क-सरणेरनुसरणेऽपि भाष्यवाक्यं परमप्रमाणमिति सिद्धम्।

स्वरितञित इति शक्यमकर्तुम्

इदं भाष्यवचनं महाभाष्ये[2]—'स्वरितञितः कर्त्रभिप्राये क्रियाफले'[3] इति सूत्रे वर्तते। तत्र हि भाष्ये पूर्वं-'स्वरितञित इति किमर्थम्? याति वाति द्राति प्साति' इत्येवंरूपेण फलं प्रदाय तदनन्तरम्—'स्वरितञित इति शक्यमकर्तुम्' इति वचनं भगवता महाभाष्यकृता व्याहृतम्। किन्तु नहि केवलं प्रतिज्ञामात्रेण वस्तुसिद्धिः, अपि तु हेतुनेति हेतोरेतत्प्रतिज्ञोत्तरं प्रतिज्ञातार्थोपपत्तये शङ्कासमाधानाभ्यां प्रयतितम्। तथाहि—'इह कस्मान्न भवति याति वाति द्राति प्सातीति' इति ग्रन्थेन पूर्वपक्षमुप-क्षिप्य ततः 'कर्त्रभिप्राये क्रियाफले' इत्युच्यते। सर्वेषां च कर्त्रभिप्रायं क्रियाफलमस्ति। त एवं विज्ञास्यामः। येषां कर्त्रभिप्रायमकर्त्रभिप्रायञ्च क्रियाफलमस्ति, तज्जातीयकाः खल्वाचार्येण स्वरितञितः पठिता ये उभयवन्तः, येषां कर्त्रभिप्रायं चाकर्त्रभिप्रायञ्च क्रियाफलमस्ति' इति ग्रन्थेन कृतस्याक्षेपस्य वारणेन सूत्रस्य खण्डनं कृतम्।

अत्रेदं विमृश्यते—सूत्रे यदा 'स्वरितञितः' इत्यंशो न दीयते केवलं 'कर्त्रभिप्राये क्रियाफले' इत्येव सूत्राकारः, तदा या युक्तिर्भगवता महाभाष्यकृता समुपपादिता यद् 'ये उभयवन्तो येषां कर्त्रभिप्रायञ्चाकर्त्रभिप्रायञ्च क्रियाफलमस्ति' इति तया कथं दोषोद्धारः? 'याति-वाति'प्रभृतिप्रयोगेषु कर्त्रभिप्रायस्य फलस्य सत्त्वेनात्मनेपदापत्तेः।

यत्तु—'स्वरितञितः' इत्यंशाभावेऽपि कर्त्रभिप्राये इति विशेषणवैयर्थ्येनैव तथा-विधोऽर्थो लभ्यते, यतो हि 'सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्' इति वचनानु-सारेण सर्वेषां धातूनां कर्त्रभिप्रायरूपक्रियावाचकत्वात् सम्भवमात्रस्यैव सत्त्वादसत्त्वाच्च व्यभिचारस्येति—तत्तुच्छम्, याति-वाति-प्सातिप्रभृतिधातूनां पदार्थक्रियावाचकत्व-स्यापि सम्भवेन 'कर्त्रभिप्राये क्रियाफले' इत्यंशस्य साफल्यात्। कर्त्रभिप्रायपदेन—'असति बाधके सर्वं वाक्यं सावधारणम्' इति न्यायाद् येषां हि धातूनां कर्त्रभिप्राय-क्रियावाचकत्वेन विवक्षा भवेत् तेषामेवात्मनेपदसंज्ञेति अर्थस्यापि सम्भवाद् वैयर्थ्योप-

---

१. ब्रह्मसूत्रम्—२।१।११।

२. महाभाष्यम् 'स्वरितञितः कर्त्रभिप्राये क्रियाफले'—१।३।७२।

३—पा०स० ०—१।३।७२।

पादनासम्भवात् । कश्चिदपि प्रकारो न लक्ष्यते येन सूत्रवैयर्थ्यं वा तदंशवैयर्थ्यं वा शक्योपपादनं भवेद् यद्बलेन वक्तुं प्रभवामो यत् 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रे–'स्वरितञित इति शक्यमकर्तुम्' इति । किन्तु भगवता शाब्दिकशिरोमणिना महर्षिणा पतञ्जलिना तथाकथितमेव भाष्ये इति तद्वाक्यप्रमाण्यान्यथानुपपत्त्या नूनमत्रत्यं भगवतो वचनस्य तात्पर्यमुपबृंहणीयम्, येन जिज्ञासुजनमनोऽनुपपत्तिदोषग्रस्त पक्षावलोकनेन दोलायमानं तोषमाप्नुयादिति कृत्वा भाष्यवचनस्य तात्पर्यवर्णनाय प्रयत्यते । तथाहि—'स्वरितञितः किम् ? याति वाति द्राति प्साति' इति भाष्य-वचनेन तद्ग्रहणस्य फलं प्रदर्श्य पुनस्तत्खण्डनं कथं प्रामाणिकं भवेदित्येव तावत्पूर्व-पक्षस्याभिप्रायः । तत्र खण्डनपरभाष्यप्रामाण्येन तत्र न कर्त्रभिप्रायफलत्वमिति मन्तव्यम् । तथास्वीकारे दोषाप्रसक्तेः । अत एव भाष्यकारेण महाभाष्ये प्रोक्तम्—न चैषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति'[1] इति ।

तथा चाह तत्र कैयटः 'न चैषामिति । यात्यादयः संविधाने वर्तितुं न शक्नु-वन्तीत्यर्थः । अथवा स्वाभिधेयमात्रवृत्तयो यात्यादयः, नैषां स्वार्थताविशिष्टक्रिया-वाचित्वसम्भवः'[2] इति ।

उद्द्योते च नागेशभट्टः—'एवञ्च यात्यादीनां सर्वथा कर्त्रभिप्रेतमेवेति व्यावर्त्या-भावात्तेषां नोदाहरणत्वमिति भावः । नैतेषां स्वार्थताविशिष्टेति क्रियामात्र वृत्तित्वादिति भावः । एतदुक्तरीत्या भाष्यविरुद्धम् । अकर्त्रभिप्रेतक्रियाफलाभावस्यैव भाष्यतो लाभादिति कश्चित्'[3] इति ।

ननु 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रे महाभाष्ये सर्वेषामपि पदानां विषये इदंपदं किमर्थम् ? इदंपदं किमर्थम् ? इत्येवं रूपेण प्रश्नमुपस्थाप्य पुनश्च फलप्रदानं कृतम् । तथैव स्वरितञित इति किमर्थमिति प्रश्नस्यापि कृतत्वान्न तस्य त्यागे तात्पर्यमिति चेन्न, अन्येषां पदानां सूत्रघटकानां प्रयोजनजिज्ञासया पूर्वपक्षमुप-स्थाप्य फलञ्चोपदर्श्य पुनस्तदकर्तव्यताया अनुक्तत्वादत्र च पूर्वभाष्ये फलं प्रदर्श्य तस्य स्वरितञित इत्यंशस्य सर्वथैव सूत्रेऽकर्तव्यत्वस्योक्तत्वेनान्यत्रत्यन्यायेन विचारानुप-योगात् ।

न चास्यांशस्याघटकत्वे सूत्रस्वरूपं कीदृशं स्यादिति वाच्यम्, 'कर्त्रभिप्राये क्रियाफले' इत्येतावन्मात्रस्वरूपस्य सिद्धान्तितत्वात् । तथा चोक्तं महाभाष्ये—'कर्त्रभि-प्राये क्रियाफले' इति किमर्थम् ? पचन्ति भक्तकराः, कुर्वन्ति कर्मकराः, यजन्ति याजकाः । कर्त्रभिप्राये क्रियाफले' इत्युच्यमानेऽपि प्राप्नोति । अत्रापि हि क्रियाफलं

---

१. महाभाष्यम्—१।३।७२ सूत्रे ।

२. प्रदीपे—१।३।७२ सूत्रे ।

३. उद्द्योते—१।३।७२ सूत्रे ।

कर्तारमभिप्रैति। याजका यजन्ति गा लप्स्यामह इति। कर्मकराः कुर्वन्ति पादिकमहर्लप्स्यामह इति। एवं तर्हि 'कर्त्रभिप्राये क्रियाफले' इत्युच्यते। सर्वत्र च कर्तारं क्रियाफलमभिप्रैति। तत्र प्रकर्षगतिर्विज्ञायते--साधीयो यत्र कर्तारं क्रियाफलमभिप्रैति। न चान्तरेण यजिं यजिफलं वपिं वा वपिफलं लभन्ते। याजकाः पुनरन्तरेणापि यजिं गा लभन्ते भृतकाश्च पादिकमिति'[3] इति। अनेनोपसंहारभाष्येण स्पष्टमेव प्रतीयते यदत्र स्वरितञित इत्यंशं विहायावशिष्टं सूत्रं सिद्धान्ते स्वीकर्तव्यमिति। तच्च सूत्रस्वरूपं 'कर्त्रभिप्राये क्रियाफले' इत्येव प्रतिफलितं भवतीति विज्ञेयम्।

३. महाभाष्यम्—१।३।७२ सूत्रे।

द्वितीयोऽध्यायः

१३. 'सुब्लोपो व्यवधानं यथेष्टममन्यतरेणाभिसम्बन्धः स्वरः'[१]

इदं वचनं भाष्यवार्त्तिकरूपेण प्रवृत्तम् 'समर्थः पदविधिः' इति सूत्रे । तत्र हि भाष्ये विचारोऽयमुपक्रान्तो यत् किं समर्थं नाम ? यदाश्रितः समासो भवति, नान्यत्र चेति । तदुत्तरम्—'पृथगर्थानामेकार्थीभावः समर्थवचनम्' पृथगर्थानां पदानामेकार्थीभावः समर्थम्' इत्युच्यते । क्व पुनः पृथगर्थानि, क्वैकार्थानि ? वाक्ये पृथगर्थानि राज्ञः पुरुष इति । किमुच्यते पृथगर्थानीति यावता राज्ञः पुरुष आनीयतामित्युक्ते राजपुरुष आनीयते) राजपुरुष इति च स एव । नापि ब्रूमः 'अन्यस्यानयनं भवीति । कस्तर्हि—एकार्थीभावकृतो विशेषः ?' इति वाक्यकदम्बेन महाभाष्ये तत्र पक्षे विशेषाभावमाक्षिप्य यदुत्तरं दत्तम् 'सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः स्वरः' इति, तदेवात्र विचारणीयमनुसन्धेयञ्च वर्तते ।

अतस्तावद् विचार्यते यत्पूर्वपक्षस्तु—'कस्तर्हि एकार्थीभावकृतो विशेष इति वर्तते । उत्तरन्तु दीयते—'सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः स्वरः' इति ।

अत्र दीयतां दृष्टिर्हेतुतत्त्वविद्भिर्यत् प्रयुक्तोऽयं फलरूपो हेतुः समीचीनो वा न वेति । यतो हि यदा एकार्थीभावो भवति तदैव समासः । समासस्य च प्रातिपदिकसंज्ञा—'कृत्तद्धितसमासाश्च[२]' इति सूत्रेण । प्रातिपदिकसंज्ञायां जातायां सत्यां स्वीयोद्देश्यतावच्छेदकसम्पत्तौ प्रवर्तते नाम 'सुपो धातुप्रातिपदिकयोः[३]' इति सूत्रम् । तेन च प्रातिपदिकावयवस्य सुपो लोपो भवति । एवञ्चैकार्थीभावस्य फलं भवति, सुपो लोपः । भगवता महाभाष्यकृता च तत्र प्रोक्तम्—'सुब्लोपो व्यवधानमित्यादिना सुपो लोपाभावस्यैव फलत्वम् । यदेव फलं तन्नोक्त्वा फलाभाव एव फलत्वेन महाभाष्यकृता प्रोक्तः कथं प्रामाणिकं भवेद्विरुद्धार्थावगाहित्वादिति स्वाभाविक्येव जिज्ञासा जागर्ति चेतसि । अतस्तस्य महाभाष्यवचनस्य किं रहस्यमित्यालोचयितुं महाभाष्यतत्त्वविदां विदुषां कैयटनागेशप्रभृतीनां पन्थानं समाश्रित्य किञ्चिदत्र निदर्शयितुं प्रयत्यते ।

तत्र यथा लोकेऽपि कश्चित् समर्थो जनो जनरक्षकः स्वस्थानात्क्वचित् गतो भवति तदानीमेव तत्र कश्चन उपद्रवो वा दुर्भिक्षं वा समुद्गतं भवेत्, तदा तत्रत्यैर्जनैरुच्यते तत्कृतमेवैतत्सर्वमिति । यथा भगवतो राघवेन्द्रस्य मर्यादापुरुषोत्तमस्य रामचन्द्रस्य

---

१. महाभाष्यम्, समर्थः पदविधिः'—२।१।१ सूत्रे ।

२. पा० सू०—१।२।४६ ।

३. पा० सू०—२।४।७१ ।

वनवासे जाते सति भरतेन भ्रातृभक्तेन कथितं यदहमेवास्यानर्थजालस्य हेतुः। भ्रमहेतुकमेव भ्रातुः सर्वलोकप्रियस्य, नृपतिकुलमणे रामचन्द्रस्य तदनुगस्य भ्रातृभक्तशिरोमणेर्लक्ष्मणस्य, पतिभक्तपरायणायाः सीतायाश्च वनगमनमिति। नहि तत्र भरतो हेतुः, अपि तु तज्जननीति। तथापि भरतभिन्नस्य हेतुत्वेऽपि भरतस्य तत्र हेतुत्वमुपचरितम्। तथैव प्रकृतेऽप्येकार्थीभावाभावस्य हेतुत्वेऽपि तत्प्रतियोगिनो नामैकार्थीभावस्य हेतुत्वं सुब्लोपे जातमेव।

यथा वा लोके वृष्टिकृतं सुभिक्षं वृष्टिकृतं दुर्भिक्षमिति। नहि दुर्भिक्षं वृष्टिकृतं किन्तु वृष्ट्यभावकृतमेव। तथापि स्वाभावकृतं दुर्भिक्षं तत्प्रतियोगित्वात् तत्कृतमेव व्यवह्रियते। तथैव प्रकृतेऽप्येकार्थीभावाभावकृतोऽपि सुब्लोपरूपो विशेषस्तत्प्रतियोगिभूतैकार्थीभावकृत इति व्यवहृतश्चेत्, तर्हि न कोऽपि विरोधः, न वा लोकमर्यादातिक्रमणं शब्दप्रमाणपद्धतेरुल्लङ्घनं वेति मतिमतां कृते पर्याप्तं स्थलमुदाहृतम्।

अत्रायं विशेषो द्रष्टव्यः—कश्चन हि व्यवहारः साक्षाद् व्यवह्रियमाणहेतुको भवति, कश्चिच्च व्यवह्रियमाणसम्बन्धिहेतुको वा भवति। यथा हि—गङ्गायां स्नातीति व्यवहारो गङ्गानिमित्तकः, गङ्गायां घोष इति व्यवहारश्च तीरनिमितकः। तत्रापि गङ्गापदेनैव कथं व्यवहार इति प्रश्ने गङ्गासम्बन्धित्वादित्येवोत्तरं वक्तव्यं भवति। अत एव तार्किकैः—शक्यसम्बन्धरूपैव लक्षणा स्वीक्रियते। यद्यपि सा पदार्थवृत्तिः, पदवृत्तित्वमेव तार्किकैर्लक्षणायाः स्वीकारादापाततो विरोधः प्रतिभाति, तथापि कृते विचारे तन्मतेन समाधातुं शक्यते। तथाहि—गङ्गायां घोष इत्यत्र भगीरथरथखातावच्छिन्नजलप्रवाहरूपगङ्गापदार्थस्य तत्तीरस्य च यः संयोगलक्षणः सम्बन्धः स न पदवृत्तिः पदार्थवृत्तित्वात्। शब्दस्य च गुणत्वेन संयोगस्य च गुणत्वाद् गुणे गुणानङ्गीकारात् संयोगस्य पदवृत्तित्वस्य शङ्कितुमप्यशक्यत्वात्। प्रकृते शब्दस्य शक्यसम्बन्धरूपलक्षणालक्षणस्यासङ्घटनाद्विरुद्धार्थापत्तेश्च। किन्तु—स्वप्रतियोगिवाचकत्वसम्बन्धेन तस्याः पदवृत्तित्वमुपपादनीयम्। स्वं-संयोगसम्बन्धस्तत्प्रतियोगी प्रवाहस्तद्वाचकत्वं गङ्गापदे इति गङ्गापदनिष्ठा लक्षणेति समन्वयः। एवमेवान्यत्राप्यूह्यम्।

अतोऽत्र निष्कर्षोऽयमागतो यद्व्यवहारो मुख्यो गौणश्च भवति, तत्र शब्दानां गतेर्नियन्तुमशक्यत्वादुभयथाऽपि प्रयोगा दृश्यन्ते। कश्चन साक्षात् तीरे घोष इत्येव व्यवहरति, कश्चिच्च गङ्गायां घोष इति। तथैव परमशाब्दिकेन भगवता महाभाष्यकृता एकार्थीभावाभावकृतस्य फलस्य एकार्थीभावकृतत्वेन व्यपदेशस्तस्य भगवतो महर्षेः पतञ्जलेः शब्दतत्त्ववित्त्वमेव विशदीकरोति।

तथा चोक्तं कैयटेन—'एकार्थीभावाभावकृतोऽपि विशेष एकार्थीभावकृत इत्युच्यते। सन्निधानासन्निधानाभ्यां क्रियाभिनिर्वृत्तौ पदार्थानां कारणत्वात्। यथा वर्षकृतं सुभिक्षम्, वर्षकृतं दुर्भिक्षमिति चोच्यते'[1] इति।

---

१. 'समर्थः पदविधिः' इति सूत्रे कैयटे।

अत्रोद्द्योतकारो नागेशभट्टस्तु—'यथा मशकनिवृत्तिकारणमपि धूमो मशककारणमित्युच्यते मशकार्थो धूमः' इति। तथा तदभावकारणकमपि तत्कारणकमित्युच्यते। तदुक्तं पातञ्जलभाष्ये—

उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्तयः।
वियोगान्यत्वधृतयः कारणं नवधा स्मृतम्[1]॥ इति।

अवश्यमेवायमंशो विचारणीयः। अत एव कैयटप्रभृतिभिराचार्यैर्नोपेक्षितः। वार्त्तिकरूपेण—'सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः स्वरः' इति वचनमवतार्य महाभाष्यकृता, कृतापि व्याख्या तस्य—'सुबलोपो भवति वाक्ये राज्ञः पुरुषः' इति। अतः शङ्काशङ्कुसमुद्भवः स्वाभाविक एव। यत्र वाक्ये एकार्थीभाव एव न विद्यते, तत्रैव सुबलोप एकार्थीभावस्य फलत्वेन भगवता महाभाष्यकृता प्रोच्यते, तत्तु न समीचीनम्। यतो हि सुबलोपस्य एकार्थीभावपक्षे एव फलत्वेन कथनस्य साङ्गत्यात्। तथापि कैयटादिभाष्यमर्मज्ञाचार्यचर्चितपथमनुसृत्य समाधाने न कोऽपि बाधः।

यद्यप्यत्रेदं वक्तुं शक्यं यद्महाभाष्यकार एकार्थीभावाभावकृतं विशेषमेकार्थीभाव कृतं मन्यमानः सुबलोपो व्यवधानमित्यादिना समुपबृंहयति, किन्तु काऽवश्यकता तथाकथनस्य? साक्षादेव कथं नोक्तं भाष्यकृता? सुबलोपो व्यवधानमित्यादीनि एकार्थीभावकृतस्य सुपो लोपरूपविशेषस्य साक्षात्फलस्य कथनमकृत्वा परम्परया गौणं फलं कथमुपचर्यते? स्पष्टतयैव कथं नोक्तं यद् सुबलोपो व्यवधानमित्यादि। सुबलोपो व्यवधानमित्यादिकथने साक्षादेव गौरवसत्त्वात्।

अपरञ्च-एकार्थीभावकृतविशेषविषयकजिज्ञासायां तदभावकृतविशेषं तद्विशेषत्वेनारोप्य कथनापेक्षया तस्यैकार्थीभावस्य यत्फलं सुब्लोपरूपं तदेवौचित्याद्वक्तुं युक्तम्। तथा कथं न लाघवप्रियेणाप्याचार्येण महाभाष्यकृता नोक्तमिति जिज्ञासामुखरीकारोत्येव वक्तुमिति शङ्कासमुन्मेषे विमृश्यते। तथाहि—सम्भवति लघुनोपायेन फलोपपत्तिप्रदर्शने गौरवेण प्रदर्शनं न शब्दतत्त्वविदां पन्थाः। अत एव 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति भाष्यकृता स्वयमेव लाघवस्य प्रशस्तत्वप्रदर्शनं कृतम्। अतोऽत्रैकार्थीभावकृतविशेषप्रदर्शनप्रसङ्गे सम्भवति लघौ समाधाने सुब्लोपरूपे तदुपेक्ष्य गौरवग्रस्तमेकार्थीभावाभावकृतं विशेषं सुबलोपो व्यवधानमित्यादिना भगवान् महाभाष्यकारो दर्शितवानिति पूर्वपक्षस्तदवस्थ एवेति, तथापि तत्र समाधानस्य विशेषरूपेण विचारेण लब्धस्य दर्शनादुपपत्तिस्तथोक्तेः कर्तुं शक्यत्वेनादोषात्।

तथाहि एकन्तु समाधानमिदं वर्तते यद् वर्तते कश्चन वाक्यविशेषः—'आचार्याः कृत्वा न निवर्तन्ते' इति। तथा चैकार्थीभावाभावकृतविशेषस्य फलमेकार्थी-

---

१. 'समर्थः पदविधिः' इति सूत्रे उद्द्योते।

भावेऽप्यारोप्य तथोक्त्या न दोषः। यतो हि लोके तदभावकृतस्यापि विशेषस्य तत्कृतत्वेन 'वर्षकृतं दुर्भिक्षम्' इत्यादौ त्रिकालाबाधितत्वेन प्रयुक्तत्वदर्शनादाचार्येण भगवता महाभाष्यकृता तथाकृतमित्यहो लोकज्ञता लोकोत्तरा भगवतः। स्वतन्त्रेच्छस्याचार्यस्य नियन्तुमशक्यत्वाल्लोकाविरोधादाचार्याः कृत्वा न निवर्तन्ते इत्यादिनैकवाक्यत्वाच्च भगवतो महाभाष्यकारस्य वचसः परमप्रामाण्यसत्त्वान्न कथमपि दोषलेशोऽपीति मन्तव्यम्।

अपरञ्च समाधानमिदं वर्तते यद् यदाचार्येण सुब्लोपो व्यवधानमित्याद्येवोक्तं स्यात्, तदायमर्थः सम्पद्येत—यत्रैकार्थीभावस्तत्र सुब्लोप इति। तथा च सति–'वनेचरः, परस्मैपदम्, स्तोकान्मुक्तः' इत्यादौ समासप्रयोजकैकार्थीभावसत्त्वेऽपि सुब्लोपाभावाद् व्यभिचारः स्यात्। उद्देश्यतावच्छेदकव्यापकत्वस्य विधेये भानस्यौत्सर्गिकत्वेऽपि सर्वत्र परित्यागाभावेन तत्रैकार्थीभावसत्त्वात् तत्प्रयोज्यसुब्लोपस्यावश्यकत्वेन प्रदर्शितप्रयोगेषु लोपाभावस्य दर्शनाद् व्यभिचारसत्त्वेन विभक्तेर्लोपस्य तत्र महाभाष्येण फलत्वमेकार्थीभावकृतं प्रदर्शितमिति प्रतिभाति। अतोऽपि तथा नोक्तमिति वक्तुं शक्यम्।

यद्यपि—'असति बाधके प्रमाणानां सामान्ये पक्षपातात्' 'वनेचरः, परस्मैपदम्, स्तोकान्मुक्तः' इत्यादिप्रयोगेषु तत्तदलुग्विधायकशास्त्रप्रामाण्यसत्वाद्बाधकसद्भावाद् बाधकाभावविशिष्टोद्देश्यताऽवच्छेदकव्यापकत्वं विधेये भासते इति नियमार्थप्रतिफलनादत्र च बाधकसत्त्वाद्विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वेन नियमाबाधान्नेदं समाधानं युक्तम्। किन्तत्र बाधकमिति चेत्, तर्हि—अलुग्विधायकानि शास्त्राण्येवेति वेदितव्यम्। तथाहि—'स्तोकान्मुक्तः' इत्यत्र 'पञ्चम्याः स्तोकादिभ्यः[1]' इति सूत्रेण विभक्तेर्लुङ्निषेधः 'वनेचरः' इत्यत्र 'हलदन्तात्सप्तम्याः संज्ञायाम्[2]' इत्यनेन 'तत्पुरुषे कृतिबहुलम्[3]' इत्यनेन वा कृतोऽलुक्। 'परस्मैपदम्' इत्यत्र तु 'परस्य च[4]' इति सूत्रेण लुको निषेधः। एवञ्च 'असति बाधके प्रमाणानां सामान्ये पक्षपातः' इति न्यायस्य 'उद्देश्यतावच्छेदकव्यापकत्वं विधेये भासते' इति व्युत्पत्तेर्वा तत्राप्रसरात् कथमिदं समाधानं युक्तं स्याद् यद् यदि—सुब्लोपो व्यवधानमित्याद्युक्तौ सत्यां बहुत्र समाससत्त्वेऽपि लोपाभावेन तथा वक्तुमशक्यत्वादिति। यतो हि तत्र तु बाधसत्त्वेन उद्देश्यतावच्छेदकसत्त्वेऽपि बाधाभावविशिष्टतदभावात्तन्न्यायाप्रसक्तेस्तत्र दोषाप्रसरात्। यथा 'इको यणचि' इति सूत्रीयोद्देश्यतावच्छेदकस्याजव्यवहितपूर्वत्वविशिष्टस्य इकारादिकान्तसमुदायघटकैकपदवाच्यत्वस्य यकारादिणकारान्तघटकयण्

---

१. पा० सू०—६।३।२।
२. पा० सू०—६।३।९।
३. पा० सू०—६।३।१४।
४. पा०सू०—६।२।८।

पदवाच्यविधेयतानिरूपकस्य सत्त्वेऽपि 'चक्रि अत्र' इत्यादिप्रयोगेषु न यण्, यतो हि 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'[1] इति सूत्रं बाधकं विद्यते। बाधाभावविशिष्टं यत्रैकत्वं तत्र तु यण् भवत्येव। यथा--सुद्ध्युपास्यः, मध्वरिरित्यादौ। यथा वा--हरि वन्दे, राज्ञः पुरुष इत्यादिवाक्येष्वपि धातुभिन्नप्रत्ययभिन्नप्रत्ययान्तभिन्नार्थवच्छब्द-स्वरूपत्वरूपस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'[2] इति सूत्रस्योद्देश्यतावच्छेदकस्य सत्त्वेऽपि न तत्र प्रातिपदिकसंज्ञा। यतो हि 'कृत्तद्धितसमासाश्च'[3] इति सूत्रं नियमार्थं भवति। नियमो हि नाम सिद्धकार्यविधायकशास्त्रकृतव्यवस्थाविशेषः। स च प्रकृते समासग्रहणस्य वर्तत एव। सिद्धप्रातिपदिकसंज्ञाविधायकशास्त्रत्वस्य तत्कृतव्यवस्था-विशेषस्य च तत्रोपलम्भात्। तथा चोक्तम्—सिद्धे सत्यारभ्यमाणो विधिर्नियमाय भवति' इति। अत एवेदं फलितं भवति—इत्थंभूतव्यवस्था नियम इति।

तथा च समासग्रहणेन व्यवस्था एका कृता, यथा सिद्धप्रयोगान्वाख्यानरूपं प्रयोजनं व्याकरणस्य सिद्धम्। सा चेयम्—'पूर्वोत्तरपदघटितस्य प्रातिपदिकसंज्ञा चेत्तर्हि समासस्यैव' इति। तेन वाक्यस्य प्रातिपदिकत्वं निराकृतं भवति। तत्र को हेतुः? समासग्रहण-कृतनियमरूपव्यवस्थया बाध एव। यदि हि बाधो न स्यात्, तर्हि बाधाभावविशिष्टो-द्देश्यतावच्छेदकसत्त्वाद्विधेयस्य प्रातिपदिकस्य तत्र सत्त्वमावश्यकमेव। किन्तु समास-ग्रहणरूपप्रमाणकृतव्यवस्थारूपबाधकसत्त्वाद् विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वेन न दोषलेशः। तथा चोक्तं वैयाकरणसिद्धान्तकौमुद्याम्—'पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम्—यत्र संघाते पूर्वो भागः पदं तस्य चेद् भवति, तर्हि समासस्यैव'[4] इति।

इत्थञ्च सर्वविधप्रमाणराशिदर्शनेन सिद्धमिदं भवति यत्कृतस्य समाधानस्य प्रकृतार्थासाधकत्वमिति पूर्वपक्षः, तथापि—सुब्लोपव्यवधानमित्यादिसमाधाने दत्ते कतिपयव्युत्पत्तिवचनानां बलं हेतुत्वेन समाश्रित्य तद्वचनं समर्थनीयम्। किन्तु—सुब्लोपो व्यवधानमित्युक्तौ व्युत्पत्तिवचनबलप्रयोगापेक्षा न भवति, यतो हि एकार्थीभावे क्वचित् समासे जातेऽपि क्वचित् समासप्रयोज्यो लुक् 'सुपो धातुप्राति-पदिकयोः'[5] इति सूत्रेण विधीयमानो न भवति, किन्तु एकार्थीभावाभावकृतः सुब्लोपस्तु कचिदपि व्यभिचरितो नास्त्येव। अर्थादेकार्थीभावाभावकृतः सुप्त्वेन सुपो लोपाभावस्त्वव्यभिचरित एव।

अत एव भगवता महाभाष्यकृता 'सुब्लोपो व्यवधानम्' इत्याद्यनुक्त्वा सुबलोपो व्यवधानमित्याद्युक्तमिति युक्ततमं प्रतिभाति। यद्यपि दधि मधु रमा हे हरे प्रभृति-

---

१. पा० सू०—६।१।१२७।
२. पा० सू०—१।२।४५।
३. पा० सू०—१।१।४६।
४. सिद्धान्तकौमुदीग्रन्थेऽजन्तपुलिङ्गप्रकरणे।
५. पा० सू०—२।४।७१।

प्रयोगेषु एकार्थीभावाभावसत्त्वेऽपि न सुबलोपः, किन्तु सुपो लोप एवेति कथमयमपि हेतुर्युक्तः, तुल्यन्यायादस्यापि हेतोरयुक्तत्वमिति चेद्, अत्रायं समाधिः—यथा न्यायमते मनस इन्द्रियत्वेन मनसो ज्ञानसामान्ये हेतुत्वादनुमित्यादिज्ञानेष्वपि मनसो हेतुत्वात् 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्'[1] इति प्रत्यक्षलक्षणसत्त्वेनातिव्याप्तिः प्रसज्यते। अत्र सूत्रे प्रसक्ताया अतिव्याप्तेर्वारणाय ज्ञानसामान्ये मनसो नास्तीन्द्रियत्वेन कारणत्वम्, किन्तु मनस्त्वेन।

एवञ्च—यत्र इन्द्रियत्वावच्छिन्नकारणतानिरूपितकार्यता भवेत्, तत्रैव ज्ञाने प्रत्यक्षत्वमिष्टम्। व्यवस्थार्थमेव लक्षणमाश्रीयते। अत एवोक्तम् 'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्' इति। तथा च यत्र ज्ञाने प्रत्यक्षत्वमिष्टं व्यवहारसिद्धञ्च, तत्रेन्द्रियत्वावच्छिन्नकारणताकत्वेन प्रत्यक्षत्वम्। अत एव मानसे प्रत्यक्षे प्रत्यक्षत्वोपपत्तिः। अनुमित्यादौ तु नेन्द्रियत्वेन मनसो हेतुत्वम्, किन्तु मनस्त्वेनेति हेतोः न तत्रातिव्याप्तिः। तथा चोक्तम्—'इन्द्रियजन्यं ज्ञानं प्रत्यक्षम्। यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानम्, तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितम्'[2] इति।

यथा वा वेदान्तपरिभाषायामनुमितिलक्षणे करणीये—'अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या'[3] इत्युक्तम्। तथा च न व्याप्तिज्ञानजन्ये व्याप्तिज्ञानध्वंसे व्याप्तिज्ञानस्य प्रत्यक्षे वा कथमप्यतिव्याप्तिः ? यतो हि ध्वंसं प्रति प्रतियोगित्वेनैव कारणता, न तु व्याप्तिज्ञानत्वेन। प्रत्यक्षं प्रति च तादात्म्येनैव रूपेण कारणत्वम्, न व्याप्तिज्ञानत्वेन।

अनुमितिलक्षणं तु क्रियते—'व्याप्तिज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताशालित्वमनुमितित्वम्' इति।

तथैव प्रकृतेऽपि यत्रैकार्थीभावाभावस्तत्र सर्वत्रैव सुप्त्वेन लोपाभाव एव। यत्रापि व्यभिचारो दर्शितः—दधिमधुप्रभृतिषु प्रयोगेषु, तत्रापि न लोपीयप्रतियोगितावच्छेदकं सुप्त्वम्, किन्तु सुत्वमत्वञ्च। तथा चोक्तम्—'स्वमोर्नपुंसकात्'[4] इति। तत्र प्रतिपदोक्तमेव सुत्वमम्त्वञ्च। हे हरे प्रभृतिप्रयोगेष्वपि न सुप्त्वेन लोपः, किन्तु सुसम्बन्धिहल्त्वेन। तथा च सूत्रम्—'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'[5] इति सूत्रम्। नहि तत्र सुप्त्वं साक्षादवच्छेदकम्, किन्तु तद्व्याप्यं तत्सम्बन्धिहल्त्वादिकञ्च। अतो नैकार्थीभावाभावस्थले व्यभिचार इति प्रतिभाति। विशेषस्तु धीधनैस्तत्र तत्र स्वयमेव मार्गान्तरमपि कल्पयित्वा योजयितुं शक्यते।

---

१. न्यायसिद्धान्तमुक्तावल्यां प्र० ख०।

२. 'न्यायसिद्धान्तमुक्तावली' ग्रन्थे प्र० ख० दिनकरीयुक्ते, पृ० १७३।

३. वेदान्तपरिभाषायामनुमानखण्डे।

४. पा० सू०—७।१।२३।

५. पा० सू०—६।१।६७।

अत्र प्रसङ्गे कैयटस्तु—तंत्र राज्ञः पुरुषः इति वाक्ये भेदाधिष्ठानस्य सम्बन्धस्य प्रत्यायिषितत्वाद्विना विभक्त्या तस्य प्रत्यायितुमशक्यत्वान्नास्ति सुब्लोप:। समासे कृते भेदनिवृत्तौ तदाश्रयस्य सम्बन्धस्योपरमात् स्वाभाविकी वृत्तिः, सैव शास्त्रेणानुज्ञायते। तदेवं सुपो भावाभावाभ्यामर्थस्य भावाभावानुमानम्'[1] इति।

अत्र—सुपो भावाभावाभ्यामर्थस्य भावाभावानुमानमिति कैयटोक्तेः सामान्यतोऽर्थस्य भावाभावानुमानमिति नार्थः। तथा सति राजपुरुष इत्यादौ सुपोऽभावेऽप्यर्थस्य विद्यमानतया दोषात्। किन्तु सुपो भावाभावाभ्यामर्थस्य भावाभावानुमानमिति वाक्यस्य विद्यते कश्चनान्य एवार्थः। स च क इति जिज्ञासायामुद्द्योतग्रन्थे नागेशभट्टेन स्पष्टीकृतम्। तथाहि—'अर्थस्य–अर्थगतभिन्नोपस्थितिविषयत्वस्येत्यर्थः'[2] इति।

अयमत्र विशेषः—यद्यपि वैयाकरणमते समासे वाक्ये चोभयत्र समानैव शक्तिः। अत एव वृत्त्यर्थावबोधकं वाक्यं विग्रहः' इति वैयाकरणमतं सङ्गच्छते। तथा चोक्तं सिद्धान्तकौमुद्याम्---'कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः। परार्थाभिधानं वृत्तिः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः' इति। एवञ्च लौकिकालौकिकभेदेन द्विविधाया वृत्तेः सत्त्वाल्लौकिकविग्रहवाक्यन्तु राजपुरुष इत्यादिसमासस्य राज्ञः पुरुष इत्याद्येव स्यात्। तदेव तु वाक्यम्। एवञ्च समाससमानार्थकत्वाद्वाक्येऽपि सोऽर्थो मन्तव्य एवेति वाक्यस्यापि शक्तत्वमङ्गीकुर्वन्ति वैयाकरणाः।

ननु—'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्'[3] इति वैयाकरणानां सिद्धान्ताद् वाक्याद् भिन्नार्थकत्वात् समासस्य कथं समासरूपवृत्त्यर्थावबोधकत्वं विग्रहवाक्यस्य स्यादपि। यदि चैकार्थकत्वं स्यात् समासवाक्ययोः, तर्हि तत्र—'भिन्नैव शक्तिः पङ्कजशब्दवत्' इति कथं भूषणे उक्तम्? महाभाष्येऽपि प्रकृतसूत्रे एकार्थीभावव्यपेक्षालक्षणसामर्थ्यद्वयस्य भेदेन समासस्य वाक्यस्य वैलक्षण्यं प्रतिपादितं कथं समन्वितं भवेद्? महाभाष्येऽपि वाक्यसमासयोर्वैलक्षण्योपपादनसमये—'अथ क्रियमाणे समर्थग्रहणे समर्थमित्युच्यते। किं समर्थं नाम? पृथगर्थानामेकार्थीभावः समर्थवचनम्। क्व पुनः पृथगर्थानि, क्वैकार्थानि? किमुच्यते—पृथगर्थानीति। यावता—राज्ञः पुरुष आनीयताम् इत्युक्ते' इत्यादिना। तथा चैकार्थीभावस्य व्यपेक्षालक्षणस्य च विशेषस्य विद्यमानत्वात् कथं समानार्थकत्वम्? एवञ्चात्र समानार्थकत्वाभावे विग्रहत्वाभावापत्तिर्वाक्यस्य। एवं विग्रहत्वोपपत्तये समानार्थकत्वाङ्गीकारे—'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' इत्यादिवाक्यम्, महाभाष्ये एकार्थीभावस्य व्यपेक्षालक्षणभेदादेश्चानुपपत्तिरित्युभयतः पाशारज्जुरिति चेन्न, आपाततो विरोधस्य प्रतीयमानत्वेऽपि विचारे क्रियमाणे तन्निरासस‌द्भावाद् दोषनिरासात्।

---

१. प्रदीपः 'समर्थः पदविधिः' (२।१।१।१) इति सूत्रे।
२. प्रदीपः 'समर्थः पदविधिः' (२।१।१।१) इति सूत्रे उद्द्योते।
३. वैयाकरणभूषणसारे समासार्थप्रकरणे।

तथाहि—'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' इति भूषणवाक्येन समासे या भिन्ना शक्तिः प्रतिपादिता सा विशिष्टार्थस्य सत्त्वेन। वाक्ये हि पृथक् पृथग् भवति शब्देभ्योऽर्थोपस्थितिः, समासे तु तथा नास्ति। किन्तु विशिष्टार्थविषयिणी समासादेकार्थोपस्थितिरित्येतावानेव विशेषः। विशिष्टस्य सत्त्वेऽपि समासात् प्राग् वाक्यात् प्रतीयमानोऽर्थो न निराक्रियते, किन्तु स तत्रैवान्तर्भूतः। एवञ्च कुण्डली देवदत्तो न देवदत्त इत्यस्य वक्तुमशक्यत्वाद्विशिष्टशुद्धयोर्विशेषणकृतभेदेऽपि स्वरूपे भेदाभावान्न विरोधः। एकार्थीभावव्यपेक्षयोरपि तत्कृत एव भेदः। व्यपेक्षास्थले पृथक् पृथगर्थोपस्थितिः। एकार्थीभावे तु विशिष्टार्थोपस्थितिरिति। अतो न—'वृत्त्यर्थावबोधकं वाक्यं विग्रहः' इत्यनेन सह विरोधः। अत एव महाभाष्ये एकार्थीभावस्य व्यपेक्षातो विशेषो न विशिष्टार्थविषयकत्वेन स्वीकृतः, किन्तु—'सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धः' इति।

तत्रेदमेव हृदयं यत् पृथक्त्वेन वाक्ये प्रतीयमानोऽप्यर्थो विशिष्टार्थोपस्थितिविषयीभूतो वर्तत एव। अधिकन्तु प्रविष्टं न क्षतिकरं भवति। अत एव भाष्ये—'क्व पुनः पृथगर्थानि, क्व चैकार्थानीति वाक्ये पृथगर्थानि राज्ञः पुरुषः इति। समासे पुनरेकार्थानि राजपुरुष इति। किमुच्यते पृथगर्थानीति। यावता 'राज्ञः पुरुष आनीयताम्' इत्युक्ते राजपुरुष आनीयते। राजपुरुष इति च स एव। नापि ब्रूमः—अन्यस्यानयनं भवतीति'[1] इति।

तदनन्तरम् 'कस्तर्ह्येकार्थीभावकृतो विशेषः'[2] इति महाभाष्ये जिज्ञासासंसूचकवाक्येन पक्षमुपक्षिप्य—'सुबलोपो व्यवधानम्'[3] इत्यादिना व्यपेक्षातो यद् वैलक्षण्यमेकार्थीभावे तत्प्रतिपादितम्। एवञ्च नोभयतः पाशारज्जुरूपो दोषोऽत्र सम्भवति। तथा चोक्तं कैयटेन नागेशेन च महाभाष्यतत्त्वविदा विदुषा—'किमुच्यते इति—एवं हि वाक्ये पदानां पृथगर्थत्वं स्याद् यद्येक एव विशिष्टार्थो न प्रतीयेत। वृत्तौ च पुरुषमात्रप्रतीतौ स्यादेकार्थीभावः। यतस्तु वृत्तिवाक्ययोरेक एवार्थः प्रतीयते, तदा सामर्थ्यभेदोऽपि नास्ति'[4] इति कैयटे।

ततश्चोद्द्योते—'उक्तविशेषस्य गम्यमानतया अविशेषोक्तिः कथमित्यत आह—एवं हीति। पृथगर्थत्वं स्यादिति समासापेक्षया परस्परापेक्षया च भिन्नार्थत्वं स्यादित्यर्थः। न प्रतीयेतेति पदाभ्यामिति शेषः। सामर्थ्यभेदोऽपीति व्यपेक्षैकार्थीभावरूप इत्यर्थः[5]' इति।

---

१. महाभाष्यम् 'समर्थः पदविधिः' (२।१।१) इति सूत्रे।

२. ,, ,, ,, ,, ,, ।

३. ,, ,, ,, ,, ,, ।

४. 'समर्थः पदविधिः' (२।१।१) इति सूत्रे कैयटीये।

५. ,, ,, ,, उद्द्योते।

ततः पुनः कैयटः—'नापि ब्रूम इति । वाक्ये पृथगर्थकत्वेऽपि पदानामाकाङ्क्षा-योग्यतावशाद्विशेषणविशेष्यभावाद्विशिष्टार्थप्रतीतिः । वृत्तावपि विशिष्ट एवार्थो राज-पुरुषशब्दाभ्यामभिधीयत इति कुतोऽन्यस्यानयनम् ? न चैतावता वृत्तिवाक्ययोरे-कार्थता । यथा ब्राह्मणानां शतं भोज्यताम्-शतं ब्राह्मणाः भोज्यन्तामिति सत्यपि कार्यस्याभेदे शब्दार्थो भिद्यते, तथेहापीत्यर्थः' इति ।

अनेन प्रघट्टकेन सिद्धमिदं यत् कया दृष्ट्या एकार्थीभावव्यपेक्षयोरभेदाभिधानम्, कया च दृष्ट्या भेदाभिधानमिति । स्पष्टमेवाहात्र कैयटः—'न चैतावता वृत्ति-वाक्ययोरभेदः' इति । तथा च वाक्यार्थस्य वृत्त्यर्थान्तर्गतत्वेऽपि विशिष्टार्थोपस्थापक-तया भेद इति विवेकः । अत एव कैयटे—'तदेवं सुपो भावाभावाभ्यामर्थस्य भावा-भावानुमानं वाक्यसमासयोः'[1] इति ।

अर्थस्येति कैयटवाक्यघटकस्य पदस्य प्रतीकमादाय नागेशभट्टेन—'अर्थगत-भिन्नोपस्थितिविषयत्वस्येत्यर्थः'[2] इति व्याख्यातम् ।

तथा च निगूढमत्रेदमेव स्फुटितं जातं यदेकार्थीभावव्यपेक्षयोर्यो विशेषः स नार्थविषयकत्वेन, यतो हि तयोरेकरूपत्वमनेकरूपत्वञ्च विशिष्टार्थोपस्थितिजनकत्वेन तदन्तर्गतत्वेन चोपपादयितुं शक्यत्वात् । किन्तु कश्चनान्यो विशेषोऽवश्यं वाच्यो येन स्यादेकार्थीभावव्यपेक्षयोर्विशेष इति प्रश्ने तदवस्थे भगवान् महाभाष्यकारः प्राह—'सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्धस्वर इति'[3] इति ।

अत एतद्भाष्यसूचितकार्यविशेषादत्रैकार्थीभावव्यपेक्षयोरपि विशेष इति बोध्यम् । तत्र सुब्लोपमित्यनभिधाय सुबलोप इति कथमुक्तमिति प्रश्ने यावद् वक्तव्यमत्र सन्निधापितम् । अन्ये च ये महाभाष्यवाक्येन विशेषा एकार्थीभावव्यपेक्षयोर्वर्तन्ते ते महाभाष्ये वाक्येऽस्मिन् सूत्ररूपेण प्रोक्ता एव । पश्चाच्च व्याख्यानरूपेण तेषां स्वरूप-मभिधाय एकार्थीभावव्यपेक्षयोर्विशेषमाविश्चकार भगवान् महाभाष्यकारः । तथाहि—

'व्यवधानं भवति वाक्ये राज्ञः ऋद्धस्य पुरुष इति । समासे तु न भवति राज-पुरुष इति । यथेष्टमन्यतरेणाभिसम्बन्धो भवति वाक्ये—राज्ञः पुरुषः पुरुषो राज्ञ इति । समासे न भवति राजपुरुष इति द्वौ स्वरौ भवतो वाक्ये राज्ञः पुरुष इति । समासे पुनरेक एव राजपुरुष इति'[4] इति ।

एभिश्चतुर्भिर्हेतुभिर्महाभाष्ये सुबलोपो व्यवधानं यथेष्टमन्यतरेणाभिसम्बन्ध-स्वर इत्येतैरेकार्थीभावव्यपेक्षयोर्वृत्तिवाक्ययोर्भेदः प्रसाधितः ।

कैयटोऽपि व्याख्यातवान् सर्वं पक्षम् । तथाहि—'व्यवधानमपि सत्यर्थ-भेदे दृष्टं वाक्ये यथा भार्या राज्ञः पुरुषो देवदत्तस्येति । असति न दृष्टम् । देवदत्त इति

१. ,, ,, ,, ,, ।

२. ,, ,, ,, ,, ।

३–४. महाभाष्यम्—'समर्थः पदविधिरिति सूत्रे ।

पदमध्ये पदान्तरस्य प्रक्षेप्तुमशक्यत्वात्'। यथेष्टमिति वाक्येऽनियतपौर्वापर्येण पदानां प्रयोगः, समासे तु नियतपौर्वापर्यः। स चार्थभेदनिबन्धनः। यथा कर्क इति प्रयोक्तव्ये अर्क इति न प्रयुज्यते। द्वौ स्वराविति। अर्थभेदे स्वरभेदो दृश्यते। यथा देवदत्तो गामभ्याजेति। तदभेदे न दृश्यते, यथा घट इति। अत्र राज्ञः पुरुष इति द्वे अपि पदे नित्स्वरेणाद्युदात्ते इति।

तथा च कैयटोक्तिः समीचीनैव—'तदेवं सुपो भावाभावाभ्यामर्थस्य भावाभावानुमानं वाक्यसमासयोः' इति।

अनुमानाकारश्चात्र कीदृश इति चेत्, तर्हि—समासः, वाक्यार्थापेक्षया किञ्चिदधिकविषयकः सुब्रहितत्वाद् यन्नैवं तन्नैवम्, यथा वाक्यम् इति प्रयोगो बोध्यः। यदि च पक्षैकदेशस्यापि दृष्टान्तता सम्भवत्येव, तदा 'वनेचरः' 'सप्तर्षयः' इत्यादिशब्दवदिति दृष्टान्तीकर्तुं शक्यम्। यतो हि वाक्येन संज्ञा नावगम्यते।

तथा च प्रयोगः—'समासः वाक्यबोध्यार्थातिरिक्तार्थप्रतिपादकः समासत्वात् सप्तर्षय इत्यादिसमस्तपदवद् इति। तथा च सुपो भावाभावाभ्यामर्थस्य भावाभावानुमानं वाक्यसमासयोः' इति कैयटवाक्यस्य भिन्नार्थानुमानप्रयोजकहेत्वन्तरेऽपि तात्पर्यकल्पनापरत्वान्मदीयानुमानप्रयोगस्यापि समासार्थस्य वाक्यार्थापेक्षया भिन्नत्वात् प्रामाण्यं सङ्गतमेव। अयमपि विशेष एकार्थीभावव्यपेक्षयोः।

कश्चिदपि साधकत्वेन प्रयुक्तो हेतुः समालोचनीयो भवत्येव। येन तस्य निर्दुष्टत्वं स्वसाध्यसाधकत्वञ्च भवेदिति कृत्वा यथा 'अयं वृक्षः कपिसंयोगी एतद्वृक्षत्वात्' इति तार्किकैः प्रयुज्यते। तत्र जायते विचारोऽयं यदयं प्रयुक्तो हेतुरन्वयी वा व्यतिरेकी वा? तत्रान्वयी तु भवितुं नार्हति, यतो हि तादृशेऽन्वयिनि हेतौ साध्यवत्तया प्रसिद्धो धर्मी अपेक्ष्यते। प्रकृते तु एकस्यैव वृक्षविशेषस्य पक्षत्वात् कपिसंयोगस्य साध्यत्वादेतद्वृक्षत्वस्य च हेतुत्वादेतद्वृक्षत्वस्यैतद्वृक्षातिरिक्तावृत्तित्वादन्वयित्वासम्भवः। व्यतिरेकित्वमपि न सम्भवति, यतो हि व्यतिरेकित्वं नाम साध्याभावव्यापकीभूताभावप्रतियोगित्वं हेतोः। प्रकृते च यत्र यत्र कपिसंयोगाभावस्तत्र तत्र एतद्वृक्षत्वाभाव इति रीत्या नास्ति साध्याभावव्यापकीभूताभावप्रत्याशा, यतो हि यथा—'अयं वृक्षः कपिसंयोगी एतद्वृक्षत्वात्' इत्यस्यानुमानस्य मानत्वमबाधितासत्प्रतिपक्षिताव्यभिचारितत्वादिकञ्च मन्यन्ते तार्किकाः। तथैव—'अयं वृक्षः कपिसंयोगाभावान् एतद्वृक्षत्वात्' इत्यस्यापि प्रयोगस्य प्रागुक्तानुमानवदेव मानत्वादिकं मन्यन्ते।

तथा च यत्र कपिसंयोगाभावस्तत्र एतद्वृक्षत्वाभाव इति वक्तुमशक्यम्, तस्मिन्नेव वृक्षे मूलावच्छेदेन कपिसंयोगाभावस्य सत्त्वेऽपि एतद्वृक्षत्वाभावस्यासत्त्वात्। अतोऽस्य प्रयोगस्यान्वयित्वं व्यतिरेकित्वं वा न सम्भावयितुं शक्यमिति पूर्वपक्षे प्राप्ते समाधीयते—'यद्व्यतिरेकित्वमेवास्य प्रयोगस्य। यतो हि यत्राव्याप्यवृत्तिकवस्तुसाध्यत्वं भवति, तत्र व्यतिरेकिव्याप्तौ प्रतियोगि-

व्यधिकरणस्याभावस्य प्रवेशः। तथा च यत्र प्रतियोगिव्यधिकरणकपिसंयोगाभावस्तत्र एतद्वृक्षत्वाभाव इति व्यतिरेकिव्याप्तौ न दोषः, गुणादेरेव दृष्टान्तत्वात्। एतद्वृक्षे वर्ततां नाम एतद्वृक्षत्वम्, तथापि न व्यभिचारावतारः, यतो हि सोऽभावो न प्रतियोगिव्यधिकरणः, किन्तु प्रतियोगिसमानाधिकरण एव। कपिसंयोगरूपः प्रतियोग्यपि वृक्षे, तदभावोऽपि मूलावच्छेदेन वृक्षे इति प्रतियोगिसमानाधिकरणाभाव-प्रतियोगित्वान्नात्र दोषप्रसक्तिः। गुणादौ तु कपिसंयोगाभावोऽपि प्रतियोगिव्यधिकरणो विद्यते, यतो हि तत्र कपिसंयोगस्तु न स्थातुं शक्नोति, गुणे गुणानङ्गीकारात्। तथा च प्रतियोगिव्यधिकरणाभावव्यापकीभूताभावप्रतियोगित्वमेतद्वृक्षत्वे वर्तते एव गुणा-वच्छेदेन, तथा च न व्यतिरेकिहेतुत्वानुपपत्तिः। तथैव भगवता महाभाष्यकृता कृतस्य प्रयोगस्योपपत्तये विचारणीयमेवास्माभिरिति हेतोर्मया पूर्वपूर्वाचार्यवचोऽवलम्बनेन श्रीगुरुचरणवचोऽमृतानुस्मरणजन्यप्रतिभासेन स्वीयानेकशास्त्राभ्यासजन्ययथाप्रतिभा-समानार्थसन्निवेशेन च कृतमुपपादनम्।

तत्र प्रसङ्गादापतितमेतत्तत्त्वं विशदीकरोमि यत्—'गुणे गुणानङ्गीकारः' इति मते किं बीजम्? यतो हि कश्चिदपि नियमो व्यवस्था वा कस्मिंश्चिद् दोषे कार्यानुपपत्तौ वा स्वीक्रियत इति। गुणे गुणानङ्गीकारः कुतोऽङ्गीक्रियते? नहि द्रव्ये द्रव्या-नङ्गीकारः। तत्रेदमेवाभिधेयं भवति यद् द्रव्ये तु कपालादिरूपे घटादिरूपद्रव्योप-लम्भात् प्रमाणस्य बाधकत्वेनोपस्थितेः सत्त्वान्न द्रव्ये द्रव्यानङ्गीकारः शक्यशङ्कः, गुणे गुणसद्भावस्तु कथमपि न व्यवस्थापयितुं शक्यः। यतो हि यद् दृश्यते तदेव कल्प्यते इति नियमः। नहि क्रियायां क्रिया, न वा गुणे गुणो दृश्यते, तयोः समवायसम्बन्धेन द्रव्यमात्रवृत्तित्वात्। अत एव समवायसम्बन्धेन कार्यं प्रति द्रव्यमेव तादात्म्येन कारणं भवतीति नियमः। तथा चोक्तं विश्वनाथपञ्चाननभट्टाचार्येण—

'ननु द्रव्यत्वजातौ किं मानम्? नहि तत्र प्रत्यक्षं प्रमाणं घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न, कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेः[1]' इति।

यथा हि तत्र तार्किकमते उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति स्वीक्रियते। कुत इति प्रश्ने तत्र यदि सगुणं सक्रियमेव द्रव्यमुत्पद्येत, तर्हि गुणादेः कार्यत्वमेव न स्यात्। यतो हि समसमयकयोः पदार्थयोः सव्येतरशृङ्गयोरिव कार्यकारणभावानु-पपत्तेः। अतो द्रव्यस्य क्रियां प्रति गुणं प्रति च कारणत्वोपपत्तये उत्पत्तिकाले द्रव्यस्य निर्गुणत्वं निष्क्रियत्वञ्चाङ्गीकृतम्। तथा स्वीकारे च समन्वयः। यतो हि कारणत्वं नाम कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्यन्ताभावप्रतियोगितानवच्छे-दकधर्मवत्त्वम्। तच्च द्रव्यस्यैव सङ्गतं भवति। अतः प्रथमक्षणे द्रव्यस्य निर्गुणत्व-निष्क्रियत्वपक्षोपपत्तिः। भगवान् महाभाष्यकारो महान् शब्दतत्त्ववेत्ता लोके शब्दाः

१. न्यायसिद्धान्तमुक्तावलीप्रत्यक्षखण्डे दिनकरीरामरुद्रीयुक्ते ४८ पृष्ठे।

कथं प्रयुक्ता भवन्तीति हि ज्ञात्वा स्वयमेव भगवान् भाष्यकारो निर्दुष्टव्याप्तिबलाच्छब्दानां साधुत्वं साधितवानित्यहो तेषां लोकोत्तरज्ञानवत्त्वम्। कस्यापि सूत्रस्यार्थविचारप्रसङ्गे पक्षप्रतिपक्षोपस्थापनेन सम्यग् विचार्य पदार्थनिर्णयः कृतः।

१४. एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्

इदं हि वाक्यं महाभाष्ये द्वितीयाध्याये—'समर्थः पदविधिः[१]' इति सूत्रे प्रयुक्तमुपलभ्यते। तत्र वाक्यशब्दस्य निष्पत्तये—'वचोऽशब्दसंज्ञायाम्[२]' इति सूत्रमेव मानम्। तेन हि सूत्रेण शब्दस्य संज्ञा यदा न विवक्षिता भवेत्, तदा वच्धातोश्चकारस्य कुत्वं न क्रियते। शब्दस्य संज्ञायान्तु वाक्यमिति भवति। तथा चोक्तं कौमुद्यां श्रीदीक्षितेन—'वचोऽशब्दसंज्ञायां वाच्यम्, शब्दाख्यायान्तु वाक्यम्[३]' इति। तथा च शब्दानामनेकाः संज्ञा व्यवहारतोऽपि सिद्धाः—वर्णपदवाक्यादिरूपाः। कस्यापि वस्तुनः स्वेतरवैलक्षण्येन निर्धारणाय तस्य व्यवहारनिदानं किमिति जिज्ञासोपशान्तये च लक्षणानि प्रमाणानि च सार्थकानि भवन्ति। अत एवायं प्रवादः—'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' इति। 'व्यावृत्तिव्यवहारौ वा लक्षणस्य प्रयोजनम्' इति च। सर्वजनप्रत्ययप्रसिद्धमप्यात्मानं साधयितुं भगवान् गौतमो हेतूपपादनेन साधितवान् लक्षणेन च। नहि कोऽपि सन्दिग्धे अहं न वा अहं नास्मि वा तदित्थमात्मनः संशयविपर्ययमिथ्याज्ञानव्यतिरेकसमुदायेन सर्वजनप्रत्ययसंवेद्यमसन्दिग्धमप्यात्मानं साधयितुम्, अत एव महर्षिः प्रवृत्तो यतो जिज्ञासेयं न शान्ता भवति यद्—'आत्मनि किं प्रमाणम्? किं लक्षणम्' इत्याकारा।

किं प्रमाणमिति जिज्ञासाया उपशान्तये प्राह महर्षिर्गौतमः—'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्[४]' इति। एभिश्चिह्नैरात्मसिद्धिर्भवति।

तथा चोपपादिवन्तः श्रीमधुसूदनसरस्वतीस्वामिनः स्वरचिते वेदान्तकल्पलतिकाख्ये ग्रन्थे—'जातस्यास्मिन् जन्मनि किञ्चिदप्यननुभूतवतः स्तनपानाद्यर्थप्रवृत्त्यन्यथानुपपत्त्या तज्जातीयेष्टसाधनतास्मरणतज्जनकसंस्कारतज्जनकानुभवाश्रयत्वनियमेन ततः पूर्वमपि तथैवाभ्युपगमात् पूर्वानुभवसंस्कारस्मरणेच्छादीनामेकाश्रयाणामेकविषयत्वेन कार्यकारणभावनियमात्।

तथा च परामर्षं सूत्रम् 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्[५]' इति।

---

१. पा० सू०—२।१।१।

२. पा० सू०—७।३।६७।

३. सिद्धान्तकौमुद्यां कृदन्तप्रकरणे।

४. न्यायसूत्रम्—१।१।१०।

५. वेदान्तकल्पलतिका २० पृष्ठे।

तथा च 'समर्थः पदविधिः' इति सूत्रे समासवाक्ययोर्वृत्तिवाक्ययोर्वैजात्यप्रदर्शनार्थं लक्षणं वाक्यस्यावश्यकमिति धिया भगवता महाभाष्यकृता बहूनि लक्षणवाक्यानि प्रदर्श्यापि तत्र तत्र पूर्णतोषमलभमानः परेषां व्युत्पत्तिसिद्धये स्मृतस्योपेक्षानर्हत्वाच्च-लक्षणमिदमप्येकं वाक्यस्याह—'एकतिङ् वाक्यम् एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्' इति।

तत्रभगवतो महाभाष्यकारस्य 'समर्थः पदविधि' इति सूत्रं व्याख्यातुं प्रवृत्त-स्याकस्मात् कस्माद्धेतोर्वाक्यलक्षणतत्प्रयोजनान्वाख्याने प्रवृत्तिरिति जिज्ञासा नैसर्गिकी, तां निवर्तयितुमाह तत्रभवान् महान् शाब्दिकशिरोमणिः कैयटः—

'नानाकारकान्निघातादिनिवृत्तये क्वचित्प्रवृत्तये च समानवाक्ये निघातयुष्मद-स्मादादेशा वक्ष्यन्ते। तत्र लौकिकवाक्यग्रहणनिषेधार्थं वाक्यं परिभाष्यते। अव्ययकारक-विशेषणानि प्रत्येकं समुदितानि चाश्रीयन्ते, यथा वृषलैर्न प्रवेष्टव्यम्। अट्कुप्वाङ्नुम्-व्यवायेऽपीति। आख्यातमिति चैकत्वं विवक्षितम्[1]' इति।

तत्रैव नागेशभट्टेन सम्यगालोच्य विवृतम्। तथाहि—'वाक्यलक्षणस्यासङ्गति-माशङ्क्याहनानेति। नद्यास्तिष्ठति कूले इत्यादौ। अत्र ह्यसामर्थ्यान्न प्राप्नोति। यथा कथञ्चित्सामर्थ्यग्रहणे तु—अयं दण्डो हरानेनेत्यादावपि स्यादिति भावः। लौकिकेति। सुप्तिङन्तचयो वाक्यमित्यादि'[2] इति।

तस्य सर्वस्य प्रघट्टकस्यायमेवाभिप्रायो यत्तत्रभवान् भगवान् महाभाष्यकारो नैव विना सङ्गतिमनेकानि लक्षणानि प्राह, किन्तु प्रयोजनमुद्दिश्य लौकिकवाक्य-लक्षणमात्रेण प्रयोजनासिद्धौ शास्त्रीयं वाक्यलक्षणं परिभाषणीयमेवेति मनसि निधाय। तत्र महाभाष्ये–'आख्यातं साव्ययकारकविशेषणं वाक्यम्। आख्यातं साव्ययं सकारकं सकारकविशेषणं वाक्यसंज्ञं भवतीति वक्तव्यम्। साव्ययम्—उच्चैः पठति नीचैः पठति' इति। सकारकम्—ओदनं पचति। सकारकविशेषणम्—ओदनं मृदु विशदं पचति। सक्रियाविशेषणञ्च। सक्रियाविशेषणञ्चेति वक्तव्यम्। सुष्ठु पचति, दुष्ठु पचतीति। अपर आह आख्यातं सविशेषणम्। इत्येव सर्वाणि ह्येतानि विशेषणानि[3] इत्येवं रूपेण वाक्यसमूहेन वाक्यस्य विविधानि लक्षणान्यभिधाय ततो भगवता महाभाष्यकृता कृतमिदमनुसन्धेयस्य लक्षणत्वेन मया निश्चयविषयतामापादितम्—'एकतिङ्। एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम्'[4] इति।

---

१. 'समर्थः पदविधिः' इति सूत्रे कैयटव्याख्याप्रदीपः।

२. ,, ,, नागेशकृते उद्द्योते।

३. समर्थः पदविधिरिति सूत्रे भाष्यम्।

४. ,, ,, ,, ।

इदमेव महाभाष्ये वाक्यलक्षणप्रस्तावेऽन्तिमं लक्षणम्। अत्र च लक्षणे अन्तिमे सिद्धान्तितत्वेन स्वीकृतेऽपि न दोषनिस्तारः, भाष्यविरोधश्च। तथाहि—तत्रेदं लक्षणममिधायोदाहरणरूपेण महाभाष्ये भाषितम्—'ब्रूहि ब्रूहि' इति।

यदि हि नाम एकतिङ् वाक्यसंज्ञं भवतीति तर्हि नात्र वाक्ये एकतिङ्, प्रत्युत द्वितिङ्घटितमिदं शब्दस्वरूपम्, अतोऽत्र लक्षणाव्याप्तेरुदाहरणासङ्गतिः। न च तिङ्-द्वयसत्त्वेऽपि तत्र वर्तत एव सुतरामेकतिङ्, यतो हि तदभावे द्वित्वानुपपत्तेः, द्वित्वसङ्-ख्यायाञ्चैकत्वस्योपजीव्यत्वात्। न हि तत्र क्वचिदप्यैकत्वसङ्ख्यामन्तरा द्वित्व-सङ्ख्या शक्यनिरूपणा। अत एव वैयाकरणसिद्धान्तो महाभाष्यानुसारिप्रक्रियया सिद्धोऽयं विद्यते यत्—'गौण्यपि उत्तरा संख्या पूर्वां संख्यां बाधते' इति।

एवञ्च—'ब्रूहि ब्रूहि' इति वाक्यत्वेनाभिमतस्य भाष्यकारस्योदाहरणस्यानुपपत्तिः स्यादतस्तत्रोक्तं कैयटेन—'एकशब्दः समानवचनो न तु संख्यावाची। बहुव्रीहिश्चायम्। ब्रूहि ब्रूहि देवदत्तेत्यत्र वाक्यत्वादामन्त्रितनिघातः सिद्ध्यति' इति।

तत्र च नागेश भट्टो विवृणुते—'नन्वेकग्रहणात्पुनरप्यनुपपत्तिस्तदवस्थैवेत्यत आह—एकशब्द इति। एकस्य पदस्य वाक्यस्य वाक्यसंज्ञायां प्रयोजनाभावादाह—बहुव्रीहिरिति। एकं तिङन्तं यत्र समुदाय इत्यर्थः[1]' इति। अनेन ग्रन्थेन नागेशभट्टेन कैयटोक्तेर्व्याख्यानं विहितम्। ततश्च महता संरम्भेण कैयटमतस्य निरासः कृतः। तस्य युक्तायुक्तत्वं पश्चाद्विवेचयिष्ये।

साम्प्रतमपरमपि प्राकरणिकं किञ्चिद् विविच्यते। तथाहि—वाक्यस्वरूपनिर्धा-रणे प्रकृतसूत्रे—'समर्थः पदविधिः'[2] इत्यत्र भगवता महाभाष्यकृता 'एकतिङ्वाक्यम्। एकतिङ् वाक्यं भवतीति वक्तव्यम्' इत्यनेन वाक्येन वाक्यलक्षणमुक्तम्। अपरत्र हि—'निपात एकाजनाङ्'[3] इति सूत्रे 'एकोऽज्निपात आङ्वर्जः प्रगृह्यः स्यात्' इत्यर्थ-केऽनाङ्' इति प्रतिषेधांशेन न ङितौ भवति प्रगृह्यत्वमङितस्तु भवत्येव प्रगृह्यत्वमिति स्थितिः। अत एव सिद्धान्तकौमुदीग्रन्थे—'अनाङ' इत्युक्तेरङिदाकारः प्रगृह्य एव आ एवं नु मन्यसे। आ एवं किल तत्। ङित्तु न प्रगृह्यः। ईषदुष्णमौष्णम्'[4] इति विचारितम्।

किन्तु तत्रेयं शङ्का न जहाति सर्वान् यत्प्रयोगे ङकारस्याश्रवणात् कुत्रा-कारस्य ङित्त्वं कुत्र नेति। तथा चाविशेषादिति प्रसङ्गः। ङित्त्वाङित्त्वाविवेके सूत्रे

---

१. महाभाष्यव्याख्याप्रदीपः 'समर्थः पदविधिः' इति सूत्रे।

२. महाभाष्ये उद्द्योते समर्थः पदविधिरिति सूत्रे।

३. पा० सू०—२।१।१। (३) पा० सू०—१।१।१३।

४. सिद्धान्तकौमुद्यामच्सन्धौ 'निपात एकाजनाङ्' इति सूत्रे।

प्रोक्तस्य 'अनाङ' इति प्रतिषेधस्य वैयर्थ्यञ्चापतेदिति दोषप्रसक्तौ भगवता पतञ्जलिना स्वसामर्थ्ययोगाद् व्यवस्था कृता—

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्[१] ॥ इति ।

तत्र हि वाक्यस्य ग्रहणं कृतं वर्तते। यदि वाक्यपदेन सुबन्तचयस्य ग्रहणं क्रियेत, तर्हि सर्वेषामेव वाक्यत्वाद्वाक्यघटकत्वेन सर्ववाक्यघटकाकारस्याङित्त्वाद् विभागो व्यर्थः स्यात्, स्याच्च व्यर्थमनाङ् इति प्रतिषेधः। अतस्तत्र वाक्यत्वं पारिभाषिकं ग्रहीतव्यं वा, लोकसिद्धं ग्रहीतव्यं वेति विचारे इदमवधेयम्। यदि हि सुबन्तरूपपदचयात्मकं वाक्यं गृहीतं स्यात्, तर्हि भाष्यकारिकया अनया कृतो विभागो न सङ्गच्छेत्, यतो हि तत्रोक्तानामीषदाद्यर्थानां प्रतिपादकस्य वाक्यत्वेन केवलमङित्त्वमेव प्रसज्येत।

न च तद्वारणार्थमेव विभाग इति वाच्यम्, तथा सत्यपि स्मरणग्रहणस्य वैयर्थ्यापत्तेः। यतो हि 'आ एवं किल तत्' इत्यादिवाक्यानां स्मरणार्थकत्वेन प्रसिद्धानां वाक्यत्वमेव। अतस्तत्र—'वाक्यस्मरणयोरङित्' इति महाभाष्यीयकारिकाघटकवाक्य-शब्देन कीदृशं वाक्यत्वमपेक्षितमिति चेत्, तर्हि 'एकतिङ्वाक्यम्' इति 'समर्थः पदविधिः' इति सूत्रस्थलक्षणलक्षितमेवेति सिद्धान्तः कर्तव्यः। अन्यादृशे वाक्यग्रहणे तत्रत्यसर्व-विभागविप्लवापत्तेः। अत एव 'आ एवं नु मन्यसे' इति तिङन्त एवोदाहरणत्वेन तत्र प्रदर्श्यते। तत्र वाक्ये प्रयुक्त आकारो वाक्यार्थगतान्यथात्वसूचनार्थः। तथा चोक्तमुद्द्योते—

'पूर्वप्रकान्तस्य वाक्यार्थस्यान्यथात्वद्योतनया प्रकारः प्रयुज्यते—आ एवं नु मन्यसे, नैवं पूर्वं मंस्थाः सम्प्रति मन्यसे इति वाक्यारम्भसूचनायाकार इत्यपरे। तथा स्मृतेः सूचक आकारः प्रयुज्यते। ततः स्मृतोऽर्थो निर्दिश्यते—वा एवं किल तदिति'[२] इति।

एवञ्च सर्वस्य वाक्यस्य क्रियायां परिसमाप्तेः सर्वत्रैव वाक्यत्वं भवितु-मर्हतीति स्मरणार्थकस्यापि वाक्येऽन्तर्भाव इत्यौपादयितुं शक्यते, तथापि यत्र तिङन्तं पदं नोपात्तम्, तत्रैव स्मरणार्थकत्वाङ्गीकारेणान्तर्भावशङ्कानुदयात्। अत एव महाभाष्ये 'वाक्यस्मरणयोरित्युक्तं द्विवचननं सङ्गतमिति बोध्यम्।

इत्थञ्च 'एकतिङ् वाक्यं भवतीति वक्तव्यम्' इति महाभाष्यवाक्यं निर्दुष्टं व्याकरणशास्त्रे तदनुसारेण व्यवस्थेति सिद्धम्। अत एव 'निपात एकाजनाङ्' इति

---

१. महाभाष्ये 'निपात एकजनाङ्' (१।१।१४) इति सूत्रे १७४ पृष्ठे।

२. उद्द्योते महाभाष्ये 'निपात एकजनाङ्' (१।१।५।१४) इति सूत्रे।

सूत्रस्थं भाष्यं तत्रत्योदाहरणादिचिन्ता चात्र समायोजिता। तदैकवाक्यतया विरोधाभावाच्चात्र वाक्यलक्षणं भाष्यीयमिदम्—'एकतिङ् वाक्यम्' इति निर्दुष्टं सम्पन्नम्। यत्रापि 'ब्रूहि ब्रूहि' इत्यत्र तिङन्तद्वयं तत्रापि वर्तत एव तिङन्तपदघटितत्वमधिकं प्रविष्टन्तु न क्षतिकरमिति लक्षणसङ्गतिः।

यत्तु प्रकृतमहाभाष्यलक्षणे कैयटोद्द्योतकारनागेशभट्टयोर्मतभेदः स च युक्तायुक्तत्वपरीक्षकैः परीक्षणीयः। उद्द्योते कैयटोक्तीनां खण्डनं कृतम्। तत्तु सर्वं समालोच्याविरुद्धत्वेनापि व्याख्यातुं शक्यम्। मन्ये बुद्धिवैशद्यार्थं तत्रैव वा कैयटोक्तीनां तात्पर्यमिति वर्णनाय वा श्रीमतो नागेशभट्टस्य तात्पर्यमिति वक्तुं शक्यमिति प्रतिभाति।

तृतीयोऽध्यायः

१५. अपवादश्च नामानुबन्धभिन्नो वा भवति रूपान्यत्वेन वा

इदं हि महाभाष्यवाक्यं तृतीयाध्याये 'वासरूपोऽस्त्रियाम्'[1] इति सूत्रे सत्यवसरे प्रवृत्तम्। तस्य हि सूत्रस्य वर्तते किल कुटिलिकार्थः। यतो हि सूत्रे नञ्द्वयोपादानं विद्यते—'असरूपः' इति 'अस्त्रियाम्' इति च। न च कथमुच्यते 'असरूपः' इति, 'सरूपः' इत्येवास्तु। तथा च सरूपप्रत्ययो विकल्पेनोत्सर्गस्य बाधक इत्येवार्थोऽस्तु, का क्षतिरिति वाच्यम्, तथा सति 'सरूपो वास्त्रियाम्' इति सूत्रं कुर्यात् सूत्रकारः, न च तथाकृतमित्यदोषात्।

ननु प्रयोगसिद्ध्यर्थं शास्त्रं प्रवृत्तम्, शास्त्रमपि लक्षणपदेन व्यवह्रियते, अत एव—'लक्ष्यलक्षणे व्याकरणम्'[2] इति महाभाष्यवाक्यं प्रवृत्तं पुरा। तथा च यथा कस्यचिल्लक्षणस्य प्रवृत्तौ आदाविदं परीक्ष्यते परीक्षकैर्यदिदं लक्षणमव्याप्त्यतिव्याप्त्यसम्भवदोषशून्यं न वेति। तदनन्तरञ्च तादृशप्रसिद्धदोषत्रयशून्यं लक्षणं स्वलक्ष्यसङ्ग्राहकं स्वलक्ष्येतरप्रतियोगिकस्वलक्ष्यधर्मिकभेदानुमापकञ्च भवतीति पद्धतिः शास्त्रीया। तथैव प्रकृतेऽपि—'वाऽसरूपोऽस्त्रियाम्' इति सूत्रे नूनमिदं चिन्तनीयं यद् यद्यत्र 'वा सरूपोऽस्त्रियाम्' इत्यत्र 'सरूपः' इत्येवच्छेदो भवतु। मास्तु 'असरूपः' इतिच्छेदः। तथा च नञ्द्वयप्रवेशकृतगौरवादिकं नास्त्येव। भवेद् यदि तथा कृतेच्छेदे कश्चन दोषः प्रयोगासिद्धरूपो भवेत्, तदा यथाश्रुतच्छेदस्वीकार आवश्यकः। नहि केवलं निःसंशयव्यापारं विहायात्र—'सरूपो वाऽस्त्रियाम्' इत्यनुक्त्वा 'वासरूपोऽस्त्रियामित्युक्तम्, अतो विज्ञायते यदत्रासरूप इतिच्छेद इति कथनमात्रेण फलशून्येन यत्किञ्चित् प्रयोगासिद्ध्यापादनरहितेन न यथाश्रुतसूत्रोपपत्तिः कर्तुं शक्येति चेन्न, सरूप इति पदच्छेदे हि 'गोदः, कम्बलदः' इत्यादिप्रयोगेषु कप्रत्ययो विकल्पेन स्यादणोऽपवादः। कृते चासरूप इति पदच्छेदे नित्यमपवादता संगच्छते।

अयं भावः—'कर्मण्यण्'[1] इति सूत्रं हि सामान्यशास्त्रमुत्सर्गापरपर्यायम्।

'आतोऽनुपसर्गे कः'[2] इति सूत्रमपवादसूत्रम्। तत्र च नित्यमेव कप्रत्ययो बाधते पूर्वनिर्दिष्टसूत्रेण विधीयमानमणम्। यदि चात्र सूत्रे 'सरूप' इति पदच्छेदं क्रियेत, तर्हि तयोर्द्वयोः कप्रत्ययाण्प्रत्यययोः सरूपप्रत्ययत्वाद्विकल्पेन बाध्य-

---

१. पा० सू०—३।१।९४।

२. महाभाष्ये पस्पशाह्निके।

१. पा० सू०—३।२।१।

२. पा० सू०—३।२।३।

बाधकभावः स्यात्, अतस्तत्र 'असरूपः' इत्येव पदच्छेदः। एवञ्च 'वाऽसरूपोऽस्त्रियाम्' इत्येव नञ्द्वयघटितमिदं सूत्रमिति बोध्यम्।

ननु कृतेऽपि 'असरूपः' इति पदच्छेदे कप्रत्ययाणप्रत्यययोरसरूपत्वात् पुनरपि विकल्पेन बाधकतापत्तिरपवादप्रत्ययस्य तदवस्थैवेति चेन्न, 'नानुबन्धकृतमसारूप्यम्'[1] इति परिभाषाबलादनुबन्धकृतासारूप्यस्याभावेन तयोः सरूपप्रत्ययत्वाद् नित्यं बाध्यबाधकभावसत्त्वेनादोषात्।

न च—'वाऽसरूपोऽस्त्रियाम्' इति सूत्रे 'सरूपः' इत्येवास्तु, सा परिभाषापि मास्तु काणोर्नित्यं बाध्यबाधकभावोपपत्तिरपि स्यात्। कथमिति चेदुच्यते—परिभाषाया अभावेऽनुबन्धकृतमसारूप्यन्तु स्यादेव।

एवञ्च काणोरनुबन्धकृतासारूप्यसत्त्वेन सूत्रे च सरूपपदसत्त्वात् सरूपयोरेवोत्सर्गापवादयोर्विकल्पेनापवादशास्त्रस्य बाधकत्वात्। तत्र च सरूपत्वाभावेन नित्यं बाधकत्वोपपत्तिरिति वाच्यम्, तथा सति तव्यतव्यदनीयरादीनामपि नित्यबाधापत्तेः। यत्ण्यत्तव्यदादयो हि प्रत्यया असरूपाः। तेषामपि परस्परं बाध्यबाधकभावापत्तिः स्यात्।

यदा च 'असरूपः' इतिच्छेदस्तदा न दोषावसरः, यतो हि तेषामसरूपत्वेन विकल्पेन बाधात्। अतो न तत्र दोषापत्तिः। तथा चोक्तम्—

"अपवादेन नित्यं बाधे प्राप्ते क्वचिदुत्सर्गस्यापि प्रवृत्त्यर्थमिदं सूत्रम्। अत एव—'अचो[2] यत्', 'ऋहलोर्ण्यत्'[3] इत्याद्यपवादविषये तव्यदादयोऽपि प्रयुज्यन्ते—भव्यम्, भवितव्यम्; कार्यम्, कर्तव्यम्, करणीयम्; वाच्यम्, वक्तव्यमित्यादि"[4] इति।

इत्थञ्च 'वाऽसरूपोऽस्त्रियाम्' इति सूत्रे 'असरूपः' इत्येव पदच्छेद इति सिद्धान्तः। अन्यथा प्रदर्शितप्रयोगेषु नित्यबाधापत्तेः।

सूत्रेऽसरूप इति परिच्छेदे स्वीकृते सति गां ददातीति गोदः इत्यादौ 'कर्मण्यण्'[5], 'आतोऽनुपसर्गे कः'[6] इत्याभ्यां सूत्राभ्यां विधीयमानयोरण्प्रत्ययकप्रत्यययोरपि विकल्पेन बाध्यबाधकभावापत्त्या एकदा गोद इति, एकदा च गोदाय इति प्रयोगयोः साधुत्वापत्तिः स्यात्। तथा मा भवेदेतदर्थम्—'नानुबन्धकृतमसारूप्यम्' इतीयं परिभाषा प्रवृत्ता।

---

१. परिभाषेन्दुशेखरे परिभाषा ८।

२. वैयाकरणसिद्धान्तकौमुद्यां कृदन्तप्रकरणे 'वाऽसरूपो' ३।१।९४ इति सूत्रे।

३. पा० सू०—३।१।९७।

४. पा० सू०—३।१।१२४।

५. पा० सू०—३।२।१।

६. पा० सू०—३।२।३।

तथा चानुबन्धकृतमसारूप्यं वारितम्। तेन काणोः सारूप्यमेवावतिष्ठते। तथा च तत्रासारूप्याभावादसारूप्ये एव 'वाऽसरूपोऽस्त्रियाम्' इति सूत्रप्रवृत्तेः काणोर्विषये तत्सूत्रीयोद्देश्यतावच्छेदकाक्रान्तेरभावान्नापवादप्रत्ययेन केन विकल्पेन बाधः, किन्तु नित्यमिति हृदयम्। अत एवोक्तं परिभाषेन्दुशेखरे नागेशभट्टेन विदुषा—'नन्वेवमपि'[1] 'वाऽसरूपसूत्रेण कविषयेऽणोऽप्यापत्तिरित्यत आह—'नानुबन्धकृतमसारूप्यम्' 'ददाति दधात्योर्विभाषा'[2] इति णबाधकशस्य विकल्पविधायकमस्यां ज्ञापकम् तेन गोद इत्यादौ नाणिति वाऽसरूपसूत्रे भाष्ये स्पष्टम् इति।

अत्रायं विशेषः—व्याकरणमहाभाष्यानुसारेण व्याकरणशास्त्रेऽस्ति पक्षद्वयम्—एकस्तु 'अनुबन्धा अनेकान्ता' इति, अपरस्तु 'अनुबन्धा एकान्ता' इति। तथा चानेकान्तपक्षे काणोः सारूप्यान्नित्यमेव बाध्यबाधकभावः। एकान्तपक्षे चानुबन्धकृतस्यासारूप्यस्य विद्यमानत्वेन 'वाऽसरूपोऽस्त्रियाम्' इति सूत्रेण विकल्पेन स्यादपवादप्रत्ययेन बाध इति कृत्वा—'नानुबन्धकृतमसारूप्यम्' इति परिभाषाबलेन काणोः सारूप्यसत्त्वात् तत्र तत्सूत्रीयोद्देश्यतावच्छेदकाक्रान्तेरसत्त्वादप्रवृत्तौ नित्यं बाधसत्त्वेन साधुरूपोपपत्तिः।

तथा चोक्तं महाभाष्ये—'यद्येवम्[3]—अनुबन्धविभिन्नेषु विभाषाप्रसङ्गः अनुबन्धविभिन्नेषु विभाषा प्राप्नोति—'कर्मण्यण्' 'आतोऽनुपसर्गे कः' इति कविषयेऽणपि स्यात्। सिद्धमनुबन्धस्यानेकान्तत्वात्। सिद्धमेतत्। कथम्? अनुबन्धस्यानेकान्तत्वात्। अनेकान्ता अनुबन्धाः। अथैकान्तेषु दोष एव। एकान्तेषु च न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति 'नानुबन्धकृतमसारूप्यं भवति' इति। यदयं 'ददातिदधात्योर्विभाषा' इति।

इत्थञ्च सम्यग्रूपेणकृते सत्यालोडने सूत्रे नञ्द्वयसत्त्वं समीचीनमेव। अन्यथानेकप्रयोगनिष्पत्तिरूपप्रयोजनासिद्धेः। तथा च सूत्रार्थोऽयं संवृत्तः—'अस्मिन् धात्वधिकारेऽसरुपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना'[4] इति। सूत्रेऽस्त्रियामित्यंशोऽप्यावश्यकः। तेन 'स्त्रियां क्तिन्'[5] इत्युत्सर्गम् 'अप्रत्ययात्'[6] इत्यपवादो नित्यं बाधते। तथा च चिकीर्षा जिहीर्षा इत्यादिरूपाणि सिध्यन्ति। तदंशाप्रवेशे तु विकल्पापत्तिः। महाभाष्ये प्रकृतसूत्रे कतिपयान् पक्षानुत्थाप्य ततः—'अथ वाऽसरूपो वा बाधको भवतीत्युच्यते' इत्युक्त्वा ततोऽनुसन्धेयत्वेन गृहीतं

---

१. परिभाषेन्दुशेखरे परिभाषा ८ व्याख्याने भूतियुक्ते ३४ पृष्ठे।

२. पा० सू०—३।१।१३९।

३. म० भा०—३।१।९४ सूत्रे।

४. सिद्धान्तकौमुद्यां कृदन्तप्रकरणे—३।१।९४ सूत्रे।

५. पा० सू०—३।३।९४।

६. पा० सू०—३।३।१०२।

वाक्यम्' अपवादो नामानुबन्धभिन्नो वा भवति रूपान्यत्वेन वा'[1] इत्युक्तम्। तदनन्तरञ्च 'तेनानेनावश्यं किञ्चित् त्याज्यं किञ्चिच्च संगृहीतव्यम्। तद् यदनुबन्धकृतमसारूप्यम्, तन्नाश्रयिष्यामः, यत्तु रूपान्यत्वेनासारूप्यं तदाश्रयिष्यामः' इति।

तस्य भाष्यवचसः कोऽभिप्राय इति जिज्ञासायामाह नागेशभट्टः स्वकृते उद्द्योते 'अथ वेति—उभयकृतासारूप्ये गृह्यमाणे व्यावर्त्याभावादसरूप इति व्यर्थम्, स्पष्टत्वात् 'वाऽपवादः' इत्येव वदेत्। तत्सामर्थ्यादनुबन्धकृतासारूप्यं नाश्रीयते, किन्तु रूपान्यत्वेनैवेत्यर्थः'[2] इति।

१६. 'कर्मणि निवर्त्यमानविक्रियमाणे'

इदं हि महाभाष्यवाक्यं 'कर्मण्यण्'[3] इति सूत्रस्य प्रवृत्तियोग्यदेशनिर्देशपरतया प्रवृत्तम्। इदं वचनमुल्लिख्य ततश्च स्वत एव महाभाष्यकृता तस्य वाक्यस्य विवक्षितमर्थं स्पष्टयितुमुक्तम्—'कर्मणि निवर्त्यमानविक्रियमाणे इति वक्तव्यम्। इह मा भूत्—आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छतीति'[4] इत्युक्तम्।

तस्यायं भावः-कर्मवाचकोपपदाद् धातोरण् प्रत्ययः साधुरित्यर्थकस्य 'कर्मण्यण्' इति सूत्रस्य क्व प्रवृत्तिरित्यत्र कश्चन संकोचः कर्तव्यः। सामान्यतः कर्ममात्रवाचकपदोपपदाद् धातोरण् प्रत्ययो भवेदेतदर्थेऽङ्गीकृते सति यत्र नाण्प्रत्ययो भवति तत्रापि स्यात्। यथा—आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छतीति प्रयोगेष्वपि प्रसज्येत स प्रत्ययः। तस्मात् संकोचः कर्तव्यो यद् निवर्त्यमानविक्रियमाणकर्मवाचकोपपदादेव स्यादण्प्रत्ययो नान्यत्रेति। तथा सति साधुत्वेन गृहीतेषु प्रयोगेष्वेव 'कुम्भकारः' इत्यादिषु भवति। अत एवेदं भाष्यं प्रवृत्तमिति बोध्यम्।

अत्रेयमाशङ्का स्वभावत एव जायते यत् संकोचे कृते सति नातिप्रसङ्गो भवति तेषु प्रयोगेषु। तत्र भाष्यस्येदं तात्पर्यं वर्तते यत्र निवर्त्यविकार्याप्यकर्मसु द्वयोर्वाचकाभ्यान्तु पदाभ्यामुपपदाद् धातोरण् भवति, न तु तत्राप्यकर्मवाचकोपपदात्। यथा—आदित्यं पश्यति, हिमवन्तं शृणोतीत्यादि।

तत्र को हेतुरिति चेत्, तर्हि बोध्यमत्रेदं तत्त्वं यत्-यत्र कर्मणि क्रियाकृतविशेषोपलम्भस्तत्र तु तद्वाचकोपपददात् धातोरण् भवति। यत्र चाप्यं कर्म यस्मिन् क्रियाकृतविशेषो नोपलभ्यते, यथा दर्शनश्रवणादिः। नहि आदित्यादिदर्शनक्रियया श्रवणक्रियया वा कर्मसु आदित्यहिमवदादिषु विशेषो दृश्यते, दृष्टादृष्टश्रुताश्रुतकर्मसु वैलक्षण्याभावेन दर्शनात्। विशेषो हि नाम स पदार्थो यस्य सत्तया तदाश्रयस्य पूर्वावस्थातोऽ-

१. महाभाष्यम्—३।१।९४।
२. उद्द्योते—३।१।९४।
३. पा० सू०—३।२।१।
४. महाभाष्यम्—३।२।१ सूत्रे।

न्यथारूपत्वम् । यथा–मृदं घटं करोति, तन्तुं पटं करोतीत्यादौ पूर्वतन्त्ववस्थातो भवति विलक्षणता पटे घटे च। नहि घटपटाभ्यां जलाहरणप्रावरणादिकार्यनिष्पत्तिर्यथा, तथा तदुपादानमृत्तन्तुप्रभृत्तिभिरपि सम्भाव्यते। अतस्तत्रैव 'कर्मण्यण्' सूत्रं प्रवर्तते यत्र क्रियाकृतविशेषोपलब्धिः । अन्यत्र तु नेत्येव भाष्यहृदयम् ।

किन्तु समालोचनीयमत्रेदं वर्तते यत् कामं मा भवतु विशेषः–आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छतीत्यादौ। परन्तु तज्जातीयक्रियास्थले एव विशेषो लक्ष्यते चापि लोके। यथा–यात्रायां कश्च पश्यति तैलादिकम्। तत्र विशेषो भवत्येव। अत एव दृष्टिदोषोऽनर्थकर इति लोकप्रसिद्धिः। कुसुमाण्डस्याङ्गुल्यादिनिर्देशेनैव परिक्षीणत्वं सर्वलोकप्रसिद्धम्। श्रवणेनापि विशेषः। यथा—कोदण्डविद्युत्सन्निपातादिकालिकशब्दश्रवणेन क्रियाकृतविशेषो दृश्यते हि लोके। तस्मात् कथं तासां क्रियाणां स्वसम्बन्धिनि कर्मणि विशेषानाधायकत्वेन परिष्कर्तुं शक्यमाप्यकर्मत्वमिति पूर्वपक्षः।

उत्तरपक्षः—भाष्यवाक्यदर्शनेन प्रतिभात्येव यद्यत्राप्यं कर्म तत्र न कर्मणि प्रत्ययः यथा—आदित्यं पश्यति, हिमवन्तं शृणोतीत्यादौ। आप्यत्वञ्च क्रियाकृतविशेषाभाववत्त्वम्। तच्च तत्र वर्तत एव। नहि दृष्टादृष्टयोः श्रुताश्रुतयोः, गतागतयोः कश्चन विशेषः। किन्तु क्वचित्तथा वर्तते यत्र दृश्धात्वर्थसम्बन्धमात्रेण विशेषोपलम्भ इति। अत एव तु दुर्योधनस्य मात्रा नेत्राविधानं कृतमिति महाभारतवृत्तान्तो भवति प्रामाणिकः। नेत्राभ्यां दृष्टस्य च दुर्योधनस्य वपुस्तदैव वज्रसन्निभमिति प्रसिद्धिः। अतः कथमियं युक्तिर्भाष्यकारस्य समीचीना भवेद् यत्तत्र न प्रत्यय इति। अत एव तेन वाक्यमिदं निर्धारकतया प्रयुक्तम्—'कर्मणि निवर्त्यमानविक्रियमाणे' इति। तद्वाक्यप्रभावेण यत्र न निवर्त्यमानकर्मत्वं विक्रियमाणकर्मत्वं वा तत्र न प्रत्यय इति प्रतिफलितम्। प्रदर्शितञ्च तत्रैव भाष्ये वाक्यस्यास्य प्रयोजनं व्यावर्त्यविधया, इह मा भूत्—'आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छति'[1] इति।

इत्थञ्चापाततोऽत्र लोकप्रमाणेनोभयादृशस्थलोपलम्भाद् भवति संशयः। किन्तु तस्य कृते इदं समाधानं कर्तुं शक्यं यद् आप्यकर्मणः सामान्यतो नायं परिष्कारो यत् क्रियाकृतविशेषोपलम्भाभाव इत्यनेन धात्वर्थविशेषक्रियानिरूपित इति। किन्तु एकापि कापि क्रिया यत्र विशेषं नोपस्थापयति, तत्राप्यकर्मता। सैव क्रिया यत्र विशेषमुपस्थापयति चेत् तर्हि नाप्यकर्मता, किन्तु विक्रियमाणकर्मतैव। यथा—आदित्यं पश्यति, हिमवन्तं शृणोतीत्यादौ विशेषाभाववत्त्वेनाप्यकर्मत्वम्। दुर्योधनमातृकर्तृकदर्शनेन कुसुमाण्डादिफलदर्शनेन कर्मणि यत्र विशेषस्तत्र विक्रियमाणकर्मत्वम्। एकैव दर्शनक्रिया स्थलभेदेन स्वविषये विशेषमुपस्थापयति, नापि

---

१. महाभाष्यम्—३।२।१ सूत्रे।

करोतीति 'यथा दृश्यते तथा कल्प्यते' इति न्यायेन व्यवस्थापनान्न दोषलेशोऽपि। सिद्धानुगममात्रेण व्यवस्थार्थं शास्त्रजातं प्रवृत्तमिति राद्धान्तः। यथा एक एव वहधात्वर्थः सकर्मकत्वाकर्मकत्वप्रयोजकः। तथाहि—'नदी वहति' 'भारं वहति इत्यादौ।

अपरञ्चेदं समाधानम्—तादृशानां प्रयोगाणामनभिधानाद् वाक्याप्रयोगाद् दोषाभाव एव। नहि—आदित्यं पश्यतीत्यादौ शिष्टाः आदित्यदृश इत्यादि प्रयुञ्जते। तेन विज्ञायते यत्तत्र प्रसक्तेरभावेन वचनमिदं 'कर्मणि निवर्त्यमान-विक्रियमाणे' इति नारब्धव्यमिति। कर्मणां प्रविभागस्तत्रोद्द्योते वैयाकरणभूषणे च विस्तरशो द्रष्टव्यः। अत्र विचारणीयमात्रं यथा प्रतिभानं मया दर्शितम्। तथा चोक्तं भाष्ये—'अनभिधानात्। अनभिधानादेव न भविष्यति'[1] इति। तत्रैव चोद्द्योते नागेशभट्टः—'अनभिधानादिति—नित्यानां शब्दानामिदमन्वाख्यानमात्रम्। न चादित्यं पश्यतीत्याद्यर्थप्रतिपादनायादित्यदर्शादयः शब्दा लोके प्रयुज्यन्त इति शास्त्रेणापि साधुत्वेन नानुशास्यन्त इत्यर्थः।' इति।

---

१. महाभाष्यम्—३।२।१ इति सूत्रे।

चतुर्थोऽध्यायः

१७. असतु मृगतृष्णावात्

इदं भाष्यवचनं महाभाष्ये 'स्त्रियाम्'[1] इति सूत्रे प्रयुक्तं वर्तते। कथमस्य वाक्यस्यावतारः ? यतो हि कस्याञ्चिदापत्तौ सत्यां समाधानापेक्षा भवतीति रीतिः शब्दतत्त्वविदाम्। अत एव शास्त्रेषु सङ्गतिप्रदर्शनं शास्त्रकृतां प्रामाण्यं परिवहति। तत्रेदं बोध्यम्—'स्त्रियाम्'[1] इति सूत्रे हि विचारोऽयमुपक्रान्तो यत्किं नाम स्त्रीत्वम् ? यावद्धि तन्न निर्णीयते तावदस्य सूत्रस्य प्रवृत्तिरेव न स्यात्, सूत्राणां प्रवृत्तये तद्घटकपदप्रतिपाद्यतावच्छेदकनिश्चयस्य द्वारत्वात्। अत एव सूत्रार्थकरणे सूत्रेष्वघटकानामपि पदानामाक्षेपः क्रियते। येन सूत्रार्थप्रवृत्तिभूमिनिर्णये सति सूत्रप्रवृत्तौ किमपि बाधकं नोपस्थितं भवेत्। मन्ये इदमेव हृदये निधाय श्रीभट्टोजिदीक्षितेन प्रोक्तम्—'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र'[2] इति।

अतश्च हेतोः—'स्त्रियाम्' इति सूत्रमधिकारसूत्रम्। अधिकारत्वञ्च स्वदेशे साक्षाल्लक्ष्यधर्मिकसाधुत्वप्रकारकबोधाजनकत्वे सति स्वोत्तरसूत्रसम्बद्धत्वम्। एवञ्च यद्यस्य सूत्रस्यार्थनिर्णयो नभवेत्, तावत्कथमेतदेकवाक्यतापन्नानि विधिसूत्राणि स्त्रीत्वरूपार्थवाचकानां प्रत्ययानां विधाने स्युः समर्थानि ? अतः प्रथमतः किं नाम स्त्रीत्वमिति विचारो महाभाष्ये ससङ्गतिक उपक्रान्तः। तत्र 'तदभावे नपुंसकम्' स्त्रीपुंल्लिङ्गाभावे नपुंसकं लिङ्गं न्याय्यम्' इत्यनेन भाष्यग्रन्थेन खट्वावृक्षयोः स्त्रीत्वपुंस्त्वाभावे नपुंसकलिङ्गत्वमेव स्यादिति दोषापादाने प्रवृत्तमिदं भाष्यम्—'असत्तु मृगतृष्णावत्' इति।

ततश्चास्य स्ववाक्यस्य स्वयमेव व्याख्यामपि कृतवान् भगवान् महाभाष्यकारः—'असत्तु खट्वावृक्षयोर्लिङ्गं द्रष्टव्यम्। कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम् ? मृगतृष्णावत्। तद्यथा मृगास्तृषिता अपां धाराः पश्यन्ति। न च ताः सन्ति' इति।

तस्य महाभाष्यवाक्यस्यायमेवाभिप्रायो यद् यद्यपि लोकतः खट्वायाः स्त्रीत्वं वृक्षस्य च पुंस्त्वं सेद्धुं नार्हति, तथापि स्त्रीत्वपुंस्त्वव्यवहारौ समारोपितौ भविष्यतः। यथा शुक्तौ रजतं त्रिकालेऽपि न विद्यते; मृगाणां तृषितानां दृष्ट्यैव मरुप्रदेशे जलं प्रतीयते; न तु तत्रास्ति जलम्।

किञ्च—स्वावयवेष्वेवावयविनः समुत्पत्तिरिति राद्धान्तः। तथापि लोका व्यवहरन्ति—वृक्षे शाखा इति।

---

१. पा० सू०—४।१।३।

२. सिद्धान्तकौमुदीसंज्ञाप्रकरणे।

वस्तुस्थितिस्तु इयं वर्तते यत् शाखासु वृक्षः। तथापि व्यवहारो नान्यथयितुं शक्यः शक्रेणापि। अतो महाभाष्यकारो महान् लोकज्ञो ब्रवीति—'असत्तु मृगतृष्णावत्' इत्यादि।

तथा चासतोरपि स्त्रीत्वपुंस्त्वयोस्तत्र खट्वावृक्षयोरुपपत्तिर्भ्रममादाय भविष्यतीति भाष्याशयः।

भ्रमात्मकप्रत्ययमादायोपपत्तिपरकत्वमेवास्य भाष्यवाक्यस्य मन्तव्यम्। अत एवाग्रे एकमन्यदप्युदाहरणं दत्तम्—'गन्धर्वनगरं यथा'। यथा गन्धर्वनगराणि दूरतो दृश्यन्ते, उपसृत्य च नोपलभ्यन्ते। तद्वत् 'खट्वावृक्षयोरसल्लिङ्गं द्रष्टव्यम्'[1] इति।

तस्य भाष्यस्योपपत्तिप्रकारः सम्यगालोचितः कैयटाख्येन विदुषा नागेशेन च। तथाहि—

'असत्त्विति—मृगतृष्णाविषया मरुमरीचिका यथाऽसत्येन जलरूपेण प्रतिभासते, तथा खट्वावृक्षावसता स्त्रीत्वपुंस्त्वेनेत्यर्थः'[2] इति।

ततश्चोद्द्योते नागेशः 'वृक्षादावव्याप्तिवारणाय भाष्ये असत्त्विति। तत्राविद्यमानमित्यर्थः। बुद्धौ तु सदिति भावः। तदुक्तम्—

विप्र पृथिव्यादिचित्तस्थं न बहिष्ठं कदाचन।
स्वप्नभ्रममदाद्येषु सर्वैरेवानुभूयते॥

अत्र न कदाचनेत्युक्त्या सर्वः प्रपञ्चो बहिरसन्नेवेति सूत्रयति'[3] इति।

ततश्चान्यान्यप्रमाणोपस्थापने नासतोऽपि विद्यमानस्वभावस्यापि स्त्रीत्वपुंस्त्वस्य व्यवहारो नूनमुपपादयितुं शक्य इति महता प्रबन्धेन प्रतिपादित उद्द्योते प्रकृतभाष्यव्याख्यानेऽग्रिममहाभाष्यव्याख्याने च। तस्य सर्वस्यायमेव सारो यत्कल्पितेन लिङ्गेनापि व्यवहारोपपादनं शक्यं न दोषलेशोऽपीति।

१८. गुणवचनलक्षणम्

तत्र 'वोतो गुणवचनात्'[4] इति सूत्रं वर्तते उदन्ताद् गुणवाचिनः शब्दात् स्त्रीत्वे ङीष्विधायकम्। यथा—'मृद्वी, मृदुः' इत्यादि। कथं विकल्पलाभ इति चेत्, वा उतः गुणवचनादिति सूत्रविभागः। सन्धौ च वोतो गुणवचनादिति रीत्या विकल्पलाभः। अस्य सूत्रस्य तावत्प्रवृत्तिर्न शक्या यावदत्र श्रुतस्य गुणपदस्यार्थनिर्णयो न जायेत। व्याकरणशास्त्रे वर्तते काचन मर्यादा यत् क्वचिच्छब्दाः स्वरूपपराः

१. महाभाष्यम्—४।१।१ सूत्रे।
२. कैयटकृते प्रदीपे—४।१।१ सूत्रे।
३. नागेशकृते उद्द्योते—४।१।१ इति सूत्रे।
४. पा० सू०—४।१।४४।

क्वचिच्चार्थपराः। तत्र क्व तथाविभागः सुज्ञेय इति निर्णयपरं सूत्रमिदं प्रवृत्तम्—'स्वं रूपं शब्दस्याशब्दसंज्ञा'[1] इति। तेन हि सूत्रेण यत्र शब्दशास्त्रे संज्ञा विहितास्तत्र न स्वरूपपरत्वम्, किन्तु शब्दार्थपरत्वम्। यथा—'अदेङ्गुणः'[2] 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इत्यादौ न स्वरूपपरकत्वम्, किन्तु तेषां शब्दानां येऽर्थास्ते तत्र विधेयाः। यतो हि एवं ब्रवीति भगवान् पाणिनिः 'अशब्दसंज्ञा' इति।

तथा च यथा व्याकरणशास्त्रे तत्सूत्रमर्यादया सर्वत्र व्यवस्था, न च स्वरूपपरकत्वं शब्दानां येषां व्याकरणशास्त्रे संज्ञाशब्दत्वेन व्यवस्थापनात्। तथैव—'वोतो गुणवचनात्'[3] इति सूत्रे श्रुतस्य गुणपदस्य व्याकरणशास्त्र 'अदेङ्गुणः' इति सूत्रेण परिभाषितत्वाद् न स्वरूपपरकत्वम्, किन्तु अर्थपरकत्वं स्यात्। यथा च—मृद्वी इत्यादिप्रयोगानुपपत्तिः, तेषामदेङ्गुण इति सूत्रप्रसिद्धगुणरूपत्वाभावात्।

यदि च सूत्रे श्रुतस्य गुणपदस्य स्वरूपपरकत्वम्, तथापि न दोषव्युदासप्रत्याशा, तस्य गुणशब्दस्य मृदुशब्दात्मकत्वाभावात्। अपरञ्च गुणशब्देन यदि स्वरूपभूतो गुणशब्दो विवक्ष्येत, तर्हि तस्य उकारान्तत्वाभावेन सूत्राप्रवृत्तौ बाधः सुस्पष्ट एव।

इत्थञ्च कथमपि निर्बाधमेतत्सूत्रप्रवृत्तेरभावेनावश्यं गुणलक्षणं किञ्चिद् वक्तव्यम्, येन सूत्रप्रवृत्तौ सत्यां मृद्वीत्यादिप्रयोगाणां सिद्धिः स्यादतिव्याप्तिश्च न स्यादिति मनसि निधाय भगवान् महाभाष्यकारः पतञ्जलिः प्राह—'गुणवचनादित्युच्यते, को गुणो नाम ? इति ग्रन्थेन पूर्वोक्तं पूर्वपक्षमेव हृदि निधाय पूर्वपक्षं कृत्वा, ततः।

'सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः'[4] ॥

इति ग्रन्थेन गुणस्य लक्षणमुक्तम्।

ततश्चापरमपि गुणलक्षणं प्रोक्तम्। अपर आह—

उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि।
वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः ॥ इति।

तथा चैतद्भाष्यवाक्यपरिभाषितमेवार्थमादाय प्रवृत्तोऽत्र सूत्रे गुणशब्दः। तेनैव गुणरूपेणार्थेन सर्वत्र व्यवस्थायाः करणान्न क्वापि दोषलेश इति विभावनीयम्।

इत्थञ्च न मृद्वीत्यादौ दोषः न वा 'स्वंरूपं शब्दस्याशब्दसंज्ञा' इति सूत्रविरोध इति सर्वमनाविलं वेदितव्यम्।

कारिकाया अस्याः पूर्वोक्तायाश्चार्थो वर्णितो महाभाष्ये प्रदीपे उद्द्योते इति नेह तस्य प्रदर्शनं तत्रैव दर्शनेन सन्देहसन्दोहशोषणात्।

---

१. पा० सू० १।१।६८।
२. तत्रव १।१।२।
३. तत्रैव ४।१।४४।
४. महाभाष्यम्—४।१।४४ सूत्रे।

पञ्चमोऽध्यायः

१९. भावपदार्थनिर्णयः

गोत्वम्, ब्राह्मणत्वम्, घटत्वम्, पटत्वमित्यादयः साधवः शब्दा अनादिकालतः प्रसिद्धा व्याकरणशास्त्रेणानुगतरूपेण प्रसिद्धिं लभन्तां साधुत्वेनेति धिया भगवान् पाणिनिः सूत्रमिदं प्रणीतवान्—'तस्य भावस्त्वतलौ'[1] इति। तत्र भगवता पाणिनिना क्वापि स्वरचितसूत्रजाले भावपदार्थो नोपवर्णितः। भावपदार्थानिर्णये च कथं तस्य सूत्रस्य प्रवृत्तिरपि शक्यसम्भावना स्यादिति हेतोर्भगवता महाभाष्यकृता भावपदार्थनिर्णयाय कृतो यत्नः। तद्भाष्यमुपजीव्य साम्प्रतं किञ्चिदालोच्यते।

सन्ति किल भावशब्दस्यानेकेऽर्थाः। यथा हि स्वयमेव भगवान् पाणिनिर्भावपदघटितानि बहूनि सूत्राणि प्रणीतवान्। किन्तु क्वापि भावशब्दस्य कोऽर्थो विवक्षित इति नोक्तम्। तथा हि—'भावे',[2] 'यस्य च भावेन भावलक्षणम्',[3] 'तस्य भावस्त्वतलौ' इति। लोकेऽपि हि यदि कश्चित् किमपि वक्ति तदुक्तेरर्थो यदि नावगम्यते तर्हि पृच्छ्यते को भावो भवत उक्तेरिति। प्रयुञ्जते च प्रामाणिकाः किञ्चन प्रकरणं वाक्यं वा विलिख्य तदर्थस्फोरणाय--अयं भाव इत्यादिकम्।

एवमेव साहित्यशास्त्रे व्यभिचारिभावो विभावोऽनुभाव इत्यादयः प्रयोगा भवन्ति। तत्र क्व भावशब्दार्थः क इति जिज्ञासा जायते एव। अवश्यमेव विचारणीयमिदं वर्तते यल्लोकशास्त्रोभयस्थले प्रयुक्तो भावशब्द एकार्थको वा, भिन्नार्थको वेति। किं बहुना, न्यायशास्त्रे द्रव्यादयः षट्पदार्था भावशब्देन प्रोच्यन्ते, तदतिरिक्तश्च चतुर्भेदभिन्नोऽभाव एकः पदार्थः। तथा चात्रावश्यमिदं विचारणीयं यद्भावशब्दस्य को हि तत्र तत्रार्थः। तदनन्तरं निर्णीतं भविष्यति यत्—'तस्य भावस्त्वतलौ' इत्यत्र भावशब्दस्य कोऽर्थ इति। अनेनाभिप्रायेणैव महाभाष्ये कृत्वा पूर्वपक्षं पुनरुत्तरेण सिद्धान्तितम्। तथाहि—

'तस्य भाव[4] इत्यभिप्रायादिष्वतिप्रसङ्गः' तस्य भाव इत्यभिप्रायादिष्वतिप्रसङ्गो भवति। इहापि प्राप्नोति—अभिप्रायो देवदत्तस्य मोदकेषु भोजने ये नो भावास्ते नो भावाः पुत्राः पुत्रैश्चेष्टन्ते' इति।

---

१. पा० सू०—५।१।११९।

२. पा० सू०—३।३।१८।

३. पा० सू०—२।३।३७।

४. महाभाष्यम्—५।१।११९ सूत्रे।

तत्र कैयटः—'अभिप्रायादिष्विति—अनाश्रितप्रवृत्तिनिमित्तविशेषो भावशब्द-वाच्यो यावान् कश्चिदर्थस्तस्य सर्वस्य विशेषानुपादानाद् ग्रहणस्य न्याय्यत्वादतिप्रसङ्गः ये नो भावा इति—अस्माकं येऽभिप्रायास्ते नित्यमेवास्माकं भवन्तीति भावाः। 'भवतेश्चेति वक्तव्यम्'[1] इति कर्तरि णः इति।

ततश्च नागेशभट्टोऽपि तादृशेनैवाभिप्रायेण पूर्वपक्षमुपपादितान्। तथाहि—

'भावशब्दोऽभिप्रायवाची, यथा—अयं भाव इति। पदार्थमात्रेऽपि यथा—विचित्रा भावशक्तय इति। अस्ति च शृङ्गारादिस्थायिसञ्चारादिषु स्थायीभावः सञ्चारीभाव इति। कर्तृवर्जितकारके च 'यस्य भावेन भावलक्षणम्' इत्यादौ धात्वर्थवचन इति। अनेकरूपेण भावशब्दस्यानेकेष्वर्थेषु प्रयुक्तत्वस्य प्रामाणि-कत्वेन त्वेतत्प्रत्ययविधायकेऽत्र—'तस्य भावस्त्वतलौ' इति सूत्रे कमर्थमभिप्रेत्य त्वतलौ विहितौ भगवता पाणिनिनेति जिज्ञासायां यः सिद्धान्तः स प्रदर्श्यते।

तत्र प्रदर्शितेषु भिन्नभिन्नार्थेषु सत्यपि भावशब्दस्य प्रयोगे तत्र प्रामाण्यं विद्यते एव। अनेकशक्तिमतः शब्दस्य सङ्कुचितार्थकरणस्यान्याय्यत्वात्। तथापि प्रकृते प्रकारीभूतो धर्म एव भावशब्दार्थः। यथाहि लोके द्रव्यशब्दस्य मुख्यतया रूप्यकप्रभृतिष्वेवार्थेषु बाहुल्येन प्रयोगेऽपि पाणिनिना भव्यार्थेऽपि कृतः प्रयोग-स्तमर्थमभिव्यनक्त्येव। तथाहि—'द्रव्यञ्च भव्ये'[2] इति। तथैव धात्वर्थव्यापारमात्र-रूपार्थे 'भावे' इति सूत्रेण घञि प्रत्यये विहितेऽपि तथैव 'यस्य भावेन भावलक्षण-मित्यत्र क्रियारूपभावशब्दार्थग्रहणेऽपि 'तस्य भावस्त्वतलौ' इति सूत्रे भावशब्दस्य प्रवृत्तिनिमित्तमेवार्थः।

तथा चोक्तं सिद्धान्तकौमुद्यां दीक्षितेन—'प्रकृतिजन्यबोधे प्रकारीभूतो भावः'[3] इति। एतदभिप्रायकमेवोत्तरं भाष्ये प्रदर्शितम्। तथाहि—'सिद्धन्तु यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ' सिद्धमेत् कथम्? यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने तस्मिन् गुणे वक्तव्ये प्रत्ययेन भवितव्यम्, न चाभिप्रायादीनां भावाद् द्रव्ये देवदत्तशब्दो वर्तते' इति। यत्र भाष्यस्थस्य गुणशब्दस्य स्पष्टमर्थमाह कैयटः—'यस्य गुणस्येति—गुणशब्देन यावान् कश्चित् त्पराश्रयो भेदको जात्यादिरर्थः स सर्व एव गृह्यते। यस्य भावात्'[4] इत्येतावत्युच्य-माने पुत्रस्य भावात् पितरि पितृशब्दप्रवर्तनात् पितृत्वमिति पुत्रे भावशब्दः स्यात्, पुत्रत्वमिति च पितरि—इति गुणग्रहणम्। भावात्—विद्यमानादित्यर्थः। द्रव्य-

१. प्रदीपः—५।१।११९ सूत्रे।

२. पा० सू०—५।१।१०४।

३. सिद्धान्तकौमुद्यां तद्धितप्रकरणे ५।१।११९ सूत्रे ५६६ पृष्ठे।

४. प्रदीपः—५।१।११९ सूत्रे।

शब्देन विशेष्यभूतस्सत्वभावापन्नोऽर्थं उच्यते। तस्मिन् द्रव्ये शब्दनिवेशः--शब्दस्य प्रवृत्तिर्यस्य गुणस्य शब्देन वाच्यस्यावाच्यस्य वा भावात् स त्वतलाद्यभिधेय इत्यर्थः' इति।

अनेन ग्रन्थेन कैयटो भाष्याशयं स्पष्टीकृतवान्। ततश्च कैयटेः सूक्ष्मतया महाभाष्ये कृतस्योत्तरस्य विस्तारेण व्याख्यां विधाय कस्मात् शब्दात् कस्मिन् प्रकारीभूते धर्मे प्रत्ययः, कथञ्च विभागो वेदितव्य इति सम्यगाह प्रदीपे। तथाहि 'तत्र ये रूपादयः शब्दा गुणमात्रवृत्तयस्तेभ्यो गुणसमवायिनि सामान्ये भावप्रत्ययः--रूपत्वमिति। ये तु शुक्लादयो गुणगुणिवृत्तयो गुणगुणिनोरभेदोपचारान्मतुब्लोपाद्वा तेभ्यो गुणवृत्तिभ्यो गुणासमवायिनि सामान्ये भावप्रत्ययः। गुणिवृत्तिभ्यस्तु गुणे। अणुमहद्दीर्घादयो नित्यं परिमाणिनि वर्तन्ते, न तु परिमाणमात्रे। तेन तेभ्यः परिमाणे गुणे भावप्रत्ययः। षत्वं णत्वमिति भिन्नव्यक्तिसमवेते सामान्यविशेषे प्रत्ययः। गवादयो यदा जातिमात्रवाचिनः, तदा तेभ्यः शब्दस्वरूपे प्रत्ययः। तथाहि अर्थे जातौ शब्दस्वरूपमध्यस्यते ये गोशब्दः स एवार्थः इति। ततः शब्दस्वरूपमेव तत्र प्रवृत्तिनिमित्तं नान्यत्। द्रव्यवाचिभ्यस्तु गवादिभ्यो जातौ प्रत्ययः'[1] इति।

अनेन कैयटप्रोक्तेन विभागेन त्वतल्प्रत्ययविषये सर्वोऽपि संशयसमूह समाहितः। भाष्याशयश्च स्पष्टीकृत इति नातोऽधिकमपेक्ष्यतेऽत्र।

---

१. प्रदीपः—५।१।११९ सूत्रभाष्ये।

षष्ठोऽध्याय:

२०. भाषितपुंस्कपदार्थविमर्शः

तत्र षष्ठाध्याये भाषितपुंस्कशब्दस्य कोऽर्थं इति विमृश्यते। वर्तते तत्र समासे स्त्रीवाचकस्य शब्दस्य पुंवद्भावविधायकमेकं सूत्रम्--'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु'[1] इति। तस्य सूत्रस्य योऽर्थः स तु सिद्धान्तकौमुदीग्रन्थे एव दीक्षितेन प्रोक्तः। तथाहि--'भाषितपुंस्कादनूङ् ऊङोऽभावोऽस्यामिति बहुव्रीहिः। निपातनात् पञ्चम्या अलुक्, षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्यैव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदेऽन तु पूरण्यां प्रियादिषु परतः'[2] इति।

सूत्रघटकस्य भाषितपुंस्कादिति पदस्य कोऽर्थं इति विचारो महाभाष्ये कृतः। तत्र पक्षद्वयं संस्थाप्य दोषांश्च प्रदर्श्य भाषितपुंस्कस्य लक्षणमनभिधाय केवलम्--'कर्त्तव्योऽत्र यत्नः'[3] इत्येवोक्त्वा विरतो भगवान् महाभाष्यकारः। तथाहि--'भाषितपुंस्कादिति कथमिदं विज्ञायते--समानायामाकृतौ यद् भाषितपुंस्कम्, आहोस्वित् क्वचिद् यद्भाषितपुंस्कमिति ? किं चातः ? यदि विज्ञायतेसमानायामाकृतौ यद्भाषितपुंस्कमिति, गर्भिभार्यः, प्रसूतभार्यः, प्रजातभार्यः अत्र न प्राप्नोति।

अथ विज्ञायते—क्वचिद् यद्भाषितपुंस्कमिति–द्रोणीभार्यः, कुटीभार्यः, पात्रीभार्यः--अत्रापि प्राप्नोति। अस्तु तर्हि समानायामाकृतौ यद् भाषितपुंस्कमिति। कथं तर्हि गर्भिभार्यः, प्रजातभार्यः, प्रसूतभार्य इति ? कर्त्तव्योऽत्र यत्नः'[4] अनेन महता वाक्येन पक्षद्वयमुपस्थाप्य तत्र च कञ्चन सिद्धान्तमनुपस्थाप्य 'कर्त्तव्योऽत्र यत्नः' इत्येतावन्मात्रमुक्त्वा विरराम भगवान् महाभाष्यकारः। अतोऽत्रावश्यं विचारणीयं विद्यते यद्भाषितपुंस्कपदेन किं विवक्षितमिति।

अत्र सूत्रे यदि भाषितपुंस्कत्वं निर्णीतं भवति, तर्हि तेनैव लक्षणेन लक्षितं तदग्रेऽपि कार्यसाधकं भविष्यति। वर्तते हि—'तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य'[5] इति सूत्रम्। तत्रापि भाषितपुंस्कशब्दश्रवणादत्रैव प्रथमोपस्थितत्वाद् यदि निर्णीयते, तदा सर्वदोषनिरासोऽग्रिमे सूत्रेऽत्र च सूत्रकार्यसिद्धिः। तत्र समानाया-

---

१. पा० सू —६।३।३४।

२. सिद्धान्तकौमुद्यां बहुव्रीहिप्रकरणे१३४ पृष्ठे।

३. महाभाष्यम्—६।३।३४ सूत्रे।

४. महाभाष्यम्—६।३।३४ सूत्रे।

५. पा० सू०—७।१।७४।

माकृतौ भाषितपुंस्कमिति पक्षेऽपि भाष्ये दोषो दर्शितः, क्वचिद् भाषितपुंस्कमिति पक्षेऽपि दोषो दर्शितः। तर्हि कतरःपक्षो युक्तः ? किञ्च भाषितपुंस्कत्वमिति जिज्ञासा मुखरीकरोत्येव व्याकरणतत्त्वज्ञस्य समक्षं वक्तुमिति किञ्चिदत्र विमृश्यते— तत्र महाभाष्ये पक्षद्वयं दर्शयित्वा पश्चाच्च समानायामाकृतावेव भाषितपुंस्कमिति पक्षमुपस्थाप्य तत्पक्षे प्रसक्तान् दोषान् प्रदर्श्य तद्दोषवारणाय 'कर्त्तव्योऽत्र यत्नः' इत्येवोक्त्वा विरतस्य भाष्यकारस्य तात्पर्यमिदमेवावगम्यते यत्समानायामाकृतौ यद्भाषितपुंस्कमिति। तथाहि—

'अस्तु तर्हि समानायामाकृतौ यद्भाषितपुंस्कमिति। कथं तर्हि गर्भिभार्यः, प्रजातभार्यः, प्रसूतभार्य इति ? कर्त्तव्योऽत्र यत्नः[1]' इति।

अनेन महाभाष्येणेदमेव प्रतीयते यत्समानायाकृतौ यद्भाषितपुंस्कं तत्रैव पुंवद्भाव इति। अत एवाग्रे सप्तमाध्यायेऽपि भाषितपुस्कप्रकरणे–'तद्धितलुक्प्रतिषेधश्च' तद्धितलुकश्च प्रतिषेधो वक्तव्यः पीलुर्वृक्षः, पीलुफलम्, पीलुना पीलुने इति। न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् 'न वा वक्तव्यं किं कारणम् ? समानायामाकृतौ भाषितपुंस्कविज्ञानात्। समानायामाकृतौ यद्भाषितपुंस्कम्'[2] इति महाभाष्ये प्रोक्तम्। तेनेदमेव विज्ञातं भवति समानायामाकृतौ यद्भाषितपुंस्कं तस्य ग्रहणमिति।

'कर्त्तव्योऽत्र यत्नः' इति भाष्यस्य यत्तात्पर्यं तत्तत्र कैयटेन स्पष्टीकृतम्। तथाहि—कर्त्तव्योऽत्र यत्न इति। गर्भिशब्दस्य गर्भसम्बन्धः प्रवृत्तिनिमित्तं पुंसि स्त्रियां च समानम्, अवान्तरभेदस्त्वविवक्षितः। प्रसूतप्रजातशब्दयोरपत्यवत्सम्बन्धः समानं प्रवृत्तिनिमित्तमस्तीति दोषाभावः'[3] इति।

तथा च समानायामाकृतौ यद्भाषितपुंस्कमिति पक्षे समापतिताः समे दोषा वारिता इति स एव पक्षोऽत्र मान्यः। येन चोपायेन दोषवारणं यश्चोपायः 'कर्त्तव्योऽत्र यत्नः' इति वाक्येन महाभाष्ये विवक्षितः स दर्शितः कैयटेन।

भाषितपुंस्कः कः शब्दो यत्र सूत्रस्यास्य प्रवृत्तिरिति प्रश्नस्येदमेवोत्तरं यद् यः शब्दः प्रवृत्तिनिमित्तैक्ये पुमांसमभिधत्ते स शब्दः भाषितपुंस्क इति। अयमेवाभिप्रायः कैयटेनप्रकटीकृतः। तथाहि—'भाषितः पुमान् यस्मिन्नर्थे प्रवृत्तिनिमित्तलक्षणे स भाषितपुंस्क इति। प्रवृत्तिनिमित्तस्यान्यपदार्थत्वाश्रयणे तद्योगाच्च शब्दस्यापि भाषितपुंस्कत्वविज्ञाने समानायामाकृतावित्यर्थो लभ्यते। प्रत्यासत्त्या च यस्य शब्दस्य पुंवद्भावो विधीयते तेनैव पुमान् भाषित इति गृह्यते। भाषितपुंस्कग्रहणसामर्थ्याच्च। शब्दान्तरेण सर्वस्यार्थस्य भाषितपुंस्कत्वादन्ततोऽर्थशब्देनापीति व्यवच्छेद्याभावादनर्थकं भाषितपुंस्कग्रहणं स्यात्। यदा तु भाषितपुमान्

---

१. महाभाष्यम्—६।३।२४ सूत्रे।

२. महाभाष्यम्—६।३।३४ सूत्रे।

३. प्रदीपे — „ „।

येन शब्देन स भाषितपुंस्क इति शब्दोऽन्यपदार्थ आश्रीयते, तदा समानायामाकृतावित्यस्य विशेषस्य नास्ति लाभः'[1] इति।

विवृतञ्च नागेशभट्टेन स्वकृते उद्द्योते—'भाषितः पुमान् यस्य प्रवृत्तिनिमित्तस्याश्रय इति षष्ठ्यर्थे बहुव्रीहिः। समानायामिति—समाने प्रवृत्तिनिमित्ते इत्यर्थः'[2] इति।

अत एव सिद्धान्तकौमुद्याम् 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति सूत्रव्याख्याने—'प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद् वा स्याट्टादावचि'[3] इति वृत्तिर्लिखिता। कौमुदीव्याख्यां तत्त्वबोधिन्याम् 'यद्यत्र भाषितः पुमान् येन शब्देन स भाषितपुंस्कः शब्द इति विज्ञायेत, तदा पीलुने इत्यादावतिप्रसङ्गः स्यात्, अतो व्याचष्टे—प्रवृत्तिनिमित्तैक्ये इति।

अयं भावः—भाषितपुमान् यस्मिन् अर्थे तद्भाषितपुंस्कं प्रवृत्तिनिमित्तम्, तदस्यास्तीति अर्श आदित्वादच्। तेनैकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कं यच्छब्दस्वरूपं तल्लभ्यते इति'[4] इति। सिद्धान्तकौमुद्यां मूले एवं तत्त्वबोधिन्याञ्च यथालिखितं तेनैव भाषितपुंस्कं यद्भाष्ये विवक्षितं तत्स्पष्टीभवति। प्रयोजनञ्च किं भाषितपुंस्कविचारस्येत्यपि समाहितं भवति मूलकौमुदीवाक्यदर्शनेन तद्व्याख्यानभूततत्त्वबोधिनीवाक्यदर्शनेन च। तथाहि—'पीलुर्वृक्षः, तत्फलं पीलु, तस्मै पीलुने। अत्र न पुंवत्, प्रवृत्तिनिमित्तभेदात्'[5] इति। ततस्तत्त्वबोधिन्याम्—'तत्फलमिति—पीलोः फलं पीलु। 'फले लुक्'[6] इति ओरञो लुक्। प्रवृत्तिनिमित्तभेदादिति पीलुशब्दस्य हि वृक्षत्वव्याप्यजातिर्वृक्षे प्रवृत्तिनिमित्तम्, फले तु फलत्वव्याप्यजातिर्वृक्षविशेषप्रभवत्वं वा। उभयथापि पुंनपुंसक्योर्नैकं प्रवृत्तिनिमित्तमिति भावः'[7] इति।

इत्थञ्च कृते विचारे भाषितपुंस्कोऽपि शब्दो ज्ञातस्तज्ज्ञानस्य फलमपि सिद्धमित्यलमप्रसक्तानुचिन्तनेन।

———

१. प्रदीपे—६।३।३४ सूत्रे महाभाष्ये।
२. उद्द्योते— ,, ,, ।
३. सिद्धान्तकौमुद्यामजन्तपुल्लिङ्गप्रकरणे।
४. तत्त्वबोधिनी—अजन्तपुल्लिङ्गप्रकरणे—७।१।७४ सूत्रे।
५. 'सिद्धान्तकौमुदी' अजन्तपुल्लिङ्गप्रकरणे—७।१।७४ सूत्रे।
६. पा० सू०—४।३।१६३।
७. 'तत्त्वबोधिनी' अजन्तपु० प्र०—७।१।७४ सूत्रे।

सप्तमोऽध्यायः

३१. अलिङ्गे युष्मदस्मदी[1]

इदं हि वाक्यं महाभाष्ये 'साम आकम्'[2] इति सूत्रे भगवता महाभाष्यकृता प्रयुक्तम्। वाक्यस्यास्य प्रयोगे को हेतुरिति चेत्, तर्हि, सङ्गतिरत्रेत्थं विज्ञेया। तथाहि—'सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात्' सुट्प्रतिषेधो वक्तव्यः। किं कारणम्? आदेशे लोपविज्ञानात्। यः स 'शेषे लोपः'[3] आदेशे स विज्ञायते।

'न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम्' न वा सुट्प्रतिषेधो वक्तव्यः। किं कारणम्? टिलोपवचनात् आदेशे यः स शेषे लोपष्टिलोपः स वक्तव्यः। किं प्रयोजनम्? टाप्प्रतिषेधार्थम्। टाब्मा भूदिति। स तर्हि वक्तव्यः? न वा लिङ्गा-भावाट्टिलोपवचनानर्थक्यम्' न वा वक्तव्यमेतत्? किं कारणम्? लिङ्गा-भावात्'[4] इत्येवंरूपेण पक्षविपक्षोपस्थापनपूर्वकं वचनमिदं प्रयुक्तम् 'अलिङ्गे युष्मदस्मदी' इति। अनेन वचनेन युष्मदस्मदोः सर्वथैव लिङ्गाभावमुक्त्वा भगवान् महाभाष्यकारः पतञ्जलिस्तस्य हेतुत्वेन प्रयुक्तस्य 'अलिङ्गे युष्मदस्मदी' इति वचन-स्योपपत्तये ततोऽग्रे महाभाष्ये वचनमिदं प्रार्युक्त—'किं वक्तव्यमेतत्? नहि। कथमनुच्यमानं गंस्यते? नह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा'[5] इति।

तत्र प्रदर्शितेन महाभाष्यवाक्येन सिद्धान्तितमिदं यद् युष्मदस्मदोः शब्दयोः स्त्रियां पुंलिङ्गे नपुंसके वा रूपे विशेषाभावान्नहि तत्र तत्तल्लिङ्गप्रयुक्तकार्यप्रति-षेधाय वचनारम्भः कर्त्तव्य इति।

किन्तु विचारणीयमिदं भवति यत्कथमित्थं भगवान् महाभाष्यकारः प्राह यत्सामान्यतो लिङ्गत्रये एव न प्रयोगो युष्मदस्मदोरिति। यदि हि पुंलिङ्गे प्रयोगो न स्यात्, तर्हि युष्मान् इति प्रयोगसाधनाय 'तस्माच्छसो नः पुंसि'[6] इति सूत्रं कथं प्रवर्तेत? सूत्रस्य तस्य प्रवृत्तौ निमित्तं पुमभिधायकशब्दत्वमेव। अत एव स्त्रियां तत्सूत्रं नकारकरणाय न प्रवर्तते 'मतीः' इत्यादौ। तथा च युष्मदस्मदोः पुंल्लिङ्गाभावे युष्मान् अस्मान् इति प्रयोगो कथं भवेताम्? उच्यते भगवता महाभाष्यकृता 'न ह्यस्ति विशेषः पुंसि' इति।

---

१. महाभाष्यम्—७।१।३३ सूत्रे।

२. पा० सू०—७।१।३३।

३. पा० सू०—७।२।९०।

४।५. महाभाष्य—७।१।३३ सूत्रे।

६. पा० सू०—६।१।१०१।

एवमेव नपुंसके यदि न प्रयोगस्तर्हि 'अलिङ्गे युष्मदस्मदी' इति महाभाष्यीयवाक्यमेव कथं प्रयुक्तं साधु स्यात्? यतो ह्यत्र नपुंसकलिङ्गमेव दृश्यते। उच्यते च भाष्ये—'न ह्यस्ति विशेषः पुंसि नपुंसके वा' इति। अतोऽवश्यमत्र महाभाष्यतात्पर्यं वर्णनीयं येन कथमपि बाधो न भवेत्। बाधितार्थमुपस्थापयद् हि प्रमाणं न मान्यं भवति, यतो हि सर्वेषां प्रमाणानां बाधको बाधः। प्रमात्मकज्ञानजनकत्वमेव प्रमाणत्वम्। प्रमा च नाम प्रकृष्टा मा ज्ञानम्। प्रकर्षश्च तस्याबाधितार्थविषयकत्वरूप एव। अत एव शाब्दबोधे योग्यताज्ञानस्य कारणत्वम्। योग्यता च बाधाभाव एव। तथा च प्रमाणान्तरेण बाधे विद्यमाने भगवता महाभाष्यकृता कथमुक्तं वाक्यमिदं प्रमाणं स्यात्—'अलिङ्गे युष्मदस्मदी' इति प्रश्नः।

अत्रेदं समाधानम्—यद्यपि भाष्यवचनस्यास्य 'अलिङ्गे युष्मदस्मदी' इति दर्शनेन तदनन्तरं 'न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा' इति व्याख्यानतो विशेषतोऽपि नाम्ना लिङ्गनिषेधेन च प्रतिभात्येव यद् युष्मदस्मद्शब्दयोर्लिङ्गसामान्याभावः, तथापि तत्र केवलं स्त्रीलिङ्गमेव नास्ति युष्मदस्मदोरिति विज्ञेयम्।

यदि तस्य भाष्यस्यायमाशयो न मन्येत, तर्हि युष्मान् अस्मान्' इत्यादिप्रयोगेषु पुंस्त्वाभावात् 'तस्माच्छसो नः पुंसि' इति सूत्रेण नकार एव न स्यात्, पुंस्त्वाभावस्य वर्णनात्। 'अलिङ्गे युष्मदस्मदी' इति महाभाष्यवाक्यमेव विरुद्धं स्यात्। यतो हि एकत्र स्वयं भगवान् भाष्यकारो ब्रवीति 'नह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा' इति। स्वयमेव च नपुंसकलिङ्गे प्रयोगमाचष्टे—'युस्मदस्मदी' इति।

तथा च येन वाक्येन युष्मदस्मदोर्लिङ्गसामान्याभावव्यवस्था क्रियते भगवता महाभाष्यकृता 'अलिङ्गे युष्मदस्मदी' इत्यनेन तत्रैव च नपुंसकलिङ्गदर्शनेन वदतो व्याघातादप्रामाण्यमापतेद् भाष्यवचनस्य। यदा च सङ्कोचः क्रियते यद् युष्मदस्मच्छब्दयोः स्त्रीलिङ्गे प्रयोगो न भवतीति, तदा न कोऽपि दोषः, न वा भाष्यवचनव्याघात इति। अत एव शब्देन्दुशेखरे 'अलिङ्गे इति।

एवञ्च स्त्रियामनयोरवृत्तेर्न टाबिति भावः'[1] इति प्रोक्तम्।

अनयोर्द्वयोः शब्दयोः युष्मदस्मदोः स्त्रियामेवाप्रयोगाद् भट्टोजिदीक्षितेनापि स्त्रियामेवापत्तिं प्रदर्श्य महाभाष्यीयेनानेन वाक्येन 'अलिङ्गे युष्मदस्मदी' इत्यनेन टाबापत्तिर्वारितेति प्रतिभाति। तथाहि—'ननु त्वं स्त्री, अहं स्त्री' इत्यत्र 'त्वं अम्' 'अहअम्' इति स्थिते, अमि पूर्वरूपं परमपि बाधित्वान्तरङ्गत्वात् टाप् प्राप्नोति। सत्यम्, अलिङ्गे युष्मदस्मदी तेन स्त्रीत्वाभावान्नटाप्'[2] इति।

---

१. लघुशब्देन्दुशेखरे हलन्तपुल्लिङ्गप्रकरणे सदीपके—पृ० ३२५।

२. सिद्धान्तकौमुद्यां हलन्तपुंल्लिङ्गप्रकरणे ७।२।९० सूत्रे।

अनेन सर्वेण दृष्टेन प्रमाणेनेदमेव प्रमाणितं भवति यदनयोर्द्वयोः शब्दयोर्युष्मदस्मदोः स्त्रियां प्रयोगो न भवति। अर्थानां तद्वाचकानाञ्च लिङ्गत्रयवत्त्वेऽपि शब्दयोरनयोर्न निर्लिङ्गतेति सिद्धान्ते न कापि क्षतिरिति हृदयं भाष्यवचसो यदि व्याख्यायते, तदा न कोऽपि दोषः।

यदपि—'न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम्' इति भाष्यवचनात्, ततश्च तद्वाक्यव्याख्यानरूपात्—'अलिङ्गे युष्मदस्मदी'। 'न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा' इति व्याख्यानस्य 'लिङ्गाभावादित्यस्योपलक्षणतया 'शिशीलुङ्नुम्विधिभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन'[1] इति भाष्यवार्त्तिकबलेन लिङ्गवत्त्वेऽपि टापो वारणं सन्निपातपरिभाषया क्रियते। यतो हि वर्तते किल व्याकरणशास्त्रे परिभाषा एषा बहुशास्त्रेषु स्वस्वलक्ष्यानुसारेण व्यवस्थोपपादिका—'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'[2] इति। तदपि न तथामनोरमं यथा स्पष्टतया केवलं स्त्रीलिङ्गमात्रे युष्मदस्मदोः प्रयोगाभाव इति सिद्धान्तिते सति स्वारस्यमिति प्रतिभाति। अत एव महाभाष्ये 'अलिङ्गे युष्मदस्मदी' इति वचनेन सामान्यतो लिङ्गं निषिध्यापि पुनस्तद्व्याख्यानवाक्ये प्रथमतः स्त्रीलिङ्गस्यैव निषेधः कृतः 'न ह्यस्ति विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा' इत्यत्र। अतोऽत्र युष्मदस्मच्छब्दयोः स्त्रीलिङ्गे प्रयोगो न भवतीति सिद्धान्तो वेदितव्यः।

———

१. भाष्यवार्त्तिकम् ७।१।२६ सूत्रे।

२. परिभाषेन्दुशेखरे परिभाषा ८६।

अष्टमोऽध्यायः

२२. वीप्सापदार्थनिर्णयः

तत्राष्टमाध्याये वर्तते किल सूत्रमिदं 'नित्यवीप्सयोः'[1] इति। तत्र महाभाष्ये नित्यशब्दस्यार्थविचारे बहून् पक्षान् विकल्प्य आभीक्ष्ण्यरूप एवार्थो ग्राह्य इति सिद्धान्तितम्।

तथाहि—'इह कस्मान्न भवति—हिमवान्, वाडवः, पारियात्रः, समुद्रः इति। 'नित्ये द्वे भवत इति प्राप्नोति। नैष दोषः। अयं नित्यशब्दोऽस्त्येव कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा—नित्या द्यौः, नित्या पृथिवी, नित्यमाकाशमिति अस्त्याभीक्ष्ण्ये वर्तते। तद्यथा—नित्यप्रहसितो नित्यप्रजल्पित इति। तद् य आभीक्ष्ण्ये वर्तते तस्येदं ग्रहणम्'[2] इति।

अनेन हि भाष्येण नित्यशब्दस्याभीक्ष्ण्यरूपोऽर्थ इति निश्चितम्।

अत एव सूत्रस्य 'नित्यवीप्सयोः' इत्यस्य विवरणावसरे सिद्धान्तकौमुद्याम्—'आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च। पचति पचति। भुक्त्वा भुक्त्वा। वीप्सायाम्—'वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः'[3] इति। तत्र 'नित्यवीप्सयोः' इति सूत्रे पदस्येति कुतो लब्धमिति चेत्तर्हि—'पदस्य'[4] इति सूत्रादनुकर्षणं वेदितव्यम्। यद्यपि 'पदस्य' इति सूत्रात् पदस्येत्यस्यानुकर्षणं क्रियते, तर्हि 'सर्वस्य द्वे' इति सूत्रे सर्वग्रहणं व्यर्थम्, 'द्वे' इत्यस्यैवाधिकारसूत्रत्वेन सर्वकार्यनिर्वाहादिति वक्तुं शक्यम्, तथापि न तस्य सर्वस्येति पदस्य वैयर्थ्यम्, वृक्षाभ्यामित्यादौ 'स्वादिष्वसर्वनामस्थाने'[5] इति सूत्रेण प्रकृतिमात्रस्य द्वित्वं न भवेदेतदर्थम्।

यदि हि 'सर्वस्य द्वे' इति सूत्रे सर्वग्रहणं न स्यात्तर्हि प्रकृतिमात्रस्य द्विरुच्चारणं स्यात्। कृते तु 'सर्वस्य' इति ग्रहणे न दोषः, यतो हि शब्दाधिक्यादर्थाधिक्यमिति न्यायादनुकर्षणाल्लब्धे 'पदस्य' इत्यंशेऽतिप्रसक्तिनिवारके पुनः क्रियमाणस्य 'सर्वस्य' इत्यंशस्य सर्वशब्देनावयवकार्त्स्न्यस्य विवक्षितत्वपरकतया व्याख्यानाद् न प्रकृतिमात्रस्य द्विरुक्तापत्तिरिति बोध्यम्।

---

१. पा० सू०—८।१।४।

२. महाभाष्यम्—८।१।४ सूत्रे।

३. 'सिद्धान्तकौमुदी' द्विरुक्तप्रकरणे ८।१।४ सूत्रे।

४. पा० स० ८।१।१६।

५. पा० सू०—१।४।१७।

ननु प्रदर्शितामापत्तिं वारयितुं यदि 'नित्यवीप्सयोः' इत्यत्रानुकृष्टस्य पदस्य सम्बन्धः क्रियते तर्हि—

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् ,
मृदुनि मृगशरीरे तूलराशाविवाग्नेः[1] ॥

इत्यत्र वाक्यस्य द्वित्वं कृतं कथं सङ्गच्छेत ?

अपरञ्च—

शृणु हृदयरहस्यं यत्प्रशस्तं मुनीनाम्
न खलु न खलु योषित्सन्निधिः सन्निधेयः ।
हरति हि हरिणाक्षी क्षिप्रमक्षिक्षुरप्रैः
पिहितमपि तनुत्रैश्चित्तमप्युत्तमानाम्[2] ॥

इति प्रामाणिकवाक्यञ्च कथं सङ्गच्छेतेति चेन्न, तत्र प्रथमे स्थले तु बाणसन्निपात-संस्मरणमात्रसञ्जातचित्तवैकल्याधिक्यद्योतनार्थत्वात् पदस्य द्वित्वं न विहितम् । यस्याव-सरस्य वर्णनं करोति कविकुलगुरुः कालिदासः, तदा तस्य महर्षेर्व्याकरणनियमस्यापि ध्यानं नास्तीति सूच्यते पदद्वित्वाभावेनेति वर्णनपरकत्वाद्दोषाभावः । अपरञ्च छन्दोभङ्गभिया तथाकरणस्यादोषादिति समाधानेन सर्वदोषनिरासात् ।

द्वितीये श्लोकेऽपि तस्य महाविरक्तस्य ब्रह्मविदो महापुरुषस्य चैतन्यमहा-प्रभोश्चित्तं नितरां खिन्नं विषयविषज्वालाधिकरणं योषित्सङ्गं स्मृत्वेति द्योतनार्थं पदद्वित्वाभावः । छन्दोभङ्गरूपदोषापत्तिरिति समाधानं वा कार्यमित्यदाषः ।

इत्थञ्च सूचीकटाहन्यायेन नित्यपदार्थमत्रत्यं यथाभाष्यमपरप्रमाणसाक्षिकञ्च प्रदर्श्य, साम्प्रतं प्रतिज्ञातं वीप्सापदार्थं वर्णयितुं प्रयत्यते । तत्र महाभाष्ये—'अथ किमिदं वीप्सेति'[3] इति ग्रन्थेन वीप्साविषये पूर्वपक्षमुपस्थाप्य तदनन्तरं पक्षान् सम्भाव्यमानाननेकान् प्रदर्श्य यत्सिद्धान्तितं तदनुसारेण विविच्यते समालोच्यते च ।

वीप्साशब्दः कथं निष्पद्यते इति प्रथमतः संसाध्यते । 'आप्लृ' व्याप्तौ इति गण-पाठदर्शनाद् व्याप्त्यर्थकाद् विपूर्वकाद् आप्धातोरिच्छायां सनि 'सन्यङोः'[4] इति सूत्रेण द्वित्वे 'पूर्वोऽभ्यासः'[5] इति सूत्रेण पूर्वभागस्याभ्याससंज्ञायाम्—'अत्र लोपोऽभ्या-सस्य'[6] इति सूत्रेणाभ्यासस्य लोपे । 'आप्ज्ञप्यृधामीत्'[7] इति सूत्रेण सनि परे आका-

१. अभिज्ञानशाकुन्तले ।

२. चैतन्यचरितावल्याम् ।

३. पा० सू०—८।१।४ ।

४. महाभाष्यम्—६।१।९ सत्रे ।

५. पा० सू०—६।१।२ ।

६. पा० सू०—७।४।५८ ।

७. पा० सू०—७।४।५५ ।

रस्य ईत्वे 'वि' इत्युपसर्गघटकेकारेण सह दीर्घे 'वीप्स' इत्यस्मात् 'अप्रत्ययात्'[१] इति सूत्रेण 'अ' प्रत्यये टापि च सति वीप्साशब्दः सिध्यति। तथा चोक्तं सारेण महाभाष्ये—'अथ किमिदं वीप्सेति ? आप्नोतेरयं विपूर्वादिच्छायामर्थे सन् विधीयते'[२] इति।

तत्र च महाभाष्यवाक्यविवरणविधायकेन श्रीमता पदवाक्यप्रमाणज्ञेनाचार्येण कैयटेन विवृतम्। तथाहि--'आप्नोतेरिति—व्युत्पत्तिप्रदर्शनेन क्रियाविशेषे योगरूढिर्वीप्साशब्द इति दर्शयति' इति।

तत्र चोद्द्योते—'क्रियाविशेषेति व्याप्तिप्रतिपिपादयिषारूपे योगरूढिर्यस्येत्यर्थः'[३] इति।

ननु यदि वीप्साशब्दो योगरूढिसामर्थ्येन व्याप्तिप्रतिपिपादयिषारूपार्थपरतया व्याख्यायतेतदा महाभाष्यग्रन्थविरोधः। तथाहि—तत्र महाभाष्ये—'अथ किमिदं वीप्सेति ? आप्नोतेरयं विपूर्वादिच्छायामर्थे सन् विधीयते' इति ग्रन्थेन वीप्साशब्दार्थं निरुच्य ततः—'यद्येवम्—चिकीर्षति जिहीर्षतीत्यत्रापि प्राप्नोति' इति ग्रन्थेन कृतः पूर्वपक्षः। 'नैष दोषः। नेवं विज्ञायते वीप्सायामभिधेयायामिति। कथं तर्हि ? कर्तृविशेषणमेतत्। वीप्सतीति वीप्सः। वीप्सश्चेत् कर्ता भवतीति। कः पुनः वीप्सार्थः ? अनवयवाभिधानं वीप्सार्थः। अनवयवेन द्रव्याणामभिधानमेव वीप्सार्थः' इति ग्रन्थेन कृतं तत्रत्यं समाधानञ्च व्यर्थं स्यात्। यतो हि 'प्रसक्तं हि प्रतिषिध्यते' इति न्यायेन चिकीर्षतीत्यादौ प्राप्तेरभावेन तद्वारणप्रयासवैयर्थ्यापत्तेः। योगरूढिस्वीकारेण यत्र व्याप्तिरूपसम्बन्धस्य प्रतिपादनेच्छा स्यात्, तत्रैव द्वित्वम् न तु तथा चिकीर्षतीत्यादाविति चेन्न, तस्य भाष्यस्य योगरूढिसामर्थ्यमनभिध्यायैव प्रवृत्तत्वेन शङ्कासमाधानदलयोर्निर्दलत्वापत्त्यभावात्।

तथा चोक्तं तत्र कैयटेन—'अपरो रूढित्वमबुद्ध्वाह—यद्येवमिति'[४] इति।

तत्र महाभाष्ये 'कः पुनर्वीप्सार्थः ? अनवयवाभिधानं वीप्सार्थः। अनवयवेन द्रव्याणामभिधानमेव वीप्सार्थः'[५] इति यदुक्तं तदेव हृदयं वीप्साविचारस्य।

तस्य भाष्यस्य योऽभिप्रायस्तम्, तन्निभोऽपरश्च यत्पूर्वाचार्याणामभिप्रायो वीप्साविषये तल्लक्षणविषये च तत्सर्वमेव कैयटेन स्पष्टीकृतं स्वरचिते प्रदीपे। स च प्रदीपग्रन्थः सन्दर्श्यते तत्त्वाधिगमाय। तथाहि—

---

१. पा० स०—३।३।१०२।
२. प्रदीपे—८।१।४ सूत्रे महाभाष्ये।
३. उद्द्योते—८।१।५ सूत्रे महाभाष्ये।
४. प्रदीपः—८।१।४ सूत्रे महाभाष्ये।
५. महाभाष्यम्—८।१।४ सूत्रे।

'कः पुनर्वीप्सार्थ इति—अर्थः प्रयोजनम्। एवंभूताया वीप्साया उपादाने किं प्रयोजनमिति प्रश्नः। अनवयवाभिधानमिति—साकल्येन द्रव्याणां क्रियागुणसम्बन्धप्रतिपादनं वीप्साफलमित्यर्थः'[१] इति।

ततश्च महाभाष्ये—'अनवयवाभिधानं वीप्सार्थ इति चेत्, जात्याख्यायां द्विर्वचनप्रसङ्गः' अनवयवाभिधानं वीप्सार्थ इति चेत्, जात्याख्यायां द्विर्वचनं प्राप्नोति। व्रीहिर्यव' इति। 'न वैकार्थत्वाज्जातेः' न चैष दोषः। किं कारणम्? एकार्थो हि जातिः। एकमर्थप्रत्याययिष्यामीति जातिशब्दः प्रयुज्यते। अनेकार्थाश्रयत्वाच्च वीप्सायाः। अनेकार्थाश्रया च पुनर्वीप्सा। अनेकमर्थंसंप्रत्याययिष्यामीति वीप्सा प्रयुज्यते। एकार्थत्वाज्जातेरनेकार्थाश्रयत्वाच्च वीप्साया जात्याख्यायां द्विर्वचनं न भविष्यति'[२] इति।

तत्र च कैयटः 'जात्याख्यायामिति—जातौ पदार्थे साकल्येन द्रव्याणां प्रतिपत्तिर्भवति। यथा—ब्राह्मणो न हन्तव्य इति सर्वब्राह्मणहननप्रतिषेधः प्रतीयते। न चैकार्थत्वादिति—यदि व्यक्तिव्यतिरिक्ता जातिः, अथ त्यक्तभेदहेतवो व्यक्तय एव जातिः, उभयथा भेदाभावाज्जातिलक्षण एकोऽर्थः। तत्र यथा अग्न्यानयने चोदितेऽचोदितमपि पात्रं नान्तरीयकत्वादग्न्यानयनस्योपादीयते, तथा जातौ चोदितायां द्रव्यं क्रियाङ्गभावेन प्रतीयते, ततोऽनवयवाभिधानस्य भेदविषयत्वाज्जात्यभिधाने तदभावाद्—द्विर्वचनाभावः। एकशेषेऽप्यस्मिन् वने शोभना वृक्षा इति कतिपयानामपि वृक्षाणां शोभनत्वेन प्रयोगदर्शनादनवयवाभिधानाभावाद् द्विर्वचनाभावः। ग्रामो ग्रामो रमणीय इति तूक्ते निःशेषग्रामगतरमणीयत्वप्रतीतिः। तथाऽस्मिन् वने वृक्षो वृक्षः शोभन इत्युक्ते सर्वेषामेव वृक्षाणां प्रत्येकं सन्निवेशनिरपेक्षदर्शनीयत्वयोगप्रतीतिः। 'सर्वे वृक्षाः शोभनाः' इत्यत्र तु सर्वनाम्ना वीप्साया द्योतनाद् द्विर्वचनाभावः। इह तु सर्वे माषा ब्रह्मणेभ्यो दत्ता इति यद्यपि कस्मैचित् त्रयो दत्ताः, कस्मैचित् पञ्च, तथापि प्रयोगाद् वीप्साऽभावः। यदा त्वेकैको दत्तस्तदा वीप्सासम्भवान्माषो माषो दत्त इति द्विर्वचनं भवति।

वृत्तिकारैरप्युक्तम्—'नानावचनानामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा' इति। नानाभूतमर्थद्रव्यलक्षणं ये शब्दा ब्रुवन्ति, तेषां यान्यधिकरणान्यभिधेयानि तेषां सहाविवक्षितानां पृथक्सङ्ख्यायुक्तानां प्रत्येकं क्रियागुणयुक्तानां प्रयोक्तुः क्रियया गुणेन वा युगपदेककाला व्याप्तुमिच्छा सा वीप्सा। तत्र नानावाचिशब्देन जातिशब्दनिराशः। युगपद्ग्रहणेन क्रमविवक्षायां द्विर्वचननिरासः। यथाऽस्मिन् वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमेण शोभनत्वप्रतिपादनं बहूनपि शब्दान् प्रयुङ्क्ते'[३] इति।

---

१. प्रदीपः—८।१।४ सूत्रे महाभाष्ये।

२. महाभाष्यम्—८।१।४ सूत्रे।

३. प्रदीपः—८।१।४ सूत्रे महाभाष्ये।

अनेन प्रदीपे कैयटप्रदर्शितमार्गेण वीप्साया यादृशं स्वरूपम्, द्रव्याणां क्रियागुणाभ्यां सह युगपत्सम्बन्धः स सर्वथैव स्पष्टीभवति।

अत एव वीप्सापदार्थस्य कैयटोक्तस्य पूर्वाचार्यमतस्य कैयटेन व्याख्यातस्य यादृशं स्वरूपं तदुपदर्शयता नागेशभट्टेन उद्द्योते प्रदर्शितम्। तथाहि--'युगपदिति--क्रियागुणाभ्यां युगपद्व्यापकत्वेनान्वयं बोधयितुमिच्छेत्यर्थः'[१] इति।

तथा चात्रेदमेवाकूतं निगूढं तत्त्वं यद्वीप्सा नाम द्रव्याणां क्रियागुणाभ्यां युगपद् व्यापकत्वेनान्वयं बोधयितुमिच्छेति।

इत्थं महाभाष्यं तन्मूलककैयटप्रणीतप्रदीपं नागेशभट्टप्रणीतमुद्द्योतञ्चाधारीकृत्य कृते विचारे वीप्सायाः स्वरूपं तस्या लक्ष्ये समन्वयश्च सम्यगुपपद्यते। नातः परमत्रापेक्ष्यते किञ्चिद्वक्तुम्।

श्रीमन्तो ज्ञानेन्द्रसरस्वतीस्वामिनस्तु स्वरचितायां वैयाकरणसिद्धान्तकौमुदीव्याख्यायां तत्त्वबोधिन्यां वीप्सायाः स्वरूपविषये सूत्रस्वरूपविषये च यत्किञ्चित् तत्त्वं बोधितवन्तस्तत्प्रकाशीक्रियते। तथाहि--

'वीप्सायामिति--व्याप्तुमिच्छा वीप्सा। व्याप्तिप्रतिपिपादयिषेति यावत्। सा च प्रयोक्तुर्धर्मं आबाधवत्। गत गत इत्युक्ते प्रियस्य चिरगमनादिनापीडितो वाक्यं प्रयुङ्क्ते इति यथा प्रतीयते, तथा वृक्षं वृक्षं सिञ्चतीत्यादावपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात्। शाब्दबोधविषयस्तु व्याप्तिरेव। तथा च 'नित्यव्याप्त्योः' इत्येव सूत्रयितुं शक्यम्। व्याप्तिरिह कात्स्न्यर्यम्। तच्चाधिकारिकम्। 'सर्वे ब्राह्मणा आमन्त्रिताः' इत्यादौ यथा। नहि जगतीतले विद्यमाना ब्राह्मणाः सर्वेऽपि केनचिदामन्त्रयितुं शक्यन्ते इति स्वग्रामस्थस्वसजातीयब्राह्मणपरतया तत्र सङ्कोचो यद्यभ्युपेयते, तर्हि अत्रापि सकलवृक्षसेचनसामर्थ्यं कस्यापि मनुष्यस्य नास्तीति यत्र वाटिकादौ वृक्षसेचनार्थमधिकारस्तद्वाटिकास्थवृक्षाणामेव कात्स्न्यं वृक्षं वृक्षं सिञ्चतीत्यादौ गम्यते इत्यभ्युपेयम्। यत्र च संकोचे कारणं नास्ति, तत्रासंकोच इष्ट एव 'जातौ जातौ निधनमुपैति' इति यथा। न चैवं वृक्षम् वृक्षमित्यादौ बहुवचनप्रसङ्गः, बहूनां मानेऽपि बहुत्वसंख्यायास्तत्राभानात्। प्रत्येकनिष्ठमेकत्वमेव हि तत्र भासते इत्यादिमनोरमायां स्थितम्'[२] इति।

तत्त्वबोधिनीव्याख्याया अस्याः पर्यालोचनेन वीत्सायाः स्वरूपं यथाभाष्यं यथाकैयटोक्तमभिव्यक्ततरं भवति। तत्र या काचन बहुवचनत्वापत्तिप्रभृतिशङ्का सापि समाहिता।

---

१. उद्द्योतः--८।१।४ सूत्रे महाभाष्ये।

२. पा० सू०--८।१।४ सूत्रे तत्त्वबोधिन्याम्।

यत्तु तत्त्वबोधिन्याम्—'नित्यवीप्सयोः'[1] इति सूत्रस्थाने 'नित्यव्याप्त्योः' इति सूत्रस्वरूपं कर्तुं शक्यमिति स्वमतं प्रदर्शितम्, तत्तु यथाश्रुतन्यासे विपरिवर्तने च मात्रादिगौरवाभावेन कथञ्चिन्मान्यं भवेदपि, किन्तु सनर्थेच्छायास्तत्राप्रतीत्या कथं तथा सूत्रयितुमौचित्यप्रदर्शनं शक्यमपि स्यात् ? तत्र यापि! तत्र 'नित्यव्याप्त्योः' इत्येवमाकारे सूत्रे कर्तव्ये युक्तिः प्रदर्शिता यद् न सनर्थ इच्छा शाब्दबोधे भासते, किन्तु व्याप्तिरेव शाब्दबोधविषय इति। तस्य यद्यपि उपपत्तिरपि कर्तुं शक्या यद् अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तमितिन्यायात् प्रयोगे सनि सत्यपि न स शाब्दबोधे भासते, यथा—'कर्तुरीप्सिततमं[2] कर्म' इति सूत्रे 'क्तस्य[3] च वर्तमाने' इति सूत्रेण वर्तमानकालरूपार्थे षष्ठ्यां जातायां सत्यामपि वर्तमानकालः शाब्दबोधे न भासते। भासिते सति घटं करिष्यति घटं कृतवानित्यादौ कर्मसंज्ञानापत्तेः। तथा चोक्तं शब्देन्दुशेखरे—'क्तप्रत्ययोपात्तवर्तमानत्वंतु न विवक्षितम्। तेन कटं कृतवान् करिष्यतीत्यादिसिद्धिः'[4] इति।

तथा च तत्त्वबोधिनीव्याख्या यद्यपि सनर्थाविवक्षया लापयितुं शक्या, तथापि विवक्षैव किल शब्दप्रवृत्तौ हेतुरिति सर्वलोकसिद्धो विषयः। किञ्चिद्धि विवक्षुः शब्दानुच्चारयति। अत एव वक्तुस्तात्पर्यज्ञानमपि शाब्दबोधे कारणमिति स्वीकृतम्। विवक्षैव तात्पर्यम्। तथा च सनर्थस्य भानमावश्यकम्। तेन व्याप्तौ स्वरूपतः सत्यामपि न द्विरुच्चारणम्, किन्तु यदि वक्तुस्तेन तात्पर्येण विवक्षा भवेत्, तदा सूत्रमिदं प्रवर्तते 'नित्यवीप्सयोः' इति।

अत एव कैयटेन वृत्तिकारमतसिद्धं वीप्साया यत्स्वरूपं दर्शितं प्रदीपे तत्र प्रयोक्तुर्व्याप्तुमिच्छेति वाक्ये प्रयोक्तुरिति पदं निवेशितम्। तथाहि—नानावचनानामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छावीप्सा' इति। स्वयमेव च तत्त्वबोधिनीकृद्भिः—'व्याप्तुमिच्छावीप्सा। व्याप्तिप्रतिपिपादयिषेति यावत्। सा च प्रयोक्तुधर्म' इत्यादिग्रन्थेन प्रतिपादितम्। अतो यथान्यासमेव सूत्रमस्तु।

किञ्च, सूत्राणां पारायणेन धर्मश्रवणाद् यदाऽदृष्टार्थसूत्रस्य स्वरूपं तथैवाङ्गीकर्तव्यम्, तथानुपूर्वीकसूत्राणां पारायणेनैव धर्मोत्पतेः। तर्हि दृष्टमपि प्रयोक्तुरिच्छारूपार्थलाभरूपं फलं यदा सम्भवति, तदा व्यर्थमत्राग्रहः।

---

१. पा० सू०—८।१।४।
२. ,, —१।४।४९।
३. ,, —२।३।६७।
४. शब्देन्दुशेखरे कारकप्रकरणे सदीपके ४३८ पृष्ठे।

अपरञ्च—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं षडङ्गेषु व्याकरणम्'[1] इति महाभाष्यवाक्येन व्याकरणस्य वेदाङ्गत्वम्। तदपि व्याकरणं प्रधानमङ्गम्। प्राधान्यञ्चोपपादितं कैयटेन व्याकरणशास्त्रस्य प्रदीपे। तथाहि—'प्रधानञ्चेति पदपदार्थावगमस्य व्याकरणनिमित्तत्वात्तन्मूलत्वाद्वाक्यवाक्यार्थावसायस्येति भावः'[2] इति।

तथा च यथा वेदानामानुपूर्वीपरिवर्तनं कर्तुं न शक्यते तथा सति तस्यावेदत्वापत्तेः। यथानुपूर्वीके एव वेदत्वात्। तथैव वेदाङ्गस्य व्याकरणशास्त्रस्य स्थितिः। आनुपूर्वीपरिवर्तने वेदाङ्गत्वानापत्तेः। तथा च यथाश्रुतमेव सूत्रमस्तु, 'नित्यवीप्सयोः' इति वीप्सा च सम्यगुपपन्ना प्रमाणैरिति शम्।

१. महाभाष्यम्—पस्पशा० शब्दकौस्तुभे १९ पृष्ठे।

२. प्रदीपः—तत्रैव।

सहायकग्रन्थसूची

व्याकरणग्रन्थाः

१. अमरकोषः, अमरसिंहः।

२. अष्टाध्यायीसूत्रपाठः, पाणिनिः, चौखम्बा संस्कृत सीरिज, वा० १९५० ई०।

३. अष्टाध्यायीभाष्यम्, स्वामीदयानन्दः।

४. परिभाषेन्दुशेखरः, नागेशभट्टः, चौखम्बासंस्कृतसीरिज, वाराणसी १९४१ ई०।

५. पाणिनीयव्याकरणे प्रमाणसमीक्षा, डा० रामप्रसादत्रिपाठी, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी १९७२ ई०।

६. प्रौढमनोरमा, श्रीभट्टोजिदीक्षितः, कन्हैयालाल ब्रजभूषणदास, कचौड़ी गली, वाराणसी, द्वितीयसंस्करणम्, १९९७ वि०।

७. लघुशब्देन्दुशेखरः, श्रीनागेशभट्टः, भार्गवपुस्तकालय, वा० १९९२ वि०।

८. " " व्या० श्रीनित्यानन्दपर्वतीयः, चौखम्बा संस्कृतसीरिज, वाराणसी १९५४ ई०।

९. वाक्यपदीयं ब्रह्मकाण्डम्, श्रीभर्तृहरिः, श्रीव्रजेन्द्रमुद्रणयन्त्रालयः १९८३ वि०।

१०. वाक्यपदीयं वाक्यकाण्डम्, श्रीभर्तृहरिः, व्या० श्रीरघुनाथशर्मा, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी, १९६८ ई०।

११. वैयाकरणभूषणसारः, श्रीकौण्डभट्टः, व्या० श्रीगोपालशास्त्री, टि० श्रीरामप्रसादत्रिपाठी, श्रीहरिकृष्णनिबन्धभवनम्, वाराणसी १९५२ ई०।

१२. व्याकरणसिद्धान्तलघुमञ्जूषा, प्रथमो भागः, श्रीनागेशभट्टः, चौखम्बासंस्कृतसीरिज आफिस, वाराणसी १९८५ वि०।

१३. वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्), श्रीभट्टोजिदीक्षितः, निर्णयसागरप्रेस, बम्बई १८९४ ई०।

१४. वैयाकरणसिद्धान्तकौमुदी (१-४ भागः), श्रीभट्टोजिदीक्षितः, व्या० श्रीवासुदेवदीक्षितज्ञानेन्द्रसरस्वतीमहोदयाः, मोतीलालबनारसीदास।

१५. व्याकरणमहाभाष्यम् (नवाह्निकम्), महर्षिः पतञ्जलिः, व्या० गुरुप्रसादशास्त्री, श्रीराजस्थानसंस्कृतकालेज, १९९६ वि० ।

१६. व्याकरणमहाभाष्यम्, महर्षिः पतञ्जलिः, टीकाकारः श्रीरुद्रधरझाः, चौखम्बासंस्कृतसीरिज आफिस, वाराणसी १९५४ ई० ।

१७. व्याकरणटीकाकाराः कैयटनागेशवैद्यनाथपायगुण्डेरघुनाथशर्माणः, निर्णयसागरप्रेस, बम्बई ।

१८. ,, (१–३ खण्डः) टीकाकाराः–कैयटनागेशवैद्यनाथपायगुण्डे महोदयाः, मोतीलालबनारसीदास, वाराणसी, प्रथमसंस्करणम् ।

न्यायग्रन्थाः

१९. शास्त्रार्थरत्नावली ।

२०. व्युपत्तिवादः, गदाधरभट्टाचार्यः, व्या० जयदेवमिश्रः, प्रयागविश्वविद्यालयः १९४० ई० ।

२१. ,, ,, व्या० बच्चाझाः, निर्णयसागर प्रेस, बम्बई १९११ ई० ।

२२. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननभट्टाचार्यः, व्या० महादेवभट्टरामरुद्रभट्टाचार्यराजेश्वरशास्त्रीद्रविडमहोदयाः, चौखम्बासंस्कृतसीरिज आफिस, बनारस १९५१ ई० ।

२३. न्यायदर्शनम्, गौतमः, भारतीयविद्याप्रकाशनम्, वाराणसी, १९६६ ई० ।

वेदान्तग्रन्थाः

२४. अद्वैतसिद्धिः, प० मधुसूदनसरस्वती, व्या० गौडब्रह्मानन्दः, निर्णयसागरप्रेस, बम्बई, १९३७ ई० ।

२५. अध्यात्मरामायणान्तर्गता रामगीता, व्या० स्वामी रामाश्रयः, परमहंसराय चौधरी, गाजीपुर, १९३७ ई० ।

२६. ईशादिदशोपनिषद्, भा० शङ्कराचार्यः, टि० गोविन्दशास्त्रीगाडगिलः, वाणीविलाससंस्कृतपुस्तकालयः, वाराणसी, १९०८ ई० ।

२७. खण्डनखण्डखाद्यम्, श्रीहर्षमिश्रः, व्या० शङ्करचैतन्यभारतीस्वामी, श्रीबालानन्दस्वामी, बनारस, प्र० ख० १९३८ ई०, द्वि० ख० १९४० ई० ।

२८. ,, ,, व्या० शङ्करमिश्रः, श्रीभगवतीप्रसाद मेडिकलहाल, द्वि० सं०, १९१७ ई० ।

२९. छान्दोग्योपनिषद्, भा० शङ्कराचार्यः, गीताप्रेस, गोरखपुर, २०१३ वि० ।

३०. ब्रह्मसूत्रम्, शाङ्करभाष्यम्, व्या० वाचस्पतिमिश्रामलानन्दाप्पयदीक्षितमहोदयौ, निर्णयसागरप्रेस, बम्बई ।

३१. बृहदारण्यकोपनिषद्, शाङ्करभाष्यम्, गीताप्रेस, गोरखपुर १९९९ वि० ।

३२. भगवद्गीता, शाङ्करभाष्यम्, गीताप्रेस, गोरखपुर १९९१ वि० ।

३३. माण्डूक्योपनिषद्, शाङ्करभाष्यम्, टि० श्रीविष्णुदेवानन्दः ।

३४. वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रः, व्या० श्रीशिवदत्तः, चौखम्बा संस्कृत सीरिज आफिस, बनारस, १९५४ ई० ।

३५. ,, ,, व्या० अमरदासरामकृष्णाध्वरिमहोदयौ, क्षेमराजश्रीकृष्णदास, बम्बई १९८५ वि० ।

३६. वेदान्तकल्पलतिका, प० मधुसूदनसरस्वती, व्या० आर० डी० करमरकरः, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना १९६२ ई० ।

३७. श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर, २०१८ वि० ।

३८. संक्षेपशारीरकम्, सर्वज्ञात्ममुनिः, व्या० पुरुषोत्तममिश्रः, प्रथमखण्डः १९१३ ई०, द्वितीयखण्ड १९१८ ई० ।

३९. सिद्धान्तबिन्दुः, प० मधुसूदनसरस्वती, व्या० गौडब्रह्मानन्दनारायणतीर्थः, चौखम्बा संस्कृत सीरिज, बनारस, १९२८ ई० ।

मीमांसाग्रन्थाः

४०. भाट्टदीपिका, श्रीखण्डदेवः, व्या० श्रीशम्भुभट्टः, निर्णयसागर प्रेस, बम्बई, १९२२ ई० ।

४१. मीमांसासूत्रम्, महर्षिजैमिनिः ।

योगग्रन्थाः

४२. पातञ्जलयोगदर्शनम्, महर्षिः पतञ्जलिः, भा० महर्षिव्यासः, व्या०-वाचस्पतिमिश्रः, भारतीयविद्याप्रकाशन, वाराणसी १९६३ ई० ।

४३. पातञ्जलयोगदर्शनम्, वृ० राजर्षिभोजदेवः, दी फाइन आर्ट प्रिंटिंग, अजमेर, १९३२ ई० ।

४४. योगसूत्रम्, महर्षिः पतञ्जलिः ।

साहित्यग्रन्थाः

४५. अभिज्ञानशाकुन्तलम्, कालिदासः ।

४६. नैषधमहाकाव्यम्, श्रीहर्षः ।

४७. साहित्यदर्पणः, श्रीविश्वनाथः, व्या० श्रीरामचरणतर्कवागीशदुर्गाप्रसादद्विवेदीमहोदयौ, निर्णयसागरप्रेस, बम्बई १९३६ ई० ।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्याभिनवप्रकाशनानि

क्रमसं० ग्रन्थनाम	मूल्यम्
१. शुक्लयजुर्वेदकाण्वसंहिता [उत्तरविंशतिः] संहितेयं सायणभाष्यसहिता प्रकाशिता । विविधैः खलु गवेषणाप्रधानैः भूमिका-टिप्पण-परिशिष्टैश्च समलङ्कृता–	२२–००
२. वाक्यपदीयम् [वृत्तिसमुद्देशात्मकम्] ग्रन्थरत्नमिदं हेलाराजप्रणीतया प्रकाशव्याख्यया तथा च प० श्रीरघुनाथशर्मविरचितया अम्बाकर्त्रीटीकया विभूषितं वर्तते–	६५–५०
३. वैयाकरणसिद्धान्तमञ्जूषा [नागेशभट्टविरचिता] ग्रन्थोऽयं सर्वप्रथमं सम्पादककृतविविधैः सारभूतैः टिप्पण-भूमिका-परिशिष्टैश्च समलङ्कृत्य प्रकाशितो वर्तते–	३६–००
४. प्रक्रियाकौमुदी [भागद्वयात्मिका] रामचन्द्राचार्यप्रणीतेयं प्रक्रियाकौमुदी सर्वप्रथमं श्रीकृष्णाचार्यप्रणीतया प्रकाशव्याख्यया विभूष्य प्रकाशिता । तृतीयो भागोऽपि अचिरादेव प्राकाश्यमेष्यतीति–	प्रथमभागस्य –५२–५० द्वितीयभागस्य–६७–००
५. सरलत्रिकोणमितिः [ज्यौतिषम्] म० म० श्रीबापूदेवशास्त्रिविरचितोऽयं ग्रन्थो गवेषणापूर्णैः उपोद्घात-परिशिष्टैश्च सम्भूष्य प्रकाशितः–	२९–००
६. प्रशस्तपादभाष्यम् [प्रशस्तपादाचार्यप्रणीतम्] न्यायदर्शनस्य प्राणभूतमिदं ग्रन्थरत्नं श्रीधरभट्टकृतन्यायकन्दलीव्याख्यया, श्रीदुर्गाधरझाकृतहिन्दीभाषानुवादेन च समलङ्कृत्य द्वितीयवारं प्रकाशितम्–	६८–००
७. रसगङ्गाधरः [पण्डितराजजगन्नाथविरचितः] साहित्यशास्त्रग्रन्थोऽयं प० श्रीकेदारनाथ–ओझा प्रणीतया रसचन्द्रिकाख्यया व्याख्यया विभूष्य प्रकाशितः । द्वितीयभागोऽपि किलाचिरादेव प्राकाश्यमेष्यतीति–	२२–००
८. नानकचन्द्रोदयमहाकाव्यम् [श्रीदेवराजशर्मविरचितम्] गुरुनानकचरितमुपजीव्यत्वेनाङ्गीकृत्य प्रतिभावता देवराजशर्मणा महाकविना विरचितमिदं महाकाव्यं कामं संस्कृतवाङ्मयस्य श्रियं समेधयति–	७४–००
९. रसिकजीवनम् [पण्डितश्रीरामानन्दपतित्रिपाठिविरचितम्] नायिकाभेदनिरूपणपरमिदं काव्यं सर्वप्रथमं विस्तृतगवेषणात्मिकया प्रस्तावनया समलङ्कृत्य प्रकाशितम्–	७–००

प्रकाशकः-निदेशकः,अनुसन्धानसंस्थानस्य, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-२२१००२.